न्यायाचार्य-न्यायविशारद-महामहोपाध्याय-

श्रीमद्यशोविजयगणि-

विरचितं

अनेकान्तव्यवस्थाप्रकरणम् ।

[प्रथमो विभागः]

तदुपरि

व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न-

श्रीमद्विजयलावण्यसूरिविरचित-

तत्त्वबोधिनी-

विवृतिः समन्वितम् ।

श्रीविजयनेमिसूरिग्रन्थमालारत्नम्-३४

आशैशवशीलशालिने **श्रीनेमीश्वराय** नमो नमः ॥

न्यायाचार्य-न्यायविशारद-महामहोपाध्याय-
श्रीमद्यशोविजयगणिमणि-
विरचितम्-

अनेकान्तव्यवस्थाप्रकरणम् ।

[अपरनाम जैनतर्कपरिभाषा]

तस्य चायं प्रथमो विभागः

तपोगच्छाधिपति-शासनसम्राट्-सूरिचक्रचक्रवर्ति-
जगद्गुरु-श्रीविजयनेमिसूरीश्वर-पट्टालङ्कारेण
व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेन
श्रीविजयलावण्यसूरिणा विरचिता

तत्त्वबोधिनी विवृतिः ।

वि. सं. २००८] वीर नि. सं. २४७८ [नेमि सं. ३

—: સહાયક :—

રાજનગરનિવાસી શ્રેષ્ઠી **જેશિંગભાઇ ઉગરચંદ** શાહે પોતાના સ્વ૦ પિતાશ્રીના શ્રેયોર્થે આ 'અનેકાંત-વ્યવસ્થાપ્રકરણ' અપરનામ 'જૈનતર્ક પરિભાષા' જેવા દર્શનપ્રભાવક ગ્રંથના પ્રકાશનકાર્યમાં જે સહાયતા સમર્પણ કરી છે, તે પ્રશંસનીય અને જ્ઞાનરસિક શ્રીમંતોને ખરેખર અનુકરણીય છે.

પ્રકાશકઃ—

શ્રેષ્ઠી ઈશ્વરદાસ મૂલચંદ

ઠે. શ્રીવિજયલાવણ્યસૂરીશ્વરજ્ઞાનમન્દિર

બોટાદ, [સૌરાષ્ટ્ર]

મુદ્રકઃ—

ગોવિંદલાલ જગશીભાઇ : શારદા મુદ્રણાલય

જુમ્મા મસ્જિદ સામે, **અમદાવાદ**

પ્રાપ્તિસ્થાનમ્ ।

શ્રીવિજયલાવણ્યસૂરીશ્વરજ્ઞાનમન્દિર

બોટાદ [સૌરાષ્ટ્ર]

શ્રીસરસ્વતી પુસ્તકભંડાર

'હાથીખાના' રતનપોળ,

અમદાવાદ

શાસનસમ્રાટ્ તપોગચ્છાધિપતિ-નરપતિતતિ પ્રતિબોધક-સૂરિચક્રચક્રવર્ત્તિ-શ્રીકદમ્બ
ગિરિ-પ્રમુખ-તીર્થોદ્ધારક-પ્રૌઢપ્રભાવશાલિ-પરમપૂજ્ય બાલબ્રહ્મચારિ-

આચાર્ય મહારાજાધિરાજ શ્રીમદ્‌વિજયનેમિસૂરીશ્વરજી મહારાજ સાહેબ.

જન્મ : વિ. સં. ૧૯૨૨ કાર્તિક શુદ્ધ ૧ શુક્રવાર મહુવા (સૌરાષ્ટ્ર)

ગણિપદ : વિ. સ. ૧૯૬૦ કાર્તિક વદ ૭. વળા-વલ્લભીપુર
પંન્યાસપદ : વિ. સ. ૧૯૬૦ માગશર શુદ ૩. વળા-વલ્લભીપુર
સૂરિપદ : વિ. સ. ૧૯૬૪ જ્યેષ્ઠ શુદ ૫. ભાવનગર
સ્વર્ગવાસ : વિ. સ. ૨૦૦૫ આસો વદ અમાસ. શુક્રવાર મહુવા.

卐 પ્રકાશકીય નિવેદન 卐

જૈનદર્શનના મૂળાધાર અનેકાંતવાદનો બોધ આપતો '**અનેકાંતવ્યવસ્થા** પ્રકરણ' (અપરનામ 'જૈનતર્કપરિભાષા') નામનો આ ગ્રંથ છે. તેના રચયિતા પૂજ્યપાદ જૈન ન્યાયના પ્રાણદાતા ન્યાયવિશારદ–ન્યાયાચાર્ય મહામહોપાધ્યાય **શ્રીમદ્ યશોવિજયજી** મહારાજ છે. તેમના જીવન અને કવન વિષે કેટલાયે વિદ્વાનોએ ખૂબ પ્રકાશ પાડયો છે, તેથી એ સંબંધે વધુ લખવાની અહીં જરૂરત નથી. છતાં તેમના પ્રખર પાંડિત્ય વિષે એટલું કહેવું જરૂરી છે કે, તેમણે કાશીના સમર્થ બ્રાહ્મણ પંડિતો સાથેના શાસ્ત્રાર્થમાં જીત મેળવી હતી, જેથી એ જ પંડિતમંડલીએ 'ન્યાયવિશારદ'ની પદવીથી તેમને વિભૂષિત કર્યા હતા અને ન્યાયશાસ્ત્રના એકસો ગ્રંથો બનાવ્યા બાદ 'ન્યાયાચાર્ય'ના બિરુદથી તેમને નવાજ્યા હતા. તેમની કસાયેલી વિદ્વદ્‌ભોગ્ય કલમથી લખાયેલો આ ગ્રંથ આધુનિક પ્રજાને ટીકા વિના સાંગોપાંગ સમજવો મુશ્કેલ હતો, તેથી સ્વ. પૂજ્યપાદ શાસનસમ્રાટ્ સર્વતન્ત્રસ્વતંત્ર સૂરિચક્રવર્તી આચાર્ય મહારાજાધિરાજ **શ્રીમદ્ વિજયનેમિસૂરીશ્વરજી** મહારાજશ્રીના પટ્ટાલંકાર વ્યાકરણવાચસ્પતિ, શાસ્ત્રવિશારદ, કવિરત્ન પૂજ્ય આચાર્યવર્ય **શ્રીમદ્ વિજયલાવણ્યસૂરીશ્વરજી** મહારાજશ્રીએ વિદ્વત્સમાજ તેમજ તત્ત્વજિજ્ઞાસુ તત્ત્વરસિક જીવોને તત્ત્વનો બોધ

આપનારી '**तत्त्वबोधिनी**' નામની વિવૃતિ-ટીકા રચી, આ અનેકાંતવ્યવસ્થા ગ્રંથને સુગમ બનાવ્યો છે; તેને અમે સહર્ષ પ્રકાશિત કરીએ છીએ. મૂળ ગ્રંથ અપ્રતિમ પ્રતિભાથી લખાયેલો છે એ વાત તો નિઃશંક છે, પરંતુ ટીકાકાર મહર્ષિએ પણ તેના ઉપર તલસ્પર્શી વિશદ તત્ત્વબોધિની વિવૃતિ રચી, પોતાની પ્રકાંડ વિદ્વત્તા વ્યક્ત કરી છે, જે સાદ્યન્ત સૂક્ષ્મેક્ષિકાથી નિરીક્ષણ કરનારને સહેજે ખ્યાલમાં આવે તેમ છે; એટલું જ નહિ પણ 'तत्त्वबोधिनी' વિવૃતિની સાર્થકતાનો સાક્ષાત્કાર થયા વિના રહેતો નથી. જૈન ન્યાયસાહિત્યની સૃષ્ટિમાં આ ગ્રંથ અનેરો પ્રકાશ ફેંકે એવો છે, આ ગ્રંથરત્નમાં કયાં કયાં વિષયરત્નો કયાં કયાં છે, તેની જિજ્ઞાસાવાળા મહાનુભાવોને વિશાળકાય વિષયાનુક્રમણિકાનું નિરીક્ષણ કરવાની અમે ભલામણ કરીએ છીએ, જેથી ગ્રંથ અને તેની ટીકાની મહત્તાનો ખરો ખ્યાલ આવી શકે. પૂજ્ય વિદ્વાન **મુનિશ્રી અહિંસાપ્રભવિજયજી** મહારાજે પ્રેસકોપી મેળવવા વગેરેમાં જે પરિશ્રમ ઉઠાવ્યો છે તે ધન્યવાદને પાત્ર છે.

આ 'અનેકાંતવ્યવસ્થાપ્રકરણ' અપરનામ 'જૈનતર્ક પરિભાષા' ગ્રંથ કાશી (બનારસ) ગવર્નમેંટ સંસ્કૃત કૉલેજમાં **वेदान्तदर्शन**ની પરીક્ષા આપનારાઓ માટે પણ પાઠ્યપુસ્તક તરીકે દાખલ થયેલો છે, એ જ આ ગ્રંથની મહત્તા ને ઉપયોગિતા પ્રદર્શિત કરે છે.

શા.ઊગરચંદ ત્રીભોવનદાસ

॥ तत्त्वबोधिनीविवृतिविभूषितस्याऽनेकान्तव्यवस्था-प्रकरणस्य पूर्वार्धस्य विषयानुक्रमणिका ॥

अङ्काः	विषयाः	पृ.	पं.
१	टी. मङ्गलाचरणे श्रीवीरस्तुतिः।	१	९
२	श्रीहेमचन्द्रसूरि-नमस्कारः।	१	१३
३	श्रीमद्यशोविजय-वाचकस्मरणम्।	१	१७
४	गुरुवरश्रीनेमिसूरीश्वरप्रणामः।	२	१
५	वृत्तिकर्तुः स्वकृत्यभीष्टाशंसनम्।	२	५
६	मूलकर्तुः वीतरागनमस्कारलक्षणं मङ्गलम्; तत्रानेकान्तव्यवस्थाश्रमविधिप्रतिज्ञा।	२	९
७	टी. मङ्गलमवतार्य तत्रत्यस्तुत्यवीतरागविशेषणानामैन्द्रस्तोमनतमित्यादीनां प्रयोजनोपदर्शनम्।	२	११
८	नमस्कारान्तरमनेकान्तव्यवस्थाश्रमविधानस्य प्रयोजनं दर्शितम्।	२	२४
९	अनेकान्तव्यवस्थाया-	३	९

अङ्काः	विषयाः	पृ.	पं.
	मिति ग्रन्थनामोट्टङ्केनानुबन्धचतुष्टयोल्लासः।		
१०	द्वितीयतृतीयपद्यावतरणम्।	३	२४
११	जिनमतस्याति[गम्भीर]त्वाद्यावेदकं द्वितीयपद्यम्।	४	१
१२	प्रमाणनयसाधितस्याऽनेकान्तस्य वस्तुधर्मस्याज्ञानतो दूषणमयुक्तमिति द्वितीयपद्येनावेदितम्।	४	३
१३	अनेकान्तस्वरूपोपवर्णनम्, तद्घटकतत्त्वविभजनपरं तत्त्वार्थसूत्रम्।	४	५
१४	अनेकान्ताक्षेप–तत्प्रतिविधानयोः सत्त्वासत्त्वादीनां परस्परविरोधपरस्पराविरोधसमर्थनेन स्फुटीकरणम्।	४	१५
१५	"औपशमिकादिभावान्विताः जीवाः" इत्यत्रादिपदग्राह्याणां क्षायिकक्षयोपशमिकौदयिकपारिणामिकभावानां यथा-	५	१५

अङ्काः	विषयाः	पृ.	पं.
	यथं स्वस्वसङ्ख्यानामसङ्कीर्त्तनपुरस्सरं प्रपञ्चनम्।		
१६	जीवाजीवादिसप्तविधतत्त्वानां क्रमेण लक्षणप्रतिपादनम्।	६	१
१७	"अजीवाः– धर्मादयः चत्वारोऽस्तिकायाः" इत्यत्रादिपदग्राह्या अधर्माकाशपुद्गलाः, तेषां चतुर्णामपि अस्तिकायानामस्तिकायत्वोपवर्णनं तत्त्वार्थसूत्रोक्तप्रतिनियतलक्षणप्रदर्शनं च।	६	१०
१८	आश्रवस्य जीवाजीवाभ्यामन्यत्वे तत्त्वार्थसूत्रवृत्तिकृदुपदर्शितयुक्तीनामुद्घट्टनम्।	७	५
१९	आश्रवलक्षणं पर्य्यवसितं दर्शितम्।	७	१३
२०	"बन्धो नाम–आश्रवात्तकर्मण आत्मना सह प्रकृत्यादिविशेषतः संयोगः" इत्यत्रादिपदेन स्थित्यनुभावप्रदेशानां ग्रहणतः चातुर्विध्यमस्य निष्टङ्कितम्।	७	१४
२१	"आश्रवनिरोधहेतुः संवरः" इत्यत्राश्रवनिरोधहेतूनां गुप्त्यादीनामाश्रवनिरोधलक्षणसंवरहेतुत्वात् संवरत्वमुक्तम्।	७	१७
२२	"विपाकात् तपसो वा कर्मणां शाटो निर्ज्जरा" इत्यत्र षड्विधबाह्यतपसः षड्विधान्तरतपसः चोपदर्शनम्।	७	२०
२३	"सर्वोपाधिविशुद्धस्वात्मलाभो मोक्षः" इति मोक्षलक्षणस्य स्पष्टीकरणम्।	७	२४
२४	सूत्रे तत्त्वमिति भाष्ये तत्त्वं तत्त्वानीत्येकवचनबहुवचनान्तता, तदेतद्द्वयं यथा सङ्गतं तथोपदर्शनं तत्त्वार्थटीकाकृतः।	८	१
२५	टीकायामेतत् स्पष्टीकरणम्।	८	९
२६	ग्रन्थकारः तत्पशब्दस्य	९	१

अङ्काः	विषयाः	पृ.	पं.
	एकवचन–बहुवचनान्ततायां प्रकारान्तरमुपवर्णितवान्, टीकाकारसमाधानं च दूषितवान्।		
२७	पुण्यपापयोरधिक्योः सद्भावात् कथं सप्तैव तत्त्वानि ? इति प्रश्नः तत्प्रतिविधानं च।	१०	५
२८	उक्तसमाधानदिशा आश्रवादीनां पञ्चानामपि जीवाजीवयोरन्तर्भावात् जीवाजीवास्तित्वम्; ? इत्येव वक्तव्यम् ? इति प्रश्नः तत्राश्रवादीनां जीवाजीवाभिन्नत्वव्यवस्थापनं च।	१०	७
२९	पुण्यपापाधिक्यप्रयुक्तप्रकृततत्त्वविभागानुपपत्त्याशङ्कितुः तत्समाधातुश्च क्रमेण आशयोपवर्णनम्।	१०	१५
३०	आश्रवादीनां जीवाजीवयोः अन्तर्भावात् प्रकृतविभागानुपपत्तिरिति प्रश्नयितुः वक्तव्योपदर्शनम्।	१०	१९
३१	आश्रवादीनां जीवाजीवयोः अन्तर्भावेऽपि पृथगभिधानस्याप्रयोजनोपदर्शनेन उक्तप्रश्नप्रतिविधानम्।	११	५
३२	मुक्तितत्त्वस्य पृथगभिधाने युक्तिरुक्ता।	११	८
३३	हेयोपादेययोः संसारमोक्षयोः प्रत्येकमेकैककारणाभिधानेनापि चरितार्थत्वे कारणद्वयाभिधानमनर्थकम् ? इति-प्रश्नप्रतिविधानम्।	१२	२
३४	संसारमोक्षकारणद्वयाभिधाने समाधातुः अभिप्रायः आवेदितः।	१२	१२
३५	उपादेयतया मोक्षस्येव हेयतया संसारस्यापि पृथगभिधानं कर्थमित्याशङ्काया अपाकरणम्।	१३	१
३६	मोक्षहेतुसंवरनिर्जरोभयस्याभिधाने संसारस्य बन्धरूपतया तत्त्वेनाभिधाने तत्कारणाश्रवस्याभिधाने युक्तिः सम्प्रदायातिक्रम-	१४	१

अङ्काः	विषयाः	पृ.	पं.
	परिहारश्च ।		
३७	संवर-निर्जरयोः मोक्षे दण्डचक्रादिन्यायेन हेतुता, न तु तृणारणि-मणिन्यायेनेति मूलस्य स्फुटीकरणम् ।	१४	४
३८	सर्वत्र विभागवाक्ये इत्यारभ्य अयुक्तोऽयं विभागः इत्यन्तेन प्रकृततत्त्वविभागस्या-युक्तत्वमिति वैशेषिकाणां प्रश्नः ।	१५	५
३९	टी. निरुक्तप्रश्नस्य विस्तरतः प्रपञ्चनम्, तत्र बहवो विषयाः चर्चिताः ।	१६	१
४०	निरुक्तवैशेषिकप्रश्न-प्रतिविधानम् तदुप-पादनं च वृत्तौ ।	२९	१
४१	जातिसाङ्कर्यस्यैव जातिबाधकत्वं, न तु साङ्कर्यसामान्यस्येति प्रश्नो-त्तराभ्यां निर्णीतम् ।	३१	८
४२	विभाजकसाङ्कर्येऽपि विभागस्य युक्तत्वादेव प्रमाणप्रमेयेत्यादि	३२	१
४३	उपाधेरुपाधि-जाति-साङ्कर्येऽप्युपाधित्वं निराबाधमिति सदृष्टान्तं दर्शितम् ।	३२	५
४४	प्रमाणप्रमेय-संशये-त्यादि संपूर्णगौतमसूत्र-मुपादाय पदार्थविभा-जकानां साङ्कर्येऽपि यथा विभागस्य नासङ्गततत्वं तथोपपत्त्या आशयो दर्शितः ।	३२	२३
४५	न्यूनत्वव्यवच्छेदा-भिप्रायाभावेऽपि न्यून-त्वव्यवच्छेदफलकत्वं विभागस्य स्यादेवेत्या-शङ्कोद्भाव्यापाकृता ?	३३	१
४६	उक्ताशङ्काग्रन्थार्थौ वृत्तौ सम्यगुपपादितः ।	३३	६
४७	जीवाजीवादितत्त्वं विभागवाक्ये "अदग्ध-दहनन्यायेन यावद-प्राप्तं तावद् विधेयम्" इति यस्य तत्त्वाधिगमः तं प्रति जीवाधन्यतमस्य	३५	४
	गौतमीयपदार्थविभा-गोपपत्तिः ।		

अङ्काः	विषयाः	पृ.	पं.
	विधेयत्वम्, जीवधन्यतमाधिगन्तारं प्रति तत्त्वस्य, तदुभयानभिज्ञं प्रति तदुभयस्य विधेयत्वमिति।		
४८	विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदकत्वं व्युत्पत्तिसिद्धमित्यभ्युपगन्तृमतमुपदर्शितम्।	३६	५
४९	सर्वत्र श्रुतादध्याहृतादेवकारादेव न्यूनाधिकसङ्ख्याव्यवच्छेद इति मतम्, दर्शितम्।	३७	१
५०	"जीवाजीवादीनि सप्तैव तत्त्वानि" इत्युपसंहारः।	३७	३
५१	पुण्यपापयोरपि पृथक्निरूपणावश्यकत्वे नव तत्त्वानीति जैनसिद्धान्तः।	३७	३
५२	जीवाजीवादितत्त्वेषु भावाभावादिशबलैकरूपत्वस्य व्यवस्थापनम्।	३८	४
५३	एकपरिणामस्याप्युभयाकारप्रतीतिजनकैकशक्तिमत्त्वात् प्रत्ययद्वैविध्यमित्याशङ्का निराकृता।	३९	१
५४	सदंशस्य परानपेक्षप्रतीतिविषयत्वात् तात्त्विकत्वम्, असदंशस्य विपर्ययाद् अतात्त्विकत्वमिति विनिगमकाशङ्का व्युदस्ता।	३९	३
५५	केषाञ्चिद्भावानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं केषाञ्चिद् न, इत्यत्र स्वभावविशेष एव शरणमिति सदंशासदंशयोरपि तथैव परापेक्षत्वतद्विपर्ययौ नैतावता तुच्छातुच्छत्वे।	४०	४
५६	शुद्धं भूतलमेव घटाभावव्यवहारविषय इति नाभावांशोऽधिक इति मीमांसकमतस्य खण्डनम्।	४१	६
५७	अत्रैव नैयायिकजैनमतयोः विशेष आवेदितः।	४३	१
५८	अभावस्य भावात् अभेदैकान्ते दोष उद्-	४३	१

अङ्काः	विषयाः	पृ.	पं.
	भावितः ।		
५९	अभावाभाववतोरेकान्तभेदस्य नैयायिकसम्मतस्य खण्डनम् ।	४३	५
६०	अभावतद्वतोः तादात्म्यातिरिक्तसम्बन्धस्य नैयायिकैकदेशिसम्मतस्य खण्डनम् ।	४४	२
६१	भावांशोऽपि न स्वलक्षणातिरिक्तः सकलव्यक्तिवृत्तितिर्यक्सामान्यात्मेति बौद्धमतस्य खण्डनम् ।	४५	१
६२	टी. सामान्यवृत्तिप्रकारखण्डस्य बौद्धोक्तस्य उपादानम् ।	४५	१८
६३	ऊर्द्ध्वतासामान्यात्मा भावो नास्तीति बौद्धमतस्य खण्डनम् ।	४६	३
६४	ऊर्द्ध्वतासामान्यलक्षणप्रतिपादकं देवसूरिसूत्रम् ।	४६	१६
६५	ज्ञानाकार एव भावो न तु बाह्यः ? इति बौद्धविशेषयोगाचारमतखण्डनम्, तत्र निश्चितव्यवहारोपपादकवासनाविशेषाभ्युपगमेऽपि तत्प्रबोधको बाह्योऽभ्युपेयः ।	४७	३
६६	जीवाजीवादीनां विचित्रभावाभावादिशबलैकरूपत्वमुपसंहृतम् ।	४७	७
६७	सर्वस्यानेकान्तत्वेन सर्वरूपत्वेऽपि प्रतिनियतधर्मग्रहस्य मतिज्ञानोपयोगनयविशेषजश्रुतज्ञानोपयोगत उपपत्तिः ।	४८	१
६८	श्रुतज्ञानोपयोगे नयविशेषजत्वप्रयोजनोपदर्शनम् ।	४८	३
६९	प्रतिनियतधर्मग्रहहेतूनां नयानां स्वरूपसङ्ख्याज्ञानार्थं प्रश्नः, तदुत्तरं नैगम-सङ्ग्रह-व्यवहारर्जुसूत्रशब्द-समभिरूढैवम्भूताः सप्तनया इति ।	५०	१
७०	देवसूरिसूत्राभिप्रेतं नयलक्षणम्, ततसूत्रस्य नयदुर्नयभेदप्रतिपत्तये "रत्नप्रभसूरेः"	५०	४

अङ्काः	विषयाः	पृ.	पं.
	व्याख्यानमुल्लिखितम्।		
७१	नयस्य प्रमाणतो भेदो "रत्नप्रभसूरि"निर्णीत उपदर्शितः।	५०	२१
७२	नैगमनयस्य निरुक्ति-लभ्यं लक्षणम्।	५१	१
७३	नयविषयस्य न वस्तुत्वम्? नापि अवस्तुत्वम्? किन्तु वस्त्वंशत्वम्, तथा नयस्य न प्रमाणत्वम्? नापि मिथ्याज्ञानत्वमिति "रत्नप्रभसूरि"ग्रन्थनिर्णीतम्।	५१	३
७४	नैगमनिरुक्तौ वर्णविपर्ययात् वर्णलोपाद् वा नैगमशब्दः साधितः।	५२	१
७५	नैगमनयस्य महासामान्यादिषु त्रिषु क्रमेण सर्वाविशुद्ध-विशुद्धाविशुद्ध-विशुद्धभेदाः प्रस्थकादुदाहरणेषु सिद्धान्तसिद्धेषु भाविताः।	५२	४
७६	वर्णागमादिभेदेन निरुक्तस्य पञ्चविधत्वं	५२	९
७७	फलितं नैगमलक्षणं तत्र दोषासम्पृक्तत्वम्।	५२	१४
७८	प्रदेश-प्रस्थक वस-त्युदाहरणभावनाश्लोका नयोपदेशगताः दर्शिताः।	५३	१
७९	प्रकारान्तरेण नैगमादिनयेषु अविशुद्धादित्रय भेदा दर्शिताः।	५४	१
९०	नैगमनये सामान्य-विशेषयोः परस्परं भेदः, एवम्-आश्रयात् सामान्यस्य भेदः, अन्त्यविशेषस्य परमाणुभ्यो भेदश्च।	५५	१
८१	द्रव्यार्थिकविषय-सामान्यपर्यायार्थिक-विषयविशेषोभयाभ्युपगन्तृत्वेन नैगमनयस्य जैनसाधुवत् सम्यग्दृष्टित्वमाशङ्कितम्।	५३	३
८२	एकान्ततः परस्पर-भिन्नसामान्यविशेषोभयाभ्युपगन्तृत्वेन नैगमस्य कणादवद् मिथ्यादृष्टित्वमेव,	५७	१

अङ्काः	विषयाः	पृ.	पं.
	तत्र महाभाष्यसम्मतिः सम्मतिसम्मतिश्च, सम्मतिगाथाव्याख्यानं च।		
८३	नैगमस्य द्रव्यपर्यायोभयावगाहित्वेन द्रव्यार्थिकपर्यायार्थिकोभयान्तःपातित्वेन पर्यायार्थिकाधिक्ये सति सिद्धसेनस्य अन्त्याः चत्वारः पर्यायार्थिकाः इति जिनभद्रगणिक्षमाश्रमणस्य अन्त्याः त्रयः पर्यायार्थिका इति च विभागवचनव्याघात इति प्रश्नः।	५८	१
८४	अत्र द्रव्यांशे प्राधान्येनास्य द्रव्यार्थिकत्वमेवेत्याशङ्कायाः क्वचित् पर्यायांशेऽपि अस्य प्राधान्योपदर्शनेन व्युदासः।	५८	६
८५	उक्तप्रश्नप्रतिविधानम्, तत्र नैगमस्य द्रव्यांशाप्रतिक्षेपेण द्रव्यार्थिकत्वानिर्णये "जीवो गुणप्रतिपन्नः" इत्यादि विशेषावश्यकगाथा, तद्व्याख्यानं च दर्शितम्; टीकायां तत्स्पष्टीकरणम्।	६०	२
८६	द्रव्यनये द्रव्यस्य तथ्यत्वं गुणस्य औपचारिकत्वमित्यत्र विशेषावश्यकभाष्यगाथे दर्शिते।	६३	३
८७	कल्पना द्विविधा-पारमार्थिकी काल्पनिकी च, तयोः उपवर्णनम्।	६३	२०
८८	पर्यायार्थिकमतसमर्थिके विशेषावश्यकभाष्यगाथे, तद्विवरणं च।	६४	२
८९	पर्यायार्थिकमते पर्यायेभ्योऽर्थान्तरभूतस्य द्रव्यस्याभावे युक्तिनिकरोपदर्शनम्।	६५	१
९०	द्रव्यनास्तित्वसाधकानुमानेषु धर्म्यादयो विकल्पसिद्धाः, विकल्पश्च असत्ख्यातिरूपः, अन्यथाख्यातिरूपो वा, द्वितीयकल्पे द्रव्यस्य सत्त्वप्रसक्तिराशङ्क्याऽपाकृता।	६६	१
९१	पर्यायार्थिकमतसमर्थिका-विशेषावश्यकभाष्य-	६८	५

अङ्काः	विषयाः	पृ.	पं.
	गाथा तद्विवरणं च।		
९२	निर्युक्तिकृदभिमतोपदर्शिके विशेषावश्यकभाष्यगाथे।	७०	७
९३	परस्परमत्यन्तभिन्नौ द्रव्यपर्यायौ? पर्यायार्थिकोऽभ्युपगच्छतीत्येवं परतया निरुक्तिवचनव्याख्यातुरेकदेशिनो व्याख्यानोपदर्शकं विशेषावश्यकभाष्यगाथात्रयम् तद्व्याख्यानं च।	७१	५
९४	एतद्व्याख्यानापाकरणपूर्वकं स्वव्याख्यानसमर्थकं विशेषावश्यकभाष्यगाथाषट्कं, तद्विवरणं च।	७४	२
९५	एकदेशिन आशङ्का, तत्र प्रत्येकमुभयोः एकैकविषयत्वेऽपि उभयोः मेलनेन भाष्यकृन्मते यत्प्रयोजनं तत्प्रत्येकम्, उभयोः उभयविषयत्वेऽपि स्वमते सम्भवति, स्वमते "जीवो	७८	४
	गुणप्रतिपन्नः" इति निर्युक्तिप्रतीके गुणाभिन्न इत्यर्थे साम्मुख्यम्, न तु भाष्यकृन्मते इत्याद्युपदर्शितम्।		
९६	उक्ताशङ्काप्रतिविधानम्।	८१	३
९७	पुनरेकदेशिन आशङ्का तदुपदर्शिका विशेषावश्यकभाष्यगाथा, तद्विवरणं च।	८४	१
९८	उक्ताशङ्काप्रतिविधानपरे विशेषावश्यकभाष्यगाथे, तद्व्याख्यानं च।	८५	६
९९	गुणसन्तानयोः भेदकल्पनैव न सम्भवतीति जीवस्य सामायिकगुण इति षष्ठी न भेदार्थिका किन्तु अभेदार्थिका? इत्याशङ्कयागुण-ततसन्तानयोर्भेदनिबन्धनवैधर्म्योपदर्शिका भाष्यगाथा अवतार्य व्याख्याता।	८८	२
१००	द्रव्यार्थिकनयाभिप्रायोपदर्शिके विशेषावश्यक-	९०	१४

अङ्काः	विषयाः	पृ.	पं.
	भाष्यगाथे, तद्व्याख्यानं च तत्र द्रव्यातिरिक्तगुणप्रतिक्षेपः।		
१०१	द्रव्यार्थिकसमर्थनपरा विशेषावश्यकनिर्युक्तिगाथा, तद्विवरणं च।	९२	२
१०२	द्रव्यान्यसत्त्वाभावत् पर्यायाणामसत्त्वे द्रव्यस्यापि ततोऽसत्त्वं स्यादित्याशङ्कायाः अपाकरणम्।	९४	८
१०३	असत्पर्यायांशे तदवगाहिकेवलज्ञानस्य भ्रान्तत्वमाशङ्क्य प्रतिक्षिप्तम्।	९५	२
१०४	केवलिना केवलज्ञानोपयोगे प्राधान्येनाविषयीक्रियमाणत्वमेव पर्यायाणामसत्त्वं द्रव्यार्थिकमते, निश्चयतः केवलज्ञानस्यैव प्रामाण्यम्, छाद्मस्थिकज्ञानानांव्यवहारत एव प्रामाण्याभिमान इति।	९६	१
१०५	निरुक्तनिर्युक्तिगाथार्थविवरणात्मिका भाष्यगाथा तद्व्याख्यानं च।	९७	२
१०६	कुण्डलादिपर्यायासत्त्वेऽपि तद्व्यपदेशोपपादिका विशेषावश्यकभाष्यगाथा, तद्व्याख्यानं च।	९७	१०
१०७	स्वप्रदेशत्वविभिन्नदेशोपलम्भापत्तितो गुणानां द्रव्यभिन्नत्वप्रतिक्षेपिका विशेषावश्यकभाष्यगाथा तद्व्याख्यानं च।	९८	६
१०८	उपचारतः पर्यायाभ्युपगमे सिद्धसाध्यताप्रतिपादिका विशेषावश्यकभाष्यगाथा तद्व्याख्यानं च।	९९	७
१०९	पर्यायस्य कल्पितत्वेऽपि न शशशृङ्गादेः स इत्युपदर्शिका भाष्यगाथा तद्व्याख्यानं च।	१००	१०
११०	द्रव्यांशाप्रतिक्षेपित्वाद् नैगमस्य द्रव्यार्थिकत्वं निगमितम्।	१०२	३
१११	शुद्धपर्यायाभ्युपगन्तृत्वं पर्यायार्थिकत्वनिमित्तं नैगमे नास्तीति न	१०३	१

अङ्काः	विषयाः	पृ.	पं.
	पर्यायार्थिकः सः ।		
११२	नैगमस्य शुद्धाशुद्ध- द्रव्यास्तिकत्वेन सङ्ग्रह- व्यवहारयोरेवान्तर्भावो न पृथग्नयतया सम्मतौ स दर्शितः इत्यवगतये द्रव्यार्थिकविभजनपरा सम्मतिगाथा दर्शिता तद्व्याख्या च ।	१०४	४
११३	पृथक्तया नैगमनया- भ्युपगन्तारः प्रतिपत्तृ- भेदाद् नानावद् अभि- प्रायमामनन्ति ।	१०५	९
११४	एके "पुरुष एवेदं सर्वम्" इत्यादि स्वी- कुर्वते ।	१०५	१०
११५	तदाश्रित्य ऊर्ध्वमूल- मित्यादिगीतावचनम्, टी. तद्व्याख्यानं च ।	१०६	१
११६	पुरुषाभ्युपगमेऽपि अनेकाभ्युपगमप्रकारः प्रतिपत्तृणाम् ।	१०६	१
११७	अपरैस्तु प्रधानकारणकं जगदभ्युपगतम्, तत्रापि कैश्चित् सेश्वर- निरीश्वरभेदोऽभ्युपगतः ।	१०५	५
११८	अन्यैस्तु परमाणुप्रभवं जगदभ्युपगतं तत्रा- प्यनेकेऽभ्युपगमप्रकाराः ।	१०८	१
११९	कैश्चित् स्वभाव-काल- यदृच्छादिवादाः समा- श्रिताः, टीकायां तदुप- पादनम् ।	१०८	४
१२०	कारणं नित्यं कार्यम- नित्यमिति द्वैताभ्युप- गमः केषाञ्चित् ।	१०९	२
१२१	अनित्यमपि कार्यं नियमेन स्वरूपमपि त्यजति नवेति भेदाभ्युपगमः ।	१०९	३
१२२	एवं मूर्त्तेरेव मूर्त्तमार- भ्यते इत्याद्यनेकधा निगमार्थः सम्मतिवृत्तौ ।		
१२३	एतन्नयावलम्बनप्रवृत्त- वैशेषिकदर्शनमते द्रव्यादयः षट्पदार्थाः द्रव्यादीनां षण्णां क्रमेण विभजनम् ।	११०	३
१२४	द्रव्यत्वजातिसाधक- प्रमाणोपदर्शनम् ।	११०	२०
१२५	नवैव द्रव्याणीत्येव- कारेण तमः सुवर्णा-	१११	१९

अङ्काः	विषयाः	पृ.	पं.
	दीनां द्रव्यान्तरत्व-व्यवच्छेदः, तत्र सोऽ-न्तर्भावः सुवर्णस्य तेजस्यन्तर्भावः, तत्सा-धकमनुमानं दर्शितम्।		
१२६	पृथिव्या लक्षणं पृथि-वीत्वजातिसाधनं, पाषाणादौ गन्धसाधनम्।	१११	२३
१२७	जलस्य लक्षणं जलत्व-जातिसाधनम्।	११२	४
१२८	तेजसो लक्षणं तेजस्त्व-जातिसाधनम्।	११२	७
१२९	वायोर्लक्षणं वायुत्व-जातिसाधनम्।	११२	१०
१३०	आकाशस्य लक्षणम्, आकाशत्वं न जातिः, व्यक्त्यभेदात्।	११२	१४
१३१	कालस्य लक्षणं कालत्वं न जातिः।	११२	१६
१३२	दिशोर्लक्षणं दित्त्वं न जातिः।	११२	२२
१३३	आत्मसामान्यलक्षणम् जीवेश्वरयोर्लक्षणं च।	११२	२७
१३४	जीवा अनेके विभवश्च ईश्वरस्त्वेको विभुर्जगत-कर्त्ता च।	११३	९
१३५	मनसो लक्षणं मनस्त्व-जातिसद्भावश्च।	११३	२
१३६	गुणस्य लक्षणं गुणत्व-जातिसाधनं च।		
१३७	रूपादयः चतुर्विंशति-गुणाः, तेषां प्रत्येकं लक्षणानि।	११३	१०
१३८	कर्मसामान्यलक्षणं कर्मत्वजातिसिद्धिश्च।	११४	१२
१३९	उत्क्षेपणादिकं पञ्च-विधं कर्म, भ्रमणादिकं गमनेऽन्तर्भूतम्।	११४	१४
१४०	उत्क्षेपणादीनां लक्ष-णानि।	११४	१७
१४१	सामान्यस्य लक्षणं परापरादित्रिविध-सामान्यस्य निदर्शन-द्वारोपपादनम्।	११४	२२
१४२	विशेषाणामानन्त्यं सम-वायस्येकत्वं च दर्शि-तम्।	११५	१
१४३	उक्तदिशा प्रपञ्चितस्य वैशेषिकमतस्य अपाक-रणं सङ्ख्यायाः पदा-र्थान्तरत्वं व्यवस्थापनेन।	११५	२
१४४	विशेषस्य समवायस्य च	११५	१०

अङ्काः	विषयाः	पृ.	पं.
	लक्षणम्।		
१४५	अतिरिक्तशक्ति-पदार्थव्यवस्थापनेन वैशेषिकषट्पदार्थविभजनस्यायुक्तत्वम्, तत्र वैशेषिकसम्मतप्रतिबन्धकाभावकारणत्वमाशङ्क्यापाकृतम्।	११६	३
१४६	टीकायामेतत् स्पष्टीकरणम्, विलक्षणवह्न्यादेः दाहकारणत्वस्य व्युदासश्च।	११६	१८
१४७	तृणादिजन्यवह्नौ तृणादिजन्यतावच्छेदकवैजात्यभयकल्पनापेक्षया तृणादौ जनकतावच्छेदकैकशक्तिकल्पनैव लघीयसीत्युपपादितम्।	१२१	१
१४८	व्रीह्यादिजननियामकशक्तिविशेष आवश्यकः, तत्रानेकविधपराशङ्कापाकरणम्।	१२२	१
१४९	वैशिष्ट्यनामकपदार्थान्तरसद्भावादपि वैशेषिकपदार्थविभजनस्यायुक्तत्वम्।		
१५०	समवायसाधनं नैयायिकस्याशङ्क्यापाकृतम्, प्रपञ्चतः टीकायां प्रश्नप्रतिविधानस्फुटीकरणम्।	१२६	१
१५१	प्रत्यक्षसन्निकर्षकार्यकारणभावकल्पनलाघवबलाद् वैशिष्ट्यसिद्धिः उपपादिता, अत्रापि प्रश्नप्रतिविधानप्रक्रिया टीकया स्पष्टीकृता।	१३०	१
१५२	चक्षुषोऽप्राप्यकारित्वे द्रव्यचाक्षुषेऽपि चक्षुराभिमुख्यमेव नियामकमिति तदपि पदार्थान्तरम्।	१४०	६
१५३	द्रव्यजात्यन्यचाक्षुषे महदुद्भूतरूपवद् भिन्नसमवेतत्वेन प्रतिबन्धकत्वात् समवायसिद्धिरिति मतमुपन्यस्य प्रतिक्षिप्तम्।	१४१	४
१५४	सादृश्यस्य पदार्थान्तरस्य सद्भावाद् वैशेषिकपदार्थविभागस्यायुक्तत्वम्।	१४२	३
१५५	कारणत्वस्य पदार्था-	१४३	१

अङ्काः	विषयाः	पृ.	पं.
	न्तरस्य सद्भावात् उक्तविभागस्य अयुक्तता, अत्र नैयायिकाभिमत-कारणत्वप्रतिक्षेपपञ्च-विधान्यथासिद्धप्रदर्शनं च।		
१५६	द्वितीयान्यथासिद्धौ-दीधितिकारमतम्।	१५७	४
१५७	द्रव्यचाक्षुषादौ शरीर-लाघवेन महत्त्वेन अनेक-द्रव्यवत्त्वमन्यथासिद्धम्।	१५१	१
१५८	कारणात्मत्वलाघवेन व्याप्याधर्मावच्छिन्नेन व्यापकधर्मावच्छिन्न-मन्यथासिद्धम्।	१६१	२
१५९	सोदाहरणं चतुर्थान्य-थासिद्धलक्षणम्।	१६२	३
१६०	सोदाहरणं पञ्चमान्य-थासिद्धलक्षणम्, तत्र चिन्तामणिसंवादः।	१६३	१
१६१	पञ्चमान्यथासिद्धस्य यथा नाद्येनापि द्वितीयेऽन्तर्भावः तथाभावितम्।	१६३	७
१६२	तृतीयचतुर्थ्योरैक्यं पञ्चम्याश्च द्वितीयेऽन्त-र्भावमाश्रित्य त्रिविधे-वान्यथासिद्धिरिति मतम्।	१६५	२
१६३	एकैवान्यथासिद्धिरिति मतमुपदर्शितम्।	१६५	४
१६४	द्रव्यत्वादिनान्यथा-सिद्धस्य कपालादेः कपा-लत्वादिनापि कारणत्वं न स्यादित्याशङ्काया अपाकरणं, विशिष्य-कारत्वनिर्वचनेन तत्रा-वच्छेदकरूपादिनिवेश-प्रयोजनमुपदर्शितम्।	१६५	६
१६५	दैशिकव्यापकत्व-कालिकव्यापकत्वयोः कारणत्वशरीरे प्रवेश-माहत्यैकं कारणतं तद्द्वयगर्भमिति मत-मुपदर्शितम्।	१६८	२
१६६	कारणत्वस्य निकृष्ट-लक्षणं कालिकेन सम्बन्धान्तरेण च कारणस्य संग्राहकम्, न चैतस्य व्यापकताद्वय-गर्भत्वमपीत्यादिपर्या-लोचनम्।	१७०	१
१६७	धूमादेः कार्यमात्रस्य	१७२	२

अङ्काः	विषयाः	पृ.	पं.
	कालिकेन कार्यत्वमाशङ्क्य प्रतिक्षिप्तम् ।		
१६८	कारणत्वलक्षणे धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तदव्यवहितपूर्वकालावच्छेदेनेति निवेशस्य प्रयोजनमुपदर्शितम् ।	१७३	१
१६९	कारणत्वलक्षणे अभावे कार्याधिकरणवृत्तित्वं देशानवच्छिन्नविशेषणतया, वृत्त्यनियामकं सम्बन्धस्य प्रतियोगितानवच्छेदकत्वे विशिष्य प्रतियोगिवैयधिकरण्यनिवेशः, यागादेः कारणत्वोपादनं तथा अन्यत्रातिव्याप्तिवारणं च ।	१७५	१
१७०	लक्ष्यभेदेन कारणत्वान्यनेकविधानि दर्शितानि ।	१७७	१
१७१	कारणत्वलक्षणे अव्यवहितत्वनिवेशप्रयोजनम् उपदर्शितम् ।	१८०	१
१७२	कारणत्वग्रहे व्यतिरेकव्यभिचारज्ञानस्य विरोधित्ववदन्वयव्यभिचारज्ञानस्याविरोधित्वमुपपादितम् ।	१८०	४
१७३	विशिष्यान्वय-व्यतिरेकयोः ग्रहः कारणग्राहकः, तयोः ग्रहे च अन्वय-व्यतिरेकव्यभिचारज्ञानं विरोधीतिमतमुपदर्शितम् ।	१८१	२
१७४	"येन सहेत्यादिकं" अन्यथासिद्धिलक्षणस्य खण्डनम् ।	१८१	७
१७५	"अन्यं प्रतीति" इत्यादि निरुक्तान्यथासिद्धस्य खण्डनम् ।	१८२	३
१७६	अवश्यक्लृप्तेत्यादिनिरुक्तान्यथासिद्धस्य खण्डनम् ।	१८४	१
१७७	प्रकारान्तरेण कारणत्वनिर्वचनं तत्र प्रविष्टस्यान्यथासिद्धनिरूपकत्वस्य प्रकारान्तरेण निर्वचनं च आशङ्क्य निराकृतम् ।	१८४	२
१७८	अतिरिक्तकारणत्वं	१८६	४

अङ्काः	विषयाः	पृ.	पं.
	व्यवस्थापितम्, तस्य कारणपदप्रवृत्तिनिमित्तत्वोपपादनम्, तद्ग्राहकं अन्वयव्यतिरेकसहित-प्रत्यक्षागमादिकमित्याद्युपदर्शितम्।		
१७९	प्रतिबन्ध्यातिरिक्तकारणत्वकार्यत्वयोस्त्यागेऽतिरिक्तसामान्यविशेषयोरपि त्यागः, तयोः स्वीकारे अतिरिक्तकारणत्वकार्यत्वयोरपि स्वीकारः समुचितः इत्युपसंहृत्य व्यक्तीनामेव सामान्यविशेषोभयरूपत्वमित्यत्र संवादकं "स्क्तोऽनुवृत्तिव्यावृत्तिभाजः" इतिश्रीहेमसूरिपद्यं दर्शितम्।	१९३	३
१८०	प्रतिबन्ध्यातिरिक्तव्याप्याद्यापादनं स्यादवादिनो न दोषायेति दर्शितम्।	१९४	१
१८१	नियतपूर्ववृत्तितावच्छेदकदण्डत्वादिकमेव कारणत्वम्, इति मतमपाकृतम्।	१९४	४
१८२	आधारत्वमपि अतिरिक्तमस्तु ? इत्यासञ्जनम्, तत्र बहुविधो विचारः।	१९५	५
१८३	अतिरिक्तप्रतियोगित्वस्वीकारापादनम्।	२००	५
१८४	स्वभावाभावत्वं स्वस्य प्रतियोगित्वमित्युदयनाचार्यमतमपाकृतम्, टीकायां "व्यावर्त्याभाववत्त्वैव" इत्युदयनपद्यमुद्धृतम्।	२०१	३
१८५	अतिरिक्तविषयतास्वीकारासञ्जनम्, तत्र विषयतायाः विषयादिस्वरूपत्वखण्डनम्।	२०२	२
१८६	भिन्नाभिन्नानन्तधर्मात्मकवस्तुस्वीकारनिगमनम्, तत्र "अनन्तधर्मात्मकमेव तत्त्वम्" इतिश्रीहेमसूरिवचनसंवादः।	२०४	९
१८७	"षडेव पदार्थाः" इत्यन्ययोगव्यवच्छेदस्य अनुपपन्नता उपसंहृता	२०५	४

अङ्काः	विषयाः	पृ.	पं.
	अयोगव्यवच्छेदानुपपन्नतापि अत्र "दोहिं विणएहिं वीयं" इत्यादि सम्मतिगाथाव्याख्यानतोऽवसेया इत्युपदेशश्च।		
१८८	तद्व्याख्यानं टीकायां दर्शितम्।	२०६	६
१८९	नैगमनयनिरूपणसमाप्तिप्रदर्शनं पद्येन।	२०७	१
१९०	संग्रहनयनिरूपणे संग्रहनयलक्षणं तन्निरुक्तिश्च तत्प्रतिपादकमागमवचनम्।	२०७	३
१९१	तत्त्वबोधिनीविवृतिकृतः ग्रन्थप्राशस्त्यावबोधकं पद्यद्वयम्।	२०७	१२
१९२	"सङ्गृहीतपिण्डार्थं संग्रहवचनम्" इत्यागमार्थकथनम्।	२०८	१
१९३	सन्मात्रस्यैव शब्दविषयत्वेन प्रत्यक्षविषयत्वेन च तात्त्विकत्वं भेदप्रतिभासस्य च असत्यत्वम्।	२०९	१
१९४	घटपटादीनां भावान्यत्वे खरविषाणतुल्यत्वं तदनन्यत्वे च सामान्यमात्रपरिशेषः, अत्र च "कुंभोभावाऽणण्णा" इति "चूओ वणस्सइच्चिय" इति भाष्यगाथाद्वयसम्वादकम्।	२०९	४
१९५	सत्तायाः सर्वपदार्थाव्यभिचारादेव "यत्र विशेषक्रिया न श्रूयते" इति शाब्दिकवचनसङ्गतिः, तदेव पारमार्थिकं, व्यभिचरितत्वपारमार्थिकम्।	२११	४
१९६	सङ्ग्रहनयानुयायिनाम् "अस्त्यर्थः सर्वशब्दानाम्" इत्यादि पद्यद्वयं दर्शितम्।	२१२	१
१९७	सङ्ग्रहनयसमुत्थं वेदान्तदर्शनम्।	२१२	७
१९८	वेदान्तदर्शने सच्चिदानन्दाद्वयं ब्रह्मैव वस्तु अज्ञानाद्यवस्तु, तत्र अज्ञानमनिर्वचनीयं त्रिगुणात्मकं भावरूपम्, अनुभवागमसिद्धम्।	२१३	१
१९९	अज्ञानं समष्टिरूपेण एकम्, व्यष्टिरूपेण अनेकम्, तत्र समष्टि-	२१५	२

अङ्काः	विषयाः	पृ.	पं.
	रूपेण ऐक्यभावनायाम् "अजामेकाम्" इत्यादि श्रुतिः प्रमाणम्, टीकायां सम्पूर्णा सोल्लिखिता।		
२००	विशुद्धसत्त्वप्रधाना- ज्ञानरूपा समष्टिः, तदु- पहितं चैतन्यं सर्वज्ञ- त्वादिगुणकदम्बक- मन्तर्यामि-जगत्कारण- मीश्वर इति च व्यपदिश्यते।	२१५	६
२०१	समष्ट्यज्ञानं चेश्वरस्य कारणशरीरमानन्द- मयकोशः, सुषुप्तिश्च स्थूलसूक्ष्मप्रपञ्चलय- स्थानं च।	२१६	२
२०२	व्यष्टिरूपेण अज्ञानस्या- नेकता तत्र "इन्द्रो मायाभिः" इतिश्रुतिः प्रमाणम्।	२१६	६
२०३	मलिनसत्त्वप्रधानं व्यष्टिरूपाज्ञानं, तदु- पहितं चैतन्यमल्पज्ञ- त्वानीश्वरत्वादिगुणकं प्राज्ञ इति।	२१७	२
२०४	व्यष्टिरूपाज्ञानं प्राज्ञस्य कारणशरीरम्, आनन्द- मयकोशः, सुषुप्तिः, स्थूलसूक्ष्मशरीरलय- स्थानं च।	२१७	५
२०५	व्यष्टिसमष्ट्योः तदु- पहितचैतन्ययोः अभेदो भावितः।	२१७	७
२०६	अज्ञानतदुपहितचैत- न्ययोराधारभूतमनुप- हितचैतन्यं तुरीयम् इति।	२१८	२
२०७	तुरीयं चैतन्यत्वम् अज्ञानतदुपहितचैत- न्याभ्यामविविक्तं सत् "सर्वं ब्रह्मैव" इत्यादेः "तत्त्वमसि" इत्यादेर्वा महावाक्यवाच्यम्, विविक्तम्-सत् लक्ष्यम् इति।	२१८	५
२०८	अस्य अज्ञानस्यावरण- शक्तिः विक्षेपशक्तिश्च, तत्रावरणशक्तेराच्छा- दने सामर्थ्यमुप- वर्णितम्।	२१९	१
२०९	टीकायाम्, अविद्याया आश्रयत्वं विषयत्वं च ब्रह्मण एवेति प्रति- पादकम् "आश्रयत्व- विषयत्वभागिनी"	२१९	२५

अङ्काः	विषयाः	पृ.	पं.
	इत्यादि पद्यद्वयं दर्शितम्।		
२१०	आवरणकृतं चात्मनः कर्तृत्वादिकम्।	२२०	२
२११	विक्षेपशक्तिश्चावृते चैतन्ये गगनादि-प्रपञ्चोत्पादनसामर्थ्यम्।	२२०	३
२१२	शक्तिद्वयवदज्ञानोपहित-चैतन्यं स्वप्रधानतया निमित्तम्, स्वोपाधि-प्रधानतया चोपादान-मिति दर्शितम्।	२२१	१
२१३	तमःप्रधानशक्तिमद-ज्ञानोपहितचैतन्यादा-काशम्, आकाशाद् वायुः, वायोः अग्निः, अग्नेः आपः, अद्भ्यः पृथिवी चोत्पद्यते इति सृष्टिप्रक्रिया वर्णिता।	२२१	२
२१४	"ततः सत्यवतः क्रियात्" इति लिङ्ग-वचनं लिङ्गशरीरावेदकं टीकायां दर्शितम्।	२२१	६
२१५	उक्तेभ्योऽपञ्चीकृतभूते-भ्यो लिङ्गशरीरस्थूल-भूतानामुत्पत्तिर्दर्शिता।	२२२	३
२१६	लिङ्गशरीरसप्तदशावय-वानां ज्ञानेन्द्रियादीनां	२२२	४
	स्वरूपाण्यपि उक्तानि।		
२१७	ज्ञानेन्द्रियपञ्चकस्य आकाशादीनां सात्त्वि-कांशेभ्यो व्यस्तेभ्यो भवनमुक्तम्।	२२३	१
२१८	निश्चयविकल्पसङ्कल्पा-त्मिकवृत्त्योः बुद्धिमनसोः गगनादिगतसात्त्वि-कांशेभ्यो मिलितेभ्यः उत्पत्तिर्दर्शिता, तयोरेव च चित्ताहङ्कारयोरन्त-र्भावः।	२२३	२
२१९	टीकायां चतुर्विधान्तः करणप्रतिपादकेन "मनोबुद्धिरहङ्कारः" इत्यादिवचनेन विरो-धस्य निरास आवेदितः।	२२३	१८
२२०	ज्ञानेन्द्रियैः सहिता बुद्धिः विज्ञानमयकोशो व्यावहारिको जीवः, कर्मेन्द्रियसहितं मनो मनोमयकोशः, कर्मेन्द्रि-याणि वागादीनि पञ्चा-काशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथक् उत्पद्यन्ते, प्राणादयः पञ्च वायवः।	२२४	१

अङ्काः	विषयाः	पृ.	पं.
२२१	टीकायां "हृदि प्राणः" इत्याविपद्येन प्राणादीनां स्थानकथनम् ।	२२४	२४
२२२	प्राणादीनाम्—आकाशादिगतरजोंशेभ्यः मिलितेभ्यः उत्पत्तिः, कर्मेन्द्रियसहितं प्राणादिपञ्चकं प्राणमयकोशः ।	२२५	१
२२३	एषु कोशेषु विज्ञानमयः कर्तृरूपः, मनोमयः करणरूपः प्राणमयः कार्यरूप इति विभागः ।	२२५	३
२२४	मिलितमेतत् कोशत्रयं सूक्ष्मशरीरं, समष्टिः, व्यष्टिश्च, तत्र समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चाख्यायते ।	२२५	५
२२५	हिरण्यगर्भस्य एतच्छरीरं स्वप्नः स्थूलप्रपञ्चलयस्थानं च ।	२२६	१
२२६	व्यष्टिव्यपदेश्यकोशत्रयरूपसूक्ष्मशरीरोपहितचैतन्यं तैजसः, अस्यैतच्छरीरं स्वप्नः स्थूलशरीरलयस्थानम् ।	२२६	३
२२७	व्यष्टिसमष्ट्योः तवुपहितसूत्रात्मतैजसयोः अभेदः सदृष्टान्त उपदर्शितः ।	२२७	१
२२८	पञ्चीकृतानि स्थूलभूतानि, पञ्चीकरणं च तत्र त्रिवृत्करणश्रुत्यविरोधोपदर्शनं च ।	२२७	३
२२९	पञ्चीकरणदशायाम् आकाशादौ शब्दाद्यभिव्यक्तिः आवेदिता ।	२२८	३
२३०	पञ्चीकृतभूतेभ्यः चतुर्दशश्लोकतदन्तर्गतस्थूलशरीरोत्पत्तिस्थूलशरीरभेदोपदर्शनम् ।	२२८	६
२३१	चतुर्विधस्थूलशरीरमपि समष्टिः व्यष्टिश्च, एतत् समष्ट्युपहितं चैतन्यं वैश्वानरः इति विराडिति च कथ्यते, अस्यैतच्छरीरमन्नमयकोशो जागरश्च ।	२२८	८
२३२	एतद्व्यष्ट्युपहितं चैतन्यं विश्वः अस्यापि एतत्शरीरमन्नमयकोशः जाग्रत् इति कथ्यते ।	२२९	४
२३३	विश्ववैश्वानरयोः स्विस्वदेवनियन्त्रितज्ञानेन्द्रिय-	२३०	१

अङ्काः	विषयाः	पृ.	पं.
	कर्मेन्द्रियान्तःकरणद्वारा तत्तत्स्थूलविषयानुभावकत्वं श्रुतिप्रमाणकं दर्शितम् ।		
१३४	स्थूलव्यष्टिसमष्ट्योः तदुपहितचैतन्ययोः अभेदः सनिदर्शन उपदर्शितः ।	२३१	३
१३५	स्थूलसूक्ष्मपञ्चकरणानां समष्टिः महान् प्रपञ्चः तदुपहितं वैश्वानरादीश्वर-पर्यन्तमेकमेव इत्यर्थाध्यारोपः ।	२३१	७
१३६	अपवादनिरूपणं तत्र वस्तुविवर्तस्य अवस्तुनो वस्तुमात्रत्वमुपपादितम् ।	२३२	४
१३७	अध्यारोपापवादाभ्यां तत्त्वंपदार्थयोः शोधनं भावितम् ।	२३३	४
१३८	'तत्त्वमसि' इति वाक्यं सामान्याधिकरण्यविशेषण-विशेष्यभावलक्ष्यलक्ष्यण-भावेति सम्बन्धत्रयेण यथा अखण्डार्थं बोधयति तथा उपपाद्य उपदर्शितम् ।	२३४	३
१३९	"तत्त्वमसि" इति वाक्य-वद् "अहं ब्रह्मास्मि" इति वाक्यस्य अखण्डार्थ-बोधकत्वम्, अखण्डा-कारचित्तवृत्तेः ब्रह्मविषयिण्याः	२४०	९
	ब्रह्मगताज्ञानबाधकत्वेन तत्कार्याखिलबाधे तदन्त-र्भूततया स्वस्यापि बाधः ।		
२४०	अविद्यातत्कार्याखिल-बोध अखण्डाकारचित्त-वृत्तिप्रतिबिम्बितचैतन्यं ब्रह्ममात्रम् "मनसैवानुद्रष्टव्यम्" इति श्रुतिः ब्रह्मणो वृत्ति-व्याप्यत्वावेदिका "यन्मनसा न मनुते" इति श्रुतिः फलव्याप्यत्वप्रतिषेधिका, तेन न विरोधः तयोः इति आवेदितम् ।	२४२	३
२४१	ब्रह्मणो वृत्तिव्याप्यत्व-मस्ति फलव्याप्यत्वं च नास्ति इत्यत्र "फलव्याप्य-त्वमेवास्य" इति पञ्चदशीवचनसम्वादकम्, एतत्स्पष्टीकरणं टीकायाम्, तत्र श्रुतिस्मृतिसम्वादोऽपि दर्शितः ।	२४३	१
२४२	घटाकारचित्तवृत्तिः घटा-ज्ञाननिरसनपुरस्सरं स्वगत-चिदाभासेन घटादिकं स्वं चावभासयति इति दर्शितम् ।	२४५	१
२४३	टीकायामेतद्विषयका-	२४५	७

अङ्काः	विषयाः	पृ.	पं.
	वबलकपञ्चदशीपद्यनिकरः तद्व्याख्यानं चावेदितम्।		
२४४	अखण्डचिदाकारवृत्तेः शमादिगुणानां चाभ्यासादेव स्वरूपविश्रान्तिः इत्यत्र "न यावत् सममभ्यस्तौ" इतिवचनं तद्व्याख्यानं च दर्शितम्।	२४६	२
२४५	शम-दमोपरति-तितिक्षा-समाधान-श्रद्धानां षण्णां स्वरूपमुपवर्णितम्।	२४६	१०
२४६	श्रवणमननिदिध्यासन-समाध्यनुष्ठानस्वरूप आत्मविचारो दर्शितः।	२४७	३
२४७	श्रवणाद्यभ्यासावश्यकत्वस्य श्रवणस्य च निरूपकम् "अहं ब्रह्मेति-वाक्यार्थबोधः" इत्यादि-पञ्चदशीपद्यचतुष्टयं तद् विवरणं च टीकायामुपदर्शितम्।	२४७	१२
२४८	श्रवणस्य लक्षणम्, अद्वितीयब्रह्मणि अशेष-वेदान्ततात्पर्यावधारणहेतुभूतानामुपक्रमोपसंहाराभ्यासापूर्वता-फलार्थवादोपपत्त्याख्यानां षण्णां लिङ्गानां प्रतिपादनम्।	२४८	१
२४९	मनननिदिध्यासनयोर्लक्षणम्।	२५०	७
२५०	सविकल्पकनिर्विकल्पकभेदेन समाधि-द्वैविध्यं तत्र सविकल्पक-समाधिनिरूपणे मुक्तिकोपनिषदुपदर्शिता।	२५०	९
२५१	निर्विकल्पकसमाधि-निरूपणम्, तदङ्गानि यमनियमासन-प्राणायाम-प्रत्याहार-धारणा-समाध्याख्यान्यष्टौ उपदेशतानि।	२५२	१
२५२	यम-नियमासनप्राणायामानां पृथक् पृथक् प्रभेदाः उपवर्णिताः।	२५३	१
२५३	प्रत्याहार-धारणा-ध्यानानां लक्षणान्युपपर्शितानि।	२५१	४
२५४	निर्विकल्पकसमाध्यङ्गभूतः समाधिः सविकल्पक एवेति।	२५३	७
२५५	निर्विकल्पकस्याङ्गिनो लय-विक्षेप-कषाय-रसास्वाद-लक्षणाश्चत्वारो विघ्ना निरूपिताः।	२५३	७
२५६	लयादिविघ्नचतुष्टया-भाव एव निर्विकल्पसमा-	२५४	४

अङ्काः	विषयाः	पृ.	पं.
	धिरित्यत्र प्राचां वचनं गीता-		
	वचनं संवादकं दर्शितम् ।		
२५७	यथा निर्विकल्पकसमाधि-	२५५	१
	प्राप्तः पुरुषः जीवन्मुक्त इति		
	व्यपदिश्यते तथोपदर्शितम् ।		
२५८	जीवन्मुक्तस्य शुभवास-	२५६	५
	नानामेवानुवृत्तिः, शुभा-		
	शुभयोः औदास्यं वा अत्र		
	"सिद्धाद्वैतस्वतत्त्वस्य"		
	इतिपञ्चदशीपद्यं सम्वाद-		
	कमुपदर्शितम् ।		
२५९	टीकायामेतदनुगुणानि	२५६	१६
	पञ्चदशीपद्यान्तराणि		
	उल्लिखितानि ।		
२६०	जीवन्मुक्तावस्थायाममा-	२५९	१
	नित्वादीनामद्वेषवादीनां		
	च अलङ्कारवदनुवर्तनम्		
	तत्र उत्पन्नात्मावबोधस्य		
	इति प्राचां वचनं संवादकम् ।		
२६१	जीवन्मुक्तोऽखण्डब्रह्म-	२५७	९
	रूपेणावतिष्ठते इत्यत्र "न		
	तस्य प्राणा उत्क्रामन्ति"		
	इति "विमुक्तश्च विमुच्यते"		
	इति च श्रुतिः प्रमाणं दर्शितम् ।		
२६२	वेदान्तमतखण्डनारम्भः	२६७	१२
	तदुपगमे बन्ध-मोक्षव्यव-		

अङ्काः	विषयाः	पृ.	पं.
	स्थानुपपत्तिः दोष उद्भवति ।		
२६६	प्रतिबिम्बवादे वेदान्त्यभि-	२५८	१
	मतबन्धमोक्षपदार्थस्य		
	वक्तुमशक्यत्वमुपपादितम् ।		
२६४	आभासवादे अवच्छेद-	२५९	२
	वादे च वेदान्त्यभिमत-		
	बद्धत्वमुक्तत्वव्यवस्थायाः		
	खण्डनमुपदर्शितम् ।		
२६५	प्राचीनवेदान्त्यभिमत-	२६०	२
	दृष्टिसृष्टिवादस्य खण्डनम् ।		
२६६	व्यावहारिकमांशिकबद्ध-	२५०	४
	मुक्तोभयस्वरूपं पारमा-		
	र्थिकं सहजमुक्तनिरंशब्रह्म-		
	स्वरूपं निरुणद्धि इत्यशङ्काया		
	अपाकरणम्, सहजमुक्तत्व-		
	खण्डने वार्तिकसंवादश्च ।		
२६७	ब्रह्मणः सहजमुक्तत्वे	२६३	१
	मुमुक्षूपदेशानैक्यमुप-		
	दर्शितम् ।		
२६८	परमार्थतो मुमुक्षूपदेश-	२६३	४
	फलं नास्त्यवेति वेदान्त्या-		
	शङ्कायां "न निरोधो न		
	चोत्पातः" इत्यादिश्रुतेः		
	प्रमाणतया उपदर्शनम् ।		
२६९	प्रतीतित उपदेशफल-	५६४	१
	सद्भावोपदर्शनम् ।		

अङ्काः	विषयाः	पृ.	पं.
२७०	एकस्मिन्नपि चैतन्ये मायाबन्धमोक्षव्यवस्थापनक्षमावस्तुतो बन्धमोक्षादिर्नास्तीत्यत्र "बन्धमोक्षव्यवस्थार्थम्" इत्यादि पञ्चदशीपद्यत्रयं तद्व्याख्यानं च टीकायाम्।	२६४	२
२७१	निरुक्तवेदान्त्याशङ्काया अपाकरणम्।	२६५	३
२७२	ब्रह्मणो निर्विकल्पकचिदेकाकारवृत्तिविषयत्वस्य दुर्घटता भाविता।	२६५	५
२७३	ब्रह्माकरत्वमेव ब्रह्मविषयत्वमित्याशङ्कायाः अपाकरणम्।	२६५	३
२७४	निर्विकल्पकवृतेः तत्त्वतो ब्रह्मसम्बन्धेऽपि तत्राज्ञाननिवर्तकत्वात् प्रामाण्यमित्याशङ्कायाः व्युदासः।	२६६	४
२७५	महावाक्यजनिर्विकल्पके ब्रह्मणः औपराधिकसम्बन्धः प्रामाण्यं च तस्य द्वैतानवगाहित्वेनेत्याशङ्कायाः निरसनम्।	२६७	३
२७६	द्वैतानवगाह्यद्वैतज्ञानत्वादिनाऽज्ञाननिवर्तकत्वस्य प्रतिक्षेपः।	२६७	१०
२७७	द्वैतज्ञानोपमर्दकयुक्तयुपबृंहितमहावाक्यार्थज्ञानत्वेनाज्ञाननिवर्तकत्वस्याशङ्कितस्य प्रतिक्षेपः।	२६९	४
२७८	"तस्यामिध्यानात्" इत्यादिश्रुतिः विचारपूर्वकमहावाक्यार्थजात्मसाक्षात्कारस्य साक्षादज्ञाननिवर्तकत्वे दिनिगमकेत्याशङ्काया अपाकरणम्।	२७०	५
२७९	मायाया अनिर्वाच्यत्वं न्याय्यमित्याशङ्कायाः प्रतिक्षेपः।	२७२	१
२८०	वेदान्त्यभिमतेऽज्ञानेऽनिर्वचनीयत्वस्य सप्तभङ्गीवाक्यस्थत्वमुपपादितम्।	२७३	१७
२८१	वेदान्त्यभिमतस्याज्ञाने सर्वथाऽनिर्वाच्यत्वस्य प्रतिक्षेपः।	२७४	३
२८२	मायायाः सत्त्वासत्त्वाभ्यां विकल्पखण्डने 'माया सती चेद्' इति हेमसूरिवचनसंवादः।	२७४	५

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
११५ दृशि स्वरूपं गगनोपमं वरं०	[मुक्तिकोपनिषद्–२, ७३]	२५१,	४–५
१२६ देवात्मशक्तिं स्वगुणैर्निगूढां०	[श्वेताश्वतरोपनिषद्–१, ३]	२१४,	१
१२७ द्वे ब्रह्मणी वेदितव्ये	[त्रिपुरातापिन्युपनिषद्–४, १७]	२८५,	३
१२८ दोहि वि णएहिं णीयं०	[विशेषावश्यकमहाभाष्ये– गा० २१९५, सम्मतितर्के ३–४९]	५७,	४–५
१२९ दोहिं वि णएहिं णीयं	[सम्मति० का० ३, गा० ४९]	२०५,	५
१३० धर्मा-ऽधर्मा-ऽऽकाश-जीव०	[नयोपदेश० श्लो० ५४]	५३,	३–४
१३१ धर्मिणः प्रसिद्धिः क्वचिद्०	[प्रमाण० परि० ३, सू० २१]	६६,	१५–१६
१३२ नणु भणियं पज्जायट्ठियस्स०	[विशेषावश्यकभाष्य-गा० २६६०]	८४,	३–४
१३३ न तस्य प्राणा०	[नृसिंहोपनिषद्, ५]	२५७,	९
१३४ न निरोधो न चोत्पत्ति०	[पञ्चदशीचित्रदीप० २३५]	२६४,	६–७
१३५ न प्रकृतिर्नापि विकृतिः पुरुष०	[साङ्ख्यकारिका–३]	३७९,	११
१३६ न यावत् सममभ्यस्तौ०	[ ]	२४६,	३–४
१३७ न सदकरणादुपादान०	[ ]	३४६,	११–१२
१३८ न सुवचादवं०	[विशेषावश्यकभाष्य–गा० २६६९]	९७,	१०–११
१३९ नाऽयं वस्तु न चाऽवस्तु०	[ ]	५१,	९–१०
१४० नास्वादयेद् रसं तत्र०	[अद्वैत प्र० ४५]	२५४,	६
१४१ नित्यसत्त्वा भवन्त्येके०	[ ]	१०८,	२५–२६
१४२ नित्यं विज्ञानमानन्दं ब्रह्म०	[ ]	३४३,	२२–२३
१४३ निर्विकल्पमनन्तं च०	[त्रिपुरातापिन्युपनिषद्, ५, ९]	२४५,	१२–१३
१४४ निःशेषांशऋजुषां०	[पञ्चाशत—]	५०,	१८–२०
१४५ नीयते येन श्रुताख्य०	[प्रमाण० परिच्छेद–७, सू० १]	५०,	४–६
१४६ पज्जवणयवुक्कंतं०	[सम्मति० का० १, गा० ८]	२९६,	२–३
१४७ पज्जाओ च्चिय वत्थुं०	[विशेषावश्यकभाष्य–गा० २६४५]	६३,	५–६
१४८ पज्जायनयमयमिणं०	[विशेषावश्यकभाष्य–गा० २६४६]	६४,	२–३
१४९ पञ्चप्रकारः प्रत्येकं०	[नयोपदेश० श्लो० ५७]	५३,	९–१०

अङ्काः	विषयाः	पृ.	पं.
	प्रयोजनाशंसावेदकं पद्यम्।		
२९६	व्यवहारनयनिरूपणे तल्लक्षणोपदर्शनम्।	२९१	१५
२९७	व्यवहारे उपचार-बाहुल्यावेदकं दह्यते गिरिरित्यादि नयोपदेश-पद्यमुट्टङ्कितम्, तद्-व्याख्यानं च।	२९१	२३
२९८	सर्वद्रव्येषु विशेषमात्रा-भ्युपगमोऽस्य, सामा-न्यस्य तु प्रतिक्षेप एवेति व्यवहारविचारो-पदर्शनम्।	२९२	१
२९९	अत्रान्तरासामान्य-वादिनः प्रश्नस्तत्प्रति-विधानं च।	१९२	४
३००	सङ्ग्रहवादिनः "यथा-कटकशब्दार्थः" इति पद्येनाभिमतस्य प्रद-र्शनपुरस्सरं निरा-करणम्।	२९४	६
३०१	वस्तुगत्या सामान्य-विषयस्य व्यवहारस्य तदभावार्थं यत्नो न सम्भवतीति प्रश्नः।	२९५	७
३०२	व्यहारस्य सामान्य-विषयकत्वे "पज्जवणय वुक्कं तं" इति सम्मति-गाथा-तदर्थद्वयं च दर्शितम्।	२९५	१
३०३	द्रव्यार्थिक-पर्यायार्थिकयो-र्वस्तुगत्योभयविषय-कत्वादनेकान्तानु-प्रवेशादेव तद्व्यव-स्थायां "दव्वट्ठिओ त्ति तम्" इति सम्मति-गाथा प्रमाणतयोद्भाविता।	२९८	४
३०४	उक्तप्रश्नप्रतिविधाने व्यवहारस्य सामान्या-भावार्थयत्नत्वोपपादन-प्रकारे "दव्वट्ठियवत्तव्वं' इति समाप्तिगाथासंवादो दर्शितः।	२९९	१
३०५	पर्यायाथिकद्रव्यार्थिक-वक्तव्ययोर्मिथो विरोधाव-गमिका "उपज्जंति" इति सम्मतिगाथा दर्शिता।	३००	३
३०६	संग्रहव्यवहारयोरवधा-रणांशे मिथ्यात्वाशङ्का परिहृता चेष्टापत्त्या सा, समुदितानामुत्पादस्थिति-भङ्गानामेव द्रव्यलक्षणत्वम्।	६००	६

अङ्का:	विषयाः	पृ.	पं.
३०७	उक्तार्थे "दव्वं पज्जव- विजुयं" इत्यादि सम्मति- गाथापञ्चकं संवादि दर्शितम् ।	३०२	१
३०८	सर्वेषां नयानां मिथ्या- दृष्टित्वे तत्समुदाये सम्यक्त्वं न भवेदित्या- शङ्क्याऽन्योऽन्यनिश्रितत्वेन सम्यक्त्वं तत्र "तम्हा सव्वे वि णया" इति सम्मतिगाथासंवादश्च	३०२	१२
३०९	प्रत्येकं मिथ्यात्वेऽन्यो- ऽन्यनिश्रिततत्त्वेन समुदाये सम्यक्त्वं प्रश्नप्रतिविधा- नाभ्यामुपपादितं सम्मति- वृत्तिकृतोऽभिप्रायोट्टङ्कनेन ।	३०३	११
३१०	अत्र ग्रन्थकर्तुः स्वमनीषा विर्भावनम् ।	३०५	३
३११	तत्र सकलनयार्थसमू- हालम्बनैकप्रमाणज्ञान- स्यायुक्तत्वमाशङ्कितम् ।	३०५	३
३१२	आशङ्किता न्याय- वाक्यार्थबोधदृष्टान्तेन महावाक्यार्थज्ञानरूप- प्रमाणात्मकैकाध्यवसा- योपपत्तिशङ्कामुद्भा- व्यापहस्तितवान् ।	३०५	९
३१३	अत्रैव रत्नावलीदृष्टा- न्तेन नयप्रमाणात्मकैक- चैतन्योपपादकं "जहा णेगलक्खणगुणा" इत्यादि सम्मतिगाथा- पञ्चकविरोधदुक्तकल्प- नाया अनुपादेयत्वमुप- पादितम् ।	३०६	६
३१४	अत्रैव साङ्ख्यवैशेषिक- तदन्याभिमत-सत्कार्या- सत्कार्य-द्रव्यमात्रतत्त्व- वादाः प्रतिक्षिप्ताः, तत्र "इहरा समूहसिद्धो" इति सम्मतिगाथासंवादश्च ।	३१२	१
३१५	सवनयानां निजकवच- नीयसत्यत्वाद्यावेदिका "णियययवयणिज्जसच्चा" इति सम्मतिगाथा सव्याख्या दर्शिता ।	३१५	४
३१६	प्रश्नकर्त्रा नयप्रमाणा- त्मकैकरूपमात्मस्वरूपं निगमय्य तत्र विशिष्टैका- ध्यवसायलक्षणसमुदाया- र्थत्वानुपपत्तिर्निगमिता ।	३१६	२
३१७	उक्तप्रश्नप्रतिविधानं तत्र	३१६	३

अङ्काः	विषयाः	पृ.	पं.
	प्रमाणनय-दुर्नया विभज्य दर्शिताः "सदेव सत् स्याद्" इति हेमपुरि-वचनसंवादश्च ।		
३१८	व्यवहारस्य विसामान्यार्थ-यत्नत्वानुपपत्त्याशङ्का प्रतिविहिता ।	३१७	१
३१९	"वंचइ विणिच्छयत्थं" इति सूत्रस्य व्याख्या-नान्तरमुपदर्शितम् ।	३१८	३
३२०	व्यवहारात् साङ्ख्यदर्शन-मुत्पन्नम्, तत्र सम्मतिसंवादः ।	३१९	४
३२१	साङ्ख्यप्रक्रियोवर्णनं तत्र प्रधानस्य लक्षणम्, ततो महदादिक्रमेण सृष्टिः प्रपञ्चिता ।	३२०	५
३२२	तत्र "प्रकृतेर्महान्" इतीश्वरकृष्णकारिका दर्शिता ।	३२१	२
३२३	महदहङ्कारमनसां सोदाहरणं लक्षणमुप-दर्शितम् ।	३२१	५
३२४	प्रकृत्यादिपञ्चविंशति-तत्त्वज्ञानादेव मुक्ति-रित्यत्र "पञ्चविंशति-तत्त्वज्ञः" इति साङ्ख्या-चार्यवचनं संवादकमुप-दर्शितम् ।	३२३	१
३२५	त्रैगुण्यादिना महदह-ङ्कारादिकार्याणां प्रधा-नात्मककारणाभिन्नत्व-मुपपाद्य तत्र "त्रिगुण-विवेकिविषयः" इति कारिका-सम्वादो दर्शितः ।	३२३	५
३२६	"हेतुमदनित्य-मव्यापि" इति कारिको-पदर्शितधर्मेण व्यक्तस्या-व्यक्ताद्यभेदाशङ्कामुत्थाप्य व्युदस्ता ।	३२५	५
३२७	"असत्करणात्" इति कारिकोपदर्शितहेतु-कदम्बकेन कारणात्मनि कार्यमस्तीति सत्कार्य-वादो व्यवस्थापितः ।	३२९	१
३२८	सत्कार्यसाधक-कारण-भावेलक्षणपञ्चमहेतु-समर्थनपरस्य "कार्यस्यैव न योगाच्च" इति-पद्यस्यार्थ उपदर्शितः ।	३३३	५
३२९	प्रधानादेव महदादि-कार्यभेदा इत्येतत्साधक-	३३४	४

अङ्काः	विषयाः	पृ.	पं.
	हेतुनिकरप्रतिपादिका सव्याख्या "भेदानां परिमाणात्" इति कारिका दर्शिता।		
३३०	अशुद्धद्रव्यार्थिकव्यवहारनयप्रवृत्तं साङ्ख्यदर्शनस्येति।	३३६	९
३३१	साङ्ख्यदर्शनस्य विचारासहत्वेन मिथ्यात्वप्ररूपणम्।	३३६	१२
३३२	तत्र महदादीनां प्रकृत्या सह भेदकार्यकारणभावासंभवात् "मूलप्रकृतिरविकृतिः" इत्याद्ययुक्तम्।	३३६	१२
३३३	"यदेव दधि तत् क्षीरम्" इत्याद्युपहासवचनोद्भावनम्।	३३८	६
३३४	"हेतुमदनित्यमव्यापि" इत्यादिकारिकोक्तमपि हेतुमत्त्वादियुक्तं व्यक्तस्य तद्वैपरीत्यमव्यक्तस्येत्ययुक्तम्।	३३९	१
३३५	प्रधानादिभ्यो महदाद्युत्पत्तिक्रमस्याप्रामाणिकत्वं व्यवस्थापितम्।		
३३६	साङ्ख्यस्य परिणामवाद आशङ्क्य प्रतिक्षिप्तो विस्तरतः।	३४०	४
३३७	असदकरणादितो यथाऽसत्कार्यवादप्रतिक्षेपस्तथा सदकरणादितः सत्कार्यवादप्रतिक्षेपोऽपीत्युपपाद्य दर्शितः।	३५६	८
३३८	संशयविपर्ययनिवर्तकत्वान्निश्चयजनकत्वाद् वा साधनं सफलं सत्कार्यवादे तन्न सम्भवतीति।	३५३	१
३३९	अभिव्यञ्जकतया साधनप्रयोगस्य साफल्यमित्युच्छृङ्खलसाङ्ख्यमतमपाकृतम्, स्याद्वादश्चात्र निगमितः।	३५५	१
३४०	असत्कार्यवादिनः कारणतां प्रतिनियतशक्तयसम्भवाशङ्क्य "अवधीनामनिष्पत्तेः" इतिप्राचीनवचनसंवादो दर्शितः।	३५७	१
३४१	अवधीनामनिष्पत्तौ व्यपदेशासम्भवेऽपि जन्यजनकवस्तुस्वरूपमसत्कार्यवादेऽप्युपपन्नमित्युक्तशङ्काप्रतिविधानम्।	३५८	४

अङ्काः	विषयाः	पृ.	पं.
३४२	साङ्ख्यानां सत्कार्यवादे बन्धमोक्षाभाव आपादितः।	३६०	६
३४३	भेदानामन्वयदर्शनात् प्रधानास्तित्वे साङ्ख्याभिमते हेतोरसिद्धत्वं पर्यायनयानुसारिसम्मतमावेदितम्।	३६१	५
३४४	सुखादीनां स्वसंवेदनमसहमानस्य नैयायिकस्य मतं प्रतिक्षिप्तम्।	३६३	१
३४५	बौद्धमतमवलम्ब्य साङ्ख्यमतखण्डनमित्यतस्तत्र "लिङ्गलिङ्गिधियोः" इति बौद्धवचनसंवादोपदर्शनम्।	३६७	३
३४६	साङ्ख्यमते शब्दादीनां त्रिगुणात्मकत्वतः प्रीत्यादिप्रतिपत्तिनियमाय कल्पनीयस्योपायस्य दुष्टत्वमावेदितम्।	३६८	२
३४७	शब्दादीनां सुखाद्यन्वितत्वसिद्धये साङ्ख्याभिहितस्य प्रसाद-ताप-दैन्यादुपलम्भहेतोरनैकान्तिकत्वमुपदर्शितम्।	३६९	३
३४८	प्रधानसिद्धयेऽभिमतस्य समन्वयहेतोर्यथाऽनैकान्तिकत्वविरोधतो निरासस्तथाऽन्यहेतूनामपीति।	३७०	६
३४९	प्रेक्षावत्कारणसाधनस्याप्यनैकान्तिकता दर्शिता।	३७१	१
३५०	शक्तितः प्रवृत्तेरित्यस्य विकल्पतो व्युदसनम्।	३७२	१
३५१	कारणकार्यविभागाविभागयोर्हेत्वोरपाकरणम्।	३७३	२
३५२	प्रधानविकारबुद्धिव्यतिरिक्तं चैतन्यं पुरुषस्य स्वरूपमित्यादिसाङ्ख्यमतमुपदर्श्य प्रतिक्षिप्तम्।	३७४	३
३५३	पुरुषस्य कर्तृत्वाभावे भोक्तृत्वं न सम्भवतीति दर्शितम्।	३७७	२
३५४	पङ्ग्वन्धवत् प्रधानपुरुषयोः संयोगात् सर्गस्तत्र "पुरुषस्य दर्शनार्थम्" इतिकारिकासंवादश्चेत्याशङ्काऽपाकृता।	३७८	३
३५५	स्वसंयोगमात्रेण प्रकृतेः पुरुषं प्रति फलोपनयनस्य खण्डनम्।	३७९	३

अङ्काः	विषयाः	पृ.	पं.
३५६	पुरुषस्य भोक्तृत्वा-सम्भवप्रतिपादनम्, तत्र साङ्ख्याभिमतपुरुषभोक्तृत्वोपपादनप्रकार आशङ्क्य व्युदस्तः।	३८०	५
३५७	बुद्धावात्मनो भेदसाधनाय साङ्ख्याभिमतमनुमानमुपदर्श्य दूषितम्।	३८२	७
३५८	शब्दमात्रानुगमेऽप्यनुगतहेतुसिद्धिर्न भवतीत्यत्र "तस्यैव व्यभिचारादौ" इतिप्राचीनवचनसंवादः।	३८३	८
३५९	"वत्सविवृद्धिनिमित्तम्" इतिकारिकया वत्सविवृद्धयर्थक्षीरप्रवृत्तिवत् पुरुषविमोक्षार्थप्रधानप्रवृत्तिरिति साङ्ख्यकल्पनाऽपाकृता।	३८४	४
३६०	व्यतिरिक्तात्मसिद्धिपर्यवसायि चक्षुरादीनां परार्थत्वसाधनमपि विकल्प्य जर्जरितम्।	३८६	६
३६१	मूलकर्त्रा पद्येन व्यवहारनयनिरूपणसमाप्तिरावेदिता।	३८८	४
३६२	टीकाकर्त्रा पद्येन ग्रन्थविषयतत्फलोपढौकनम्।	३८८	१८

पञ्चाससुशीलविजयगणिसंकलिताऽनेकान्तव्यवस्था-प्रकरणस्य मूले टीकायां चोपन्यस्तानां गाथादीनामकारादिका सूचिः—

	गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
१	अग्निरुष्णः०	[श्रुतिः]	१८७,	३
२	अग्निर्हिमस्य भेषजम्०	[तैत्तिरीयसंहिता–७, ४, १८]	२८७,	३
३	अजामेकाम्०	[श्वेताश्वतरोपनिषद ४, ५]	२१५,	५
४	अत्र प्रस्थकशब्देन०	[नयोपदेश० श्लो० ६३]	५३,	२१–२२
५	अत्राग्निहोत्रं०	[मैत्रायण्युपनिषद्-६, ३६]	२८६,	३–४
६	अनन्तधर्मात्मकमेष०	[अन्ययोगव्यव० श्लो० २२]	२०५,	१–२
७	अन्यत्र नित्यद्रव्येभ्य०	[कारिकावली– श्लो० २४]	३१,	१२
८	अप्रमेयमनादिं०	[पञ्चदशीतृप्तिदी० ९५]	२४५,	७–८
९	अवधीनामनिष्पत्तेर्नियतास्ते०	[ ]	३५७,	८–९
१०	अविनाशी वारेऽयमात्मा०	[श्रुतिः]	३४७,	२३
११	अव्यक्तमूलप्रभव०	[म० भा० अश्व० ४७, १२]	१०६,	१४–१५
१२	अव्यावृत्ताऽननुगत०	[ ]	२६९,	५–६
१३	असङ्गो ह्ययं पुरुषः	[श्रुतिः]	३४३,	२२
१४	असदकरणादुपादान०	[सांख्यकारिका–९]	३२९,	१–२
१५	अस्त्यर्थः सर्वशब्दानामिति०	[वाक्यपदीयकाण्ड० २, १११]	२१२,	२–३
१६	अस्थूलमनण्वह्रस्वम्	[बृहदारण्यकोपनिषद् ३, ३, ८]	२६२,	१८
१७	अहो चित्रं चित्रं तव०	[स्तुतिद्वात्रिंशति]	५०,	१४–१६
१८	अहं नित्य-शुद्ध-बुद्ध-मुक्त०	[श्रुतिः]	२४०,	१३–११
१९	अहं ब्रह्मेति वाक्यार्थबोधो०	[पञ्चदशीयतृप्तिदी० ९८]	२४७,	१२-१३
२०	अहं ब्रह्माऽस्मि	[तेजोबिन्दूपनिषद् ३, २६]	२४०,	९–१०
२१	अहिंसाऽ-सत्या-ऽस्तेय०	[पातञ्जलयोग० पाद–२, सू० ३२]	२५३,	२–३

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
२३ आकाशस्यावगाहः	[तत्त्वार्थ० अ० ५, सू० १८]	६,	२२
२३ आचार्यवान् पुरुषो वेद०	[छान्दोग्योपनिषद् ६, १४, २]	२४९,	१०–११
२४ आजीव्यः सर्वभूतानां०	[म० भा० अश्व० ४७, १४]	१०६,	२०–२१
२५ आदावन्ते च यन्नास्ति०	[अध्यात्मोपनिषद् ३१]	६१,	७
२६ आनन्दं ब्रह्म०	[बृहदारण्यकोपनिषद्–अध्या० ३, ब्रा० ९, २८]	२१३,	६
२७ आविर्भाव-तिरोभाव०	[विशेषावश्यकभाष्य–गा० २६६६]	९१,	१–२
२८ आश्रयत्व-विषयत्वभागिनी०	[संक्षेपशारीरके–१, ३१९]	३१९,	२५–२६
२९ आहाऽवक्खाणमिदं०	[विशेषावश्यकभाष्य–गा० २६५१]	७१,	५–६
३० इच्छइ जं दव्वनओ०	[विशेषावश्यकभाष्य–गा० २६४४]	६३,	३–४
३१ इच्छइ सो तेणोभय०	[विशेषावश्यकभाष्य–गा० २६५५]	७४,	४–५
३२ इत्येष सप्तविधोऽर्थस्तत्त्वम्०	[तत्त्वार्थभाष्ये]	८,	१
३३ इन्द्रो मायाभिः पुरूप ईयते	[बृहदारण्यकोपनिषद्-२, ५, १९]	२१६,	८
३४ इहरा जीवाऽणन्नं०	[विशेषावश्यकभाष्य–गा० २६५९]	७५,	३–४
३५ इहरा समूहसिद्धो०	[सम्मति० का० १, गा० २७]	३१३,	५–६
३६ उक्ता नयार्थास्तेषां ये०	[नयोपदेश० श्लो० ५३]	५३,	१–२
३७ उत्पन्नात्मावबोधस्य०	[ ]	२५७,	३–४
३८ उप्पज्जंति चयंति य०	[सम्मति० का० १, गा० ११]	३००,	३–४
३९ उपज्जंति वियंति य०	[विशेषावश्यकभाष्य–गा० २६४८]	६८,	५–६
४० उप्पायभंगुरा जं गुणा०	[विशेषावश्यकभाष्य–गा० २६६३]	९०,	१–२
४१ उप्पायभंगुराणं०	[विशेषावश्यकभाष्य–गा० २६६१]	८५,	६–७
४२ उप्पाय-विगम०	[विशेषावश्यकभाष्य–गा० २६४९]	७०,	७–८
४३ उप्पायाइ सहावा०	[विशेषावश्यकभाष्य–गा० २६५२]	७१,	७–८
४४ ऊर्ध्वमूलमधः०	[गीता–अ० १५, श्लो० १]	१०६,	१–२
४५ ऊर्ध्वमूलोऽवाक्शाख०	[कठ० ६, १]	१०६,	१२–१३
४६ एए पुण संगहओ०	[सम्मति० का० १, गा० १३]	३०२,	३–४

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
४७ एकग्रहणगृहीता०	[ ]	४९,	६-७
४८ एकमेवाऽद्वितीयम्	[छान्दोग्योपनिषद्-६, २, १]	२०९,	१
४९ एकमेवाऽद्वितीयं ब्रह्म०	[अध्यात्मोपनिषद्-६३]	२१३,	९
५० एकया पूर्णाहुत्या०	[ ]	२८६,	५-६
५१ एको भावः सर्वथा०	[ ]	२७९,	१९-२०
५२ एगते णणु दव्वं०	[विशेषावश्यकभाष्य-गा० २६५६]	७४,	६-७
५३ एतच्छ्रुत्वा च०	[म० भा० अश्व० ४७, १५]	१०६,	२०-२१
५४ एतदात्म्यम्	[छान्दोग्योपनिषद्-६, १६, ३]	२४९,	३
५५ एतस्मादात्मन आकाशः सम्भूतः	[तैत्तिरीयोपनिषद्-२, १, १]	२२१,	४
५६ एते पञ्चाऽन्यथासिद्धा०	[कारिकावलि-श्लो० २१]	१४३,	१५-१६
५७ एष वः प्रथमो यज्ञो०	[ ]	२८६,	७
५८ एष सर्वेश्वरः०	[बृहदारण्यकोपनिषद् ४, ४, २२]	२१८,	१
५९ क्षणमेकं सुखी विषयाऽऽसक्तो	[प्रमाण० परि० ७, सू० १०]	५९,	८-९
६० काय-वाङ्मनः कर्मयोगः	[तत्त्वार्थ० अ० ६, सू० १]	७,	९
६१ कार्यस्यैव न योगश्च०	[ ]	३३३,	५-६
६२ कारीर्या वृष्टिकामो यजेत	[ ]	२४८,	९-१०
६३ कालः पचति भूतानि०	[ ]	१०९,	११-१२
६४ कुंभो भावाऽणच्चो०	[विशेषावश्यकभाष्य-गा० ११०८]	२१०,	२-३
६५ गतिस्थित्युपग्रहो०	[तत्त्वार्थाधिगम० अ० ५, सू० १७]	६,	१६-१७
६६ गृहे च वसतिः कोणे०	[नयोपदेश० श्लो० ६८]	५४,	७-८
६७ चक्षुर्दीपापेक्ष्यते०	[पञ्चदशीतृप्तिदी० ९३]	२४४,	१४-१५
६८ चूओ वणस्सइ चिय०	[विशेषावश्यकभाष्य-गा० २२१०]	२११,	१-२
६९ चैतन्यं पुरुषस्य स्वरूपम्	[ ]	३७४,	४
७० छिन्नद्मि प्रत्यकं०	[नयोपदेश० श्लो० ६४]	५३,	२३-२४
७१ जइ पज्जवोवयारो०	[विशेषावश्यकभाष्य-गा० २६७१]	९९,	७-८
७२ जइ पज्जायनउ चिय०	[विशेषावश्यकभाष्य-गा० २६५४]	७४,	२-३

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
७३ जइ वा दव्वादन्ने०	[विशेषावश्यकभाष्य-गा० २६७०]	९८,	६-७
७४ जं कावि‍लं दरिसणं०	[सम्मति० का० ३, गा० ४८]	३२०,	१
७५ जं जं जे जे भावे परिणमइ०	[विशेषावश्यकनि० गा० २६६७]	९२,	२–३
७६ जं जाहे जं भावं०	[विशेषावश्यकभाष्य-गा० २६६८]	९७,	२–३
७७ जे एगं जाण०	[आचाराङ्ग-श्रु० १, अ० ३, उ० ४, सू० ११२]	२७९,	४–५
७८ जे वयणिज्जविअप्पा	[	२०६,	१४–१५
७९ जनकं प्रतिपूर्ववर्तिता०	[कारिकावलि-श्लो० २०]	१४३,	१३–१४
८० जहऽणेगलक्खण-गुणा०	[सम्मति० का० १, गा० २२]	३०६,	८–९
८१ जह एए तह०	[सम्मति० का० १, गा० १५]	३०२,	७–८
८२ जह पुण ते चेव मणी०	[सम्मति० का० १, गा० २४]	३०७,	४–५
८३ जह भिन्नोभयगाही०	[विशेषावश्यकभाष्य-गा० २६५७]	७४,	८–९
८४ जह रूवाइविसिट्ठो०	[विशेषावश्यकभाष्य-गा० २६४७]	६४,	४–५
८५ जागरितस्थानो बहिःप्राज्ञः	[माण्डूक्योपनिषद्, ३]	२३१,	१
८६ जीवस्स य सामाइयं०	[विशेषावश्यकभाष्य-गा० २६५३]	७२,	१–२
८७ जीवाऽजीवाऽऽश्रवबन्ध०	[तत्त्वार्थाधिगम० अ० १, सू० ४]	५,	१
८८ जीवे स्कन्धेऽप्यनन्ते०	[नयोपदेश० श्लो० ६०]	५३,	१५–१६
८९ जीवो गुणपडिवन्नो०	[विशेषावश्यकनिर्युक्ति० गा० २६४३]	६१,	१–२
९० णय तइओ०	[सम्मति० का० १, गा० १४]	३०२,	५-६
९१ णिययवयणिज्जसच्चा०	[सम्मति० का० १, गा० २८]	३१५,	४–५
९२ ततः सत्यक्तः कायात्०	[	२२१,	६–७
९३ तत् त्वमसि	[छान्दोग्योपनिषद् ६, ८, ७]	२१३,	१४
९४ तत्त्वं परमार्थः	[	३४,	३
९५ तत्त्वं बुद्ध्वाऽपि कामादीन्०	[पञ्चदशी—	२५६,	१६–१७
९६ तदभिन्नाऽभिन्नस्य तदभिन्नत्वम्	[	३४४,	१४–१५
९७ तदर्थस्तत्र तत् काला०	[नयोपदेश० श्लो० ६९]	५४,	९ १०
९८ तन्मात्रस्य समुद्रत्वे०	[	५१,	११ १२

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
९९ तब्भेयकप्पणाओ०	[विशेषावश्यकभाष्य-गा० २६६२]	८५,	८-९
१०० तमेतावति शुद्धौ०	[नयोपदेश० श्लो० ६५]	५३,	२५-२६
१०१ तमेवं वेदानुवचनेन ब्राह्मणा०	[ ]	२८९,	१
१०२ तम्हा किं सामइयं०	[विशेषावश्यकभाष्य-गा० १६५८]	७५,	१-२
१०३ तम्हा सव्वे वि णया०	[सम्मति० का० १, गा० २१]	३०३,	४-५
१०४ तस्याभिध्यानाद् योजनात्०	[श्रुति—]	२७०,	५
१०५ तस्यैव व्यभिचारादौ०	[ ]	३८३,	८-९
१०६ तह णिययवायसुविणिच्छिया०	[सम्मति० का० १, गा० २३]	३०७,	४-५
१०७ तह सव्वे णयवाया	[सम्मति० का० १, गा० २५]	३०८,	७-८
१०८ तृतीयं तु भवेद् व्योम०	[कारिकावलि-श्लो० २१]	१४३,	१७-१८
१०९ ते जप्पभवा जं वा०	[विशेषावश्यकभाष्य-गा० २६५०]	७१,	१-२
११० तेषामेकैकं त्रिवृत्तं०	[श्रुति—]	२२७,	२३
१११ तेष्वप्यभीष्टसमये०	[नयोपदेश० श्लो० ७२]	५४,	१५-१६
११२ ते हुंति परावेक्खा०	[ ]	३०,	४-५
११३ त्रिगुणमविवेकिविषयः०	[सांख्यकारिका-११]	३२५,	२-३
११४ दध्ना जुहोति	[ ]	३५,	६
११५ दवट्ठिओ त्ति तम्हा०	[सम्मति० का० १, गा० ९]	२९८,	४-५
११६ दव्वट्ठियनयपयडी०	[सम्मति० का० १, गा० ४]	१०४,	४-५
११७ दव्वट्ठियवत्तव्वं०	[सम्मति० का० १, गा० १०]	२९९,	६-७
११८ दव्वं परिणाममित्तं	[विशेषावश्यकभाष्य-गा० १६७२]	१००,	१०-११
११९ दव्वं पज्जवविजुयं	[सम्मति० का० १, गा० १२]	३०२,	१-२
१२० दह्यते गिरिरप्याऽसौ०	[नयोपदेश० श्लो० २६]	२९१,	२३
१२१ दासेन मे खरः क्रीतो०	[नयोपदेश० श्लो० ५५]	५३,	५-६
१२२ द्वादश मासा संवत्सरः	[सहवा० उ० १२]	१८७,	२
१२३ द्वाभ्यां नयाभ्यामुन्नीतमपि०	[नयोपदेश-११८]	२०६,	४-५
१२४ दुर्घटं घटयामीति०	[पञ्चदशीचित्रदीप० २३४]	२६४,	४-५

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
११५ दृशि स्वरूपं गगनोपमं वरं०	[मुक्तिकोपनिषद्–२, ७३]	२५१,	४–५
१२६ देवात्मशक्तिं स्वगुणैर्निगूढां०	[श्वेताश्वतरोपनिषद्–१, ३]	२१४,	१
१२७ द्वे ब्रह्मणी वेदितव्ये	[त्रिपुरातापिन्युपनिषद्–४, १७]	२८५,	३
१२८ दोहि वि णएहिं णीयं०	[विशेषावश्यकमहाभाष्ये– गा० २१९५, सम्मतितर्के ३–४९]	५७,	४–५
१२९ दोहिं वि णएहिं णीयं	[सम्मति० का० ३, गा० ४९]	२०५,	५
१३० धर्मा-ऽधर्मा-ऽऽकाश-जीव०	[नयोपदेश० श्लो० ५४]	५३,	३–४
१३१ धर्मिणः प्रसिद्धिः क्वचिद्०	[प्रमाण० परि० ३, सू० २१]	६६,	१५–१६
१३२ नणु भणियं पज्जायट्ठियस्स०	[विशेषावश्यकभाष्य-गा० २६६०]	८४,	३–४
१३३ न तस्य प्राणा०	[नृसिंहोपनिषद्, ५]	२५७,	९
१३४ न निरोधो न चोत्पत्ति०	[पञ्चदशीचित्रदीप० २३५]	२६४,	६–७
१३५ न प्रकृतिर्नापि विकृतिः पुरुष०	[साङ्ख्यकारिका–३]	३७९,	११
१३६ न यावत् सममभ्यस्तौ०	[ ]	२४६,	३–४
१३७ न सदकरणादुपादान०	[ ]	३४६,	११–१२
१३८ न सुवन्नादन्नं०	[विशेषावश्यकभाष्य–गा० २६६९]	९७,	१०–११
१३९ नाऽयं वस्तु न चाऽवस्तु०	[ ]	५१,	९–१०
१४० नास्वादयेद् रसं तत्र०	[अद्वैत प्र० ४५]	२५४,	६
१४१ नित्यसत्त्वा भवन्त्येके०	[ ]	१०८,	२५–२६
१४२ नित्यं विज्ञानमानन्दं ब्रह्म०	[ ]	३४३,	२२–२३
१४३ निर्विकल्पमनन्तं च०	[त्रिपुरातापिन्युपनिषद्, ५, ९]	२४५,	१२–१३
१४४ निःशेषांशजुषां०	[पञ्चाशत—]	५०,	१८–२०
१४५ नीयते येन श्रुताख्य०	[प्रमाण० परिच्छेद–७, सू० १]	५०,	४–६
१४६ पज्जवणयवुक्कंतं०	[सम्मति० का० १, गा० ८]	२९६,	२–३
१४७ पज्जाओ च्चिय वत्थुं०	[विशेषावश्यकभाष्य–गा० २६४५]	६३,	५–६
१४८ पज्जायनयमयमिणं०	[विशेषावश्यकभाष्य–गा० २६४६]	६४,	२–३
१४९ पञ्चप्रकारः प्रत्येकं०	[नयोपदेश० श्लो० ५७]	५३,	९–१०

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
१५० पञ्चविंशतितत्त्वज्ञो०	[ ]	३२३,	३-४
१५१ परं चापरं च	[ ]	२८६,	१
१५२ पशुकामो वायव्यं श्वेतं	[ ]	२८९,	१८-१९
१५३ पुरुष एवेदं सर्वं०	[पुरुषसूक्तान्तर्गतोऽयं मन्त्रः]	१०५,	१०-११
१५४ पुरुष एवेदं सर्वम्	[नृसिंहपूर्वतापिन्युपनिषद्, ५, १]	२८५,	३
१५५ पुरुषस्य दर्शनार्थं०	[साङ्ख्यकारिका-२१]	३७८,	३-४
१५६ पूर्वापरपरिणामसाधारणं०	[प्रमाण० परिच्छेद० ५, सू० ५]	४६,	१६-१७
१५७ प्रकृतेर्महांस्ततो०	[साङ्ख्यकारिका-२२]	३२२,	२-३
१५८ प्रतिव्यक्तितुल्या०	[प्रमाण० परिच्छेद० ५, सू० ४]	४५,	१३-१४
१५९ प्रत्येकवृत्तिः साकाङ्क्षा०	[नयोपदेश० श्लो० ५९]	५३,	१३-१४
१६० प्रत्येकं यो भवेद् दोषो०	[ ]	२७७,	६
१६१ प्रमाण-प्रमेय०	[न्यायसू० अ० १, सू० १]	३२,	२३-२५
१६२ प्रविविक्तभुक् तैजसः	[श्रुति०]	२६६,	८
१६३ प्रस्थकश्चर्जुसूत्रस्य०	[नयोपदेश० श्लो० ६६]	५४,	३-४
१६४ प्रस्थकार्थं व्रजामीति०	[नयोपदेश० श्लो० ६२]	५३,	१९-२०
१६५ फलवत्सन्निधौ०	[ ]	२८७,	१८
१६६ फलव्याप्यत्वमेवास्य०	[पञ्चदशीतृप्तिदी० ९०]	२४३,	३
१६७ बन्ध-मोक्षव्यवस्थार्थं०	[पञ्चदशीदीपप्रकरण-२३३]	२६४,	२-३
१६८ बहुनिगद्य किमत्र वदाम्यहं०	[संक्षेपशारीरके १, ३३१]	२१०,	८-९
१६९ बाढं सन्ति०	[पञ्चदशीतृप्तिदी० ९९]	२४७,	१४-१५
१७० बीयस्स दव्वमेतं०	[विशेषावश्यकभाष्य-गा० २६६५]	९०,	१४-१५
१७१ बुद्धाद्वैतस्वतत्त्वस्य०	[पञ्चदशीद्वैतवि० ५५]	२५६,	५-६
१७२ बुद्धि-तत्स्थचिदाभासौ०	[पञ्चदशीतृप्तिदी० ९१]	२४३,	१४-१५
१७३ बोधात् पुरा०	[५६]	२६५,	२०-२१
१७४ ब्रह्मण्यज्ञाननाशाय०	[पञ्चदशीतृप्तिदी० ९१]	२४३,	१६-१७
१७५ ब्रूते समभिरूढस्तु०	[नयोपदेश० श्लो० ६१]	५३,	१७-१८

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
१७६ भजनाया विकल्पत्वाद्०	[नयोपदेश० श्लो० ५९]	५३,	१३–१४
१७७ भेदानां परिमाणाद्०	[साङ्ख्यकारिका–१५]	३३४,	३–४
१७८ मनसैवानुद्रष्टव्यम्०	[बृहदारण्यकोपनिषद् ४, ४, १९]	२४२,	७
१७९ मनसैवेदमाप्तव्यं०	[कठवल्ल्यां ४, ११]	२४५,	१७–१८
१८० मनोबुद्धिरहङ्कारश्चित्तं०	[ ]	१२३,	१८–१९
१८१ महाभूतविशाखश्च०	[म० भा० अश्व० ४७, १३]	१०६,	१६–१७
१८२ माया सती चेद्०	[अन्ययोगव्य० १३]	२७४,	५
१८३ मूलप्रकृतिरविकृतिः०	[साङ्ख्यकारिका–३]	३३७,	४–५
१८४ यः सर्वज्ञः स सर्वविद्	[श्रुति–]	२१६,	२
१८५ यज्ञानां जपयज्ञोऽहम्	[गीता, १०, २५]	२९०,	१
१८६ यत् त्वन्यत्र गतस्यापि	[नयोपदेश० श्लो० ७०]	५४,	११–१२
१८७ यत्र जन्यस्य पूर्वभावं०	[चिन्तामणि०]	१६३,	४–७
१८८ यत्रान्यत् क्रियावाचिपदं न श्रूयते०	[ ]	२११,	१६–१७
१८९ यथा कटकशब्दार्थः०	[ ]	२९४,	६–७
१९० यथा दीपो निवातस्थो०	[गीता–६, १९]	२५४,	७
१९१ यथा सौम्यैकेन मृत्पिण्डेन०	[छान्दोग्योपनिषद्-६, १, ४]	२५०,	३–४
१९२ यद् भूतं यच्च भाव्यम्०	[ ]	१०५,	१२–१३
१९३ यदृच्छैव होत्रं क्रियते०	[ ]	२४८,	८
१९४ यदेव दधि तत् क्षीरं०	[ ]	३३८,	६–७
१९५ यन्मनसा न मनुते०	[केनोपनिषद्, १, ५]	२४३,	१
१९६ येन सह पूर्वभावः०	[कारिकावलि–श्लो० १९]	१४३,	११–१२
१९७ येनाश्रुतं श्रुतं भवत्यमतं०	[छान्दोग्योपनिषद् ६, १,३]	२४९,	१३
१९८ यम-नियमा-ऽऽसन०	[पाताञ्जलयोगदर्शनद्वितीयपादे–सू०२९]	२५२,	७–९
१९९ रूप-रस-गन्ध-स्पर्शाः०	[वैशेषिकदर्शनोपस्कार०]	११३,	१०–१२
२०० रूपिणः पुद्गलाः	[तत्त्वार्थ० अ० ५, सू० ४]	६,	२४
२०१ लये सम्बोधयेच्चित्तं०	[अद्वैतप्र० ४]	२५४,	४–५

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
२०२ लिङ्ग–लिङ्गिधियोरेवं०	[ ]	३६७,	३-४
२०३ लोइयपरिच्छयसुहो०	[सम्मति० का० १, गा० २६]	३११,	१–२
२०४ लोके च तिर्यग्लोके च०	[नयोपदेश० श्लो० ६७]	५४,	५-६
२०५ लोहितोष्णीषा०	[ ]	३५,	५
२०६ वच्चइ विणिच्छयत्थं०	[विशेषावश्यक–निर्यु० गा० २१८३]	२९१,	७
२०७ वत्सवितृद्धिनिमित्तं०	[साङ्ख्यकारिका–५७]	३८४,	४ ५
२०८ वर्णागमोवर्णविपर्ययश्च०	[ ]	५२,	९–१०
२०९ वस्तु पर्यायवद् द्रव्यम्०	[प्रमाण० परि० ७, सू० ९]	५९,	५–६
२१० वह्निरुष्णो जलं शीतं०	[ ]	१०९,	५–६
२११ वायव्यं श्वेतं छाग०	[ ]	२८८,	१६
२१२ वायुर्वै क्षेपिष्ठा०	[तैत्तिरीयसंहिता–२, १, १]	२८८,	१
२१३ विक्षेपशक्तिर्लिङ्गादि०	[सरस्वतीरहस्योपनिषद्, १८]	२२०,	६
२१४ विड्वराहादितुल्यत्वं०	[ ]	२५६,	२२-२३
२१५ विधिरत्यन्तमप्राप्तौ	[ ]	२८६,	१६-१७
२१६ विमुक्तश्च विमुच्यते	[कठोपनिषद्–१]	२५७,	१०
२१७ वेदान्तानाम०	[पञ्चदशीयतृप्तिदी० १०१]	२४७,	१८–१९
२१८ व्यक्तेरभेदस्तुल्यत्वं०	[ ]	३१,	६
२१९ व्यवहारस्तु पञ्चानां०	[नयोपदेश० श्लो० ५६]	५३,	७–८
२२० व्यावर्त्याऽभाववत्तैव०	[न्यायकुसुमाञ्जलि० स्त० ३, का० २]	२०१,	१३–१४
२२१ शाखाभेदात् काम०	[पञ्चदशीयतृप्तिदी० १००]	२४७,	१६–१७
२२२ शिवमद्वैतं चातुर्थं मन्यन्ते	[श्रुति०]	२१८,	४–५
२२३ शुद्धा ह्येतेषु सूक्ष्मार्था०	[नयोपदेश० श्लो० ७४]	५४,	१९-२०
२२४ शौच-सन्तोष तपः०	[पातञ्जलयोग० पाद–२, सू० ३२]	२५३,	२–३
२२५ श्येनेनाऽभिचरन् यजेत	[ ]	२९०,	४–५
२२६ स आस्रवः	[तत्त्वार्थ० अ० ६, सू० २]	७,	११
२२७ संगहिय–पिंडियत्थं०	[विशेषावश्यक–गा० २१८३]	२०८,	११–१२

गाथादिकम्	स्थलम्	पत्रम्	पङ्क्तिः
१२८ सङ्ग्रहोवसर्ति ब्रूते०	[नयोपदेश० श्ल० ७१]	५४,	१३-१४
१२९ सचक्षुरचक्षुरिव सकर्णोऽकर्णः	[श्रुति०]	२५६,	१
१३० सच्चिदानन्दरूपं ब्रह्म	[अद्वयतारकोपनिषद्-६]	२७८,	५-६
१३१ सचैतन्यमात्मनि०	[प्रमाण० परि० ७, सू० ८]	५९,	२-३
१३२ सत्यं ज्ञानमनन्तं ब्रह्म०	[तैत्तिरोपनिषद्-वल्ली-२, अनु० १, १]	२१३,	५
१३३ सदेव सत् स्यात्०	[अन्ययोगव्यवच्छेदिका-श्लो० २८]	३१६,	९-१०
१३४ स भूमृदष्टावपि लोकपालः	[ ]	४९,	५-६
१३५ सर्वं ब्रह्मव०	[तेजोविन्दूपनिषद्-६, ४]	२१८,	७
१३६ सव्वणयसमूहम्मि वि०	[सम्मति० का० ५, गा० १६]	३०१,	९-१०
१३७ सवियप्पणिव्वियप्पं०	[सम्मति० का० १, गा० ३५]	२८२,	४-६
१३८ सामानाधिकरण्यं च०	[ ]	२३५,	१-२
१३९ सुखमहमस्वाप्सं न किञ्चिदवेदिषम्०	[स्मृति०]	२१४,	२४-२५
१४० स्वतोऽनुवृत्ति०	[अन्ययोगव्य० श्लो० ४]	१९३,	७-८
१४१ स्वप्रकाशोऽपि साक्ष्येव०	[पञ्चदशीतृप्तिदी० ९०]	२४३,	१०-१३
१४२ स्वस्मिन् स्ववसतिं प्राहुः०	[नयोपदेश० श्लो० ७३]	५४,	१७-१८
१४३ स्वाध्यायोऽध्येतव्यः	[ ]	२८८,	११-१२
१४४ स्थितोऽप्यसौ चिदाभासो०	[पञ्चदशीतृप्तिदी० ९४]	२४४,	२०-२१
१४५ हृदि प्राणो गुदेऽपानः०	[ ]	२२४,	२४-२५
१४६ हेतुमदनित्यमव्यापि०	[सांख्यकारिका-१०]	३२५,	७-८

॥ तत्त्वबोधिनीविवृतिविभूषितस्यानेकान्तव्यवस्थाप्रकरणस्य शुद्ध्यशुद्धिपत्रम् ॥

अशुद्धम	शुद्धम्	पृ.	पं.
व्यस्था	व्यवस्था	१	३
जन	जैन	२	११
णं	ण	२	१२
नुनुब	नुब	२	१२
त	तं	२	१९
गादिरा	गरा	२	२१
तंभ	त भ	२	२५
जिन	जिनं	३	१
व्यस्था	व्यवस्था	३	८
शपत्य	स्पृशत्य	४	९
जिगमत	जिनमत	३	११
नित्यत्वत्वम्	नित्यत्वम्	४	१६
धितत्वा	धित्वा	४	१९
विद्य	विध	४	२१
तक	तैक	५	७
कस्वस्व	कस्व	५	७
कः	कः,	५	१८
र्यस	र्य–स	५	२०
त्तवचा	त्तव–चा	५	२०
ष्यदे	ष्य–दे	५	२७
प्रति प	प्रतिप	६	८
यैवध	यैव ध	६	२०
क्रिया	क्रिया	७	६
कमणो	कर्मणो	७	११
त्युद	त्युपद	७	१२
णप	णं प	७	१२
प्रक्षा	प्रेक्षा	७	१६
नाऽ–	ना–ऽ	७	१९
दार्थ	दर्थ	७	१९
वृतिस	वृतिपरिस	७	२०
नर–स	न–रस	७	२०
विविक्तिश	विविक्तश	७	•
तत्त्वाथ	तत्त्वार्थ	८	२३
सूत्र	सूत्रे	९	८
पदार्थसु	पदार्थेषु	९	१२
नय	नय–	९	१७
त्यर्थ।	त्यर्थः।	९	१७
नेन्वेवं	नन्वेवं	११	१३
पाथक्ये	पार्थक्ये	११	२२
त्यर्थ	त्यर्थं	१२	२३
पूत्ते	पूर्त्ते	१२	२५
काय	कार्यं	१३	२
कमि	कत्वमि	१४	२१
त्यथं	त्यर्थं	१५	१२
दन	दनं	१६	१२
सङ्ख्या	सङ्ख्या	१६	२०

अशुद्धम्	शुद्धम्	पृ.	पं.
दाथगता	दार्थगता	१६	२७
क्याज्ञा	क्याज्ञा	१७	१६
वेदाना	वेदना	२४	३
साङ्क्य	साङ्क्यं	२५	२२
न्न प्र	न्नप्र	२७	२०
सवषां	सर्वेषां	२७	२०
क मे	कमे	२७	२१
मस्व	मत्वस्व	२८	२
कत्वं	कत्वे	३१	११
ऽपिजा	ऽपि जा	३२	१९
कयपि	कयऽपि	३३	३
पपति	पतति	३३	२१
महदास	महदसा	३४	२
पदाथ	पदार्थ	३४	७
वाद्यव	वाद्यन्यतमत्वाव	३४	१३
प्रतिक	प्रति क	३१	२४
सर्वत्रंति	सर्वत्रेति	३७	१४
बोधान्तर	बोधानन्तर	३७	१६
मित	मितं	३७	२४
चेति–	चेति,	३७	२५
रूपमत्व	रूपत्व	३८	११
भावात्मपरि	भावात्मकपरि	३८	२३
द्वविध्यम्	द्वैविध्यम्	३९	१४
मत्व	मवत्त्व	३९	२०
अतात्त्विकः	अतात्त्विकः ।	३९	२४
कत्व	कत्वं	४०	६
सदश	सदंश	४०	२०
कवं	कथं	४०	२२
जनमते	जैनमते	४२	१२
शेष,	शेषः,	४३	९
अभाव–	अभावा–	४३	१८
सवा	सर्वा	४३	२४
स्ववरू	स्वस्वरू	४५	५
भवां	भावां	४५	११
कत्व	कत्वं	४६	९
क्षणक	क्षणैक	४६	१५
पूर्व	पूर्वं	४६	२१
स्तथव	स्तथैव	४६	२५
प्रक्षेप्तु	प्रतिक्षेप्तु	४७	१२
परि	प्रति	५०	९
मेनन्मु	मेतन्मु	५०	१४
वस्तु	वस्तु,	५१	१८
स्वर्थैका	स्वार्थैक	५१	२०
नैकः	नैकैः	५१	२४
यं यान्नगमः	र्यायान्नैगमः	५२	१
निबोधा	निवेशा	५२	३
मान्यदि	मान्यादि	५२	४
मत्वं	मत्त्वं	५२	१५
त्यव	व्यव	५४	७
नगम	नैपगा	५४	२३
द्रव्यार्थिकौ	द्रव्यार्थिक–पर्यायार्थिकौ	५७	९

अशुद्धम्	शुद्धम्	पृ.	पं.
नीत	नीतं	५७	१८
रजुसूत्राः	रर्जुसूत्राः	५८	१५
अन्त्यस्त्रयः	अन्त्यास्त्रयः	५८	१५
चिन्नगमस्य	चिन्नैगमस्य	५८	२१
त्रविध्य	त्रैविध्य	५९	१२
पर्जन	पसर्जन	५९	२०
इत्येना	इत्यनेना	६०	२१
यिका	यिका–	६१	१८
न सत्	न सन्	६१	२३
गुणाः	गुणः	६२	१२
ख्यामिति	ख्यानमिति	६२	१४
गुणशिष्ट	गुणविशिष्ट	६३	१५
सांवृतो	सांवृती	६४	९
व्याहि	व्यवहि	६४	२०
न्धा	न्धो	६८	१२
द्ध	र्द्धं	६९	१६
भ्याहित	भ्यर्हित	७०	१७
चर्चा	त्रया	७२	१४
मे	मि	७३	१२
पर्यायागत	पर्यायगत	७४	१०
देर्विगलि	देर्निगलि	७४	१४
कतयैव	कनयेनैव	७५	१७
त्यूह	त्यूहं	७८	२३
एक	एव	७८	२५
सामान	समान	७९	६
संवितसं	संवित्सं	७९	७

अशुद्धम्	शुद्धम्	पृ	पं.
प्याधि	प्यधि	७९	१३
इत्यात्रा	इत्यत्रा	८०	१८
पर्यायात्वा	पर्यायत्वा	८१	११
इात	इति	८१	२३
न्तर	न्यतर	८२	७
ङ्क्षाऽव्यु	ङ्क्षाव्यु	८३	५
ङ्क्षाऽव्यु	ङ्क्षाव्यु	८३	१५
सतः	सातः	८३	२३
इ ति	इति	८४	२२
याग	ग	८६	१०
नब	निब	८६	१४
सद्मे	तद्मे	८६	२२
ममेदा	ममेदा	८७	१४
मेद	भेद	८७	१७
न्धत्रै	न्धनवै	८८	८
पत्तः	पत्तेः	८९	८
गदे	ग.दे	८९	९
सणन	समान	८९	१३
बोधप्रति	ब धं प्रति	८९	१४
शील	शीलं	९१	८
ण 'त्ति	णा 'त्ति	९४	५
त्मिकेवे	त्मिकैवे	९४	१७
तद्भावे	तद्भावे	९४	२३
मेदेऽपि	मेदेऽपि	९५	२२
प्रधान्यना	प्राधान्येना	९६	१
दित	दिति	९६	४

अशुद्धम्	शुद्धम्	पृ.	पं.
केवालनात	केवलिनेति	९६	१२
प्रधान्यनात	प्राधान्येनेति	९६	१२
विषयाक्रय	विषय	९६	१७
णा	णां	९६	१९
वाादि	वादि	९६	१९
तस्यव	तस्यैव	९६	२३
प्रामाण्य	प्रामाण्यं	९६	२४
खरशङ्गम्	खरशृङ्गम्	१०१	३
खरशङ्गम्	खरशृङ्गम्	१०१	४
तदवं	तदेवं	१०२	३
कथ	कथं	१०२	८
र्यांया	र्यायो	१०२	१०
न्याव	न्यवि	१०२	११
पार	परि	१०२	१२
कथ	कथं	१०२	१२
नाम	नमि	१०२	१३
द्रव्याशा	द्रव्यांशा	१०२	१४
द्रव्याथक	द्रव्यार्थिक	१०२	१४
तदवाम	तदेवमिति	१०२	१५
पात	पति	१०२	१६
याथिक	र्यार्थिक	१०२	१७
र्याय	र्यायं	१०२	२०
द्रव्याथिक	द्रव्यार्थिक	१०२	२२
नोत	ति	१०२	२६
नगम	नैगमः	१०४	१३
प्राति	प्राप्ति	१०६	५

अशुद्धम्	शुद्धम्	पृ.	पं.
यश्चव	यश्चेव	१०६	१५
योऽन्या	योऽन्यो	१०७	१३
स्तौत	स्तौति	१०७	१४
कतृत्वा	कर्तृत्वा	१०७	२०
अपरेस्त्विति	अपरैस्त्विति	१०७	२६
कश्चित्	कैश्चित्	१०८	६
सेश्वरक्षे	सेश्वरपक्षे	१०८	१०
तत्तत्फलाप	तत्तत्फलोप	१०८	१६
कार्यं	कार्यं	१०८	१७
काय	कार्यं	१०८	१८
कश्चिद्	कैश्चिद्	१०८	१९
मप	मुप	१०८	२१
कय	कार्यं	१०८	२३
काय	कार्यं	१०९	३
नयायिका	नैयायिका	१०९	१५
रेवक	रेवेक	१०९	१९
स्वभावा	स्वभावो	१०९	२०
मूतम्	मूर्त्तम्	११०	२
वतमानं	वर्त्तमानं	११०	२६
तन्नव	तन्नव	१११	२३
मित	मिति	११२	३
सिद्धः	सिद्धिः	११२	७
जगत	जगतो	११२	२५
षस्य,ल	षस्य ल	११३	२५
नवैव	नवैव	११५	१५
भ्युप वैव	भ्युपगवैव	११५	२२

अशुद्धम्	शुद्धम्	पृ.	पं.
समवायादिना	स्वाश्रयसम-वायादिना	११६	१०
किञ्चति	किञ्चेति	११६	१७
वह्निर्ह्रदे	वह्निर्वह्निरे	११६	१९
मण्यादे प्र	मण्यादेः प्र	११७	५
द्विविधकारण–	द्विविधकारणत्व–	११७	१५
एवं चोतेजका-भावविशिष्टम-प्याद्यभावस्य कारणत्वम्	०	११८	१३
तृणादिजनको।	तृणादिदाह-जनको।	११९	८
तृणादिजनकः	तृणादिदाहजनकः	११९	९
स्तादश	स्तादृश	११९	१६
नत्वप्रतिबद्धत्वं	नन्वप्रतिबद्धत्वं	१२०	५
काल वि	कालवि	१२०	२३
एवोत्त	एवोते	१२०	२५
निर्मथना	निर्मन्थना	१२१	३
गुरू	गुरु-	१२१	१६
तरपीति	तैरपीति	१२२	१२
स्तर्बोद्या	स्तैर्बोद्या	१२२	१९
अनेवम्भूतै	अनैवम्भूतै	१२२	२५
पापदेव	पापादेव	१२३	१५
तस्येव	तस्यैव	१२६	४
उच्छे	उच्छि	१२६	४
मभ्युपेयम्	मभ्युपेयम्	१२६	१०
न्तमा	न्तरमा	१२८	११
इत्यास्या	इत्यस्या	१३१	३
भवति,	भवति	१३५	१२
गिनीऽपि	गिनोऽपि	१३५	२६
तदा	तथा	१३७	६
दशयति-किञ्चति	दर्शयति-किञ्चेति	१३७	१८
भावन	भावेन	१३८	६
वृति	वृत्ति	१३८	७
पात्त	पत्ति	१३८	८
नंवा	नंवों	१३८	१२
वशिष्ठ्य	वैशिष्ट्य	१३८	१५
विान	विनि	१३८	१६
इात	इति	१३९	१५
चक्षुस्संयुक्त-वैशिष्ट्या, दि	चक्षुस्संयुक्त-समवायादि	१४०	२२
त्त्वे न	त्त्वेन	१४२	३
द्विविधापि	द्विविधोऽपि	१४४	६
कता	कर्त्तृ	१४४	८
व्यातरेक	व्यतिरेक	१४५	१२
यव	यैव	१४५	२२
भेवे	भवे	१४६	९
ग्रहस	ग्रहण स	१४६	१२
कार्व्यते	कार्यव्यति	१४७	२५
व्यात	व्यति	१४८	९
दराप	देरपि	१४८	१४

अशुद्धम्	शुद्धम्	पृ.	पं.
ण्डादना	दण्डादिना	१४८	१६
थ्थासाद्धः	न्यथासिद्धिः	१४८	१८
ालत्वं	शालित्वं	१४८	२०
त स्वा	यतः स्वा	१४८	२३
द्धू	तद्धू	१४९	१८
ति	रिति	१५०	५
द्वयारपि	द्वयोरपि	१५०	१२
ज्ञान	ज्ञानं	१५०	१९
तिः	पत्तिः	१५०	२३
र्वर्तित्व	पूर्ववर्त्तित्वं	१५१	५
कार	कारो	१५१	११
ब्दस्येति	शब्दस्येति	१५३	७
शब्द प्रति	शब्दं प्रति	१५३	९
वतित्व	वर्तित्व	१५३	१०
मेनो	मे नो	१५३	१५
मस्त	मस्तु	१५३	१६
कलिक	कालिक	१५४	१२
सामान्य	सामान्यं	१५४	१६
एव	एवं	१५४	१७
वतित्वं	वर्त्तित्वं	१५४	१८
सामान्य	सामान्यं	१५४	१९
पूर्व	पूर्वव	१५५	३
विशिष्य	विशिष्य	१५५	९
हेतुत्व	हेतुत्वं	१५५	१४
नचवम्	न चैवम्	१५६	६
वतित्वस्य	वर्त्तित्वस्य	१५६	६

अशुद्धम्	शुद्धम्	पृ.	पं.
वाच्छिन्न	वच्छिन्न	१५६	१०
स्वगं	स्वर्गं	१५६	११
वतित्व	वर्त्तित्व	१५६	११
ग्रह नियत	ग्रहनियत	१५६	१८
दिक	दिकं	१५६	२०
वतित्व	वर्त्तित्व	१५६	२२
दिक प्रति	दिकं प्रति	१५६	२३
श्रवणेत्वेन	श्रवणत्वेन	१५७	६
घट प्रति	घटं प्रति	१५७	७
त्वादिव	त्वादेव	१५७	२०
सिद्धत्व	सिद्धत्वं	१५९	१४
देकक	देकैक	१५९	१५
प्रति—नचेति	प्रतिक्षिपति-नचेति	१५९	२२
चक्रस्य	दण्डस्य	१५९	२४
वेऽपा	वेऽपी	१६०	१४
न्यथासद्ध	न्यथ.सिद्ध	१६०	१५
गन्धाभावो	गन्धप्रागभावो	१६०	१६
यव	यैव	१६२	३
लक्षणे	लक्षणे,	१६२	१०
यव	यैव	१६२	१५
सम्मति	सम्मतिं	१६३	१६
तद्वत्व	तद्वत्वं	१६६	७
वच्छेक	वच्छेदक	१६६	९
रासमत्वा	रासभत्वा	१६६	१९
सम्भवा	सम्भवा	१६६	२१

अशुद्धम्	शुद्धम्	पृ.	पं.
पूव	पूर्व	१६७	२२
काभूत	कीभूत	१७०	८
लानवच्छे	लाघवच्छे	१७०	१८
गान्तर	गानन्तरं	१७१	१५
हितका	हितपूर्का	१७३	२१
हित	हित–	१७३	२५
द्रव्यत्वाद्यवच्छेदेन	०	१७४	६
वर्त्तमानस्य	वत्तमानस्या-		
	भावस्य	१७४	७
आदिपदा	पदा	१७४	१४
येव तदा	येव तदा तदा	१७४	२५
भावस्यव	भावस्यैव	१७६	१९
कायस्य	कार्यस्य	१७७	२३
तत्रक	तत्रक	१७७	२६
न्धि भ	न्धित्वं भ	१७९	५
पृथमन्वय	पृथगन्वय	१८१	२२
दिक प्रति	दिकं प्रति	१८३	६
पररू	परत्वरू	१८५	८
णकस्यव	णैकस्यव	१८६	९
धमिणः	धर्मिणः	१८८	१८
परं उक्त	पर उक्त	१९०	१८
गमन्तव्य	गन्तव्य	१९०	२२
ति तत् तस्यैव	ति तस्यैव	१९१	९
अन्यता	अन्यतो	१९२	२६
नैयायिकः	नैयायिकैः	१९४	११
लिकास	लिकस	१९६	१०
धारः	धारत्वम्	१९६	२२
धार इत्यर्थः	रत्वमित्यर्थः	१९६	२३
कुण्डेत्वेन	कुण्डत्वेन	१९७	७
कुण्डेत्वेन	कुण्डत्वेन	१९७	८
नति	नेति	१९७	१४
भावता	भवता	१९७	२०
रक्तद	रक्तताद	१९८	१७
रिक्तत्व	रिक्तत्वे,	१९८	२५
योगिकत्वं	योगित्वं	१९९	९
विशिष्टति	विशिष्टेति	१९९	१७
प्रयो	प्रतियो	२००	६
विषयरू	विषयस्वरू	२०२	३
एतदङ्काङ्कितपन्त्रान्तिमपङ्क्ति-			
स्थ" तादृशप्रत्ययास्या " इत्य-			
स्यानन्तरमग्रिमपत्राष्टमपङ्क्ति-			
स्थ" प्रामाण्यं स्यादित्याह "			
इत्यारभ्यान्तिमपङ्क्ति यावत्			
ग्रन्थोऽवसेयः, अन्तिमपङ्क्तिस्थ-			
" संयोगसम्बन्धाव" इत्यस्या-			
नन्तरं चतुर्थपङ्क्तिस्थ ' च्छिन्न-			
घटनिष्ठ ' इत्यादिपङ्क्तिचतु-			
ष्टयग्रन्थोऽसेयः ।		२०२	२६
समवायन	समवायेन	२०३	६
घटवादति	घटवदिति	२०३	६
नपाति	नापीति	२०३	१०
पटो	पटौ	२०३	१७

अशुद्धम्	शुद्धम्	पृ.	पं.
पर्यायार्थक	पर्यायार्थिक	२०४	२०
द्रव्यर्थिक	द्रव्यार्थिक	२०४	२१
धनुधर	धनुर्धर	२०५	१०
दय	दयः	२०५	१६
त्वन्मि	त्वान्मि	२०६	५
शास्त्रस्य सम्यक्	शास्त्रस्य सम्यक्त्व	२०६	१०
रेकः यद्वा	रेकः, यद्वा	२०८	३
निरकृत	निराकृत	२०८	१६
समन्येति	सामान्येति	२०८	२१
क्कालं	कालं	२०९	८
अस्त्यर्थ	अस्त्यर्थः	२१२	१०
सद्भ्यादनि	सद्भ्यामनि	२१३	२
इष्ट पटः	इष्टः पटः	२१३	१२
ब्रह्मव	ब्रह्मैव	२१३	१९
प्रतात्या	प्रतीत्या	२१४	३
त्रिगुणा	त्रिगुणा	२१४	६
नित्यर्था	नित्यर्थो	२१४	१३
गना	गिनो	२१४	१६
धमिवि	धर्मिवि	२१४	२०
रूपज्ञान	रूपमज्ञानं	२१५	८
श्रततैवेति	श्रितैवेति	२१५	२३
इति इति अनेक	इत्यनेक	२१६	७
त्वायन्तं	त्वान्त	२१६	१०
ाशव	शिव	२१८	१६
लक्ष्यत्व	लक्ष्यत्वं	२१९	४
ज्ञानस्यति	ज्ञानस्येति	२१९	९
तत्रति	तत्रेति	२१९	१०
शक्तरा	शक्तेरा	२१९	११
यात्मनः	र्यात्मनः	२१९	२१
शरारम्	शरीरम्	२२०	२६
निमित्तं ०	निमित्तं स्वोपाधिप्रधानतया चोपादानं भवति, यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं	२२१	१
यमा बलात्	यमो बलात्	२२१	७
कमन्द्रिय	कर्मेन्द्रिय	२२२	५
कायषु	कार्येषु	२२२	१४
सूप्तः	स्वप्नः	२२६	१८
प्राज्ञ-विश्व	प्राज्ञ-तैजस-विश्व	२३०	११
विश्वा-वै	विश्व-वै	२३०	१६
वागाख्याकर्मे	वागाख्यकर्मे	२३०	२१
तेणा	तेना	२३१	१५
ज्ञदेः ना	ज्ञानादेः	२३२	५
मेवात्मन	मेवात्मान	२३२	१२
शरीररो	शरीरो	२३३	२०
प्रत्यगा	पदार्थ-प्रत्यगा	२३४	५
पपात्ति	पपत्ति	२३४	१३
भूत	भूतं	२३४	१४
विशिष्ट	विशिष्टदेवदत्त-	२३५	४
इति । वाक्य	इति वाक्य	२३६	१९

अशुद्धम्	शुद्धम्	पृ.	पं.
उत्पलमपि	उत्पलं	२३६	२०
तत्-त्व	तत्-त्वं	२३९	१२
व्याप्येतान्यवत्	व्याप्यतेऽन्यवत्	२४३	१२
फलव्यप्य	फलव्याप्य	२४३	२५
प्रकृतर्थो	प्रकृतार्थो	२४४	१३
व्याप्यत्व	व्याप्यत्वं	२४४	२०
रित्तेति	रिक्तेति	२४६	२३
दाठप	दार्ष्य	२४७	२२
मप्युप	मुप	२४९	२३
भावावमास	भावमास	२५२	१४
निविकल्पक	निर्विकल्पक	२५२	२३
चित्तस्याप	चित्तस्योप	२५४	२५
आशनीया	अशनीया	२५५	४
देहमत्रामात्रार्थी	देहमात्रा-मत्रार्थी	२५७	१६
ऐतेन	एतेन	२५९	२
तत्तदा	तत्तादा	२५९	१८
नामदेवा	वामदेवा	२६०	१९
कयारित्यर्थः	कयोरित्यर्थः	२६१	१२
दुर्दुरूटो	दुर्दुटो	२६३	१५
प्रपऽञ्चोपि	प्रपञ्चोपि	२६३	१९
वृत्तब्रह्मणा	वृते ब्रह्मणा	२६६	१५
अथाप	अथापि	२६६	१५
त्तयदेव	त्तयेदेव	२६८	१४
द्वताभावेति	द्वैताभावेति	२७०	६
निधर्मक	निर्धर्मक	२७०	

अशुद्धम्	शुद्धम्	पृ.	पं.
तद्वशिष्ठ्य	तद्वैशिष्ठ्य	२७०	२२
निवृत्त	निवृत्ता	२७१	१२
थमिण	धर्मिण	२७१	२५
पत्याजननी	पत्यजमनी	२७४	२३
भेदरूपोभेदा	भेदरूपो नवा-ऽभेदरूपो भेदा	२७७	५
कथ	कथं	२७७	६
सव	सर्व	२७९	१४
पारमष	पारमर्ष	२७९	१७
स्यापदशन	स्योपदर्शन	२७९	२४
वाक्यस्याखण्ड- ज्ञानव्यक्तौ	वाक्यस्य लक्षणा	२८१	१०
मात्र	मात्रं	२८२	१
अरोत्स्यत	अनुरोत्स्यते	२८२	१९
अखण्डकार	ण्डाकार	२८३	१
बह्मभिन्नत-	बह्मभिन्न	२८३	२२
मासा	मासाः	२८७	२
रिक्तन	रिक्तेन	२८७	१२
शङ्का	शङ्कां	२८७	२०
दुःख	दुःखा	२८८	११
तत्कर्तृमा	तत्कर्त्रमा	२८९	४
नेतिकर्त	नेतिकर्त्त	२८९	१३
कैदर्शि	कैर्दर्शि	२९१	९
गमपरोव्यव	गमो व्यव	२९१	१९
वेवि	वेर्वि	२९५	२०
विनिश्चश	विनिश्चयश	२९५	२१

अशुद्धम्	शुद्धम	पृ.	पं.
कोऽथ	कोऽर्थः	२९६	१०
ईदर्शः	ईदृशः	२९६	२५
मनिर्विकल्प	मविकल्प	२९६	२५
न्यो प	न्योम	३००	१
इतिरेति	इतरेति	३००	९
जानितो	जनितो	३००	१०
या माह	यामाह	३००	२२
कंप	कंयत्प	३००	२४
स्यादेवेति	स्यादेवेति	३०१	१५
एकक	एकैक	३०१	१७
समुदायेऽपि	मुदायेऽपि	३०३	२
शङ्काथः	शङ्कार्थः	३०४	१३
एव	एष	३०४	१९
पेक्षाया	पेक्षया	३०९	१२
त्माह	त्वा	३०९	१७
चतनस्य	चतन्यस्य	३१०	११
चैतन्य	चैतन्यं	३१०	१३
दाष्टान्ति	दार्ष्टान्ति	३१२	५
मताप	मतोप	३१२	१६
यरिक्तं	व्यतिरिक्तं	३१२	१८
त्य आह	त्यत आह	३१३	४
परिमाण	परिणाम	३१३	१२
युक्तकं	युक्तिकं	३१४	१४
दध्याधि	दध्यादि	३१४	१७
परि	पर	३१५	९
चक्रत्वं	चैकत्वं	३१६	१५
त्रिविध्य	त्रैविध्य	३१६	१९
न त्	नात्	३१६	१९
वद्चनं	वद्वचनं	३१६	२०
न्यार्थो	न्यार्थयत्नो	३१७	१६
प्रधानया	प्रधानतया	३१७	२५
स्यव	स्यैव	३१८	१
त्तः	त्तेः	३१८	२१
वाञ्छयो	बोधेच्छयो	३१९	१४
काय	कार्य	३२०	२१
किस्वरूप	किंस्वरूप	३२०	२३
वारणकं	वरणकं	३२१	७
तथा	यथा	३२३	१९
मन्तेन	मनेन	३२४	१०
सोऽपि	सापि	३२४	२५
नस	नमस	३२५	१९
र्णन	णनं	३२५	२१
यतोऽनत्यम्	यतोऽनित्यम्	३२६	१०
नेन	ने न	३२६	१७
त्, सर्वदा	त् सर्वदा	३२७	९
अकर्यत्वात्	अकार्यत्वात्	३२७	११
सावयत्व- निरवयत्वाभ्यां	सावयवत्वनिर- वयवत्वाभ्यां	३२७	२२
सवयव	सावयव	३२७	२३
पारतन्त्र	पारतन्त्र्य	३२७	२४
प्रतिक्षेपं	प्रतिक्षणं	३२८	९
सशक्तस्य	शक्तस्य	३२९	१

अशुद्धम्	शुद्धम्	पृ.	पं.
हेतु	हेतुं	३३०	१२
मव	मेव	३३०	१२
थिनः	थिर्नः	३३०	१६
वाज	बीज	३३०	१६
कायो	कार्यो	३३०	२५
समथम्	समर्थम्	३३१	५
कत्तु	कर्तुं	३३२	९
उक्ता	युक्ता	३३२	१५
भात्या	भीत्या	३३३	११
वारव्यातः	व्याख्यातः	३३३	१६
पञ्चहेतु	पञ्चमहेतु	३३३	१७
मिति, नच	मिति नच,	३३३	२५
र्भावा	र्भावो	३३४	१४
मो हा	मोहा	३३४	१४
बुद्धादयः	बुद्धयादयः	३३५	१९
त्वयो	त्वयोः	३३६	२२
विरुद्धं	निरुद्धं	३४१	१२
सर्वात्मेति	सर्वात्मनेति	३४१	२३
एबं	एवं	३४१	२४
स्यात्मानो	स्यात्मनो	३४३	२४
भिन्नम्	भिन्नत्वम्	३४५	२२
भावऽऽवि	भावाऽऽवि	३४६	२
धमि	धाम	३४६	१५
हेतुकरणे	हेतूकरणे	३४९	९
जन्मैव	जन्मैव न	३५१	७
ता	तौ	३५३	२७
प्यापात	प्यायात	३५५	१५
प्रविष्ठा	प्रतिष्ठा	३५६	१७
घटास्या	घटस्या	३५७	११
व्यपदेशा	व्यपदेशाः	३५९	२२
सुखस्यो	दुःखस्यो	३६३	८
तत्प्रयुक्त	तं प्रयुक्त	३६३	२७
अस्या	अस्य	३६७	२४
प्राप्तायोगानां	प्राप्त्योगानां	३६९	१९
पुरुषा	पुरुषा	३७०	२
ततः साङ्ख्यकृता ०		३७१	१८
कारण	कारणं	३७१	२४
सानार्थ्या	सामर्थ्या	३७१	२४
व्याप्त्याभावा	व्याप्त्यभावा	३७३	७
नान्यथा	नानन्यथा	३७३	१२
गन्तदा	गस्तदा	३७३	१५
तत्रप्रथ	तत्र कथ	३७३	२२
रूपापरा	रूपपरा	३७५	१४
स्यव	स्यैव	३७५	२०
गमन	गमनं	३८१	१३
शुक्तिरिति	शुक्तेरिति	३८१	१५
किंबु	किं नबु	३८२	१
परः	परैः	३८२	१८
स्यैप	स्यैव	३८३	२१
निमित्त	निमित्तं	३८४	२२
प्रकरणावादा	प्रकरणादा	३८६	५
त्वपपाठ	त्वत्र पाठो	३८८	१४
एवेति	युक्तः	३८८	१५

વ્યાકરણવાચસ્પતિ-કવિરત્ન-શાસ્ત્રવિશારદ ·

અનુપમવ્યાખ્યાનસુધાવર્ષિ-શાસનપ્રભાવક-



પૂજ્યપાદ આચાર્ય શ્રીમદ્-

વિજયલાવણ્યસૂરીશ્વરજી મહારાજ

न्यायविशारद–न्यायाचार्य–महामहोपाध्याय–श्रीमद्यशोविजय-
गणिमणिप्रणीतं जैनतर्काभिधानम्

अनेकान्तव्यवस्थाप्रकरणम् ।

तदुपरि–

तपोगच्छाधिपति–शासनसम्राट्–सर्वतन्त्रस्वतन्त्र–जगद्गुरु–श्रीविजय-
नेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति–शास्त्रविशारद–कवि-
रत्नेतिपदालङ्कृतेन श्रीविजयलावण्यसूरिणा विरचिता

तत्त्वबोधिनी विवृतिः ।

यज्ज्ञाने भाति विश्वं करगतफलवद् यश्च भावारिजेता
पूज्यानां यश्च पूज्यो वचनमवितथं यस्य नो बाधमेति ।
तं वन्दे वीरमाप्तं जिनप्रवरमहं सर्वकल्याणकन्दं
देवानां देवमिद्धाभयपदलसितं स्वस्वभावैकलीनम् ॥ १ ॥

यत्कृत्यध्ययनेन मन्दमतयोऽप्यस्मादृशो व्याकृतौ
काव्ये तत्त्वविमर्शशास्त्रनिचये चाप्तप्रवेशा अरम् ।
तान् सूरिप्रवरान् नमामि सततं स्वाध्यायसम्पादकान्
स्मृत्याऽभीष्टफलप्रदान् नवकृतौ श्रीहेमचन्द्राभिधान् ॥२॥

प्राचीनोक्तिविशारदा नवनवोन्मेषैकविद्याधनाः
श्रीमन्तो मिति-नीति-भङ्गनिपुणास्तत्त्वप्रथाकोविदाः ।
सद्धर्मैकनिकेतना बुधवराः सन्त्वत्र विघ्नापहा
ये ङ्कारैकजपात्तवित्तवप्रमुखाः श्रीमद्यशोवाचकाः ॥ ३ ॥

यस्यास्ति प्रतिभैव शास्त्रनिचये तत्त्वार्थसन्दर्शिनी
यो नित्यं कृतिमातनोति विमलां तत्त्वप्रथाभासुराम् ।
व्याकृत्यादिविचारणा प्रतिदिनं यच्छिष्यवर्गे वरा
तं भक्त्या प्रणमाम्यहं गुरुवरं श्रीनेमिसूरीश्वरम् ॥ ४ ॥
सेवा शास्त्रस्य नित्यं विलसतु रचनाव्याजतो मामकीना
स्वाभ्यासो वृद्धिमीयाज्जिनमतविषयो वाऽस्तु बालोपकारः ।
इत्याशातः प्रवृत्तिस्त्विह विवृतिविधौ या च लावण्यसूरेः
साऽनेकान्तव्यवस्थाप्रकरणविषया चांशतोऽप्येत्वभीष्टम्॥५॥

ऐन्द्रस्तोमनतं नत्वा वीतरागं स्वयम्भुवम् ।
अनेकान्तव्यवस्थायां श्रमः कश्चिद् वितन्यते ॥ १ ॥

प्रारिप्सितस्य जनतर्कपराभिधानाऽनेकान्तव्यवस्थाप्रकरणस्य निर्विघ्नपरिसमाप्तये स्वाभीष्टदेवनमस्कारलक्षणंमङ्गलमाचरन्ननुबन्धचतुष्टयावगतिनिमित्तमन्वर्थग्रन्थनाम निबध्नाति–ऐन्द्रस्तोमनतमिति– 'इन्द्रस्तोमनतम्' इत्युक्तावपि इन्द्राणां सुराधिपतीनां स्तोमः समूहस्तेन नतं प्रणतिकर्मेत्यतः पूजातिशयो लभ्यत एव, एवमपि यद् 'ऐन्द्रस्तोमनतम्' इत्युक्तं तेन स्वनिर्मितग्रन्थमात्र एव श्रीयशोविजयमहोपाध्यायः स्वाभीष्टसरस्वतीमन्त्रस्य ऐङ्कारस्य स्मरणं करोत्येव, तेन च श्रीमद्यशोविजयाभिधस्य स्वस्य कर्तृत्वमपि लभ्यत इत्युपदर्शित भवति, अत्र इन्द्रसम्बन्ध्यर्थकस्यैन्द्रपदस्य स्तोमपदेन समूहार्थकेन कर्मधारयसमासः । 'वीतरागम्' इत्यनेन संक्लेशजननरागादिराहित्यतस्तत्सहचरितद्वेषादिराहित्यस्याप्यवगतिरित्यतोऽपायापगमातिशयोऽवगम्यते । 'स्वयम्भुवम्' इत्यनेन च ज्ञानातिशयः, ज्ञानरूपेणैव सर्वदा स्वयं परिणमतेऽयम्, अतः स्वयं तथाभवनात् स्वयम्भूरिति । एतन्नमस्कारकरणानन्तरमनेकान्तव्यवस्थायां श्रमस्य यद् विधानं तेनार्थादिदमावेदितं भवति—यद्युक्त-

विशेषणविशिष्टं जिन नत्वा एकान्ततत्त्वव्यवस्थायां श्रमो विहितः स्यात् तदा निष्फल एव भवेत्, एकान्ततत्त्वस्य जिनाननुमतत्वेन तद्व्यवस्थाप्रतिबन्धकस्य विघ्नस्य जिननमस्काराऽनपनेयत्वात्, अभीष्टसिद्धिप्रतिबन्धकविघ्नसमूहापनयनस्यैव तत्कार्यत्वात्, अनेकान्ततत्त्वं तु त्रिपदीवचनप्रणेतुर्जिनस्यानुमतमेवेति तत्प्रणामलक्षणमङ्गलतस्तद्व्यवस्थाविघ्नापनयनं संभवतीत्यतोऽनेकान्ततत्त्वाविर्भावकवचनातिशयोऽपि भगवतोऽर्थादवगम्यत इति तथाविधातिशयचतुष्टयसम्पन्नपुरुषधौरेयनमस्करणं विघ्नौघविनाशकत्वाद् भवत्येव मङ्गलमित्यभिसन्धिः। 'अनेकान्तव्यवस्थायाम्' इत्यनेन 'अनेकान्तव्यवस्था' इति ग्रन्थनामसंशब्दनादनेकान्ततत्त्वव्यवस्थापकत्वादेवास्य ग्रन्थस्य 'अनेकान्ततत्त्व' इति नाम, तथा चानेकान्ततत्त्वमस्याभिधेयम्, विशेषेण तदवगतिलक्षणा तद्व्यवस्था प्रयोजनम्, अनेकान्ततत्त्वावगतिकामोऽधिकारी, अनेकान्ततत्त्वेन सहोक्तग्रन्थस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धः, उक्तप्रयोजनेन सह जन्य-जनकभावसम्बन्ध इत्यर्थाल्लभ्यते, एतदनुबन्धचतुष्टयप्रभवेष्टसाधनताज्ञानतः श्रोतृणामेतदध्ययने प्रवृत्तिः सूपपादिना भवतीति। कश्चिच्छ्रमः यः केवलपरदर्शनकोविदैः केवलस्वदर्शननिपुणैर्वा कर्तुमशक्यः स श्रमः, स च परमतनिराकरणपूर्वकस्वमतव्यवस्थापनानुकूलप्रयत्नलक्षणः स्व-परदर्शनविदुष एव सम्भवतीति तथाविधप्रयत्नशालिनः स्वस्य स्वपरदर्शनवेत्तृत्वमावेदितं भवतीत्येतादृशपुरुषनिर्मितग्रन्थस्याध्ययनादौ प्रेक्षावतामवश्यमेव प्रवृत्तिर्भविष्यतीत्यतो यावदध्ययनाऽध्यापनादिव्यवहारस्तावदयं ग्रन्थोऽध्ययनाध्यापनादिव्यापारगोचर इति तावत्कालस्थायित्वमप्यस्य गम्यत इति ॥ १ ॥

जिनमतस्यानन्तनयमयस्यातिगूढाभिप्रायस्यांशतोऽपि ज्ञानं न सम्भवति नयलवपरिज्ञानदुर्विदग्धानां परेषामिति जिनाभिप्रेतस्य

जिनमतमतिगम्भीरं नयलवविद्भिः परैरनन्तनयम् ।
आघ्रातुमपि न शक्यं हरिणेन व्याघ्रवदनमिव ॥ २ ॥
वस्तुधर्मो ह्यनेकान्तः प्रमाण-नयसाधितः ।
अज्ञात्वा दूषणं तस्य निजबुद्धेर्विडम्बनम् ॥ ३ ॥

अथ कोऽयमनेकान्तः ? उच्यते– तत्त्वेषु भावाऽभावादि-शबलैकरूपत्वम् । कानि तत्त्वानीति चेत् ? तत्रेदं तत्त्वार्थमहा-शास्त्रसूत्रम्–

प्रमाण-नयनिष्टङ्कितस्वरूपस्य वस्तुधर्मस्यानेकान्तस्य स्वरूपमपरिज्ञायैव दूषणं स्वबुद्धिविडम्बनमेव परेषां न तु तद् दूषणं शपत्यनेकान्तम्, अतोऽनेकान्तव्यवस्थाऽस्मत्प्रयत्नोपढौकिता समादरणीया विद्वद्भिरिति न निष्फलोऽयं प्रयास इति पद्याभ्यामाह—जिनमतमिति, वस्तुधर्मो ह्रीति च । जिनमतस्याऽऽघ्राणमंशतोऽपि परिज्ञानम् । नयलवविद्त्वं च दुर्नयाभिनिवेशशालित्वम् । परैः तीर्थान्तरीयैः । तस्य अनेकान्तस्य । अन्यत् स्पष्टम् ॥ २–३ ॥

परस्परविरुद्धानां सत्त्वासत्त्वादीनामेकत्र समावेशासम्भवाद् यत्र सत्त्वं तत्र नासत्त्वम्, यत्र नित्यत्वं तत्र नानित्यत्यत्वम्, इत्येकान्त एव कान्त इत्याग्रहग्रहिलः परः पृच्छति– अथेति । अयम् 'वस्तुधर्मो ह्यनेकान्तः' इत्यनन्तरपद्ये निर्दिष्टः । क इति– 'किमाक्षेपे', एकान्त एव सर्वत्रावलोक्यत इति तदुपलम्भबाधित्वान्नास्त्यनेकान्त इत्याक्षेपः । अभिन्नदेश-कालाद्यवच्छेदेनैकाधिकरणाऽवृत्तित्वमेव विरोधः, स च विभिन्नदेशकालादिस्वस्वनिमित्तापेक्षयैकत्र विद्यमानानामपि भावाऽभावादीनां निर्वहत्येवेति विरोधे सत्यप्यविरोधो भावाऽभावादीनामित्येकत्र समावेशसम्भवादनेकान्तो न विरोधबिभी-

" जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम् "
[तत्त्वार्थाधिगम० अ० १. सू० ४.]

षयाऽपहस्तयितुं शक्य इत्याशयेनोत्तरयति– उच्यत इति। 'भावाभावादि०' इत्यादिपदान्नित्यत्वाऽनित्यत्व–भेदाऽभेदादेरुपग्रहः। तथा च तत्त्वेषु जीवादिपदार्थेषु भावाऽभाव-नित्यत्वाऽनित्यत्व-भेदाऽभेदाद्यनन्तधर्मसहितैकरूपत्वमनेकान्तः, एकस्यैकानेकस्वस्वरूपत्वमनेकान्त इति यावत्। तस्य भावस्तत्त्वमुच्यते, प्रकृतं च तच्छब्दार्थः, न चात्र प्रकृतं किञ्चिदस्ति यस्य भावस्तत्त्वं स्यात्, यत्रैकमपि तत्त्वं दुर्लभं तत्र बहुवचनान्ततत्त्वशब्दवाच्यानेकतत्त्वानां दुर्लभत्वे किमु वक्तव्यमित्याशयेन परः पृच्छति–कानीति। यौगिकस्य तत्त्वशब्दस्य प्रकृतधर्मप्रतिपादकत्वेऽपि प्रकृते रूढस्य तस्य पदार्थप्रतिपादकत्वमित्याशयेनोत्तरयति– तत्रेदमिति, तत्र– उक्तप्रश्ने, इदम्– अनन्तरमेवाभिधीयमानं तत्त्वप्रतिपादकं 'तत्त्वार्थसूत्रम्' उत्तरम्, "जीवाजीव०" [१. ४.] इत्यादि सूत्रम्। संक्षेपेण जीवादिपदार्थानां स्वरूपमुपदर्शयति– जीवा इति। 'औपशमिकादि०'-इत्यादिपदात् क्षायिक-क्षायोपशमिकौदयिक-पारिणामिकभावानां परिग्रहः, तथा च–औपशमिकः, क्षायिकः, क्षायोपशमिकः, औदयिकः पारिणामिकश्चेत्येवं पञ्चविधभावान्विता जीवा इत्यर्थः। तत्र सम्यक्त्व-चारित्रे द्वावौपशमिकभावौ; ज्ञान-दर्शन-दान-लाभ-भोगोपभोग-वीर्यसम्यक्त्वचारित्राणि नव क्षायिका भावाः; मतिज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्यवज्ञानमित्येवं ज्ञानचतुष्टयम्; मत्यज्ञानम्, श्रुताऽज्ञानम्, विभङ्गज्ञानमित्येवमज्ञानत्रयम्; चक्षुर्दर्शनम्, अचक्षुर्दर्शनम्, अवधिदर्शनमिति दर्शनत्रिकम्; दानलब्धिः, लाभलब्धिः, भोगलब्धिः, उपभोगलब्धिः, वीर्यलब्धिरिति लब्धिपञ्चकम्; सम्यक्त्वम्, चारित्रम्, संयमासंयम इत्येतेऽष्टादश क्षायोपशमिका भावाः; नारक तैर्यग्यौन-मनुष्यदेवगतिभेदेन चतुर्भेदा गतिः; क्रोध-मान-

जीवाः– औपशमिकादिभावान्विताः । अजीवाः– धर्मादयश्चत्वारोऽस्तिकायाः । आश्रूयते– गृह्यते यैः कर्म ते आश्रवाः,

---

माया-लोभभेदेन चतुर्विधः कषायः; स्त्री-पुं-नपुंसकभेदेन त्रिविधो वेदः; मिथ्यादर्शनम्, अज्ञानम्, असंयतत्वम्, असिद्धत्वम्, कृष्णलेश्या, नीललेश्या, कापोतलेश्या, तेजोलेश्या, पद्मलेश्या, शुक्ललेश्या इति षड् लेश्या इत्येते पकविंशतिरौदयिका भावाः; जीवत्वम्, भव्यत्वम्, अभव्यत्वमित्येते त्रयः पारिणामिका भावा इत्येवमौपशमिकादिपञ्चविधभावान्यतमवत्त्वं जीवस्य लक्षणं प्रति पत्तव्यमित्यर्थः। 'उपयोगलक्षणो जीवः' इति तद्रहितोऽजीव इति तान् दर्शयति—अजीवा इति। 'धर्मादयः' इत्यत्रादिपदाद् अधर्माऽऽकाश-पुद्गलानां ग्रहणम्, तथा च धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्तिकायः, पुद्गलास्तिकाय इत्येवं चतुर्भेदा अजीवा इत्यर्थः, अस्तिशब्देन ध्रौव्यम्, कायशब्देनोत्पाद-विनाशावित्युत्पाद-विनाश-ध्रौव्यैतत्त्रितयात्मकत्वलक्षणं सत्त्वमेतेष्वस्तिकायशब्दप्रयोगतो दर्शितं भवति, जीवा इत्यपि जीवास्तिकाया इत्येवंरूपं वाच्यम्, उत्पाद-व्यय-ध्रौव्यलक्षणसत्त्वस्य तत्रापि तत एव प्रतीतेः। तत्र "गति-स्थित्युपग्रहो धर्मा-ऽधर्मयोरुपकारः" [५. १७.] इति तत्त्वार्थसूत्राद् गतिमतां जीव-पुद्गलानां गत्युपग्रहकारित्वं धर्मास्तिकायस्य लक्षणम्, स्थितिमतां जीव-पुद्गलानां स्थित्युपग्रहकारित्वमधर्मास्तिकायस्य लक्षणम्, अत एव लोकाकाशमात्रव्यापितयैवधर्माऽधर्मयोर्भावाल्लोकाकाश एव जीव-पुद्गलयोर्गति-स्थिती नान्यत्र। "आकाशस्यावगाहः" [त० ५. १८.] इति सूत्राद् अवगाहिनां धर्मा-ऽधर्म-पुद्गल-जीवानामवगाहोपग्रहकारित्वमाकाशस्य लक्षणम्। "रूपिणः पुद्गलाः" [त० ५. ४.] इति सूत्राद् रूपवत्त्वं पुद्गलानां लक्षणम्। आश्रवलक्षणमुपदर्शयति– आश्रूयत इति– आश्रवस्य

शुभाशुभकर्माऽऽदानहेतव इत्यर्थः। बन्धो नाम– आश्रवात्तकर्मण आत्मना सह प्रकृत्यादिविशेषतः संयोगः। आश्रवनिरोधहेतुः संवरः। विपाकात् तपसो वा कर्मणां शाटो निर्जरा। सर्वोपाधिविशुद्ध-स्वात्मलाभो मोक्षः।

जीवाऽजीवाभ्यामन्यत्वे तत्त्वार्थसूत्रवृत्तिकृता युक्तिरावेदिता– "आश्रवः क्रियाविशेषः, स चात्म-कायाद्याश्रयो न जीवो न जीव-पर्यायः केवलः, नवाऽजीवो नापि तत्पर्यायः, उभयाश्रयत्वात्, न च पदार्थान्तरं जीवाऽजीवाभ्यामतो भेदेनाऽऽश्रवस्वरूपमिदं लक्षण-विधानाभ्यां व्याख्यातुं प्रक्रियते" इति, "काय-वाङ्मनः-कर्म योगः" [त० ६. १.] इत्यनेन कायिकं कर्म, वाचिकं कर्म, मानसं कर्मेति त्रिविधयोगस्वरूपमभिधाय "स आस्रवः" [त० ६. २.] इत्यनेन तस्याऽऽश्रवत्वमवधारितं शुभाशुभकर्मणोरास्रवणादास्रव इति व्युत्प-त्त्युदर्शनेन, तेन च शुभाऽशुभकर्मादानहेतुत्वं तल्लक्षणपर्यवसितम्। बन्धस्वरूपमुपदर्शयति– बन्धो नामेति। 'प्रकृत्यादि०' इत्यादिपदात् स्थित्यनुभाव-प्रदेशानां ग्रहणम्, तेन च प्रकृतिबन्धः, स्थितिबन्धः, अनुभावबन्धः, प्रदेशबन्ध इत्येवं चतुर्विधो बन्ध इत्यावेदितम्। संवरस्वरूपमावेदयति– आश्रवेति–गुप्ति-समिति-धर्मानुप्रेक्षा-परिषह-जयचारित्राणि आश्रवनिरोधहेतवः, आश्रवनिरोध एव संवरः, तद्धे-तुत्वाद् गुप्त्यादयोऽपि संवर इति। निर्जरास्वरूपमुपदर्शयति— विपाकादिति– फलोपभोगादित्यर्थः। तपसो वेति– अनशनाऽ-वमौदार्य-वृत्तिसङ्ख्यानर-सपरित्याग-विविक्तिशय्यासन-कायक्लेशलक्षणषड्-विधबाह्यतपःप्रायश्चित्त-विनय-वैयावृत्य-स्वाध्याय-व्युत्सर्ग-ध्यानलक्षण-षड्विधान्तरतपोभ्यां वेत्यर्थः। शाटः आत्मप्रदेशेभ्योऽपगमः पृथग्-भवनम्। मोक्षस्वरूपमुपदर्शयति—सर्वोपाधीति– उपाधिश्चात्र ज्ञाना-

"इत्येष सप्तविधोऽर्थस्तत्त्वम्, एते वा सप्त पदार्थास्तत्त्वानि" इति भाष्यकारः, 'तत्त्वम्' इत्यस्याव्युत्पत्तिपक्षे परमार्थ इत्यर्थः, व्युत्पत्तिपक्षे तु जीवादीनां या स्वसत्ता सा तत्त्वपदेनोच्यते, तस्याश्च प्रतिवस्तु यो भेदस्तमनादृत्यैकवचनम्, नैयायिकादिवत् तस्या अतिरिक्तत्वानभ्युपगमेन वस्तुधर्मतया प्रतिवस्तु भेदमभिप्रेत्य च भाष्ये बहुवचनमपीति टीकाकृतः।

वरणादि अष्टविधं कर्म, तद्विशुद्धस्तद्रहितः, स्वात्मा अनन्तज्ञानादि-स्वरूपम्, तस्य लाभः प्राप्तिः।

सूत्रे 'तत्त्वम्' इत्युक्तम्, भाष्ये च 'तत्त्वम्' इत्येकवचनम् 'तत्त्वानि' इति बहुवचनम्, इत्येतद्द्वयं यथासङ्गतं तथा भाष्य-वचनमुल्लिख्योपदर्शयति- इत्येष इति। अव्युत्पत्तिपक्ष इति- परमार्थ-रूपार्थे रूढ एवायं तत्त्वशब्द इति पक्ष इत्यर्थः। व्युत्पत्तिपक्षे तु तस्य भावस्तत्त्वमिति यौगिकोऽयं तत्त्वशब्द इति पक्षे पुनः। स्वसत्ता स्वरूपसत्ता। सा स्वरूपसत्ता। तस्याश्च स्वरूपसत्तायाः पुनः। प्रतिवस्तु प्रतिव्यक्ति, स्वरूपसत्ता व्यक्तिस्वरूपेति व्यक्तिभेदेन तस्या अपि भेदः, एवमनुगतप्रतीत्यनुरोधेन कथञ्चिदैक्यमपीति तमनादृत्य सन्तमपि भेदं गजनिमीलिकयोपेक्ष्य 'तत्त्वम्' इत्यत्रैकवचनमुक्तम्। 'नैयायिकादि०' इत्यादिपदाद् वैशेषिकपरिग्रहः, नैयायिक-वैशेषिकाभ्यां यथा द्रव्य-गुण-कर्मसु परसामान्यस्वरूपायाः सर्वथा व्यतिरिक्तायाः सत्ताया अभ्युपगमस्तथा जैनेन सत्ताया अतिरिक्तत्वस्यानभ्युपगमेन धर्म-धर्मिणोरभेदेन वस्तुधर्मतया वस्त्वात्मकत्वात् प्रतिवस्तु यो भेदस्तमभिप्रेत्य भाष्ये 'तत्त्वानि' इति बहुवचनमपि सङ्गतमिति टीकाकृतः तत्त्वार्थटीकाकाराः, आहुरिति शेषः।

वस्तुतः सकलज्ञानसाध्यैकप्रयोजनकत्वलक्षणमेकत्वम्, लक्षणभेदज्ञानजनितपरस्परभेदज्ञानविषयत्वरूपं बहुत्वं चाऽऽदायैकवचनबहुवचने सूत्र-भाष्ययोर्बोध्ये, स्वाभाविकैकत्वबहुत्वयोर्नयभेदाऽऽश्रयणेन प्रकृतसमाधाने च 'उपयोगवन्तो जीवः, उपयोगवन्तो

सूत्रे एकवचनस्य भाष्यैकवचन-बहुवचनयोरुपदर्शनस्य संगमनं स्वयं करोति- वस्तुत इति। सकलेति— जीवाजीवादिसप्तविधपदार्थज्ञानसाध्यमुक्तिलक्षणैकप्रयोजनकत्वरूपमेकत्वं सप्तसु पदार्थेषु वर्तत इति तदर्थमुपादाय सूत्र भाष्ये च 'तत्त्वम्' इत्येकवचनम्। लक्षणभेदेति— जीवस्य लक्षणमन्यद् अन्यच्चाजीवादेर्लक्षणमित्येवं लक्षणभेदज्ञानेन जनितं यज्जीवादिपदार्थानां परस्परभेदज्ञानम्— 'जीवादजीवो भिन्नः, अजीवाज्जीवो भिन्नः, एवमास्रवादिः' तादृशज्ञानविषयत्वरूपं सप्तसु पदार्थेषु बहुत्वमिति तदर्थमुपादाय भाष्ये 'तत्त्वानि' इति बहुवचनं बोध्यमित्यर्थः। स्वाभाविकैकत्व-बहुत्वे आदाय भाष्यनिर्दिष्टैकवचन-बहुवचनयोरुपपत्तिसम्भवे उपचरितैकत्व-बहुत्वे उपादाय तत्समर्थनं किमर्थमित्यपेक्षायामाह— स्वाभाविकैकत्व-बहुत्वयोरिति। नयभेदाश्रयणेनेति—सत्तायास्तत्त्वपदवाच्यायाः प्रतिवस्तुभेदानादरणनय प्रतिवस्तुभेदाऽऽदरणनयाश्रयणेनेत्यर्थः। प्रकृतसमाधाने टीकाकारदर्शितैकवचन-बहुवचनोपपादनलक्षणसमाधाने। तत्त्वार्थे, 'उपयोगवन्तो जीवाः' इति प्रयोगो विशेष्य-विशेषणपदयोः समानवचनकत्वनियमाऽहानेर्भवति साधुः, 'उपयोगवन्तो जीवः' इति चोक्तनियमहानेर्न भवति साधुरित्येवं न भवेत्, "जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम्" [त० १. ४.] इत्यत्र सामानाधिकरण्योपपत्तये जीवादिसप्तपदार्थैः सह तत्त्वपदार्थस्य स्वरूपसत्त्वस्याभेदेनान्वय इति तत्त्वगतैकत्वावच्छेदेन बहुत्वान्वयस्य स्वहस्थिततत्त्वेन जीवगतैकत्वावच्छेदेन बहुत्वान्वयस्यापि

जीवाः' इति प्रयोगयोरपि साधुत्वापत्तेः, उपदर्शितनीत्या तु बहुत्वावच्छेदेनैवैकत्वस्य कल्पत्वात् 'करि-तुरग-रथाः सेना' इत्यादाविव बहुवचनावरुद्धे एकवचनावरुद्धस्योद्देश्य-विधेयभावेनान्वयो नानुपपन्न इति दिक् ॥

ननु कथं सप्तैव तत्त्वानि ? पुण्य-पापयोरप्यधिकयोः सत्त्वादिति चेत् ? न– बन्ध एव तयोरन्तर्भावमभिप्रेत्य भेदेनानभिधानात् । हन्त, तर्हि 'जीवाऽजीवास्तत्त्वम्' एतावदेव वाच्यं स्याद्, आश्रवादीनामपि पञ्चानां जीवाजीवयोरभिन्नत्वात्, तथाहि–

सम्भवेन 'उपयोगवन्तो जीवः' इति प्रयोगोऽपि साधुः स्यादिति तद्भयात् स्वाभाविकबहुत्वविशिष्टे नैकत्वान्वय इत्येव स्वीकर्तव्यमिति न टीकाकारसमाधानं युक्तमित्यर्थः। उपचरितैकत्वस्य तु बहुत्वावच्छेदेनोद्देश्य-विधेयभावेनान्वयस्त्वस्मदभिमतोऽन्यत्र दृष्ट एवेति तथा समाधाने न काप्यनुपपत्तिरित्याह–उपदर्शितनीत्या त्विति— 'वस्तुतः०' इत्यादिदर्शितदिशा पुनरित्यर्थः ।

न्यूनाधिकसङ्ख्याव्यवच्छेदफलो हि विभागो भवति, प्रकृते तु पुण्य–पापयोरधिकयोः सत्त्वात् तत्त्वस्य सप्तधा विभजनमसङ्गतमिति शङ्कते– नन्विति । कल्पते बन्धपदार्थे एव पुण्यापुण्ययोरन्तर्भावान्न तयोरधिकतेत्यधिकसङ्ख्याव्यवच्छेदस्यात्रापि सम्भवान्नोक्तविभागासामञ्जस्यमिति प्रतिक्षिपति–नेति । तयोः पुण्य-पापयोः। न चैवं धर्मास्तिकायादीनामिवाऽऽश्रवादीनामपि जीवभिन्नत्वेनाजीवपदार्थ एव, जीवधर्मतया जीवपदार्थ एव वाऽन्तर्भावसम्भवाद् जीवाऽजीवभेदेन द्विविधतयैव तत्त्वविभजनं न्याय्यमिति शङ्कते– हन्तेति । आश्रवादीनाम् आश्रव-बन्ध-संवर-निर्जरा-मोक्षाणाम् । आश्रवादीनां पञ्चानां जीवाजीवाभिन्नत्वं भावयति– तथाहीत्यादिना । आश्रवनिरूपणं

आश्रवो मिथ्यादर्शनादिरूपः परिणामो जीवस्य, स च क आत्मानं पुद्गलाँश्च विहाय ?, बन्धश्चाऽऽत्मप्रदेशसंश्लिष्टकर्मपुद्गलात्मकः; संवरोऽप्यात्मन एवाऽऽश्रवनिरोधलक्षणो देश-सर्वनिवृत्तिपरिणामः; निर्जरा तु पार्थक्याऽऽपन्नजीव-पुद्गलदशैव; मोक्षोऽपि समस्तकर्मरहित आत्मैवेति ? सत्यम्— इदमित्थमेव, किन्त्विदं शास्त्रं मुमुक्षुशिष्यप्रवृत्तये, सा च मुक्ति-संसारयोः कारणयोर्भेदेनाभिधानं विना न स्यादित्याश्रवो बन्धश्चेति द्वयं मुख्यं संसारकारणम्, संवरो निर्जरा चेति द्वयं मुख्यं मोक्षकारणमुपात्तम्; यत् तु मुख्यं प्रयोजनं मोक्षो

विस्तरतस्तत्त्वार्थस्य षष्ठाध्याये, तत एव च मिथ्यादर्शनादिरूपपरिणामस्याऽऽश्रवत्वावगतिः कार्या। स च मिथ्यादर्शनादिरूपपरिणामश्च, अन्यत् स्पष्टम्। आश्रवादीनां जीवाजीवाभिन्नत्वमभ्युपेत्य समाधत्ते- सत्यमिति। इदमित्थमेव यद् यथा भवताऽभिहितं तत् तथैव। नन्वेवं 'जीवाजीवास्तत्त्वम्' इत्येव वक्तव्यं स्यात्, तत्राह— किन्त्विति। सा च मुमुक्षुशिष्यप्रवृत्तिश्च। 'मुक्ति–संसारयोः कारणयोः' इति स्थाने 'मुक्ति–संसारकारणयोः' इति पाठो युक्तः, संसारकारणहानार्था मुक्तिकारणोपादानार्था च मुमुक्षूणां प्रवृत्तिः 'इदं संसारकारणं ममाऽनिष्टसाधनम्, तद्धानं च ममेष्टसाधनम्' इति ज्ञानमन्तरेण च न सम्भवति, तथाभूतज्ञानं च विशिष्य संसारकारण-मुक्तिकारणयोर्ज्ञानमन्तरा न सम्भवतीति संसारकारणस्य मुक्तिकारणस्य च ज्ञानार्थं भेदेन संसारकारण-मुक्तिकारणयोरभिधानमावश्यकमित्यर्थः। संसारकारणमाश्रवो बन्धश्च, मुक्तिकारणं संवरो निर्जरा चेत्यतश्चतुर्णामाश्रवादीनां पार्थक्येनाभिधानमित्याह— आश्रव इति। अन्यान्यपि परम्परया संसारकारणानि मुक्तिकारणानि च, तेषां पार्थक्येनाभिधानं मा नाम प्रापदित्येतदर्थं 'मुख्यम्' इति

यदर्था सर्वा प्रवृत्तिः, स कथं न प्रदर्श्येतेति युक्तं पञ्चानामप्युपादानम्। अथ हेयोपादेययोरेककारणाभिधानेनैव चरितार्थत्वे किं द्वयाभिधानेनेति चेत्? न– एककारणे ज्ञाते कारणान्तरजिज्ञासाया

कारणविशेषणमुक्तम्। ननु भवतूक्तदिशाऽऽश्रवादीनां पृथगुपादानस्य युक्तता, मोक्षस्य पार्थक्येनाभिधानं न कर्तव्यमेवेत्यत आह– यत् त्विति। स मोक्षः। पञ्चानाम् आश्रव-बन्ध-संवर-निर्जरा-मोक्षाणाम्। ननु हेयस्य संसारस्यैकं कारणमाश्रवो बन्धो वा, उपादेयस्य मोक्षस्यैकं कारणं संवरो निर्जरा वाऽभिधीयतां तावतैव संसार-मोक्षकारणपरिज्ञानसम्भवेन संसारकारणद्वयस्य मोक्षकारणद्वयस्य च पार्थक्येनाभिधानमफलमित्याशङ्कते– अथेति। हेयोपादेययोः संसार-मोक्षयोः। द्वयाभिधानेन संसारकारणद्वयाभिधानेन मोक्षकारणद्वयाभिधानेन च। संसारकारणस्यैकस्य मोक्षकारणस्य चैकस्य ज्ञाने वृत्तेऽपि संसारस्य किं कारणान्तरम्? मोक्षस्य किं कारणान्तरम्? इति जिज्ञासा स्यादेव, तन्निवृत्तये संसारकारणान्तरं मोक्षकारणान्तरं चाभिधातव्यं स्यात्, कारणद्वयाभिधाने च यद्यन्यदपि तृतीयं कारणं भवेत् तर्हि द्वितीयकारणवत् तृतीयकारणमप्यभ्यधास्यद् आचार्यः तदनभिधानाच्च नास्ति तृतीयं कारणमिति ज्ञानसम्भवेन न तदनन्तरं कारणान्तरजिज्ञासासम्भव इत्याशयेन संसार-मोक्षकारणद्वयाभिधानमिति समाधत्ते– नेति। मध्यमजिज्ञासापरिपूर्तेरिति– सूक्ष्ममतेः प्रमातुरेककारणज्ञाने सति कारणान्तरज्ञानं स्वयमपि सम्भवति, जडमतेश्च एककारणज्ञाने वृत्ते ऊहापोहरहितत्वात् तावतैव कृतकृत्यत्वेन कारणान्तरजिज्ञासैव तावन्नावतरतीति न तन्निवृत्त्यर्थ द्वितीयकारणाभिधानस्यावश्यकता, यस्तु नात्यन्तप्रकृष्टमतिर्नाप्यत्यन्तापकृष्टमतिः, एतादृशस्य मध्यमस्य प्रमातुः कारणद्वयज्ञाने सति विषयनिष्पत्त्या जिज्ञासापरिपूर्त्तेरित्यर्थः। यथा च मोक्ष उपादेय इति तत्परिज्ञानार्थं पृथक् तदभिधानमावश्यकं तथा

औत्सर्गिकत्वात्, कारणद्वयज्ञाने च मध्यमजिज्ञासापरिपूर्तेः। तथाऽपि मोक्षस्योपादेयतयेव हेयतया संसारस्याऽपि पृथगभिधानं कार्यमस्यादिति चेत्? न—अनागतजन्माद्यभावरूपसंसारहानेः स्वातन्त्र्येणाऽसाध्यतया तद्धेतूच्छेदे पुरुषव्यापाराभ्युपगमेन तद्धेत्वोरेवाभिधानात्, संसारहानेर्मोक्षस्वरूप एवानुप्रवेशान्मोक्षोपस्थितौ संसारस्य प्रतिपक्षत्वेनावश्योपस्थितिकतया पृथगभिधानस्यानतिप्रयोजनत्वाच्चेति सम्प्रदायपरिष्कारः।

संसारो हेय इति तज्ज्ञानार्थं तदभिधानमावश्यकमिति तमुपादाय 'अष्टौ तत्त्वानि' इति वक्तव्यम्, यदुच्छेदार्था सर्वा प्रवृत्तिः स कथं न प्रदर्श्यतेति वाचोयुक्तेस्तत्रापि सम्भवादित्याशङ्कते · तथापीति। संसारहानिर्न स्वातन्त्र्येण साध्येति तद्धर्मिककृतिसाध्यत्वज्ञानासम्भवान्न साक्षात् तदर्था प्रवृत्तिः सम्भवति, किन्तु संसारकारणोच्छेद एव पुरुषप्रयत्नसाध्य इति तद्धर्मिककृतिसाध्यत्वज्ञानात् संसारकारणोच्छेदार्थैव प्रवृत्तिरिति संसारकारणस्यैव पृथगभिधानमावश्यकमिति समाधत्ते— नेति। अनागतेति— अनागतजन्माद्यभावरूपा या संसारहानिस्तस्या इत्यर्थः। तद्धेतूच्छेदे अनागतजन्मादिरूपसंसारहेतूच्छेदे। तद्धेत्वोरेव संसारकारणयोराश्रव बन्धयोरेव। ज्ञानावरणाद्यष्टविधकर्मभिः सम्बन्ध एवात्मनः संसारः, तद्वियुक्तात्मस्वरूपावस्थितिरेव मोक्ष इति मोक्षस्वरूपे संसारहानेरनुप्रवेशान्मोक्षोपस्थितौ तत्प्रतिपक्षतया संसारस्याप्यवश्यमुपस्थितेः सम्भवेन न संसारोपस्थितये पृथक् संसाराभिधानस्याऽऽवश्यकतेत्याह— संसारहानेरिति— साम्प्रदायिकमतेन संसार-मोक्षकारणद्वयाभिधानस्यावश्यकत्वम्, संसाराभिधानस्यानावश्यकत्वमुपपादितम्।

इदानीं मोक्षकारणद्वयाभिधाने युक्त्यन्तरम्— बन्ध एव संसार इति बन्धेऽभिहिते संसारोऽभिहित एव, आश्रवस्तु एक एव संसार-

वस्तुतः संवर-निर्जरयोर्मोक्षे दण्डचक्रादिन्यायेन हेतुता, न तु तृणा-ऽरणि-मणिन्यायेनेति बोधयितुं द्वयाभिधानम्; बन्धपदेन

कारणमित्येकस्यैव संसारकारणस्याभिधानं न तु संसारकारणद्वयस्येति स्वाभिप्रायमुपदर्शयति– वस्तुत इति। यदि मोक्षं प्रति संवर-निर्जरयोस्तृणा-ऽरणि-मणिन्यायेन कारणत्वम्, अर्थाद् विजातीयवह्निं प्रति तृणस्य कारणत्वम्, विजातीयवह्निं प्रति अरणेः कारणत्वम्, विजातीयवह्निं प्रति मणेः कारणत्वं नैयायिकमते, स्वमते तु तृणा-ऽरणि-मणीनां वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वम्, एवं च केवलात् तृणात्, केवलाद् अरणेः, केवलाच्च मणेर्वह्नेरुत्पत्तिः, एवमेव मोक्षं प्रति संवर-निर्जरयोः कारणत्वम्, तदा केवलादपि संवरान्मोक्षः, केवलाया अपि निर्जरातो मोक्ष इति तयोरेकस्याभिधानेऽपि तदवगमतस्तत्सम्पादनेन मोक्षावाप्तिरिति मोक्षकारणतदुभयाभिधानमनतिप्रयोजनकम्, न चैवम्, किन्तु यथा घटं प्रति दण्ड-चक्रादीनामन्योन्यसहकारिभावापन्नानां कारणत्वमिति न केवलाद् दण्डात्, केवलाच्चक्रात्, केवलात् कुलालादितो वा घटोत्पत्तिः, किन्तु दण्ड-चक्रादियावद्घटकारणसमूहादेव, तथा संवर-निर्जरयोः परस्परसहकारिभावापन्नयोर्मोक्षं प्रति कारणत्वमिति न केवलात् संवरात्, केवलाया वा निर्जराया मोक्ष इति संवर-निर्जरयोरेकस्याभिधाने तदेकज्ञानतस्तदेकसम्पादने न तन्मात्रानुष्ठानतो मोक्ष इति तदुभयसम्पादनार्थं तदुभयज्ञानस्यावश्यकत्वे तदर्थं मोक्षकारणतदुभयज्ञानस्यावश्यकमित्याह– संवर-निर्जरयोरिति। द्वयाभिधानं मोक्षकारणसंवर-निर्जराद्वयाभिधानम्। उक्तदिशा संसारकारणाऽऽश्रव-बन्धोभयाभिधानोपपादनं तु न सम्भवति, दण्ड-चक्रादिन्यायेन संसारं प्रति आश्रव-बन्धयोः कारणत्वेऽपि तदेकाभिधानतस्तदेकज्ञानेन तदेकोच्छेदे तद्रूपसहकारिविकलात् तदन्यकारणान्न संसार इत्यनागतजन्माद्यभावरूपायाः संसारहानेः सम्भवात्, किन्त्वेकस्यैव संसार-

संसारस्याऽऽश्रवस्य च तत्कारणतयाऽभिधानमित्ययं संसारनिवृत्ति-मोक्षप्रवृत्तिप्रगुणः प्रघट्टक इत्यपि युक्तं पश्यामः। न चैवं सम्प्रदाया-तिक्रमः, अनेकनयसमूहात्मकत्वाद् भगवत्प्रवचनस्येति सूक्ष्म-मीक्षणीयम् ॥

अत्र वैशेषिकाः--"सर्वत्र विभागवाक्ये न्यूनाधिकसंख्या-

कारणाऽऽश्रवस्याभिधानं तज्ज्ञानार्थम्, संसारस्तु बन्ध एवेति बन्धाभिधानं संसाराभिधानमेव, एवं च मुख्यप्रयोजनस्य मोक्ष-स्याभिधानस्येव मुख्यहेयस्य संसारस्याभिधानस्यावश्यकत्वेऽपि न क्षतिरित्याह- बन्धपदेनेति, अस्य 'अभिधानम्' इत्यनेनान्वयः, 'संसारस्य' इत्यस्यापि तत्रान्वयः, 'आश्रवस्य' इत्यस्यापि तत्रान्वयः। तत्कारणतया बन्धात्मकसंसारकारणतया। एवं च संसारस्य संसारनिवृत्यर्थं पृथगभिधानम्, मोक्षप्रवृत्त्यथ च मोक्षस्य पृथगभिधानमिति तद्-घटितसप्ततत्त्वाभिधानलक्षणप्रघट्टकः संसारनिवृत्ति-मोक्षप्रवृत्तिप्रगुण इत्याह- इत्ययमिति। मोक्षस्यैवाग्रिमन् सूत्रेऽभिधानं न संसारस्य, एवं मोक्षकारणद्वयस्येव संसारकारणद्वयस्याप्यभिधानमिति च सम्प्रदायविरोध इत्याशङ्क्य प्रतिक्षिपति- न चैवमिति- एकं नय-माश्रित्य सम्प्रदायमतम्, नयान्तरं चाश्रित्येदमिति सम्प्रदायाति-क्रमेऽपि प्रमाणभूतस्याद्वादातिक्रमाभावात्। येनैव नयेनाभ्युपगमः सम्प्रदायस्य तेनैव तदन्यथाऽभ्युपगमो यद्यत्र भवेत् तदा सम्प्रदाया-तिक्रमो भवेत्, न चैवम्, किन्तु तदन्यनयेनैवेत्थमभ्युपगम इति सम्प्रदायातिक्रमस्यैवाभावादिति प्रतिक्षेपहेतुमुपदर्शयति- अनेकेति- उपदर्शितार्थाभिप्रायक एवायं ग्रन्थः ॥

अत्र जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षभेदेन सप्तधा तत्त्वस्य विभागकरणे, 'वैशेषिकाः' इत्यस्य 'आहुः' इत्यनेन सम्बन्धः। 'सर्वत्र' इत्यारभ्य 'अयुक्तोऽयं विभागः' इत्यन्तं वैशेषिकाणां वचनम्।

तन्त्रान्तरीयविभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वस्य सर्वसिद्धत्वेऽपि स्याद्वादिनो विभागवाक्ये यदि न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वं सर्वसिद्धं न भवेत् तर्हि 'जीवा-ऽजीव०'इत्यादिविभागवाक्ये न्यूनसङ्ख्याव्यवच्छेदकत्वाभावेऽप्ययुक्तत्वं न भवेदेवेति न्यूनत्वव्यवच्छेदकत्वाभावतो 'जीवा-ऽजीव०'इत्यादिविभागवाक्यस्य 'अयुक्तोऽयं विभागः' इत्यनेनायुक्तत्वस्याभिधानमसङ्गतं स्यादतः 'सर्वत्र' इति 'विभागवाक्ये' इत्यस्य विशेषणम्, तथा च यत्र यत्र विभागवाक्यत्वं तत्र तत्र न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वम्' इति व्याप्तिः, एवं च न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वस्य व्यापकस्याभावाद् 'जीवा-ऽजीव०'इत्यादिवाक्ये व्याप्यं विभागवाक्यत्वमपि न स्यादेवेत्येवं भवत्ययुक्तत्वम्। विभागवाक्य इति- 'सामान्यधर्मव्याप्यपरस्परविरुद्धनानाधर्मेण धर्मिप्रतिपादन विभागः' इत्येवंलक्षणलक्षितविभागात्मकवाक्ये इत्यर्थः। ग्रन्थादौ विभागवाक्यस्याकरणेऽपि ग्रन्थकर्तृबुद्धिस्थानां निरूपणीयानां पदार्थानां यत्क्रमेण निरूपणं साङ्गत्यमश्नुते तत्क्रमेण तेषां निरूपणमध्येतॄणां तत्तत्पदार्थावबोधनिबन्धनं स्यादेवेत्याशङ्काशङ्कुनिवर्तकं 'न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वम्' इत्युक्तम्, विभागेऽकृते निरूपितानां पदार्थानां मध्यात् केचित् पदार्थाः पदार्थान्तरेषु निरूपितेष्वन्तर्भूता एव विशिष्याऽवगतये पार्थक्येन पुनरपि निरूपिता इत्येवं पदार्थानां न्यूनसङ्ख्याशङ्का समुदियात्, तथा अन्येऽपि पदार्था अनिरूपिता अप्येतद्दर्शने भविष्यन्ति, किन्तु तन्निरूपणासामर्थ्यादध्येतॄणां तदवगमस्यानुपयोगित्वमिति प्रतिसन्धानाद् वा नात्र निरूपिता इत्येवं पदार्थानामधिकसङ्ख्याशङ्काऽपि स्यादेवेति निरुक्तशङ्काद्वयनिवर्तनाय पदार्थैयत्तावधारकमादिवाक्यं क्रियत इति, विभागवाक्यं यदि पदार्थस्य सप्तधा विभजनस्वरूपम्, तत्र कस्यचित् पदार्थस्य पदार्थान्तरान्तर्भूतत्वे षडेव पदार्थाः स्युः, एवं सति न्यूनसङ्ख्या स्यात् किन्तु तदान्तर्भूतपदार्थगताऽसाधारणधर्मस्य विभाजकस्य यत्रान्त-

व्यवच्छेदफलकत्वं सर्वसिद्धम्, तत्रोद्देश्य-विधेयभावस्थले विधेय-

---

र्भावस्तत्पदार्थगताऽसाधारणधर्मरूपविभाजकेन सह सामानाधिकरण्ये सति विभाजकत्वमेव न स्यात्, निरुक्तविभागलक्षणान्यथानुपपत्त्या परस्परविरुद्धधर्माणामेव विभाजकत्वव्यवस्थितेरित्येवं विभाग-वाक्यस्य न्यूनसङ्ख्याव्यवच्छेदकत्वम्, एवं वाक्यान्तरस्य प्रमाणान्तरसिद्धार्थानुवादकस्योद्देश्य-विधेयभावेन स्वार्थावबोधकत्वाभावेऽपि विभागवाक्यस्याऽपूर्वार्थप्रतिपादकस्योद्देश्य-विधेयभावेनैवार्थावबोधकत्वम्, उद्देश्य-विधेयभावस्थले च सर्वत्र 'असति बाधके उद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वयः' इति नियमः, 'नीलो घटः' इति वाक्यमप्युद्देश्यविधेयभावेनैवाऽर्थावबोधकं यतस्तत्र घटमुद्दिश्य तादात्म्येन नीलस्य विधानम्, किन्तु पीतादिघटे प्रत्यक्षेण नीलस्य बाधात्तोद्देश्यतावच्छेदकघटत्वावच्छेदेन तादात्म्येन नीलस्याऽन्वय इत्यत उक्तनियमे 'असति बाधके' इत्युक्तम्, एवं च पदार्थविभजने पदार्थत्वमुद्देश्यतावच्छेदकं तदवच्छेदेन जीवा-ऽजीवादिसप्तान्यतमस्य विधेयस्यान्वय इति पदार्थत्वव्यापकत्वं निरुक्तान्यतमस्य विभागवाक्याज्ज्ञायते, तथा च यदि जीवा-ऽजीवादि-सप्तव्यतिरिक्तोऽपि कश्चित् पदार्थो भवेत् तदा तत्राऽपि पदार्थत्व-मुद्देश्यतावच्छेदकं समस्ति, जीवाऽजीवादिसप्तान्यतमलक्षणविधेयश्च तत्र नास्तीति नोद्देश्यतावच्छेदकव्यापकत्वं विधेयस्य स्यादिति विभागवाक्यजन्यविधेयगतोद्देश्यतावच्छेदकव्यापकत्वाऽबाधितप्रती-त्यन्यथानुपपत्त्याऽवधार्यते- 'जीवाऽजीवादिसप्तपदार्थातिरिक्तपदार्थो नास्ति, इत्येवमधिकसंख्याव्यवच्छेदकत्वं विभागस्येति युक्तमुक्तम्- 'सर्वत्र विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वम्. इति। यदि सर्वत्र विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वं कस्य-चिदेव वादिनः सिद्धं स्यात् तदेतदपि वक्तुं शक्यते- न स्याद्वादिन-स्तत्सिद्धमतस्तदीयजीवाऽजीवेत्यादिविभागवाक्ये न्यूनसङ्ख्याव्यव-

च्छेदकत्वाऽभावो नाऽयुक्तत्वनिबन्धनः, अत उक्तम्- सर्वसिद्धमिति। 'सर्वत्र विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वं सर्वसिद्धम्' इत्यभिधानस्य तावदेतदेव प्रयोजनम्, यदुत- 'जीवाऽजीवा०' इत्यादिसप्ततत्त्वविभागस्य न्यूनसङ्ख्याव्यवच्छेदफलकत्वाऽभावादयुक्तत्वमिति तदेतत्प्रयोजनमावेदयितुमाह- 'तत्रेति- अस्य 'न्यूनाधिकसङ्ख्याव्यवच्छेदयोर्मध्ये' इत्यर्थो ग्राह्यः? उत 'न्यूनाधिकसङ्ख्ययोर्मध्ये' इत्यर्थ उपादेयः? किं वा 'न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वे' इत्यर्थ आश्रयणीयः? अथवा 'विभागवाक्ये' इत्यर्थ आकलनीयः? यत्राऽनेके पदार्था उद्दिष्टाः, उद्दिष्टानां च क्रमेण लक्षण-परीक्षादिना निरूपणं कर्तव्यं भवति, यद्दिवा कस्यचिद् युक्तत्वं कस्यचिच्चायुक्तत्वमित्येवमादिकमावेदनीयं भवति, तत्रोद्देशानन्तरं 'तत्र, इत्यस्य 'तेषां मध्ये तयोर्मध्ये' इत्यर्थो भवति, प्रकृतेऽपि यदि विभागवाक्यस्य न्यूनसङ्ख्याव्यवच्छेदोऽधिकसङ्ख्याव्यवच्छेदश्च फलमिति पाठः पूर्वं स्यात्, न चैवम्, अतः 'तत्र' इत्यस्य 'न्यूनाधिकसङ्ख्याव्यवच्छेदयोर्मध्ये' इत्यर्थो न युक्तः, किञ्च, तयोर्मध्येऽधिकसङ्ख्याव्यवच्छेदो विद्यत इति तस्य तत्राऽन्वयो युक्त इति तदन्वयेऽभिधित्सिते सति 'आधिक्यं व्यवच्छिद्यताम्' इत्यस्य स्थाने 'अधिकसङ्ख्याव्यवच्छेदो भवतु' इति पाठो युक्तः स्यादित्यतोऽपि सोऽर्थो न युक्तः, अत एव द्वितीयोऽप्यर्थो न सम्भवदुक्तिकः, तस्य 'आधिक्यं व्यवच्छिद्यताम्' इत्यत्रान्वयसम्भवेऽपि पूर्वं तथाऽनुद्दिष्टत्वात्, न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वस्य पूर्वमुक्तत्वेन तस्य 'तत्र' इति त्रप्प्रत्ययप्रकृतितच्छब्देन परामर्शसम्भवतस्तृतीयार्थस्य युक्तत्वेऽपि नाऽर्थप्रकर्षः कश्चिदत्र सम्भावनापथमृच्छतीत्यतश्चतुर्थोऽर्थोऽवशिष्यते, तत्र उद्देश्य-विधेयभावस्थले तत्रेत्येवमन्वये तत्रेत्यवश्यमुपादेयम्, अन्यथा भवत्वन्यत्रोद्देश्य विधेयभावस्थले विधेयतावच्छेदकरूपेण विधेयतासमव्याप्तरूपेण वा

तावच्छेदकरूपेण विधेयतासमव्याप्तरूपेण वा विधेयस्य व्यापकत्व-

विधेयस्य व्यापकत्वलाभो व्युत्पत्तिमर्यादया, एतावता विभागवाक्ये किमायातं यद्बलाद् विभागवाक्येऽधिकसङ्ख्याव्यवच्छेदफलकत्वं सिद्धयेदित्याशङ्काऽबाधितप्रसरा स्यात्, 'तत्र' इत्यस्योपादाने च उद्देश्यविधेयभावस्थले विभागवाक्ये विधेयतावच्छेदकरूपेण विधेयता-समव्याप्तरूपेण वा विधेयस्य व्यापकत्वलाभो व्युत्पत्तिमर्यादयेत्येवं यथाश्रुतान्वयबोध एवोक्ताशङ्का नोत्थानमप्यर्हतीति, यद्यपि विभाग-बलादेव न्यूनाधिकसङ्ख्याव्यवच्छेदतः प्रतिनियतसप्तत्वादिसङ्ख्याव-गतिः स्यादेव तथाऽपि यत्र विभागवाक्ये स्पष्टार्थमपि सप्तादि-पदमुपात्तं तत्र सप्तत्वादिकमपि विधेयकोटिसन्निविष्टत्वाद् विधेय-तावच्छेदकं भवतीति तत्र विधेयतावच्छेदकसप्तत्वादिरूपेण विधेय-स्योद्देश्यतावच्छेदकव्यापकत्वं विभागवाक्येऽपि सम्भवत्येव, सप्तत्वस्य पर्याप्त्या प्रत्येकाऽवृत्तित्वेऽपि सम्बन्धान्तरेण प्रत्येक-वृत्तित्वमपि सम्भवति, प्रत्येकाऽवृत्तिधर्मस्य समुदायाऽवृत्तित्व-नियमतः पर्याप्तिसम्बन्धेनाऽपि प्रत्येकवृत्तित्वं तस्य सम्भवत्येव, यत्रापि विभागवाक्ये सप्तादिपदस्य नोपादानं तत्रापि चरमपदस्य तावदन्यतमत्वविशिष्टे निरूढलक्षणया तावदन्यतमत्वस्य विधेय-तावच्छेदकतया भानं भवत्येवेति विधेयतावच्छेदकेन तेन विधेयस्य व्यापकत्वं विभागवाक्येऽपि, यदि च चरमपदे न तावदन्यतमत्व-विशिष्टे निरूढलक्षणा, तदापि विधेयतासमव्याप्तेन तावदन्यतमत्वेन विधेयस्योद्देश्यतावच्छेदकव्यापकत्वं भविष्यत्येव, 'पृथिवी गन्धवती, वह्निरुष्णः, शीतं जलम्, द्रव्यं गुणवद्' इत्यादौ सर्वत्रैकविधस्यैव विधेयत्वेन विधेयतावच्छेदकरूपेणैव विधेयस्योद्देश्यतावच्छेदकव्या-पकत्वम्, विभागवाक्य एव तूद्देश्य-विधेयभावस्थले नानाविधस्य विधेयत्वम्, तत्रैकविधायां विभजनमेव न स्यात्, नहि समवाय-स्यैकविधस्य विभागो भवतीति विभागवाक्यात्मकोद्देश्य-विधेय-

लाभो व्युत्पत्तिमर्यादयाऽवश्यं स्वीकर्तव्यः, अन्यथा 'वह्निमान्

भावस्थल एव तु चरमपदस्य तावदन्यतमत्वविशिष्टे निरूढलक्षणाऽनङ्गीकारपक्षे विधेयतावच्छेदकानां विभिन्नानां परस्परविरुद्धानामुद्देश्यतावच्छेदकव्यापकतावच्छेदकत्वं न सम्भवतीत्यतो विधेयतासमव्याप्तरूपेण विधेयस्य व्यापकत्वलाभ इत्युक्तिरपि 'तत्र' इत्यस्य 'विभागवाक्ये' इत्यर्थकतां पुष्णातीति। व्युत्पत्तिमर्यादयेति– व्युत्पत्तिश्चात्र 'असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयाऽन्वयः' इतिनियमलक्षणा, उक्तनियमनिर्वाहककार्यकारणभावरूपा वा, कार्यकारणभावश्च– उद्देश्यतावच्छेदकावच्छेदेनोद्देश्यविशेष्यकविधेयप्रकारकान्वयबोधं प्रति उद्देश्य-विधेयबोधकपदसमभिव्याहारज्ञानं कारणमिति, यद्यपि शाब्दबोधे पदजन्योपस्थितिविषयस्यैव प्रकारविधया भानम्, अत एव प्रकारतासम्बन्धेन शाब्दबोधं प्रति प्रकारतासम्बन्धेनोपस्थितिः कारणमित्येवमुपस्थितिशाब्दबोधयोः कार्यकारणभावः, तथा च विभागवाक्येऽन्यत्र वोद्देश्यविधेयभावस्थले व्यापकतावोधकपदाऽभावात् पदजन्योपस्थितविषयस्योद्देश्यतावच्छेदकव्यापकत्वस्य विधेयांशे प्रकारविधया भानं न सम्भवति, तथापि उद्देश्यतावच्छेदकव्यापकविधेयप्रतियोगिकतादात्म्यस्य संसर्गविधया भानं तादृशसमभिव्याहारलक्षणाकाङ्क्षाबलात् स्वीक्रियत इति निरुक्तसंसर्गघटकतयोक्तव्यापकत्वस्य भान सम्भवतीत्येतदर्थावगतये 'व्युत्पत्तिमर्यादया' इत्यत्र मर्यादापदोपादानम्, अन्यथा 'व्युत्पत्त्या' इत्येव लाघवादुच्चारणीयं स्यात्, तथा च यत्र यादृशो बोधो लौकिकपरीक्षकाणामनुभवपथमवतरति तत्र तादृशबोधनिर्वाहिकव व्युत्पत्तिराद्रियते नाऽतथाभूतेति यत्रैकविध एव विधेयस्तत्र पदशक्त्युपस्थितविधेयतावच्छेदकावच्छिन्नमेवोद्देश्यतावच्छेदकनिरूपितव्यापकत्वं संसर्गविधया विधेये भासते, विभागवाक्यप्रभवबोधे तु पदलक्षणोपस्थितविधेयतावच्छेदकावच्छिन्नं पदा-

धूमवान्' इत्यादौ द्रव्यत्वादिना धूमवदादिव्यापकत्वलाभ-

नुपस्थितविधेयतासमव्याप्यधर्मावच्छिन्नं वोद्देश्यतावच्छेदकनिरूपित-व्यापकत्वं समभिव्याहारविशेषलक्षणाकाङ्क्षाबलाद् विधेये संसर्ग-घटकतया भासते, अनुभवमुखप्रेक्षाविदग्धो हि परीक्षको नाऽनु-भवमवधूयावतिष्ठत इति, अत एवोक्तम्– अवश्यं स्वीकर्तव्य इति। एवमनङ्गीकारेऽनिष्टप्रसञ्जनमावेदयति– अन्यथेति– विधेयतावच्छेद-केन विधेयतासमव्याप्तेन वा विधेयस्य व्यापकत्वलाभानङ्गीकारे, येन केनचिद् रूपेण विधेयस्य व्यापकत्वाङ्गीकारे वेत्यर्थः। 'वह्निमान् धूमवान्' इत्यादाविति– 'उद्देश्यवचनं पूर्वं विधेयवचनं ततः' इति वचनाद् वह्निमानित्युद्देश्यवचनं धूमवानिति विधेयवचनम्, एवं च निरुक्तवाक्येन वह्निमन्तमुद्दिश्य धूमवतो विधानं लभ्यते; तच्च न सम्भवति, वह्निमत्त्वलक्षणोद्देश्यतावच्छेदकव्यापकत्वस्य धूमवति विधेये धूमवत्त्वात्मकविधेयतावच्छेदकेनाऽसम्भवादिति निरुक्तवाक्यं शब्दमर्यादाभिज्ञा न प्रयुञ्जते, यदि तु येन केनचिद् रूपेण व्यापकत्वलाभः स्यात् तदा वह्निमत्त्वव्यापकत्वं द्रव्यत्वेन रूपेण धूमवतोऽपि समस्तीति व्युत्पन्ना अपि निरुक्तवाक्यं प्रयु-ञ्जीरन्नित्यर्थः, यदि तु 'नीलो घटः' इत्यत्र नीलस्य विधेयत्वेऽपि तद्वचनं पूर्वं समस्त्येवेति 'उद्देश्यवचनं पूर्वम्' इति वचनस्य नाऽऽदरस्तदा 'वह्निमान् धूमवान्' इत्यादौ धूमवन्तमुद्दिश्य वह्निमतो विधानं सम्भवति, विधेयतावच्छेदकेन वह्निमत्त्वेन रूपेण वह्निमतो धूमवद्व्यापकत्वमपि समस्तीति 'वह्निमान् धूमवान्' इति प्रयोगः प्रामाणिक एवेति विभाव्यते, तदापि वह्निमत्त्वेनैव व्यापकत्वस्य लाभस्तत्रेष्टो न तु द्रव्यत्वादिना, उक्तनियमाऽभावे तु द्रव्यत्वादिना धूमवदादिव्यापकत्वलाभस्याऽनिष्टस्याऽपि प्रसङ्गादित्यर्थः, अथवा वह्निमान् धूमवान्न भवतीति कश्चिद् भ्रान्तोऽवधारयति, तं प्रति वह्निमान् धूमवान् सम्भवत्यपीत्यभिप्रायेण 'वह्निमान् धूमवान्'

प्रसङ्गात्, तदिह 'जीवाऽजीव०' इत्यादिवाक्ये चरमपदे तावदन्यतमत्वेन निरूढलक्षणास्वीकाराद् विधेयतावच्छेदकेन, अन्यथा

इति प्रयुज्यते, तत्र वह्निमत्ययोगोलके प्रत्यक्षेणैव धूमवतो बाध इति 'असति बाधके' इत्यस्याभावाद् वह्निमत्त्वावच्छेदेन धूमवतोऽन्वयो न भवति, किन्तु वह्निमत्त्वसामानाधिकरण्येनैव, विधेयताऽनवच्छेदकरूपेणापि व्यापकत्वलाभे तु द्रव्यत्वेन रूपेण धूमवतो बाधाऽभावात् तद्रूपेण धूमवतो वह्निमद्व्यापकत्वस्य सम्भवादवच्छेदकावच्छेदेनान्वयस्यानिष्टस्य प्रसङ्गादित्यर्थः। भवतु सर्वत्र विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदकत्वं प्रकृते ततः किमित्यपेक्षायामाह– तदिहेति। तत् ततः, निरुक्तरीत्या व्यापकत्वं स्वीकरणीयमिति हेतोरिति यावत्। 'इह' इत्यस्य स्पष्टीकरणम्–जीवाऽजीवेत्यादिवाक्ये इति– "जीवा-ऽजीवा-ऽऽश्रव बन्ध संवर-निर्जरा-मोक्षास्तत्त्वम्' इति विभागवाक्ये इत्यर्थः, अस्य 'आधिक्यं व्यवच्छिद्यताम्' इत्यत्रान्वयः। चरमपदे 'जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षाः' इति समस्तवाक्यघटकाऽन्त्यमोक्षपदे, अस्य 'निरूढलक्षणा' इत्यनेनान्वयः। तावदन्यतमत्वेन जीवाजीवाश्रव-बन्ध-संवर-निर्जरा-मोक्षान्यतमत्वेन। निरूढलक्षणेति– लक्षणा द्विविधा– आधुनिकी निरूढा चेति, तत्र प्रयोजनवती लक्षणा आधुनिकी, प्रयोजनाऽभावाच्चात्र न तस्याः स्वीकारः, अनादितात्पर्यमूलिका लक्षणा निरूढा, तस्या एवात्र स्वीकारः, 'मोक्षपदं जीवाऽजीवाद्यन्यतमत्वविशिष्टबोधेच्छयोच्चरितम्' इत्येवं तात्पर्यग्रहे निरूढलक्षणामूलीभूते निमित्तत्वाच्च न जीवाऽजीवादिपदानां वैयर्थ्यम्, यदा च निरुक्तान्यतमत्वविशिष्टे मोक्षपदस्य लक्षणा तदा तत्त्वपदवाच्यं पदार्थमुद्दिश्य निरुक्तान्यतमत्वविशिष्ट एव 'जीवा-ऽजीवा०' इत्यादिविभागवाक्येन विधीयत इति जीवा-ऽजीवाद्यन्यतमत्वं भवति विधेयतावच्छेकम्, अतो विधेयतावच्छेदकेन जीवाजीवाद्यन्यतम-

च विधेयतासमव्याप्तेन जीवाऽजीवाद्यन्यतमत्वेन पदार्थव्यापकत्व-

त्वेन जीवाजीवाद्यन्यतमस्य पदार्थलक्षणोद्देश्यस्य तादात्म्यसम्बन्धेन व्यापकत्वस्य जीवाजीवेत्यादिविभागवाक्यतो लाभाज्जीवाजीवेत्यादि-विभागवाक्ये, आधिक्यं जीवाजीवेत्यादिसप्तपदार्थापेक्षयाऽधिक्यम्, व्यवच्छिद्यतां व्यवच्छिन्नं भवतु, निरुक्तसप्तपदार्थाधिकोऽष्टम-नवम-पदार्थादिको मा भवत्वित्यर्थः, विभिन्नोपस्थितिजननद्वारा शाब्द-बोधजनकत्वमेव प्रत्येकं वाक्यघटकपदानां साफल्यम्, तदभावे निरुक्ततात्पर्यग्राहकत्वमात्रेण साफल्यं न चतुरचेतसां साफल्यधिय-माधिनोति, 'विधौ न परः शब्दार्थः' इति विधाने परः-शक्या-तिरिक्तोऽर्थालक्ष्योऽर्थः, शब्दार्थो न भवतीति मीमांसावाक्यमपि प्रकृते लक्षणां न सहत इति विभागवाक्ये चरमपदे तावदन्यतम-त्वविशिष्टे लक्षणास्वीकारोऽनाश्रयणीय एव शब्दमर्यादाभिज्ञाना-मिति यदि विभाव्यते तदाप्याह- अन्यथा चेति- चरमपदस्य तावद-न्यतमत्वविशिष्टे निरूढलक्षणाया अस्वीकारे चेत्यर्थः। विधेयता-समव्याप्तेनेति-प्रकृते विधेयता प्रत्येकं जीवाजीवादिषु सप्तसु वर्तते, जीवा-ऽजीवाद्यन्यतमत्वमपि जीवभिन्नत्वे सत्यजीवभिन्नत्वे सत्या-श्रवभिन्नत्वे सति बन्धभिन्नत्वे सति संवरभिन्नत्वे सति निर्जरा-भिन्नत्वे सति मोक्षभिन्नो यस्तद्भिन्नत्वलक्षणं तेषु वर्तत इति भवति विधेयतासमव्याप्तम्, ततस्तेन रूपेण जीवाऽजीवादीनां विधेयानां तादात्म्येन पदार्थरूपोद्देश्यनिरूपितव्यापकत्वस्याऽपि निरुक्तविभागवाक्यतो लाभान्निरुक्तवाक्ये आधिक्यं व्यवच्छिद्यता-मित्यर्थः। तथा चाधिकसङ्ख्याव्यवच्छेदकफलकत्वं यथा वैशेषिकादि-पदार्थविभागवाक्ये तथा भवदीयतत्त्वविभागवाक्येऽपि ततस्तन्न प्रकृतशङ्काविषयः किन्तु वैशेषिकादिपदार्थविभागवाक्ये यद्दिशा न्यून-सङ्ख्याव्यवच्छेदफलकत्वं तेषामनुमतं तद्दिशैव भवतामपि स्वीयतत्त्व-

लाभादाधिक्यं व्यवच्छिद्यताम्; यत् तु विभाजकोपाधीनां मिथः

विभागवाक्ये तदनुमतम्, 'तच्चाऽसम्भवितत्वात् प्रकृतशङ्काविषय इत्यावेदनायाह- यत्त्विति- यत् पुनरित्यर्थः, इदं यत्पदं 'तच्चाऽत्राऽसम्भवि' इत्येतद्घटकतत्पदेन सह सापेक्षभावमश्नुते, तथा च यत् साङ्कर्यरूपं न्यूनत्वमन्यतमत्वबलाद् व्यवच्छेद्यं तच्चात्राऽसम्भवीत्यन्वयः। यद्यपि विभागवाक्ये न्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वमेव प्रागभिहितं न तु तत्र न्यूनत्वव्यवच्छेदकत्वं सन्निविष्टम्, तथापि पदार्थाः प्रतिव्यक्तिगणनयाऽनन्ता एव, न तु सप्तादिसङ्ख्यकाः, अतो विभाजकोपाधीनां मिथः साङ्कर्यरूपं न्यूनत्वं तदा भवेद् यदि कस्यचिद् विभाजकस्याश्रयः कश्चित् तदन्यविभाजकाश्रयः, अपरश्च तस्याश्रयस्तद्भिन्नविभाजकाश्रयः स्यात्, तथा च यस्य विभाजकस्याश्रयौ विभिन्नविभाजकोपाधिद्वयाकलितौ तस्य विभाजकस्य विभिन्नविभाजकोपाधिभ्यां समं साङ्कर्यं विभिन्नविभाजकोपाध्योर्वा तेन विभाजकेन समं सांकर्यं स्यात्, मिथोऽसंकीर्णानामेव विभाजकोपाधित्वमभिमतं यतः 'सामान्यधर्मव्याप्यपरस्परविरुद्धनानाधर्मेण धर्मिप्रतिपादनं विभागः' इति विभागलक्षणं विभाजकोपाधीनां मिथोविरुद्धत्वमन्तरेण न सम्भवति, विरुद्धता चाऽसंकीर्णानामेव न तु संकीर्णानां समानाधिकरणानाम्, अतो यस्य विभाजकस्याश्रयणे विभाजकोपाधीनां मिथः साङ्कर्यरूपं न्यूनत्वं स्यात् स विभाजकोपाधिर्नाभ्युपेयः, एवं च तं विभाजकोपाधिमुपादाय विभाजकसमधिगतसप्तत्वादिसङ्ख्याऽपि न निर्वहेत्, किन्तु तन्न्यूनसङ्ख्यैव विभाजकोपाधिगता स्यात्, सच्च स्वाश्रयवत्त्वसम्बन्धेन पदार्थगताऽपि भवेदित्येवं विभाजकोपाधीनां मिथः साङ्कर्यरूपं न्यूनत्वं पदार्थगतन्यूनसङ्ख्यापर्यवसितम्, तद्व्यवच्छेदे पदार्थगतन्यूनसङ्ख्याऽपि व्यवच्छिन्ना भवतीत्याशयेनाह- विभाजकोपाधीनां मिथः साङ्कर्यरूपनपीति। इदं चात्र विशिष्यैदम्पर्यम्- यावत्सङ्ख्यकाः पदार्था

साङ्कर्यरूपं न्यूनत्वमप्येतद्वाक्येनान्यतमत्वबलादेव व्यवच्छेद्यम्,

---

विभागाल्लभ्यन्ते तन्न्यूनसङ्ख्यकाः पदार्थास्तदैव स्युर्यदि कस्यचित् पदार्थस्य तदन्यपदार्थेष्वन्तर्भावः क्रियेत. एवं सति यत्पदार्थेऽन्तर्भावस्तत्पदार्थाऽवान्तरपदार्थ एव यदि सन्निवेशो भवेत् तदा साङ्कर्यं न भवति, यथा-सुवर्णमतिरिक्तं पदार्थ सम्भाव्य तदादाय 'अष्टौ पदार्थाः' इत्येवं विभागवाक्यस्य न सम्भवः, यतः सुवर्णस्य द्रव्यपदार्थेऽन्तर्भावः, एवं च सति अष्टसङ्ख्यान्यूना सप्तसङ्ख्या समस्तीति तद्व्यवच्छेदाऽसम्भवात्, अत्र सुवर्णपदार्थस्य द्रव्यपदार्थावान्तरतेजःपदार्थ एवाऽन्तर्भाव इति तथाऽभ्युपगमे द्रव्यत्वावान्तरजातीनां पृथिवीत्वादीनां साङ्कर्यं नापततीति भवति तथाऽन्तर्भावो युक्तः, यदि त्वेकमेव सुवर्णद्रव्यं गुरुत्वात् पीतिमभागमुपादाय पृथिवीस्वरूपमपि स्यात्, अत्यन्तानुच्छिद्यमानजन्यद्रवत्वात् तेजःस्वरूपमपि भवेत् तदा पृथिवीत्व-तेजस्त्वयोर्विभिन्नाधिकरणवर्तिनोः सुवर्णे सामानाधिकरण्यात् साङ्कर्यमापतेदिति दशमं द्रव्यमेव तदुपेयम्, एवं सति द्रव्यस्य नवसङ्ख्यकतया विभागस्य न सम्भवो भवेत्, यदि तु कस्याश्चित् सुवर्णव्यक्तेः पृथिव्यामन्तर्भावः कस्याश्चित् तेजस्यन्तर्भाव इत्यभ्युपगम्येत तदाऽपि सुवर्णत्वेन समं पृथिवीत्व-तेजस्त्वयोः साङ्कर्यं स्यात्, तद्यथा-सुवर्णत्वाभाववति पाषाणादौ पृथिवीत्वं वर्तते, पृथिवीत्वाभाववति तेजस्सुवर्णे सुवर्णत्वं वर्तते, तयोश्च पार्थिवसुवर्णे सामानाधिकरण्यम्, एवं तेजस्त्वस्यापि तेन समं साङ्कर्यं ज्ञेयम्, तथा च यया दिशा न्यूनसङ्ख्यकपदार्थाभ्युपगमे साङ्कर्य नापतति तादृशन्यूनसङ्ख्यायां सत्यामेव विभागव्याघातः, यतस्तादृशन्यूनत्वे सत्यपि साङ्कर्यस्याऽभावान्न्यूनसङ्ख्यकानां विभाजकोपाधीनां सम्भवेन तद्रूपन्यूनसङ्ख्यायाः परम्परासम्बन्धेन पदार्थेषु सद्भावान्न्यूनसङ्ख्यकपदार्थः स्यादेवेति,

न्यूनत्वे पृथिवी-घटाऽन्यतमत्ववत् तस्याऽसम्भवात्, घटभेदवृत्तित्वा-

अत एव मूले साङ्कर्यरूपमेव न्यूनत्वं व्यवच्छेद्यतयोक्तम्, न त्व-साङ्कर्यरूपं तत् तथोक्तम्, यया दिशा तु न्यूनसङ्ख्यकपदार्थाभ्युपगमे विभाजकोपाधीनां साङ्कर्यमापतति तथाभ्युपगमे साङ्कर्यस्वरूपर्यवसितं न्यूनत्वं विभागो व्यवच्छिनत्तीति। एतद्वाक्येन जीवाऽजीवेत्यादिविभागवाक्येन। अन्यतमत्वबलादेव जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षान्यतमत्वबलादेव। कथमन्यतमत्वबलान्न्यूनत्वं व्यवच्छेद्यमित्याकाङ्क्षायामाह– न्यूनत्व इति। पृथिवी-घटान्यतमत्ववदिति– पृथिवी-घटान्यतमत्वस्य यथाऽसम्भवस्तथेत्यर्थः। ननु पृथिवी-भेद-घटभेदोभयावच्छिन्नप्रतियोगिताकभेद एव पृथिवी-घटान्यतमत्वशब्देनात्र विवक्षितः स कथं सङ्गतः? भेदद्वयावच्छिन्नप्रतियोगिताकभेदस्याऽन्यतरत्वरूपतयैव वैशेषिकादीनामनुमतत्वात्, अतोऽत्र 'पृथिवी-घटान्यतरत्ववद्' इत्येवं वक्तुमुचितमिति चेत्? सत्यम्, किन्तु वैशेषिकोक्त्युल्लेखः स्याद्वादिना ग्रन्थकृता स्वमतावलम्बनेन कृतोऽस्ति, स्वमते चान्यतरत्वस्थानेऽन्यतमत्वस्यैव प्रयोगः सिद्धान्ते दृश्यते, अतः सैद्धान्तिकानुमतिमवलम्ब्य 'पृथिवी-घटान्यतरत्ववद्' इति वक्तव्ये 'पृथिवी-घटान्यतमत्ववद्' इत्युक्तम्। ननु निष्प्रमाणकमिदं न परीक्षकाणामनुभवपथमधिरोहतीति चेत्? न– अत्र लाघवानुगृहीतप्रमाणस्य सद्भावात्; प्रमाणं च अन्यतरत्वमन्यतमत्वरूपमेव तद्भेदग्राहकप्रमाणाऽभावात्, ययोर्भेदग्राहकप्रमाणं नास्ति तयोरभेद एव, यथा– घट-कलशपदवाच्ययोः, अन्यतमत्वतश्च भेदग्राहकप्रमाणाऽभावोऽन्यतरत्वे, तस्मादन्यतरत्वमन्यतमत्वस्वरूपमेव' इत्यनुमानम्, नहि प्रमाणान्तरेणार्थभेदाऽसिद्धौ शब्दभेदमात्रेणार्थभेदः सिद्ध्यति, तथा सति घट-कलशपदवाच्ययोरपि भेदः सिद्ध्येत्, प्रमाणं च तयोर्भेदग्राहकं नास्त्येव किञ्चित्, यदि च भेदद्वयावच्छिन्नप्रतियोगिताको भेदोऽन्यतरत्वं भेदत्रयावच्छिन्न-

ऽऽद्यंशवैयर्थ्येन पृथिवीभेदवृत्तिद्वित्वादेः प्रतियोगिताऽनवच्छेदक-

---

प्रतियोगिताको भेदोऽन्यतमत्वमिति भेदद्वयावच्छिन्नप्रतियोगिताकभेदत्वभेदत्रयावच्छिन्नप्रतियोगिताकभेदत्वरूपविरुद्धधर्मद्वयाध्यासात् तयोर्भेदः, अन्यत्रापि विरुद्धधर्माध्यासादेव भेदोऽभ्युपगम्यते, स च विरुद्धधर्माध्यासो भेदसाधकोऽत्रापि समस्तीति विभाव्यते तर्हि भेदत्रयावच्छिन्नप्रतियोगिताकभेद-भेदचतुष्टयावच्छिन्नप्रतियोगिताकभेदयोरपि भेदत्रयावच्छिन्नप्रतियोगिताकभेदत्व-भेदचतुष्टयावच्छिन्नप्रतियोगिताकभेदत्वरूपविरुद्धधर्माध्यासाद् भेदोऽभ्युपगन्तव्य एव, एवं च भेदत्रयावच्छिन्नप्रतियोगिताकभेदस्यान्यतमत्वरूपत्वे भेदचतुष्टयावच्छिन्नप्रतियोगिताकभेदस्यान्यतमत्वातिरिक्तयत्किञ्चिद्धर्मस्वरूपत्वमेवोररीक्रियताम्, एवं भेदपञ्चकावच्छिन्नप्रतियोगिताकभेदादेरपि भिन्नभिन्नधर्मस्वरूपत्वमभ्युपगच्छतोऽपि मतमादरणीयं स्यात्। ननु भेदत्रयाद्यवच्छिन्नप्रतियोगिताकभेद एवान्यतमत्वम्, 'भेदत्रयादि' इत्यत्रादिपदाद् भेदचतुष्टयादेरपि ग्रहणमिति भेदचतुष्टयाद्यवच्छिन्नप्रतियोगिताकभेदानामप्यन्यतमत्वरूपतैवेति चेत्? तर्हि भेदद्वयावच्छिन्नप्रतियोगिताकभेदस्याप्यन्यतमत्वरूपतैवाऽस्तु। ननु त्रित्वादीनां सर्वेषामपि कूटत्वस्वरूपत्वादादिपदमनुपादायाऽपि भेदकूटावच्छिन्नप्रतियोगिताकभेदोऽन्यतमत्वमिति परिभाषा सम्भवति, एकेनैव भेदकूटावच्छिन्न प्रतियोगिताकभेदत्वेन सर्वषामपि भेदत्रयाद्यवच्छिन्नप्रतियोगिताक भेदानां संग्रहात्, भेदद्वयाद्यवच्छिन्नप्रतियोगिताकभेदस्यान्यतमत्वरूपत्वे आदिपदेन भेदत्रयादेर्ग्रहणस्यादरणे न तेषु सर्वेषु भेदेष्वनुगतस्यैकरूपस्य सम्भवः, एकत्वं परित्यज्य द्वित्वादिसाधारणस्य कस्यचिद् धर्मस्याऽभावादिति चेत्? न-भेदत्वव्याप्यव्यासज्यवृत्तिसङ्ख्यावदवच्छिन्नप्रतियोगिताकभेदस्यान्यतमत्वरूपतयाऽभ्युपगमात्, व्यासज्यवृत्तिसङ्ख्यात्वस्य द्वित्वादि-

त्वेन तदवच्छिन्नाऽभावाऽभावात्, तच्चात्रासम्भवीत्ययुक्तोऽयं विभागः"

साधारणत्वादित्यन्यतरत्वस्याप्यन्यतमस्वरूपत्वे लाघवमपीति बोध्यम्। तस्य जीवाजीवादिपदार्थान्यतमत्वस्य। कथं दृष्टान्तीकृत-पृथिवी-घटान्यतमत्वाऽसम्भव इत्यपेक्षायामाह- घटभेदेति-घटभेद-वृत्तित्वे सति पृथिवीभेदवृत्ति यद् द्वित्वं तदवच्छिन्नप्रतियोगिता-काऽत्यन्ताभाव एव पृथिवी-घटान्यतमत्वं वाच्यम्, तत्र घटभेद-वृत्तित्वस्याऽनिवेशेऽपि पृथिवीभेदो घटे न वर्तत इति पृथिवी-भेदात्यन्ताभावस्य घटान्यपृथिव्यामिव घटात्मकपृथिव्यामपि सत्त्वात् तावन्मात्रेणैव घटस्यापि संग्रहे प्रतियोगितावच्छेदककोटौ वैयर्थ्याद् घटभेदवृत्तित्वं न प्रविशति, तथा च पृथिवीभेदत्वस्यैव लघुभूतस्य प्रतियोगितावच्छेदकत्वमिति घटभेदमाश्रयान्तरमुपादाय यत् पृथिवीभेदवृत्तिद्वित्वं तस्य गुरुतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाऽभावात् घटभेद-पृथिवीभेदवृत्तिद्वित्वावच्छिन्नप्रतियोगि-ताकात्यन्ताभावस्याऽप्रसिद्धत्वादित्यर्थः, एतच्च घटभेदपृथिवीभेद-द्वयात्यन्ताभाव एव पृथिवीघटान्यतमत्वमिति पक्षं समाश्रित्य, पृथिवीभेद-घटभेदद्वयावच्छिन्नप्रतियोगिताकभेदस्य पृथिवी-घटा-न्यतमत्वरूपत्वपक्षे तु तदसम्भवप्रदर्शने 'प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाऽभावाऽभावात्' इत्यस्य स्थाने 'प्रतियोगितावच्छे-दकतानवच्छेदकत्वेन तदवच्छिन्नावच्छेदकताकप्रतियोगिताकाऽ-भावाऽभावात्' इति पाठः स्वयमूह्यः। अन्यतमत्वबलाद् व्यवच्छेद्य न्यूनत्वं तत्रैव भवति यत्र विभागवाक्ये निर्दिष्टा यावन्तः पदार्था-स्तेषां मध्यात् कस्यचित् पदार्थस्य पदार्थान्तरेष्वन्तर्भावे तावत्पदार्थ-गतान्यतमत्वं नोपपद्यते, बहिर्भावे चोपपद्यते. प्रकृते तु जीवाऽ-जीवादयः सप्त पदार्था येऽभिहितास्तेषां मध्ये आश्रवादेरजीवपदार्थे जीवपदार्थे वाऽन्तर्भावे सत्यपि बहिर्भूततयाऽभिधानं समस्तीति तावत्पदार्थगतान्यतमत्वं सर्वथा नोपपन्नमेवेति कुतस्तद्बलाद् व्यव-

इत्याहुः; तन्न- भूतमूर्तान्यतमत्ववज्जीवाऽजीवाऽऽश्रवाद्यन्यतमत्वस्य जीवत्वा-ऽजीवत्वा-ऽऽश्रवत्वादिसाङ्कर्येऽपि सम्भवाद्, जीवत्वा-

---

च्छेद्यं न्यूनत्वमपीत्याह- तच्चेति- अन्यतमत्वबलाद् व्यवच्छेद्यं न्यूनत्वं चेत्यर्थः। अत्र जीवाजीवेत्यादिविभागवाक्ये। असम्भवि नास्ति। इति एतस्माद् हेतोः, न्यूनसङ्ख्याव्यवच्छेदकत्वाऽभावादिति यावत्। अयं जीवाजीवेत्यादिवाक्यात्मकः। जीवाऽजीवेत्यादिविभागस्याऽयुक्तत्वप्रतिपादनपरं वैशेषिकमतं प्रतिक्षिपति- तन्नेति। निषेधे हेतुमुपदर्शयति- भूत-मूर्तान्यतमत्ववदिति- भूतत्वं विहाय मूर्तत्वं मनसि वर्तते, मूर्तत्वं विहाय भूतत्वमाकाशे वर्तते, इत्येवं भूतत्व-मूर्तत्वयोः परस्परात्यन्ताभावसामानाधिकरण्यम्, पृथिव्यादित्वितुष्टये च तयोः सामानाधिकरण्यमिति भूतत्व-मूर्तत्वयोः साङ्कर्येऽपि भूतत्वावच्छिन्नप्रतियोगिताकभेद-मूर्तत्वावच्छिन्नप्रतियोगिताकभेदद्वयावच्छिन्नप्रतियोगिताकभेदरूपस्य भूत-मूर्तान्यतमत्वस्य यथा सम्भवस्तथेत्यर्थः। जीवा-जीवाश्रवाद्यन्यतमत्वस्य जीवत्वावच्छिन्नप्रतियोयोगिताकभेदा-ऽजीवत्वावच्छिन्नप्रतियोगिताकभेदा ऽऽश्रवत्वावच्छिन्नप्रतियोगिताकभेद बन्धत्वावच्छिन्नप्रतियोगिकभेद संवरत्वावच्छिन्नप्रतियोगिताकभेद-निर्जरात्वावच्छिन्नप्रतियोगिताकभेद-मोक्षत्वावच्छिन्नप्रतियोगिताकभेदकूटावच्छिन्नप्रतियोगिताकभेदरूपस्य, अस्य 'सम्भवाद्' इत्यनेनान्वयः। जीवत्वा-ऽजीवत्वा-ऽऽश्रवत्वादिसाङ्कर्येऽपीति-जीवत्वं शुद्धचैतन्यलक्षणे मुक्तात्मनि वर्तते तत्राऽजीवत्वं नास्ति, अजीवत्वं धर्मास्तिकायादौ वर्तते, तत्र जीवत्वं नास्ति, मिथ्यादर्शनादिपरिणामलक्षणे जीव-पुद्गलाभ्यां कथञ्चिदभिन्ने आश्रवे आत्मप्रदेशसंश्लिष्टकर्मपुद्गलात्मकबन्धे च जीवत्वमजीवत्वं च वर्तत इत्येवं परस्परात्यन्ताभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वलक्षणसाङ्कर्येऽपि जीवत्वा-

-ऽजीवत्वाऽऽश्रवसाङ्कर्यस्य च जातिसाङ्कर्यादिबाधकान्तरादेव सिद्धेः ।

ऽजीवत्वा-ऽऽश्रवत्वादीनां धर्माणां स्वरूपतो भिन्नानां सद्भावेन जीवत्वावच्छिन्नप्रतियोगिताकभेदाऽजीवत्वावच्छिन्नप्रतियोगिताकभेदाऽऽश्रवत्वावच्छिन्नप्रतियोगिताकभेदानाम् एवं बन्धत्वाद्यवच्छिन्नप्रतियोगिताकभेदानां सम्भवात् तादृशभेदसप्तकावच्छिन्नप्रतियोगिताकभेदरूपस्य जीवाजीवाश्रवादिपदार्थसप्तकान्यतमत्वस्य सम्भवान्न तत्त्वस्य जीवादिरूपतया सप्तधा विभागोऽनुपपन्न इत्यर्थः । यथा च जीवत्वा-ऽजीवत्वयोर्मिथः साङ्कर्यं व्यावर्णितं तथा जीवत्वा-ऽजीवत्वाभ्यां सममाश्रवत्वादीनामपि साङ्कर्यमित्थं सङ्गमनीयम्-जीवत्वाभाववति कथञ्चिज्जीवभिन्नेऽजीवात्मके आश्रवादौ आश्रवत्वादिकं वर्तते, आश्रवत्वाद्यभाववति शुद्धचैतन्यस्वरूपे जीवे जीवत्वं वर्तते, कथञ्चिज्जीवाभिन्ने चाऽऽश्रवादौ जीवत्वमाश्रवत्वादिकं च वर्तत इति ।

ननु यदि विभाजकोपाधीनां साङ्कर्यरूपन्यूनत्वसद्भावेऽप्यन्यतमत्वस्योपपादनेऽन्यतमत्वबलान्न्यूनत्वं न व्यवच्छेद्यमेव विभागवाक्ये, तथा च विभागवाक्यस्य न्यूनसङ्ख्याव्यवच्छेदकफलकत्वमपि नोक्तदिशा भवतोऽभिप्रेतमिति जीवत्वाऽजीवत्वाद्यसाङ्कर्ये न कथञ्चिदुपपद्येतेत्यत आह—जीवत्वा-ऽजीवत्वाद्यसाङ्कर्यस्य चेति। अथवा साङ्कर्यस्य सद्भावेऽपि अन्यतमत्वं सम्भाव्य प्रस्तुतविभागस्य युक्तता दर्शिता, अथ प्रस्तुते साङ्कर्यमेव नास्तीति कुतस्तत्प्रयुक्तदोषावतार इत्यावेदनायाह- जीवत्वा-ऽजीवत्वाद्यसाङ्कर्यस्य चेति- अस्य 'सिद्धेः' इत्यनेनान्वयः, जीवत्वा-ऽजीवत्वादिकं चैकस्मिन्नधिकरणे यदि वर्तेत तदा जातिसाङ्कर्यस्य जातित्वबाधकस्य सद्भावाज्जीवत्वादेर्जातित्वमेव न स्यात्, अस्ति च जीवत्वादेर्जातित्वम्, अतस्तदन्यथानुपपत्त्या न जीवत्वाऽजीवत्वादेरेकाधिकरणवृत्तित्वम्, तच्च तदोपपद्येत यदि जीवाऽजीवोभयपरिमाणविशेषादिरूपस्याश्रवादेर्जीवा-ऽजीवाभ्यां भेदोऽप्यभ्युपेयेतेत्येवमाश्रवादेर्जीवा-ऽजीवाभ्यां भेदः, तत्सङ्गमनं च

जीवात्मकत्वेनाश्रवादेरजीवाद् भेदः, अजीवात्मकत्वेन च जीवाद् भेदः, इत्येवं जीवत्वा-ऽजीवत्वाद्यसाङ्कर्यस्य सिद्धेः, विभाजकोपाधीनामसाङ्कर्ये सत्येवान्यतमत्वोपपत्तिरिति नियमेऽपि जीवा-ऽजीवाद्यन्यतमत्वस्य सम्भवाज्जीवाऽजीवादिभेदेन सप्तधा तत्त्वविभाग उपपद्यतेतरामित्यर्थः। जातिसाङ्कर्यादीति–

"व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥ १॥

इति जातिबाधकसङ्ग्रहपरवचने सामान्यतः सङ्करस्यैव जातिबाधकतयोपन्यासो न तु जातिसङ्करस्येति किमित्यत्र जातिसाङ्कर्यस्य जातिबाधकतयोपन्यास इति चेत्? मैवम्– सामान्यतः साङ्कर्यस्य जातिबाधकत्वं उपाधिसाङ्कर्यस्य जातिमात्रे सद्भावेन जातिमात्रस्योच्छेदापत्तेः, तथाहि–"अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते" [कारिकावली] इति वचनादाश्रितत्वं नित्यद्रव्ये न वर्तते, जात्यादौ वर्तमानं तन्न जातिरूपं जातेर्जात्यादावसत्त्वात्, किन्तूपाधिस्वरूपमेवाश्रितत्वम्, तेनोपाधिना समं साङ्कर्यमस्ति द्रव्यत्व-पृथिवीत्वादिजातीनाम्, यतो द्रव्यत्व-पृथिवीत्वाद्यभाववति गुणादौ आश्रितत्वं वर्तते, आश्रितत्वाभाववति पार्थिवादिपरमाण्वादौ द्रव्यत्व-पृथिवीत्वादिकं वर्तते, घट-पटाद्यवयविद्रव्ये च द्रव्यत्व-पृथिवीत्वादिकं वर्तते, आश्रितत्वमपि वर्तत इत्येवं परस्परात्यन्ताभावसामानाधिकरण्ये सति सामानाधिकरण्यलक्षणं साङ्कर्यं समस्ति, तथाऽन्यतरत्वादिकमुपाधिरूपमेवेति पक्षोऽपि नव्यानामपीष्ट एव, तत्र पृथिवी-रूपान्यतरत्वादिना द्रव्यत्वजातेः साङ्कर्यं समस्त्येव, निरुक्तान्यतरत्वाऽभाववति जलादौ द्रव्यत्वस्य द्रव्यत्वाभाववति रूपे निरुक्तान्यतरत्वस्य सद्भावेन परस्परात्यन्ताभावसामानाधिकरण्यस्य, पृथिव्यां द्रव्यत्व-निरुक्तान्यतरत्वयोः सद्भावेन सामानाधिकरण्यस्य च सद्भा-

इत्थमेव "प्रमाण-प्रमेय०" इत्यादि गौतमीयविभागसूत्रमप्युप-

वात्, इत्येवं दिशाऽन्यजातिष्वप्युपाधिसाङ्कर्यं निभालनीयम्, अतो जातिमात्रोच्छेदभयादुपाधिसाङ्कर्यं न जातिबाधकं किन्तु जातिसाङ्कर्यस्यैव जातिबाधकत्वमित्यभिसन्धाय 'जातिसाङ्कर्य' इत्युक्तम्, उपाधेस्तूपाधिसाङ्कर्यमप्यस्ति जातिसाङ्कर्यमप्यस्ति, अथापि तस्योपाधित्वं निराबाधमेवेति तत्र साङ्कर्यमात्रस्याऽबाधकत्वमेव, तत्रोपाध्योः साङ्कर्यं यथा-घटरूपान्यतरत्व-पटरूपान्यतरत्वयोः घटपटान्यतरत्व-पटमठान्यतरत्वयोः, एवमन्येषामप्यन्यतरत्वादीनामुपाधीनामन्योऽन्यं साङ्कर्यं स्पष्टमेवोपलभ्यते, यदेवोपाधिसाङ्कर्यं जातावुपदर्शितं तदेवोपाधौ जातिसाङ्कर्यस्योदाहरणम्, अन्यदप्युपाधिजात्योः साङ्कर्यमिदमवसेयम्, तद्यथा-मूर्तत्वं जातिर्भूतत्वं चोपाधिरिति पक्षे मूर्तत्वजातेर्भूतत्वात्मकोपाधिना साङ्कर्यमपि जात्युपाध्योः साङ्कर्यमेव, क्रियाजनकतावच्छेदकतया मूर्तत्वस्य जातित्वं नैयायिकदेशीयैरुपगतमेव, एवं भूतत्वमपि पृथिव्यादिचतुष्टयवृत्ति जातिस्वरूपं स्पर्शजनकतावच्छेदकतया केचिदभ्युपगच्छन्ति, तस्याकाशवृत्तित्वानभ्युपगमान्न मूर्तत्वेन समं साङ्कर्यम्, यत एव जातिसाङ्कर्यमेव जातित्वबाधकं तत एव गन्धादिसमवायिकारणतावच्छेदकतया सिद्धायाः पृथिवीत्वादिजातेरिन्द्रियत्वेनोपाधिना साङ्कर्येऽपिजातित्वं निर्वहति, किन्तु पृथिवीत्यादिजात्या साङ्कर्यादिन्द्रियत्वमुपाधिरेव न तु जातिरिति नैयायिकसिद्धान्तः, स्वमते तु सामान्य-विशेषात्मकत्वं व्यक्तेरेव न त्वतिरिक्ता काचिज्जातिः समस्तीति बोध्यम्॥ इत्थमेव विभाजकसाङ्कर्येऽपि विभागस्य युक्तत्वादेव। प्रमाणप्रमेयेत्यादीति-"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ता-ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" [न्यायसू० अ० १, सू० १.] इति सम्पूर्णं सूत्रम्, अत्र प्रमाणत्व-प्रमेयत्वादिविभाज-

पद्यते। अथैवं न्यूनत्वव्यवच्छेदाभिप्रायाभावादीदृशविभागकरणेऽपि वस्तुतः पदार्थद्वित्वसिद्धौ भेदद्वयाभावमात्रस्य व्यापकताव-

---

कोपाधीनामिन्द्रियादौ साङ्कर्यऽपि तदन्यतमत्वस्य पदार्थत्वव्यापकस्य स्वीकारेण विभागः सुसंगतो भवति, अन्यथा पदार्थविभाजकोपाधीनां साङ्कर्यात् तदपि विभागसूत्रमयुक्तं स्यादित्याशयः। एवमपि न्यूनत्वव्यवच्छेदः स्वीकरणीय एव, तथा चोक्तदिशाऽन्यतमत्वासम्भवतो विभागस्यायुक्तत्वं स्यादेवेति वैशेषिकाः पुनः प्रत्यवतिष्ठन्ते– अथैवमिति। एवं गौतमसूत्रविभागानुरोधेन सङ्कीर्णस्याप्युपाधेः पदार्थविभाजकत्वव्यवस्थापनेन। न्यूनत्वव्यवच्छेदो यद्यभिप्रेतः स्यात् तदा कस्यचित् प्रमाणस्य प्रमेये कस्यचित् तु निर्णयादावन्तर्भावतो न्यूनसङ्ख्यकपदार्थानामेव सम्भवेन पदार्थाः षोडश न स्युरेव, न्यूनत्वव्यवच्छेदासम्भवादतो ज्ञायते–न्यूनत्वव्यवच्छेदो नाभिप्रेतः, तत एव च न्यूनपदार्थविभाजकधर्ममुपादायापि विभागे सम्भवति तदधिकसङ्ख्यकविभाजकधर्मोपादानेन विभाग इत्याह– न्यूनत्वेति। ईदृशविभागकरणेऽपि जीवाऽजीवाऽऽश्रवेत्यादिविभागकरणेऽपि। आश्रवादीनां जीवा-ऽजीवयोरेवान्तर्भावसम्भवेऽप्युक्तदिशा सप्तपदार्थविभागोपपादने वस्तुस्थित्या जीवाऽजीवौ द्वावेव पदार्थौ सप्तधा दर्शिताविति द्वयोरेव पदार्थयोः सिद्धिरित्याह–वस्तुतः पदार्थद्वित्वसिद्धाविति। न्यूनत्वव्यवच्छेदाभिप्रायाऽभावेऽपि 'जीवाऽजीवौ द्वौ पदार्थौ' इत्यप्यभिमतमेव परस्येति तथात्वे यदनिष्टमापपति तदाह– भेदद्वयाभावमात्रस्येति– एतच्चान्यतमत्वस्याऽत्यन्ताभावरूपत्वपक्षे, अन्योन्याभावरूपत्वपक्षे तु भेदद्वयावच्छिन्नप्रतियोगिताकाऽभावमात्रस्येति बोध्यम्, तथा च जीवभेदवृत्तित्वे सति अजीवभेदवृत्ति यद् द्वित्वं तदवच्छिन्नप्रतियोगिताकात्यन्ताभावस्वरूपस्य तदवच्छिन्नावच्छेदकताकप्रतियोगि-

च्छेदकत्वसम्भवादुक्तान्यतमत्वावच्छिन्नव्यापकतावलादेव न्यूनत्व-व्यवच्छेदो बलादापतेत्, तथा च महदासमञ्जस्यमिति चेत्? न- 'तत्त्वं परमार्थः' इति विवरणात् तत्त्वपदस्य मुमुक्षुप्रवृत्त्युपयुक्त-ज्ञानविषये रूढत्वात्, तस्य च सप्तभ्यो न्यूनस्याभावादुक्तविभा-

---

ताकाऽन्योऽन्याभावस्वरूपस्य वा जीवाऽजीवान्यतमत्वस्येत्यर्थः। व्यापकतावच्छेदकत्वसम्भवात् तादात्म्येन पदार्थव्यापकतावच्छेदकत्वसम्भवात्, यत्र तादात्म्येन पदार्थस्तत्रोक्ताभावमात्रस्वरूपजीवाऽजीवान्यतमत्ववानपीति भवति पदार्थव्यापकतावच्छेदकत्वं जीवाऽजीवान्यतमत्वस्य। एवं च सम्भवत्यतिप्रसङ्गाद्यनापादके लघौ धर्मे गुरुधर्मो न व्यापकताया अवच्छेदक इति जीवाऽजीवा-ऽऽश्रवादिभेदसप्तकाऽभावरूपस्य जीवाऽजीवाऽऽश्रवाद्यन्यतमत्वस्य जीवाऽजीवभेदद्वयाऽभावरूपजीवाऽजीवान्यतमत्वापेक्षया गुरूभूतस्य पदार्थव्यापकतावच्छेदकत्वं न स्यात्, जीवाऽजीवाऽऽश्रवाद्यवच्छिन्ना चोक्तव्यापकता जीवाऽजीवाऽऽश्रवादिपदार्थसप्तकविभागकरणेनाभ्युपगम्यते, तदभ्युपगमस्तदैव स्याद् यदि भेदद्वयाऽभावमात्रस्योक्तव्यापकतावच्छेदकत्वं न भवेदिति तादृशव्यापकतावलान्न्यूनत्वव्यवच्छेदः स्वीकरणीय एव, तस्याऽनुपपन्नत्वं दर्शितमेवेत्याह- उक्तान्यतमत्वावच्छिन्नेति- जीवाऽजीवा-ऽऽश्रवाद्यन्यतमत्वावच्छिन्नेत्यर्थः। जीवाऽजीवाऽऽश्रवेत्यादिः पदार्थस्य न विभागः, किन्तु परमार्थस्य, परमार्थश्च स एव भवति यज्ज्ञानान्मुमुक्षुप्रवृत्तिः, सा च जीवाऽजीवाऽऽश्रवादिसप्तकज्ञानादेव न तु न्यूनज्ञानादित्युक्तविभजनं नायुक्तमिति समाधत्ते- नेति। तस्य च मुमुक्षुप्रवृत्त्युपयोगिज्ञानविषयस्य। सप्तभ्यो जीवाऽजीवाऽऽश्रवादिभ्यः सप्तभ्यः। उक्तेति- जीवत्वा-ऽजीवत्वा-ऽऽश्रवत्व-बन्धत्व-संवरत्व-निर्जरात्व-मोक्षत्वात्मकोपाध्यवच्छिन्नभेदाऽभावगतसप्तत्वसङ्ख्याव्याप्यषट्त्वादिसङ्ख्यायां मुमुक्षुप्रवृत्त्युपयुक्तज्ञानविषयव्यापकतावच्छेदकता या सप्तत्वसङ्ख्यावच्छिन्ना जीवत्वा-

जकोपाध्यवच्छिन्नभेदाभावसङ्ख्याव्याप्यसङ्ख्यायां व्यापकताऽवच्छेदकताऽवच्छेदकत्वपर्याप्त्यभावलक्षणन्यूनत्वव्यवच्छेदस्याऽबाधितत्वादिति दिक् ॥

अत्र च 'अदग्धदहन'न्यायेन यावदप्राप्तं तावद् विधेयम्, अत एव "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र ऋत्विक्प्रचरणस्य प्रत्यक्षसिद्धत्वाल्लोहितोष्णीषत्वमात्रं विधेयम्, "दध्ना जुहोति" इत्यत्र दध्नः प्रत्यक्षसिद्धत्वात् करणत्वमात्रं विधेयमिति मीमांसा-

वच्छिन्नभेदाभावादिगता तदवच्छेदकत्वपर्याप्तिर्नास्तीति तदवच्छेदकत्वपर्याप्त्यभावस्वरूपो यो न्यूनत्वव्यवच्छेदस्तस्योक्तसङ्ख्यायामबाधितत्वाद् भवति निरुक्तविभागस्यापि न्यूनत्वव्यवच्छेदफलकत्वेन युक्तत्वमित्यर्थः। जीवाऽजीवाऽऽश्रवादिविभागवाक्ये कस्य विधेयत्वम्? कस्य चोद्देश्यत्वम्? इत्यपेक्षायामाह- अत्र चेति- उक्तवाक्ये त्वित्यर्थः ॥

अदग्धेति- यद् दग्धं तद् दग्धमेव न पुनस्तस्य दहनायाग्निव्यापारः, किन्तु य एवांशोऽदग्धस्तस्यैव दहनायाग्निव्यापारः, एवमेव यश्चांशः सिद्धः स सिद्ध एव न पुनस्तत्साधनाय साधकव्यापार इति न तस्य विधेयत्वम्, किन्तु य एवांशो न सिद्धस्तत्साधनायैव साधकव्यापार इति तस्यैव विधेयत्वमिति यावदप्राप्तं प्रमाणान्तरतो न पूर्वं सिद्धम्, तावद् विधेयमित्यर्थः। अप्राप्तस्यैव विधेयत्वमित्यत्र मीमांसकसंवादमुपदर्शयति- अत एवेति- अप्राप्तस्य विधेयत्वादेवेत्यर्थः। 'प्रत्यक्षसिद्धत्वाद्' इत्यनेन ऋत्विजां प्राप्तत्वेन न विधेयत्वमित्युपदर्शितम्, एवमग्रेऽपि। 'दध्ना' इत्यत्र प्रकृत्या दधि प्रतिपाद्यते, प्रत्ययेन च करणत्वम्, तत्र दध्नः प्रत्यक्षप्रतीतत्वेन प्राप्तत्वान्न विधेयत्वम्, तस्य होमं प्रतिकरणत्वं तु न प्रमाणान्तरप्रतिपन्नमिति तस्यैव विधेयत्वम्, पूर्वत्र समभिव्याहारलक्षणा-

निष्णाता सङ्गिरन्ते, अतो यस्य तत्त्वाऽधिगमस्तं प्रति जीवाद्यन्यतमस्य विधेयत्वम्, यस्य च जीवाद्यन्यतमाधिगमस्तं प्रति तत्त्वस्य, यस्य चोभयाऽनधिगमस्तं प्रत्युभयस्य विधेयत्वमित्यतिदेशेनाऽऽकरे व्यवस्थितम्।

विशेषविधि-निषेधयोः शेषनिषेध-विध्यभ्यनुज्ञाफलकत्वात्, सामान्यतोऽवगतानां विशेषतोऽभिधाने न्यूनाधिकसङ्ख्याव्यवच्छेदकत्वं व्युत्पत्तिसिद्धमित्यपरे।

ऽऽकाङ्क्षामत्पदान्तरप्रतिपाद्यस्य विधेयत्वमुद्देश्यत्वं च, उत्तरत्राऽऽनुपूर्वीलक्षणाऽऽकाङ्क्षामत्प्रकृति-प्रत्ययप्रतिपाद्ययोरेकस्योद्देश्यत्वमपरस्य विधेयत्वमिति विशेषः। प्रकृते सङ्गमयति– अत इति– अप्राप्तस्य विधेयत्वत इत्यर्थः। यस्य यस्य प्रतिपाद्यशिष्यादेः प्रमातुः। तत्त्वाऽधिगमः तत्त्वं समस्तीत्येतावन्मात्रं ज्ञानम्। तं प्रति तादृशप्रमातारं प्रति, तत्त्वस्य प्राप्तत्वान्न विधेयत्वम्, किन्तु जीवाद्यन्यतमस्य जीवाऽजीवाऽऽश्रवादिसप्तान्यतमस्य प्रमाणान्तरात् परमार्थस्वरूपतयाऽनवगतस्य विधेयत्वमित्यर्थः। 'तत्त्वस्य' इत्यस्य 'विधेयत्वम्' इत्यनेन सम्बन्धः। उभयाऽनधिगमः जीवाद्यन्यतम-तत्त्वोभयानधिगमः। उभयस्य जीवाद्यन्यतम-तत्त्वोभयस्य। इत्थं विधेयत्वोररीकारो न सूरिभिरन्यत्राऽऽदृत इति न वाच्यम्, रत्नाकरे देवसूरिभिरित्थमेवोपदर्शितत्वादित्याह– इत्यतिदेशेनेति– एकत्रोपदर्शितस्यान्यत्राऽपि तत्तुल्यतया प्राप्तिरतिदेशस्तेनेत्यर्थः। आकरे स्याद्वादरत्नाकरे।

विभागस्य न्यूनाऽधिकसङ्ख्याव्यवच्छेदफलकत्वाऽन्यथानुपपत्त्या विभागवाक्यतो न्यूनाधिकव्यवच्छेदलाभ इत्यर्थादुपदर्शितम्। तत्र न्यूनाधिकसङ्ख्याव्यवच्छेदबोधकपदान्तराऽभावेऽपि व्युत्पत्तिविशेषसिद्धमेव न्यूनाधिकसङ्ख्याव्यवच्छेदकत्वमिति मतमुपदर्शयति– विशेष-

सर्वत्र श्रुतादध्याहृताद् वैवकारादेव न्यूनाधिकसङ्ख्याव्यवच्छेद इत्यपि केचित्।

तदेवं जीवाऽजीवादीनि सप्तैव तत्त्वानीति व्यवस्थितम्। यदि चाभ्युदयहेतुतया पुण्यस्य तत्प्रतिपक्षतया पापस्यापि च पृथग्

विधिनिषेधयोरिति– सामान्यत उपस्थितानां पदार्थानां मध्यादेकविशेषविधानस्याऽन्यविशेषनिषेधानुज्ञापकत्वादेकविशेषनिषेधस्य चान्यविशेषविध्यनुज्ञापकत्वाच्च यस्य विशेषस्य विधानं न तस्य निषेध इति न्यूनसङ्ख्याव्यवच्छेदः, यस्य विशेषस्य विधानं तदन्यस्य विशेषस्य निषेधानुज्ञानाच्चाऽधिकसङ्ख्याव्यवच्छेद इत्येवं न्यूनाधिकसङ्ख्याव्यवच्छेदकत्वमित्यपरे सूरयो वर्णयन्तीत्यर्थः।

प्रकारविधया वाक्यजन्यबोधे पदवृत्त्युपस्थापितस्यैव भानमिति विभागवाक्येऽन्यव्यवच्छेदकस्यैवकारस्याऽप्यध्याहृतस्य घटकत्वमिति तत एव न्यूनाधिकसङ्ख्याव्यवच्छेद इति केषाञ्चिन्मतमुपदर्शयति– सर्वत्रेति विभागवाक्ये तदन्यवाक्ये चेत्यर्थः, अध्याहारकल्पनागौरवमत्रास्वरसबीजम्, विभागवाक्यतो यावदुक्तपदार्थावबोधान्तरमानसबोधे एव न्यूनाधिकसङ्ख्याव्यवच्छेदभानमित्यभ्युपगमेऽपि क्षत्यभावात्, न्यूनाधिकसङ्ख्याव्यवच्छेदविशिष्टस्वाभिधेये वाक्यघटकान्त्यपदस्य लक्षणयाऽपि वाक्यजबोधेऽपि न्यूनाधिकसङ्ख्याव्यवच्छेदभानसम्भवात्, संसर्गमर्यादया वा तद्भानमित्यस्यापि वक्तुं शक्यत्वादिति बोध्यम्। उपसंहरति–तदेवमिति। ननु जैनसिद्धान्ते क्वचित् सप्ततत्त्वनिरूपणं क्वचित् पुण्य-पापयोरप्युक्तसप्ताधिकयोः परिगणनतो नवतत्त्वनिरूपणमपि दृश्यत इति तत्र मुमुक्षुप्रवृत्त्युपयुक्तज्ञानविषयपरतया तत्त्वपदस्य व्याख्यानतः सप्ततत्त्वनिरूपणं सङ्गमितं भवता, नवतत्त्वनिरूपणं तु कथं सङ्गमितं स्यादित्यपेक्षयामाह– यदि चेति अभ्युदयहेतुतया स्वर्गादिहेतुतया।

निरूपणमावश्यकम्, तदाभ्युदयनिःश्रेयसहेतुप्रवृत्त्यनुकूलज्ञानविषयतया जीवाऽजीवादयो नवैव पदार्था निरूपणीया इति परममुनिसिद्धान्तसरणिः ॥

अथ किमेतेषु भावाऽभावादिशबलैकरूपत्वम् ?, उच्यते–विषयतया भावाऽभावाद्याकारबुद्धिजनकपरिणामद्वयतादात्म्याऽऽपन्नजात्यन्तरैकधर्मित्वम्, अस्ति ह्येकस्य जीवाऽजीवादेः स्व-परद्रव्यादिनिबन्धनो भावाऽभावादिरूपो द्विविधः परिणामः, यद्बलात् तत्र

'पुण्यस्य' इत्यस्य 'पृथग्निरूपणम्' इत्यनेनान्वयः तत्प्रतिपक्षतया नरकादिहेतुत्वेन पुण्यविरोधितया। तदा पुण्य-पापयोः पृथग्निरूपणस्याऽऽवश्यकत्वे च। परममुनिसिद्धान्तसरणिः जिनसिद्धान्तमार्गः ॥

'तत्त्वेषु भावाभावादिशबलैकरूपमत्वमनेकान्तः' इत्युक्तम्, तत्र किं भावाभावादिशबलैकरूपत्वमिति पृच्छति– अथेति। एतेषु जीवाजीवादिषु। उत्तरयति– उच्यत इति। विषयतया विषयतासम्बन्धेन, भावाऽभावाद्याकारबुद्धिर्विषये वर्तते इति तज्जनकं यत् परिणामद्वयं तदपि तद्विषयस्यैव, तादृशपरिणामद्वयतादात्म्यापन्नं यज्जात्यन्तररूपैकधर्मि जीवाऽजीवादिविषयस्वरूपं, तत्त्वं जीवाऽजीवादिवस्तुनि वर्तत इति तदेव भावाभावादिशबलैकरूपत्वम्, एतदेव भावयति– अस्तीति– अस्य 'परिणामः' इत्यनेन सम्बन्धः। हि यतः। 'द्रव्यादि०' इत्यादिपदात् क्षेत्र-काल-भावानां ग्रहणम्, स्वद्रव्यादिनिबन्धनोऽस्तित्वादिभावरूपः परिणामः, परद्रव्यादिनिबन्धनो नास्तित्वाद्यभावरूपः परिणाम इत्येवं द्विविधः परिणामो जीवाऽजीवादेरेकस्य वस्तुनोऽस्तीत्यर्थः। यद्बलात् उपदर्शितभावाऽभावादिरूपपरिणामद्वयबलात्। तत्र जीवाऽजीवादावेकस्मिन् वस्तुनि, भावात्मपरिणामबलाद् 'अस्ति' इति प्रत्ययः, अभावात्मकपरिणामबलाद्

'अस्ति, नास्ति' इति प्रत्ययद्वैविध्यमुपजायते। एकपरिणामस्याऽप्युभयाऽऽकारप्रतीतिजनकैकशक्तिमत्त्वात् प्रत्ययद्वैविध्यमुपपत्स्यत इति चेत्? न- तथाऽप्यविनिगमेनोभयपरिणामवत्त्वसिद्धेः। सदंशः परानपेक्षप्रतीतिविषयत्वात् तात्त्विकः, असदंशस्तु विपर्ययान्न तथेत्यस्ति विनिगमकमिति चेत्? न- परापेक्षप्रतीतिविषयत्वस्याऽ-

---

'नास्ति' इति प्रत्यय इत्येवं प्रत्ययद्वयमुपजायते, एवं च सिद्धम् विषयतया भावाऽभावाद्याकारबुद्धिजनकं परिणामद्वयमिति, परिणामद्वयेन सह परिणामिनस्तादात्म्यमेव सम्बन्ध इति तत्तादात्म्यापन्नत्वमपि सिद्धम्, तदेव च जात्यन्तरत्वम्, एकस्य तद्द्वयमित्येकधर्मिरूपत्वमपि। वस्तुन एक एव परिणामः, तस्यैव भावाऽभावोभयाऽऽकारप्रतीतिजननैकशक्तिमत्त्वेन भावाऽभावाद्याकारबुद्धिजनकत्वमिति नोक्तभावाऽभावादिशबलैकरूपत्वमिति शङ्कते–एकपरिणामस्यापीति। उभयाकारेति– भावाऽभावोभयाकारेत्यर्थः। प्रत्ययद्वैविध्यम् 'अस्ति, नास्ति' इति प्रत्ययद्वैविध्यम्। एकस्वभावपरिणामस्योभयाकारप्रतीतिजननैकशक्तिमत्त्वेन द्विविधप्रत्ययजनकत्वमित्यत्र विनिगमकस्य कस्यचिदभावेन ततो भावाऽभावपरिणामद्वयस्याऽपि सिद्धिः स्यादेवेति प्रतिक्षिपति– नेति। तथापि एकस्य परिणामस्योभयाकारप्रतीतिजनकैकशक्तिमत्त्वेन प्रत्ययद्वयजनकत्वस्वीकारेऽपि। अविनिगमेन विनिगमनाविरहेण। उभयपरिणामवत्त्वसिद्धेः भावाऽभावोभयपरिणामत्वसिद्धेः। भावपरिणामः पारमार्थिक इति तस्योक्तशक्तिमत्त्वेन भावाभावाद्याकारप्रतीतिजनकत्वम्, अभावपरिणामस्त्वपारमार्थिक इति न तस्य तथाभाव इति विनिगमकमस्त्येवेति शङ्कते– सदंश इति। विपर्ययात् परानपेक्षप्रतीतिविषयत्वाऽभावात्। न तथा न तात्त्विकः, किन्तु अतात्त्विकः परापेक्षप्रतीतिविषयत्वं यद्यतात्त्विकत्वव्याप्यं स्यात् तदैवासदंशस्य परापेक्ष-

तात्त्विकत्वाव्याप्यत्वात्, संयोग-विभाग-ह्रस्वत्व-दीर्घत्वादौ व्यभिचारात्। प्रतियोगिविशिष्टसंयोगादिव्यवहार एव परापेक्षा, न तु तज्ज्ञानमात्र इति चेत्? तदिदमभावेऽपि तुल्यम्।

वस्तुतः केचिद् भावाः प्रतिनियतव्यञ्जकव्यङ्ग्याः केचिन्नेत्यत्र स्वभावविशेष एव शरणम्, कर्पूर-शरावगन्धादौ तथास्वभाव-

---

प्रतीतिविषयत्वादतात्त्विकत्व सिध्येत्, तदेव न- संयोग-विभाग-ह्रस्वत्व-दीर्घत्वादौ तात्त्विकेऽपि परापेक्षप्रतीतिविषयत्वस्य सत्त्वेन व्यभिचारादिति प्रतिक्षिपति- नेति। संयोगादिव्यवहार एव परापेक्षा न तु संयोगादिज्ञानमात्र इति न परापेक्षप्रतीतिविषयत्वं संयोगादाविति न व्यभिचार इति शङ्कते- प्रतियोगिविशिष्टेति- घटेन सहास्य संयोगः, घटेन सहास्य विभागः, घटाद् विभक्तोऽयम्, अयमस्माद् ह्रस्वः, अयमस्माद् दीर्घ इत्येवं प्रतियोगिविशिष्टसंयोगादिव्यवहार एव प्रतियोगिघटादिज्ञानापेक्षा न तु प्रतियोग्यविशेषितसंयोगादिज्ञान इत्यर्थः। प्रतियोगिविशिष्टाभावव्यवहार एव परापेक्षा नाभावज्ञानमात्र इति प्रकृतेऽपि वक्तुं शक्यत एवेति नाभावेऽपि परापेक्षप्रतीतिविषयत्वमिति न ततस्तस्याऽवास्तविकत्वमिति समाधत्ते- तदिदमभावेऽपि तुल्यमिति। भावेष्वपि केषाञ्चित् प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं केषाञ्चिन्नेत्येवं वैलक्षण्ययोगेऽपि न तुच्छत्वं केषाञ्चित् केषाञ्चिच्चातुच्छत्वमिति विशेषो यथा, तथा सदंशा-सदंशयोरप्येकस्य परापेक्षत्वमपरस्य परानपेक्षत्वमिति वैलक्षण्येऽपि न तुच्छत्वा-ऽतुच्छत्वविशेषः, यस्य यः स्वभावः स तस्यैव नान्यस्य सतोऽपि, कथं नान्यस्य स इति न पर्यनुयोज्यम्, स्वभावस्याऽपर्यनुयोज्यत्वात्, अन्यस्यापि तत्त्वे प्रतिनियतस्वभावत्वस्यैव हानिः स्यादित्यसदंशस्य परापेक्षालक्षणस्वभावत्वेऽपि न तुच्छत्वमित्याह-वस्तुत इति। भावेषु प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं क्वचिद्

दर्शनात्, तद्वत् सदंशाऽसदंशयोरपि नैकस्य तुच्छत्वमपरस्याऽतुच्छत्वम्, तदिदमभिप्रेत्योक्तं प्रतीत्यसत्याधिकारे भाषारहस्येऽस्माभिः—

"ते हुंति परावेक्खा वंजयमुहदंसिणो त्ति ण य तुच्छा।
दिट्ठमिणं वेचित्तं सराव-कप्पूरगंधाणं" ॥ ३० ॥

शुद्धं भूतलमेव घटाऽभावव्यवहारविषय इति नाभावांशोऽधिक इति मीमांसकः, तन्न- शुद्धत्वस्याऽभाववत्त्वातिरिक्तस्याऽनिर्वचनेन कथञ्चिदभावपरिणामाधिक्यस्याऽऽवश्यकत्वात्। यादृशे भूतले परस्य घटाऽभाववत्त्वं तादृशत्वमेव मम शुद्धत्वमिति चेत्?

भवति क्वचिन्नेति दृष्टान्तावष्टम्भेन द्रढयति—कर्पूरेति। उक्तार्थे ग्रन्थान्तरं संवादकतया दर्शयति— तदिदमभिप्रेत्योक्तमिति। "ते हुंति०" इति— "ते भवन्ति परापेक्षा व्यञ्जकमुखदर्शिन इति न तुच्छाः। दृष्टमिदं वैचित्र्यं शराव-कर्पूरगन्धयोः"॥ इति संस्कृतम्, स्पष्टार्थेयं गाथेति।

अभावांशाऽपलापिनो मीमांसकविशेषप्रभाकरस्य मतं प्रतिक्षेप्तुमुपन्यस्यति— शुद्धमिति। प्रतिक्षेपे हेतुमुदर्शयति— शुद्धत्वस्येति। अभाववत्त्वं न शुद्धत्वं किन्त्वन्यदेव, तद्विशिष्टस्य भूतलस्याऽभावव्यवहारविषयत्वेऽपि नातिरिक्ताभावस्वीकार इति प्रभाकरमतानुयायी शङ्कते—यादृश इति। परस्य अतिरिक्ताभावस्वीकर्तुर्नैयायिकादेः। मम प्रभाकरमतानुयायिनः। न किञ्चिद्वैलक्षण्यविशिष्टे भूतले घटाभाववत्त्वं नैयायिकादिभिरुपेयते येन तादृशवैलक्षण्यमेव शुद्धत्वं प्रभाकराऽनुयायिभिरपि स्वीकृतं भवेत्, किन्तु भूतलत्वावच्छिन्न एव घटाभाववत्त्वमुपेयते, भूतले घटसत्त्वदशायां भूतलत्वावच्छिन्नस्य तस्य भावेऽपि कालविशेषविशिष्टस्य भूतलस्वरूपस्य घटा-

न- अतिरिक्ताऽभाववादिभिर्नैयायिकादिभिर्भूतलत्वावच्छिन्न एव घटाऽभाववत्तास्वीकारेऽपि कालविशेषविशिष्टत्वस्य सम्बन्धतयाऽतिप्रसङ्गनिराकरणात्, अस्माकं तु कालविशेषविशिष्टत्वेनर्जुसूत्रनयादेशात् पूर्वावस्थातः कथञ्चिद् भिन्नस्य भूतलस्य घटाऽभावाऽऽधारत्वाऽभ्युपगमेनानुपपत्त्यभावात्, परस्य चैवमभ्युपगमेऽनेकान्तप्रवेशापत्तिः।

भाववत्तानियामकसम्बन्धतया नैयायिकादिभिरभ्युपगतस्य तदानीमभावादेव न तत्र घटाभाववत्ताप्रतीतिः, भूतलत्वं च न भूतले शुद्धत्वं भवताऽभ्युपेयम्, तथा सति घटसत्त्वदशायामपि घटाभावव्यवहारः स्यादिति घटाभाववत्त्वमेव शुद्धत्वमङ्गीकृत्य तद्विशिष्टस्य भूतलस्य घटाभावव्यवहारविषयत्वे घटाभावोऽतिरिक्त आयात एवेति समाधत्ते-नेति। जनमते तु घटशून्यकालीनाद् भूतलाद् घटकालीनं भूतलं कथञ्चिद् भिन्नमेव ऋजुसूत्रनयादेशादिति घटवत्तादशाविशिष्टभूतलात् कालविशेषविशिष्टत्वेन कथञ्चिद्भिन्नस्य भूतलस्य घटाभावाधारत्वमित्यस्याभ्युपगमेन न घटवत्ताकाले घटाभाववत्ताबुद्धिरित्याह- अस्माकं त्विति- जैनानां त्वित्यर्थः। कालविशेषविशिष्टत्वेन यस्मिन् काले यत्र भूतले घटो नास्ति तत्कालविशिष्टत्वेन। पूर्वावस्थातः घटवत्तावस्थातः, अवस्था-तद्वतोरभेदात् तदवस्थात्मकभूतलतः। परस्य प्रभाकरमतानुयायिनः। एवमभ्युपगमे पूर्वावस्थाविशिष्टभूतलादुत्तरावस्थभूतलस्य कथञ्चिद्भिन्नत्वस्याभ्युपगमे। अनेकान्तप्रवेशापत्तिः भूतलत्वेनाभेदस्योक्तप्रकारेण भेदस्य चाभ्युपगमाद् भेदाऽभेदलक्षणानेकान्तप्रवेशापत्तिः, तथा च स्वसिद्धान्तव्याकोपः प्रसज्यत इति।

किञ्च, भावादेरनतिरेके दुरितध्वंसादेः परमेश्वरनमस्कारादिकार्यता न स्यात्, आत्मनि दुरितध्वंसस्याऽऽत्मस्वरूपत्वात्, तस्य च नित्यत्वेनाऽजन्यत्वात्, नित्यत्वेऽपि कथञ्चिदनित्यत्वाभ्युपगमेऽस्मत्पक्षप्रवेश इति यत्किञ्चिदेतदिति दिग्।

अभावा-ऽभाववतोरेकान्तभेदोऽपि नैयायिकाद्यभिमतो न

भट्टानुयायिनो मीमांसकस्याऽप्यधिकरणात्मकाभावाभ्युपगमो न युक्तः, दुरितध्वंसस्याऽऽत्मरूपस्य नित्यतयेश्वरनमस्कारादिजन्यत्वाऽभावापत्तेरित्याह–किञ्चेति। 'भावादेरनतिरेके' इति स्थाने 'भावादनतिरेके' इति पाठो युक्तः, 'अभावस्य' इति शेष, तथा चाभावस्याधिकरणलक्षणभावादभेद इत्यर्थः। तस्य च आत्मनश्च। यदि च पूर्वावस्थात्मनः सकाशादुत्तरावस्थस्यात्मनः कथञ्चिद्भिन्नत्वमभ्युपगम्याऽनित्यत्वमपि कथञ्चिदात्मन उपेयते तदा तस्य कार्यत्वसम्भवेऽपि स्याद्वादप्रवेशापत्तिः स्यादित्याह– नित्यत्वेऽपीति। अस्मत्पक्षप्रवेशः जैनमतप्रवेशः, एतावताऽभावांशो नास्त्येव, अधिकरणात् सर्वथाऽभिन्न एव वा स इति मतमपाकृतम्।

इदानीमधिकरणलक्षणभावात् सर्वथा भिन्न एवाभाव इति नैकस्य भावाऽभावोभयात्मकत्वलक्षणोऽनेकान्त इति नैयायिकादिमतमपाकरोति– अभाव-ऽभाववतोरिति। एकान्तभेदे एकान्ताऽभेदे च न सम्बन्ध इति अभावा-ऽधिकरणयोः सर्वथा भेदे सम्बन्ध एव न भवेदिति विशिष्टप्रतीत्यनुपपत्तिरिति निषेधहेतुमुपदर्शयति– एकान्तभेद इति, अभावस्याधिकरणेन समं विशेषणताख्यस्वरूपसम्बन्ध एव नैयायिकादिभिरुपेयते, तस्याऽभावस्वरूपत्वेऽभावस्य नित्यस्य सर्वान् प्रत्यविशिष्टत्वाद् घटवत्यपि घटाऽभाववत्ताप्रतीतिः स्यात्, एवं केवलाधिकरणस्वरूपत्वेऽपि सर्वातिप्रसक्तिः, अभावाधिकरणो-

न्याय्यः, एकान्तभेदे सम्बन्धानुपपत्तेः, विशेषणताया एकस्वरूपत्वेऽतिप्रसङ्गादुभयस्वरूपत्वे तादात्म्यपर्यवसानात्, एकदेशिनां तदतिरेकाभ्युपगमस्याप्यन्याय्यत्वात्, तत्रापि सम्बन्धान्तरान्वेषणायामनवस्थानात्, स्वरूपतस्तस्याः सम्बन्धत्वाभ्युपगमे चाभावाऽभाववत्स्वरूपयोरेव तादात्म्येन सम्बन्धत्वकल्पनौचित्यादिति दिग् ॥

भयस्वरूपत्वे च 'तदभिन्नाऽभिन्नस्य तदभिन्नत्वम्' इति नियमेन घटाभावाऽभिन्नसम्बन्धाऽभिन्नस्य भूतलस्य घटाभावाऽभिन्नत्वमायातमित्यभावाऽभाववतोः कथञ्चित्तादात्म्ये भावाऽभावोभयात्मकैकस्वरूपत्वलक्षणोऽनेकान्तः सिद्ध एवेत्याह- विशेषणताया इति। एकस्वरूपत्वे अभावाऽभाववतोरन्यतरस्वरूपत्वे। उभयस्वरूपत्वे अभावतद्वद्भावोभयस्वरूपत्वे, विशेषणता तु साक्षादेव भावाभावोभयात्मकत्वेनानेकान्तस्वरूपा सिद्धा, तद्द्वारा धर्मिस्वरूपवस्तुनोऽप्यनेकान्तात्मकत्वं सिद्ध्यतीति।

सम्बन्धोऽभावा-ऽधिकरणयोस्ताभ्यामतिरिक्त एवेति नैयायिकैकदेशिनां मते नाऽभावाऽभाववतोस्तादात्म्यसिद्धिः, अतस्तन्मतं प्रतिक्षिपति-एकदेशिनामिति-नैयायिकैकदेशिनामित्यर्थः। तदतिरेकाभ्युपगमस्य अभावाऽभाववद्भ्यां तत्सम्बन्धे भेदाभ्युपगमस्य। कथं तथाऽभ्युपगमस्याऽन्याय्यत्वमित्यपेक्षायामाह- तत्रापीति- अतिरिक्तसम्बन्धेऽपीत्यर्थः। सम्बन्धोऽपि सम्बन्धिभ्यां सह सम्बद्ध एव सम्बन्धतामाप्नोति नाऽसम्बद्धोऽतिप्रसङ्गादिति सम्बन्धसम्बन्धोऽपि सम्बन्धिभ्यामतिरिक्तोऽभ्युपगन्तव्यः, सोऽपि सम्बद्ध एव सम्बन्ध इति तत्सम्बन्धोऽप्यतिरिक्त आस्थेय इत्येवमनवस्थानादित्यर्थः। नन्वभावाऽभाववतोरतिरिक्ता विशेषणता सम्बन्धः, तस्याश्च सम्बन्धिभ्यां नातिरिक्तः सम्बन्धः किन्तु स्वरूपस्यैव तत्सम्बन्धत्वमिति नानवस्थाप्रसङ्ग इत्यत आह- स्वरूपतः इति। तस्याः विशेषणतायाः।

भावांशोऽपि न स्वलक्षणाऽतिरिक्तः सकलव्यक्तिवृत्तितिर्यक्सामान्याऽऽत्मा प्रामाणिकः, देशेन तस्यैकव्यक्तिवृत्तित्वे सावयवत्वप्रसङ्गात्, कात्स्न्र्येन च तथात्वे इतरव्यक्तीनां निःसामान्यत्वप्रसङ्गादिति बौद्धः, तन्न- नैयायिकादिवत् सर्वथाऽतिरिक्तसामान्याभ्युपगम

यद्यनवस्थापरिहाराय सम्बन्धस्य स्वरूपमेव सम्बन्धस्तर्हि प्रथमसम्बन्धोऽपि सम्बन्धिभ्यामतिरिक्तो विशेषणताऽऽख्यः किमित्यभ्युपगन्तव्यः? अभावा-ऽभाववत्स्वरूपयोरेव तादात्म्येन सम्बन्धत्वकल्पनस्यैव लाघवेन युक्तत्वादित्याह- अभावाऽभाववत्स्वरूपयोरेवेति।

यथा चाऽभावांशस्य कथञ्चिद्धर्मिस्वरूपाऽव्यतिरिक्तत्वं तथा भावांशस्यापि कथञ्चिद्धर्मिस्वरूपाऽव्यतिरिक्तत्वमेव, न तु सर्वथा भिन्नत्वमित्याह- भावांशोऽपीति। स्वलक्षणातिरिक्तः स्वलक्षणं व्यक्तिस्वरूपं तद्भिन्नः। तिर्यक्सामान्याऽऽत्मेति- सामान्यं जनमते द्विविधम्- 'तिर्यक्सामान्यमूर्ध्वतासामान्यं च' इति, तत्र "प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यम्, शबल-शाबलेयादिपिण्डेषु गोत्वं यथा" [प्रमाण० परिच्छे० ५. सू० ४.] इतिसूत्रलक्षितं गोत्वादिकं तिर्यक्सामान्यं नैयायिकादिभिर्व्यतिरिक्तमुपेयते, तदात्मा भावांशोऽपि स्वलक्षणव्यतिरिक्तो न प्रामाणिक इति बौद्ध आह। कथं न प्रामाणिक इत्यपेक्षायां बौद्ध एव हेतुमुपदर्शयति- देशेनेति-सामान्यं सकलव्यक्तिवृत्ति यदुपेयते तत् प्रत्येकं व्यक्तिषु देशेन वर्तते? कात्स्न्र्येन वा? तत्र देशेन सामान्यस्य एकव्यक्तिवृत्तित्वे एकदेशेनैकत्र वृत्तिः, द्वितीयदेशेन द्वितीयव्यक्तिवृत्तिः, तृतीयदेशेन तृतीयव्यक्तिवृत्तिरित्येवं यावत्यो व्यक्तयस्तावन्तो देशाः सामान्यस्य स्युरिति सावयवत्वं सामान्यस्य प्रसज्यत इत्यर्थः। कात्स्न्र्येनैकस्य सामान्यस्य सर्वव्यक्तिवृत्तित्वं तु न संभवत्येव एकत्र कात्स्न्र्येन परिसमाप्तस्य कृत्स्नद्वितीयस्वरूपाभावेन द्वितीयव्यक्तिवृत्तित्वा-

एव तद्दोषावकाशात्, कथञ्चिद्व्यावृत्तानामपि व्यक्तीनां कथञ्चिदनुगतत्वेन सामान्यभावाभ्युपगमे च तद्दोषाऽसंस्पर्शात्।

तत्-तदन्यक्षणवृत्तित्वयोर्विरोधादूर्ध्वतासामान्याऽऽत्मा भावो नास्तीति स एव, तदप्यसत्-स एवायमिति प्रत्यभिज्ञयैवोर्ध्वता-

---

योगात्, एवं च द्वितीयादिव्यक्तीनां निःसामान्यत्वं प्रसज्यत इत्याह-कात्स्न्येन चेति। तथात्वे एकव्यक्तिवृत्तित्वे। "बौद्धः" इत्यनन्तरम् 'आह' इति शेषः। उक्तदोषो नैयायिकादीन् सर्वथा व्यतिरिक्तसामान्याभ्युपगन्तृनेवोत्त्रासयितुं समर्थः, न जैनान्, जैनैर्व्यक्तीनामेव कथञ्चिद् व्यावृत्तत्वेन विशेषात्मकत्व कथञ्चिदनुगतत्वेन च सामान्यात्मकत्वं चाभ्युपेयत इति तत्रोक्तदोषस्य प्राप्तेरभावादिति प्रतिक्षिपति-तन्नेति। तद्दोषेति-बौद्धोपदर्शितदोषेत्यर्थः, एवमग्रेऽपि।

ऊर्ध्वतासामान्याऽपलापोऽपि बौद्धस्य न युक्त इत्याह-तत्-तदन्येति- तत्क्षणवृत्तित्व-तदन्यक्षणवृत्तित्वयोः। विरोधात् असामानाधिकरण्यात्, यत्र तत्क्षणवृत्तित्वं तत्र न तदन्यक्षणवृत्तित्वं भावमात्रस्य क्षणिकत्वेन वर्तमानक्षणकमात्रवृत्तित्वस्वाभाव्यात्। ऊर्ध्वतासामान्यात्मेति-"पूर्वापरपरिणामसाधारणं द्रव्यमूर्ध्वतासामान्यम्, कटक-कङ्कणाद्यनुगामिकाञ्चनवत्" [प्रमाण० परिच्छे० ५. सू० ५.] इतिसूत्रलक्षितं पूर्वापरपर्यायानुस्यूतं मृत्सुवर्णादिद्रव्यमूर्ध्वतासामान्यम्, तदात्मा भावो नास्तीत्यर्थः। स एव बौद्ध एव, आहेत्यर्थः। तदप्यसत् एतदपि बौद्धमननं न समीचीनम्। तत्र हेतुमुपदर्शयति-स एवायमितीति-यदेव कुण्डलरूपं पूर्व सुवर्णं तदेवेदानीं कटकरूपमिति पूर्वापरपर्यायानुस्यूतैकद्रव्यावगाहिप्रत्यभिज्ञानम्, तेनैवोर्ध्वतासामान्यरूपद्रव्यसिद्धेरित्यर्थः। 'तत्-तदन्यक्षणवृत्तित्वयोर्विरोधात्' इति यदुक्तं तदपि न-यथा बौद्धमते चित्रज्ञानमेकमेव नीलाकारं पीताकारमिति न तयोर्विरोधस्तथैव तत्क्षणवृत्तित्व- तदन्यक्षणवृत्ति-

सामान्यसिद्धेः, तत्-तदन्यक्षणवृत्तित्वयोश्चित्रज्ञाने नीलाकार-पीताकारयोरिवाविरोधात् ।

ज्ञान-विषययोरतिरिक्तसम्बन्धानुपपत्तेर्ज्ञानाकार एव भावो न तु बाह्य इति तदेकदेशीयः, तदप्यसत्–बाह्यार्थाऽभावे नियतव्यवहारादिविलोपप्रसङ्गाद्, वासनाविशेषेण तद्व्यवस्थोपपादनेऽपि तत्प्रबोधार्थं बाह्यार्थाभ्युपगमावश्यकत्वादिति दिग् ।

तदेवं व्यवस्थितम्– जीवाऽजीवादीनां विचित्रभावा-ऽभावादिशबलैकरूपत्वम् ।

त्वयोरेकत्र द्रव्ये सम्भवेन तयोरप्यविरोधादित्याह– तत्–तदन्यक्षणवृत्तित्वयोरिति ।

ज्ञानाकारातिरिक्तस्य बाह्यवस्तुनोऽभावादेव न तस्य भावाभावात्मकत्वसम्भव इति विज्ञानवादिमतं प्रक्षेप्तुमुपन्यस्यति– ज्ञानविषययोरिति । अतिरिक्तसम्बन्धानुपपत्तेः तादात्म्यातिरिक्तसम्बन्धाऽसम्भवात् । तदेकदेशीयः बौद्धैकदेशीयः, योगाचार इति यावत् । तदप्यसत् तन्मतमपि न समीचीनम् । तत्र हेतुमुपदर्शयति– बाह्यार्थाभाव इति– घट-पटादिबाह्यार्थाभावे ज्ञानस्याऽविशिष्टस्वरूपस्याऽविशेषाद् 'घटेन जलाहरणम्, पटेनावरणम्, जलेन पिपासानिवृत्तिः, वह्निना दाहः' इत्यादिनियतव्यवहारादिविलोपप्रसङ्गादित्यर्थः । बाह्यार्थाभावेऽपि वासनाविशेषादेव नियतव्यवहारादिरिति तदुपगमोऽपि न समीचीनः, अप्रबुद्धस्य वासनाविशेषस्य नियामकत्वाऽसम्भवेन प्रबुद्धवासनाविशेषस्य नियतव्यवहारादिनियामकत्वस्य वाच्यत्वेन तत्प्रबोधार्थं बाह्यार्थाभ्युपगमस्यावश्यकत्वादित्याह– वासनाविशेषेणेति । तद्व्यवस्थोपपादनेऽपि प्रतिनियतव्यवहारोपपानेऽपि । तत्प्रबोधार्थं वासनाविशेषप्रबोधार्थम् । उपसंहरति– तदेवमिति ।

अथैवं सर्वस्याऽनेकान्तत्वेन सर्वरूपत्वे कथं प्रतिनियतधर्मग्रह इति चेत् ? मतिज्ञानोपयोगे तत्तत्सामग्रीसव्यपेक्षक्षयोपशमविशेषात्, श्रुतज्ञानोपयोगे च नयविशेषादिति गृहाण, अत एवै-

---

नन्वेवमनन्तधर्मात्मकत्वे वस्तुनः सर्वस्य सर्वात्मकत्वे घटस्य घटत्वेन ग्रहणं न पटत्वेन, पटस्य पटत्वेन ग्रहणं न घटत्वादिनेति प्रतिनियतधर्मग्रहः कथम् ? प्रतिनियतधर्मेण ग्रहणे प्रतिनियतधर्मात्मकत्वमेव प्रयोजकम्, तच्च नाभ्युपगम्यते स्याद्वादिभिरिति शङ्कते- अथेति। एवं जीवा-ऽजीवादीनां विचित्रभावा-ऽभावादिशबलैकरूपत्वे। अनन्तधर्मात्मकत्वेऽपि यद्धर्मेण वस्तुग्रहणस्य सामग्री, मतिज्ञानावरणक्षयोपशमविशेषोऽपि तदनुकूल एव भवतीति तादृशक्षयोपशमविशेषसहकृतप्रतिनियतधर्मप्रकारकग्रहानुकूलसामग्रीविशेषात् तद्धर्मेणैव वस्तुग्रहणम्, तत्र सद्भिरप्यन्यधर्मैर्न ग्रहणम्, यथा-, एकान्तवादिमते एकस्मिन् घटे रूप-रस-गन्ध-स्पर्शादीनां सत्त्वेऽपि चाक्षुषप्रत्यक्षात्मकग्रहणानुकूलसामग्र्या क्षयोपशमविशेषसहकृतया रूपवत्त्वेनैव रूपेण घटस्य ग्रहणं न तु सताऽपि रसवत्त्वादिनेति समाधत्ते- मतिज्ञानोपयोग इति। श्रुतज्ञानोपयोगे नयविशेषस्यापि प्रयोजकत्वं यदङ्गीकृतं तत्प्रयोजनमुपदर्शयति- अत एवेति- श्रुतज्ञानोपयोगे नयविशेषस्य प्रयोजकत्वादेवेत्यर्थः। गुरुर्देवदत्तादिरेकोऽप्यनन्तधर्मात्मकत्वादनेक इति तत्रानेकत्वस्य सत्त्वेऽपि यदैकत्वस्य प्रतिसन्धानं द्रव्यार्थिकनयाद् भवति तदा 'अयं गुरुः' इति बोधो भवति, यदा तु तत्र पर्यायार्थिकनयतोऽनेकपर्यायस्वरूपत्वतोऽनेकत्वप्रतिसंधानं भवति तदा 'एते गुरवः' इति बोधो भवतीत्येवं बोधवैचित्र्यमुपपद्यत इत्यर्थः। ननु यत्रैकस्मिन् गुरावेकत्वस्य द्रव्यार्थादेशाद्बोधस्ततः पर्यायार्थादेशादनेकत्वस्य चोद्बोध इति क्रमेणोद्बोधे 'अयं गुरवः' इति प्रयोगोऽपि स्यादेक-

कस्मिन्नेकत्वोद्बोधे 'अयं गुरुः' इति, अनेकत्वोद्बोधे 'एते गुरवः' इति, क्रमेणोभयोद्बोधे 'अयं गुरवः' इति प्रयोगस्त्वेकत्वावरुद्धे बहुत्वान्वयस्य निराकाङ्क्षत्वादेव निरसनीयः, यत्र त्वनूद्यविधेयभावतात्पर्येण तथाऽन्वये न निराकाङ्क्षत्वम्, तत्र भवत्येव नैगमनयाभिप्रायात् तथाप्रयोगः, यथा– "स भूभृदष्टावपि लोकपालाः" [ ] इत्यादिलौकिके, यथा च–"एकग्रहणगृहीता असङ्ख्येयाः प्रदेशा जीवः" [ ] इत्यादिलोकोत्तर इति स्मर्तव्यम् ॥

वचनप्रयोगप्रयोजकस्यैकत्वोद्बोधस्य बहुवचनप्रयोगप्रयोजकस्य बहुत्वोद्बोधस्य च सत्त्वादित्यत आह– क्रमेणोभयोद्बोध इति– 'अयं गुरवः' इति एकत्वेदन्त्वोभयावच्छिन्नविशेष्यतानिरूपिततादात्म्यनिष्ठसंसर्गतानिरूपितबहुत्वगुरुत्वोभयावच्छिन्नप्रकारताकबोधार्थमेव प्रयोक्तव्यम्, परमेकत्वविशिष्टे न बहुत्वान्वय इति नियमेन तादृशबोधे उक्तवाक्यं न साकाङ्क्षमिति तथाबोधने निराकाङ्क्षत्वादेवोक्तप्रयोगो न भवतीत्यर्थः। यत्र च साकाङ्क्षता तत्र तथाप्रयोगोऽपि भवतीत्याह–यत्र त्विति। "स भूभृद्०" इत्यत्र भूभृत्त्वावच्छेदेनैकत्वान्वयो लोकपालत्वावच्छेदेन बहुत्वान्वयः। "एकग्रहण०" इत्यादिवाक्ये प्रदेशत्वावच्छेदेन बहुत्वान्वयो जीवत्वावच्छेदेनैकत्वान्वय इति धर्मिणोऽभेदान्वये एकत्वेऽपि अवच्छेदकभेदत एकत्वस्य बहुत्वस्य चान्वये उक्तवाक्यस्य साकाङ्क्षत्वं समस्ति, 'अयं गुरवः' इत्यत्र त्विदन्त्वमपि गुरुत्वम्, यथा 'अयं घटः' इत्युपदेशवाक्ये घटत्वमेवेदन्त्वम्, यतः 'प्रवृत्तिनिमित्तधर्मावच्छेदेन वाच्यताबोधकं वाक्यमुपदेशः' इत्युपदेशलक्षणम्, तच्चेदन्त्वस्य घटत्वस्वरूपत्व एव सङ्गतिमङ्गतीति विभिन्नावच्छेदकाऽभावान्न साकाङ्क्षत्वमिति बोध्यम्।

श्रुतज्ञानोपयोगे च नयविशेषात् प्रतिनियतधर्मग्रह इति प्रति-

अथ के ते नयाः ? यैः प्रतिनियतधर्मग्रह इति, उच्यते-

पादितम्, तत्र पृच्छति- अथेति। उत्तरयति- उच्यत इति। नैगमेति- नैगमः १, संग्रहः २, व्यवहारः ३, ऋजुसूत्रः ४, शब्दः ५, समभिरूढः ६, एवम्भूतः ७ इति सप्त नया इत्यर्थः, " नीयते येन श्रुताख्यप्रमाणविषयीकृतस्वार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः " [प्रमाण० परिच्छे० ७. सू० १.] इतिसूत्राभिप्रेतं श्रुताख्यप्रमाणविषयीकृतवस्त्वंशस्य तदितरांशौदासीन्येन ग्राहकोऽभिप्रायविशेषो नयस्तत्त्वं नयत्वम्, एतत्सूत्रस्य नय-दुर्नयभेदपरिपत्तये रत्नप्रभसूरेरित्थं व्याख्यानम्-" अत्रैकवचनमतन्त्रम्, तेनांशावंशा वा, येन परामर्शविशेषेण श्रुतप्रमाणप्रतिपन्नवस्तुनो विषयीक्रियन्ते तदितरांशौदासीन्यापेक्षया स नयोऽभिधीयते, तदितरांशप्रतिक्षेपे तु तदाभासता भणिष्यते, प्रत्यपादयाम च स्तुतिद्वात्रिंशति—

" अहो चित्रं चित्रं तव चरितमेनन्मुनिपते !, स्वकीयानामेषां विविधविषयव्याप्तिविशिनाम्। विपक्षापेक्षाणां कथयसि नयानां सुनयतां, विपक्षक्षेप्तृणां पुनरिह विभो ! दुष्टनयताम् " ॥ १ ॥

पञ्चाशति च—

" निःशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां, वस्तूनां नियतांशकल्पनपराः सप्त श्रुतासङ्गिनः। औदासीन्यपरायणास्तदपरे चांशे भवेयुर्नयाश्चेदेकान्तकलङ्कपङ्ककलुषास्ते स्युस्तदा दुर्नयाः" ॥१॥ इति।

नयस्य प्रमाणतो भेदस्तेनैव शङ्का-समाधानाभ्यामित्थं निर्णितः-" ननु नयस्य प्रमाणाद् भेदेन लक्षणप्रणयनमयुक्तं स्वार्थव्यवसायात्मकत्वेन तस्य प्रमाणस्वरूपत्वात्, तथाहि-नयः प्रमाणमेव स्वार्थव्यवसायकत्वात् इष्टप्रमाणवत्, स्वार्थव्यवसायकस्याप्यस्य प्रमाणत्वानभ्युपगमे प्रमाणस्यापि तथाविधस्य प्रमाणत्वं न स्यादिति कश्चित्, तदसत्— नयस्य स्वार्थैकदेशनिर्णीतिलक्षणत्वेन स्वार्थ-

नैगम-सङ्ग्रह-व्यवहारर्जुसूत्र-शब्द-समभिरूढैवम्भूता नयाः। तत्र नैकैः प्रभूतैर्मानैर्महासामान्याऽवान्तरसामान्य-विशेषज्ञानलक्षणै-

---

व्यवसायकत्वाऽसिद्धेः। ननु नयविषयतया सम्मतोऽर्थैकदेशोऽपि यदि वस्तु तदा तत्परिच्छेदी नयः प्रमाणमेव, वस्तुपरिच्छेदलक्षणत्वात् प्रमाणस्य; स न चेद् वस्तु? तर्हि तद्विषयो नयो मिथ्याज्ञानमेव स्यात्, तस्याऽवस्तुविषयत्वलक्षणत्वादिति चेत्? तदवद्यम्- अर्थैकदेशस्य वस्तुत्वाऽवस्तुत्वपरिहारेण वस्त्वंशतया प्रतिज्ञानात्, तथा चाऽवाचि—

"नाऽयं वस्तु न चाऽवस्तु वस्त्वंशः कथितो बुधैः।
नाऽसमुद्रः समुद्रो वा समुद्रांशो यथैव हि ॥ १ ॥
तन्मात्रस्य समुद्रत्वे शेषांशस्याऽसमुद्रता।
समुद्रबहुता वा स्यात् तत्त्वे काऽस्तु समुद्रवित् ॥ २ ॥"

यथैव हि समुद्रांशस्य समुद्रत्वे शेषसमुद्रांशानामसमुद्रत्वप्रसङ्गात्, समुद्रबहुत्वाऽऽपत्तेर्वा तेषामपि प्रत्येकं समुद्रत्वात्, तस्याऽसमुद्रत्वे वा शेषसमुद्रांशानामपि असमुद्रत्वात्, क्वचिदपि समुद्रव्यवहाराऽयोगात्, समुद्रांशः समुद्रांश एवोच्यते; तथा स्वाऽर्थैकदेशो नयस्य न वस्तु, स्वाऽर्थैकदेशाऽन्तराणामवस्तुत्वप्रसङ्गाद् वस्तुबहुत्वाऽनुपपत्तेर्वा, नाऽप्यवस्तु शेषांशानामप्यवस्तुत्वेन क्वचिदपि वस्तुव्यवस्थाऽनुपपत्तेः। किं तर्हि? वस्त्वंश एवाऽसौ, तादृक्प्रतीतेर्बाधकाऽभावात्, ततो वस्त्वंशे प्रवर्तमानो नयः स्वार्थैकादेशव्यवसायलक्षणो न प्रमाणम्, नाऽपि मिथ्याज्ञानम्" इति।

तत्र प्रथमोद्दिष्टस्य नैगमस्य निरुक्तितः स्वरूपमुपवर्णयति- तत्रेति- तेषु, नयेषु मध्ये इत्यर्थः। अत्र 'नैकैर्मिनोति मिमीतेर्वा नगमः' इति निरुक्तिः। 'नैकः' इत्यस्यार्थः- प्रभूतैरिति। कैरित्याकाङ्क्षानिवृत्तये तस्यैव विशिष्योपवर्णनम्- मानैर्महासामान्याऽवान्तरसामान्यविशेषज्ञानलक्षणैरिति। नैकैर्मिनोतीति निरुक्तौ नैकम इति रूपं

मिनोति मिमीते वा निरुक्तविधिना वर्णविपर्ययान्नगमः; यद्वा गम्यतेऽनेनेति गमः– पन्थाः, नैके गमाः– पन्थानो यस्य स नैकगमः, निरुक्तविधिना ककारलोपान्नैगमः, अथवा लोकार्थनिबोधा निगमाः, तेषु भवः कुशलो वा नैगमः। अयं च महासामान्यादिषु त्रिषु क्रमेण सर्वाऽविशुद्धो विशुद्धाऽविशुद्धो विशुद्धश्च ज्ञातव्यः। एवं प्रस्थकाद्युदाहरणेष्वपि सिद्धान्तसिद्धेषु भावनीयम्।

भवेत्, कथं नैगमः? इत्याशङ्कायामाह—निरुक्तविधिना वर्णविपर्ययादिति– वर्णविपर्ययः ककारस्थाने गकारः। यदुक्तम्—

"वर्णागमो वर्णविपर्ययश्च द्वौ चाऽपरौ वर्णविकार-नाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" ॥ १ ॥

नैगमस्यैव स्वरूपं निरुक्त्यन्तरेणाह– यद्वेति। उक्तनिर्वचने नैकगम इति प्राप्तौ कथं नैगमः? इत्यपेक्षायामाह– निरुक्तविधिना ककारलोपादिति। कल्पान्तरमाह– अथवेति– अत्र न वर्णविपर्ययो नवा ककारलोप इति विशेषः। तथा च महासामान्याभ्युपगमाऽवान्तरसामान्याभ्युपगम-विशेषाभ्युपगमैतत्त्रितयवृत्तिनयत्वव्याप्यजातिमत्वं गमत्वमिति नैगमलक्षणम्। अत्र नयत्वव्याप्येति जातिविशेषणान्नयत्वजातिमादाय नयान्तरेषु नाऽतिप्रसङ्गः, सङ्ग्रहत्वस्य विशेषाभ्युपगमवृत्तित्वाऽभावान्न तमादाय सङ्ग्रहेऽतिप्रसक्तिः, व्यवहारत्वस्य महासामान्याभ्युपगमवृत्तित्वाभावान्न व्यवहारेऽतिप्रसङ्गः। अस्य सर्वाविशुद्ध-विशुद्धाविशुद्ध-विशुद्धभेदेन त्रैविध्यमुपदर्शयति–अयं चेति-नैगमश्चेत्यर्थः। 'महासामान्यादिषु' इत्यत्रादिपदादवान्तरसामान्य-विशेषयोर्ग्रहणम्। एवं सर्वाविशुद्धादिभेदेन। 'प्रस्थकादि०' इत्यादिपदाद् प्रदेश-वसत्योरुपग्रहः। प्रदेश-प्रस्थक-वसत्युदाहरणभावनाश्लोका नयोपदेशगता इमे—

"उक्ता नयार्थास्तेषां ये शुद्धयशुद्धी वदेत् सुधीः।
ते प्रदेशप्रस्थकयोर्वसतेश्च निदर्शनात् ॥ ५३ ॥
धर्माऽधर्मा-ऽऽकाश-जीव-स्कन्धानां नैगमो नयः।
तद्देशस्य प्रदेशश्चेत्याह षण्णां तमुच्चकैः ॥ ५४ ॥
दासेन मे खरः क्रीतो दासो मम खरोऽपि मे।
इति स्वदेशे स्वामेदात् पञ्चानामाह सङ्ग्रहः ॥ ५५ ॥
व्यवहारस्तु पञ्चानां साधारण्यं न वित्तवत्।
इति पञ्चविधो वाच्यः प्रदेश इति मन्यते ॥ ५६ ॥
पञ्चप्रकारः प्रत्येकं पञ्चविंशतिधा भवेत्।
प्रत्येकवृत्तौ प्राक्पक्षः स्याद् गोहेष्विव वाजिनाम् ॥ ५७ ॥
प्रत्येकवृत्तिः साकाङ्क्षा बहुत्वेनेति सोऽप्यसत्।
ऋजुसूत्रस्ततो ब्रूते प्रदेशभजनीयताम् ॥ ५८ ॥
भजनाया विकल्पत्वाद् व्यवस्थैवमपैति तत्।
धर्मे धर्मः प्रदेशो वा धर्म इत्यादिनिर्णयः ॥ ५९ ॥
जीवे स्कन्धेऽप्यनन्ते नोशब्दाद् देशाऽवधारणम्।
इति शब्दनयः प्राह समासङ्ग्रयशुद्धिमान् ॥ ६० ॥
ब्रूते समभिरूढस्तु भेदाप्तेर्नात्र सप्तमी।
देश-प्रदेशनिर्मुक्तमेवम्भूतस्य वस्तु सत् ॥ ६१ ॥
प्रस्थकार्थं व्रजामीति वने गच्छन् ब्रवीति यत्।
आदिमो ह्युपचारोऽसौ नैगम-व्यवहारयोः ॥ ६२ ॥
अत्र प्रस्थकशब्देन क्रियाविष्टवनैकधीः।
प्रस्थकेऽहं व्रजामीति ह्युपचारोऽपि च स्फुटः ॥ ६३ ॥
छिनद्मि प्रस्थकं तक्ष्णोम्युत्किराम्युल्लिखामि च।
करोमि चेति तदनूपचाराः शुद्धताभृतः ॥ ६४ ॥
तमेतावतिशुद्धौ तूत्कीर्णनामानमाहतुः।
चितं मितं तथा मेयारूढमेवाह सङ्ग्रहः ॥ ६५ ॥

एवं घटादिष्वपि कार्य-कारणयोरवयवा-ऽवयविनोरन्यप्रकारेण चोपचारा-ऽनुपचाराभ्यामविशुद्ध-मध्यम-विशुद्धभेदा भावनीयाः,

प्रस्थकश्चर्जुसूत्रस्य मानं मेयमिति द्वयम् ।
न ज्ञ-कर्तृगताद् भावाच्छब्दानां सोऽतिरिच्यते ॥ ६६ ॥
लोके च तिर्यग्लोके च जम्बूद्वीपे च भारते ।
क्षेत्रे तद्दक्षिणाऽर्द्धे च पाटलीपुरपत्तने ॥ ६७ ॥
गृहे च वसतिः कोणे नैगम-व्यवहारयोः ।
अतिशुद्धौ तु निवसन् वसतीत्याहतुः स्म तौ ॥ ६८ ॥
तदर्थस्तत्र तत्कालावच्छिन्ना तस्य वृत्तिता ।
वसत्यद्य न सोऽत्रेति व्यवहारौचिती ततः ॥ ६९ ॥
यत् त्वन्यत्र गतस्यापि तद्वासित्वं निगद्यते ।
तद्वासवृत्तिभागित्वे ज्ञेयं तत् त्वौपचारिकम् ॥ ७० ॥
सङ्ग्रहो वसतिं ब्रूते जन्तोः संस्तारकोपरि ।
ऋजुसूत्रः प्रदेशेषु स्वावगाहनकृत्सु खे ॥ ७१ ॥
तेष्वप्यभीष्टसमये न पुनः समयान्तरे ।
चलोपकरणत्वेनान्यान्यक्षेत्रावगाहनात् ॥ ७२ ॥
स्वस्मिन् स्ववसतिं प्राहुस्त्रयः शब्दनयाः पुनः ।
एषानुयोगद्वारेषु दृष्टान्त-नययोजना ॥ ७३ ॥
शुद्धा ह्येतेषु सूक्ष्मार्था अशुद्धाः स्थूलगोचराः ।
फलतः शुद्धतां त्वाहुर्व्यवहारे न निश्चये ॥ ७४ ॥

उपचारोऽशुद्धताप्रयोजकः, अनुपचारस्तु शुद्धताप्रयोजक इति बोध्यम् ।

प्रकारान्तरेणापि नगमादिनयेष्वविशुद्धादित्रयभावनामुपदिशति— एवमिति । कार्य-कारणयोरिति— कार्यधर्मस्य कारणे उपचारः कारणधर्मस्य कार्ये उपचार इत्यतोऽविशुद्धता, अनुपचारे शुद्धता, अवयवावयविनोरप्येवम्, तथाधाराधेयादिष्वप्युपचाराऽ-

एतद्व्युत्पत्त्यर्थमेव प्रस्थकादिदृष्टान्तोपदेशाद् । अस्मिन् नये विशेषेभ्योऽन्यदेव सामान्यम्, अनुवृत्तिबुद्धिहेतुत्वात्, सामान्याच्चान्य एव विशेषाः, व्यावृत्तिबुद्धिहेतुत्वात्, एवमाश्रयादपि भिन्नमेव सामान्यम्, अन्यथा व्यक्तिवत् साधारण्यानुपपत्तेः; एवं तुल्याऽऽकृति गुण-क्रियैकप्रदेश निर्गताऽऽ-गतपरमाणुषु योगिनां परस्परभेदबुद्धिहेतुरन्त्यविशेषोऽपि परमाणुभ्यो भिन्न

नुपचाराभ्यामविशुद्ध्यादिभावनोच्चेया । एतद्व्युत्पत्त्यर्थमेव उपचाराऽनुपचाराभ्यामविशुद्ध्यादिज्ञानार्थमेव ॥

नयान्तरेभ्यो नैगमनयस्य विशेषमुपदर्शयति- अस्मिन् नय इति- नैगमनय इत्यर्थः, विरुद्धधर्माध्यासाद् भेदः सिद्ध्यति, तेनानुवृत्तिबुद्धिहेतुत्वं विशेषावृत्ति सामान्ये वर्त्तत इति सामान्यं विशेषाद् भिन्नम्, व्यावृत्तिबुद्धिहेतुत्वं सामान्यावृत्ति विशेषेषु वर्त्तत इति विशेषाः सामान्याद् भिन्ना इत्यर्थः। आधारव्यक्तिभ्योऽपि सामान्यं भिन्नं व्यक्तीनामसाधारण्यात्, सामान्यस्य साधारण्यात्, सामान्यस्य व्यक्तिरूपत्वे तु व्यक्तिवत् सामान्यस्यापि साधारण्यं न स्यादित्याह- एवमाश्रयादपीति। अन्यथा व्यक्तिभ्यः सामान्यस्य भेदाभावे। साधारण्याऽनुपपत्तेः अनुगतत्वानुपपत्तेः। यथा च सामान्यस्य व्यक्तिभ्यो भिन्नत्वं तथा विशेषाणामपि स्वाश्रयेभ्यः परमाणुभ्यो भिन्नत्वमित्युपदर्शयति- एवमिति। तुल्येत्यस्याकृति-गुणादौ सर्वत्रान्वयः, अनेन च नाकृत्यादितः परमाणूनामन्योऽन्यभेदस्य परिज्ञानं सम्भवतीति दर्शितम्। अस्मदादीनां न परमाणवः प्रत्यक्षाः, नवा तद्गता विशेषाः प्रत्यक्षा इति न विशेषतः परमाणूनामन्योऽन्यभेदबुद्धिसम्भवः, किन्तु योगिन एव तुल्याकृत्यादिविशिष्टेष्वपि परमाणुषु प्रत्यक्षविषयीकृतेभ्यो विशेषेभ्यो भेदमवगन्तुं प्रभविष्णव इति योगिनामित्युक्तम्। परमाणुषु योगिनां

एव, स्वस्मिन्नितरभेदबुद्धेः स्वातिरिक्तविशेषहेतुकत्वनियमाद्, गोत्वादिसामान्यविशेषस्थले तथादर्शनादित्यवधेयम् ॥

नन्वेवं द्रव्यार्थविषयं सामान्यं पर्यायार्थविषयं विशेषं चेच्छन्नैगमः साधुवदुभयनयावलम्बित्वेन सम्यग्दृष्टिः स्यादिति चेत् ?

परस्परभेदबुद्धिहेतवः परमाणव एव सन्तु, अलं तद्धेतुतयाऽतिरिक्तविशेषपदार्थाभ्युपगमेनेत्यत आह- स्वस्मिन्निति । ननु स्वस्मिन्नितरभेदबुद्धेः स्वाऽतिरिक्तविशेषहेतुकत्वनियमे विशेषेऽपि विशेषान्तरभेदबुद्धेः स्वातिरिक्तविशेषहेतुकत्वं स्यात्, एवं विशेषगतातिरिक्तविशेषेऽपि तदितरभेदबुद्धेः स्वातिरिक्तविशेषहेतुकत्वप्रसक्तिरित्येवमनवस्था स्यादित्यत आह- गोत्वादिसामान्यविशेषस्थल इति- गोत्वादिः सामान्यविशेषो यस्य स गोत्वादिसामान्यविशेषः, तदात्मकस्थले इत्यर्थः, अथवा गोत्वादिलक्षणो यः सामान्यविशेषः स गोत्वादिसामान्यविशेषः, तस्य स्थलं स्थानम् आधार इति यावत्, तत्रेत्यर्थः । तथादर्शनात् इतरभेदबुद्धेः स्वातिरिक्तविशेषहेतुकत्वदर्शनात् । तथा च सामान्यविशेषात्मकजातिमति इतरभेदबुद्धेः स्वातिरिक्तविशेषहेतुकत्वमिति नियमः, यथा-गवि अश्वादिभेदबुद्धिर्गवातिरिक्तगोत्वात्मकविशेषहेतुका, विशेषस्तु न जातिमानिति तस्मिन्नितरबुद्धेर्न स्वातिरिक्तविशेषहेतुकत्वम्, अत एवानवस्थापरिहाराय विशेषाणां स्वत एव व्यावृत्तत्वस्वभाव उपेयते, परमाणूनामुक्तनियमादेव न स्वत एव व्यावृत्तत्वमित्येतत्सूचनायोक्तम्- अवधेयमिति ।

सामान्यं विशेषं चाभ्युपगच्छन् जैनसाधुर्यथा सम्यग्दृष्टिस्तथा नैगमोऽपि सामान्य-विशेषोभयोपगन्ता स्यात्, द्रव्यार्थिकपर्यायार्थिकोभयनयविषयाभ्युपगन्तृत्वादित्याशङ्कते- नन्वेवमिति । साधुवत् जैनसाधुवत् । कथञ्चिदन्योऽन्याभिन्नसामान्य-विशेषोभयाऽभ्युपगन्तृत्वे सत्येव सम्यग्दृष्टित्वम्, एकान्तेन सामान्याद् भिन्नो

न- परस्परं वस्तुतश्च भिन्नसामान्य-विशेषोभयाभ्युपगन्तृत्वेनास्य कणादवन्मिथ्यादृष्टित्वात्, तदुक्तं महाभाष्ये [विशेषावश्यकमहाभाष्ये गाथा-२१९५] सम्मतौ [सम्मतितर्के ३-४९] च-

" दोहि वि णएहि णीयं सत्थमुलूयण तहवि मिच्छत्तं ।
जं सविसयप्पहाणत्तणेण अण्णोण्णणिरवेक्खा " ॥१॥

अस्यार्थः— द्वाभ्यामपि द्रव्यास्तिकनय-पर्यायास्तिकनयाभ्याम्, नीतं समर्थितम्, शास्त्रम्, उलूकेन वैशेषिकदर्शनाद्यप्रवर्तकेन तथापि तन्मिथ्यात्वमेव, यद् यस्मात्, ताविति शेषः, तौ वैशेषिकदर्शनप्रवर्तकौ द्रव्यार्थिकौ नयौ, स्वविषयप्रधानत्वेन सावधारणस्वविषयावगाहित्वेन, अन्योऽन्यनिरपेक्षौ इतरांशाऽपलापिनौ, जैनाभिमतौ तु तौ स्याच्छब्दलाञ्छितत्वेन परस्परसापेक्षत्वान्न मिथ्यारूपाविति भावः ॥

विशेषः, विशेषाद् भिन्नं च सामान्यमसदेव, तथाविधसामान्यविशेषोभयाभ्युपगन्तृत्वेन नैगमस्य कणादवन्मिथ्यादृष्टित्वमेवेति समाधत्ते- नेति । परस्परम् अन्योऽन्यम् । वस्तुतश्च आधारतश्च । भिन्नेति- एकान्तभिन्नेत्यर्थः । अस्य-नैगमस्य ।

उक्तार्थं विशेषावश्यकमहाभाष्यस्य सम्मतितर्कस्य च सम्मतिमुपदर्शयति-तदुक्तमिति । दोहि वि० इति-" द्वाभ्यामपि नयाभ्यां नीत शास्त्रमुलूकेन तथापि मिथ्यात्वम् । यत् स्वविषयप्रधानत्वेनान्योऽन्यनिरपेक्षौ " ॥ १ ॥ इति संस्कृतम् । एतद्विवरणमुपदर्शयति- अस्याऽर्थ इति । तौ द्रव्यार्थिक-पर्यायार्थिकनयौ, अन्यत् स्पष्टम् ।

ननु द्रव्यविषयकत्वेन नैगमस्य यथा द्रव्यार्थिकत्वं तथा पर्यायविषयकत्वेन पर्यायार्थिकत्वमपि तस्य स्यात्, एवं च द्रव्या-

ननु यदि द्रव्य-पर्यायोभयविषयावगाही नैगमस्तदा "आद्यास्त्रयो द्रव्यार्थिकाः" "अन्त्याश्चत्वारः पर्यायार्थिकाः" इति सिद्धसेनाचार्याणाम्, "आद्याश्चत्वारो द्रव्यार्थिकाः" "अन्त्यास्त्रयः पर्यायार्थिकाः" इति जिनभद्रगणिक्षमाश्रमणपूज्यपादानां च विभागवचनं व्याहन्येत, नैगमस्योभयान्तःपातित्वेन पर्यायार्थिकाधिक्यात् । न चोभयविषयकत्वेऽपि द्रव्यांशे प्राधान्येनास्य द्रव्यार्थिकत्वमेवेति वाच्यम्, पर्यायांशेऽपि क्वचिदस्य

र्थिक-पर्यायार्थिकविभागे श्रीसिद्धसेनसूरिमते नैगमऋजुसूत्र-शब्द-समभिरूढैवम्भूताः पञ्च पर्यायार्थिकाः स्युरिति चतुर्धा पर्यायार्थिक-विभजनं न सङ्गतं स्यात्, एवं पूज्यानां मते नैगम-शब्द-समभिरूढैवम्भूताश्चत्वारः पर्यायार्थिकाः प्रसज्येरन्निति पर्यायार्थिकस्य त्रिधा विभजनमपि अयुक्तमापद्यत इति शङ्कते- नन्विति। आद्यास्त्रयः नैगम-सङ्ग्रह-व्यवहाराः। अन्त्याश्चत्वारः ऋजुसूत्र-शब्द-समभिरूढैवम्भूताः, इति सिद्धसेनाचार्याणां विभागवचनं व्याहन्येत इत्यन्वयः। आद्याश्चत्वारः नैगम-सङ्ग्रह-व्यवहारऋजुसूत्राः। अन्त्यास्त्रयः शब्द-समभिरूढैवम्भूताः। उभयान्तःपातित्वेन द्रव्यार्थिक-पर्यायार्थिकोभयान्तःपातित्वेन। 'न च' इत्यस्य 'वाच्यम्' इत्यनेनान्वयः, नैगमस्य द्रव्य-पर्यायोभयविषयकत्वेऽपि प्राधान्येन द्रव्यावगाहित्वाद् द्रव्यार्थिकेऽन्तर्भावः, गौणतयैव पर्यायावगाहित्वान्न पर्यायार्थिकेऽन्तर्भाव इति शङ्कार्थः। यदि सर्वस्य नैगमस्य प्राधान्यतो द्रव्यावगाहित्वमेवेति नियमः स्यात् तदेदं विनिगमकं युक्तं भवेत्, न चैवम्- कस्यचिन्नगमस्य प्राधान्येन पर्यायावगाहित्वस्यापि भावादिति निषेधहेतुमुपदर्शयति— पर्यायांशेऽपीति। अस्य नैगमस्य।

यस्य नैगमस्य प्राधान्येन धर्मावगाहित्वं तस्य नैगमस्य प्राधा-

प्राधान्यदर्शनात् । त्रिविधो ह्ययमाकरादावुदाहियते, धर्मयोर्धर्मिणो-धर्म-धर्मिणोश्च प्रधानोपसर्जनभावेन विवक्षणात्, तत्र " सच्चैतन्य-मात्मनि० " [प्रमाण० परि० ७, सू० ८] इत्याद्यो भेदः, अत्र चैतन्याख्यास्य धर्मस्य विशेष्यत्वेन प्राधान्यात्, सत्ताख्यधर्मस्य तु विशेषणत्वेनोपसर्जनभावात् १ । " वस्तु पर्यायवद्द्रव्यम्० " [प्रमाण० परि० ७, सू० ९] इति द्वितीयो भेदः, वस्त्वाख्यधर्मिणो विशेष्यत्वेन प्राधान्यात्, पर्यायवद्द्रव्यस्य तु विशेषणत्वेनोपसर्जन-भावात् । " क्षणमेकं सुखी विषयाऽऽसक्तो जीवः " [प्रमाण० परि० ७, सू० १०] इति तृतीयो भेदः, अत्र विषयासक्त-जीवाख्यधर्मिणो विशेष्यत्वेन मुख्यत्वात्, सुखलक्षणधर्मस्य तु

न्येन धर्मलक्षणपर्यायावगाहित्वं समस्तीत्युपदर्शयितुं तस्य रत्नाकरा-द्युक्तं सनिदर्शनं त्रिविध्यमुपदर्शयति— त्रिविधो हीति— हि यतः । अयं नैगमः । आकरादौ स्याद्वादरत्नाकरादौ । धर्मयोरिति--धर्मयोः प्रधानोपसर्जनभावेन विवक्षात एकस्य धर्मस्य प्राधान्येनाऽन्यस्य धर्मस्योपसर्जनभावेनावगाही नगम एकः, धर्मिणोः प्रधानोप-सर्जनभावेन विवक्षात एकस्य धर्मिणः प्राधान्येनान्यस्य धर्मिण उपसर्जनभावेनावगाही नैगमो द्वितीयः, धर्म-धर्मिणोः प्राधानोप-सर्जनभावेन विवक्षातो धर्म-धर्मिणोरेकस्य प्राधान्येनान्यस्यो-पसर्जनतयाऽवगाही नैगमस्तृतीय इत्येवं त्रिविधो नैगम इत्यर्थः । तत्र त्रिषु नैगमेषु । आद्यो भेदः धर्मयोः प्रधानोपजनभावेनावगाही नैगमः । अत्र ' सच्चैतन्यमात्मनि ' इत्यस्मिन् । द्वितीयो भेदः धर्मिणोः प्रधानोपसर्जनभावेनावगाही नैगमः । तृतीयो भेदः धर्म-धर्मिणोः प्रधानोपसर्जनभावेनावगाही नैगमः । अत्र 'क्षणमेकं सुखी विषया-

विशेषणत्वेनोपसर्जनत्वात् ३। इत्थं चात्र धर्मप्राधान्ये पर्यायप्राधान्यात् पर्यायार्थिकत्वमपि दुर्निवारमिति चेत् ?, सत्यम्– द्रव्य-पर्यायोभयग्राहित्वेऽपि नैगमस्याधिकृतवस्तुनि द्रव्य-पर्यायान्यतरात्मकत्वजिज्ञासायां द्रव्यांशाऽप्रतिक्षेपेणैव द्रव्यार्थिकत्वनिर्धारणात्, अन्यथा सामान्यरूपस्यास्य सङ्ग्रहे विशेषरूपस्य च व्यवहारेऽन्तर्भावपक्षे व्यवहारस्यापि द्रव्यार्थिकतायाश्चिन्त्यत्वापत्तेः, निर्णीते च स्वस्वान्यविषयप्रतिक्षेपेणैव द्रव्य-पर्यायग्राहिणोर्द्रव्यार्थिकत्व-पर्यायार्थिकत्वे निर्युक्ति-भाष्यादौ, तदाह– सामायिकमाश्रित्य एतच्चिन्तायां भगवान् भद्रबाहुः—

सक्तो जीवः' इत्यस्मिन्। इत्थं च उक्तप्रकारेण नगमस्य त्रिविधत्वे च। अत्र नैगमे। समाधत्ते— सत्यमिति। अन्यथा द्रव्यांशाप्रतिक्षेपित्वप्रयुक्तद्रव्यार्थिकत्वानभ्युपगमे। सामान्यरूपस्य सामान्यग्राहिणः। अस्य नैगमस्य। सङ्ग्रहे' इत्यस्य 'अन्तर्भावपक्षे' इत्यत्रान्वयः। चिन्त्यत्वाऽऽपत्तेः विशेषात्मकपर्यायविषयकत्वेन पर्यायार्थिकत्वस्यैव प्राप्तेस्तस्य द्रव्यार्थिकता कथं सङ्गता स्यादित्येवं चिन्तनीयत्वापत्तेः। ननु व्यवहारविषयस्य द्रव्यत्वमपीत्येतावता द्रव्यार्थिकत्वं तस्य भवेदिति चेत् ? न–द्रव्यार्थिकस्य पर्यायनयविषयप्रतिक्षेपकत्वेन द्रव्यार्थिकत्वम्, पर्यायार्थिकस्य द्रव्यनयविषयप्रतिक्षेपकत्वेन पर्यायार्थिकत्वमित्यस्यैव सिद्धान्ततत्त्वेन व्यवहारस्य पर्यायाप्रतिक्षेपकत्वे द्रव्यार्थिकत्वासम्भवादित्याह—निर्णीते चेति-अस्य 'द्रव्यार्थिकत्व-पर्यायार्थिकत्वे' इत्येनान्वयः। नियुक्तिभाष्याऽऽदौ निर्णीते इति यदुक्तं तदेव दर्शयति— तदाहेति। एतच्चिन्तायां द्रव्यार्थिकत्वादिविचारणायाम्।

जीवो गुणपडिवन्नो० इति–" जीवो गुणप्रतिपन्नो नयस्य द्रव्या-

"जीवो गुणपडिवन्नो णयस्स दव्वट्ठियस्स सामइयं ।
सो चेव पज्जवट्ठियनयस्स जीवस्स एस गुणो" ॥
[विशेषावश्यकनिर्युक्ति० गाथा–२६४३] ॥

अस्यार्थः– द्रव्यमेवार्थो यस्य न तु पर्यायाः स द्रव्यार्थिकस्तस्य नयस्य मतेन, जीव आत्मा, गुणप्रतिपन्नः सामायिकम्, न तु समतागुणरूपः पर्यायः । अस्य मते गुणाः खल्वौपचारिकत्वात "आदावन्ते च यन्नास्ति, वर्तमानेऽपि तत् तथा" । [अध्यात्मोपनिषद्] इत्यादिन्यायाद् द्रव्यव्यतिरेकेण तेषामनुपलम्भाच्चासन्त एव। कथं तर्हि घटादिद्रव्ये रूपादिगुणप्रतीतिरिति चेद् ?, भ्रान्तैव चित्रे

थिकस्य सामायिकम् । स एव पर्यायार्थिकनयस्य जीवस्यैष गुणः" ॥ १ ॥ इति संस्कृतम् । निरुक्तगाथार्थं दर्शयति — अस्यार्थ इति । न इति– समतागुणरूपः पर्यायो न द्रव्यार्थिकमते सामायिकमित्यर्थः । कथं न गुणरूपः पर्यायः सामायिकमित्यपेक्षायामाह— अस्य मते इति— द्रव्यार्थिकस्य मत इत्यर्थः । 'गुणाः' इत्यस्य 'असन्त एव' इत्यनेनान्वयः, तत्र हेतुः–'औपचारिकत्वाद्' इत्येकः, 'अनुपलम्भाच्च' इति द्वितीयः । कथमौपचारिकत्वं गुणानाम्, पारमार्थिकत्वमेव न कुत इत्याकाङ्क्षायामाह— आदाविति—समतागुण आदौ सांसारिकक्रियाव्यापृतिदशायामपि नास्ति, अन्ते पुनः सामायिकावस्थात उपरमे नास्ति, तत् समतागुणपर्यायः, वर्तमानेऽपि मध्यावस्थायामपि, तथा नास्त्येवेति, न्यायात् युक्तेः । यत् यतो व्यतिरिक्तं तत् तद्व्यतिरेकेण पृथगुपलभ्यते, यथा–घटादि पटादिव्यतिरिक्तं पटादिव्यतिरेकेणाप्युपलभ्यते समतागुणश्चात्मव्यतिरेकेण नोपलभ्यत इत्यनुपलम्भाच्च न सत्, अन्येऽपि गुणा द्रव्यव्यतिरेकेण नोपलभ्यन्त इत्यसन्त एव द्रव्यार्थिकमते इत्याह— द्रव्यव्यति-

निम्नोन्नतप्रतीतिवदिति दिग्। स एव-सामायिकादिर्गुणः, पर्याय एवार्थो यस्य न तु द्रव्यं स पर्यायार्थिकनयस्तस्य मते परमार्थतोऽस्ति, न तु जीवद्रव्यम्, यस्माज्जीवस्यैष गुणो जीवगुण इति षष्ठीतत्पुरुषसमासोऽयम्, स चोत्तरपदप्रधानः, यथा–तैलस्य धारा तैलधा-

---

रेकेणेति। तेषां गुणानाम्। यदि गुणा न सन्त्येव तर्हि घटादौ रूपादिगुणप्रतीतिः कथमित्याशङ्कते— कथं तर्हीति। घटादौ रूपादिगुणप्रतीतिः प्रमाऽऽत्मिका न भवत्येव किन्तु भ्रान्ता, सा च विषयमन्तरेणापि जायते, यथा- चित्रे निम्नोन्नतत्वाद्यभावेऽपि तत्प्रतीतिरित्युत्तरयति–भ्रान्तैवेति। पूर्वार्द्धं व्याख्याय उत्तरार्द्धं विवृणोति— स एवेति। न तु जीवद्रव्यमिति— पर्यायार्थिकमते जीवद्रव्यं परमार्थतो नास्तीत्यर्थः। अयं जीवगुण इति शब्दः। स च षष्ठीतत्पुरुषसमासश्च। ननु गाथायां 'जीवगुणाः' इति समस्तं पदं नास्ति, अथापि कस्मादकस्मान्नभसो निपतितं यदाश्रित्य षष्ठीतत्पुरुषोऽयमिति ग्रन्थकृतो व्याख्यामिति चेत्, उच्यते- 'जीवो गुणप्रतिपन्नो द्रव्यार्थिकस्य नयस्य मते सामायिकम्' इत्युक्त्वा गुणविशिष्टस्य जीवस्य सामायिकत्वं लभ्यते, पर्यायार्थिकनयस्य मते 'गुणः सामायिकम्' इत्येतावन्मात्रोक्तिश्च गुणसामान्यस्यैव सामायिकत्वं लभ्यते, एवं च सति पुद्गलादिगुणानामपि सामायिकत्वं प्रसज्येतेत्यतः 'सो चेव' इत्यनेन गुणमात्रमेव नोपादीयते किन्तु तदैतदर्थद्वारा समापतितः, अर्थात् स्मृतिपथमुपगतो 'जीवगुणः' इति शब्दः, यद्यपि 'जीवस्य गुणः' इत्ययमपि शब्दः स्मृतिपथमागन्तुमर्हति, तथापि विग्रहवाक्यतः समासवाक्यस्य लघुभूतत्वाद् 'अणुरपि विशेषोऽध्यवसायकरः' इति न्यायेन 'जीवगुणः' इति समासशब्दः एव तथा ग्रहीतुं शक्य इति, स चायं समासः षष्ठीतत्पुरुष इत्येतदाविष्कर्तुं 'जीवस्स एस गुणो' इति विग्रहवाक्यं गाथाया अन्ते सन्निवेशितम्, अन्यथा 'सो चेव पज्जवट्ठियनयस्स' इत्येतावतैवान्वयबोधपरिसमाप्तावनर्थकं तदापद्ये-

रेति, न चात्र धाराऽतिरिक्तं किमपि तैलमस्ति, एवं ज्ञानादिगुणातिरिक्तं जीवद्रव्यमपि नास्तीति पर्यायार्थिकाभिप्रायः॥ अत्र भाष्यम्–

" इच्छइ जं दव्वनओ, दव्वं तच्चमुवयारओ य गुणे।
सामइयगुणविसिट्ठो, तो जीवो तस्स सामइअं॥
पज्जाओ च्चिय वत्थुं, तच्चं दव्वं च तदुवयाराओ।
पज्जवणयस्स जम्हा, सामइयं तेण पज्जाओ॥ "

[विशेषावश्यकभाष्यगाथे–२६४४, २६४५]

प्रायः स्पष्टे। नवरं ' तदुपचाराद् ' इति–तेषु पूर्वापरीभूतपर्यायेषूपचरणमुपचारः सांवृती कल्पना, ततो व्यवह्रियते, न तु परमार्थतो द्रव्यमस्तीत्यर्थः॥

तेति। ' न च ' इत्यस्य 'अस्ति' इत्यनेनान्वयः। अत्र तैलधारायाम्। एवं यथा तैलधारायां धाराऽतिरिक्तं न तैलं समस्ति तथा॥

उक्तार्थोपोद्बलकं भाष्यमुल्लिखति– अत्र भाष्यमिति। इच्छइ० इति– " इच्छति यद् द्रव्यनयो द्रव्यं तथ्यमुपचारतश्च गुणान्। सामायिकगुणविशिष्टस्ततो जीवस्तस्य सामायिकम्॥ पर्याय एव वस्तु तथ्यं द्रव्यं च तदुपचारात्। पर्यवनयस्य यस्मात् सामायिकं तेन पर्यायः "॥ इति संस्कृतम्। इमे गाथे स्पष्टे न विवरणमपेक्षेते इत्याह– प्रायः स्पष्टे इति। नवरं केवलम्, ' तदुपचाराद् ' इत्येव व्याख्येयम्, तद्व्याख्यानम्– तेष्वित्यादि। उपचारः कः? इत्यपेक्षायामाह– सांवृती कल्पनेति। ततः कल्पनातः। अयं भावः– कल्पना द्विविधा पारमार्थिकी सांवृती च, तत्र प्रमाणबलसमुत्थाऽनुकूलतर्काद्युपबृंहिता कल्पना पारमार्थिकी, या वस्तुतत्त्वं न व्यभिचरति, यदाकारं वस्तु तदाकारैव सेति; या त्वभिनिवेशादिनिबन्धना कल्पना सा सांवृती, परमार्थस्य परस्वरूपस्य स्वस्वरूपेण संवरण-

एतदेव पर्यायार्थिकमतं युक्त्या समर्थयति भाष्यकृत्–

" पज्जायनयमयमिणं, पज्जायत्थंतरं कओ दव्वं ।
उवलंभ-ववहाराभावाओ खरविसाणं व ॥
जह रूवाइ विसिट्ठो, न घडो सव्वप्पमाणविरहाओ ।
तह नाणाइविसिट्ठो, को जीवो णामऽणक्खेओ ? "

[विशेषावश्यकभाष्यगाथे–२६४६, २६४७]

माच्छादनं संवृतिः, अन्याकारं वस्तु तदन्याकारेण यदवभासयति ज्ञानं तत् संवृतिः, तत्समुत्था कल्पना विकल्पात्मिका बुद्धिः 'सांवृतो' इत्युच्यते, यथा– सन्ततिस्वरूपतामुपगताः पूर्वापरपर्याया न वस्तुतो द्रव्यम्, किन्तु तदनुगामि द्रव्यमन्यदेव, अथापि तादृशेष्वेव पूर्वापरपर्यायेषु द्रव्यबुद्धिर्भवति, सा निजेन द्रव्याकारेण पूर्वापरपर्यायाकारान् आवृणोतीति संवृतिः, तत्प्रभवा तदात्मिका वा कल्पना सांवृतीति ।

इह विशेषावश्यकविवरणमिदम्–" यद् यस्माद्, द्रव्यार्थिकनयः, तथ्यं-सत्यम्, द्रव्यमेवेच्छति, गुणाँस्तूपचारत एव मन्यते न तु सत्यान्, ततः-तस्माद्, सामायिकगुणविशिष्टः-उपसर्जनीभूतसामायिकादिगुणः, मुख्यतया जीव एव, तस्य द्रव्यार्थिकनयस्य, सामायिकमिति । यस्मात् पर्यायार्थिकनयस्य मतेन पर्याय एव, तथ्यं-निरुपचरितम्, वस्तु, द्रव्यं पुनस्तेष्वेव वार्परीभूतपर्यायेषूपचारतो व्याह्रियते, न तु परमार्थतस्तदस्ति, तेषु-पर्यायेषु, उपचारस्तस्मादिति समासः । तेन-तस्मात् कारणात्, पर्याय एवास्य मुख्यतया सामायिकम्, न जीवद्रव्यमिति ॥ २६४४ ॥ ॥ २६४५ ॥

पज्जाय इति–" पर्यायनयमतमिदं पर्यायादर्थान्तरं कुतो द्रव्यम् ? । उपलम्भ-व्यवहाराऽभावात् खरविषाणमिव ॥ यथा रूपादिविशिष्टो न घटः सर्वप्रमाणविरहात् । तथा ज्ञानादिविशिष्टः को जीवो

नास्ति परपरिकल्पितं द्रव्यं पर्यायेभ्योऽर्थान्तरत्वात् खरविषाणवत्, यद्वा नास्ति परपरिकल्पितं द्रव्यं पर्यायेभ्यो भेदेनाऽनुपलभ्यमानत्वात् व्यवहारेऽप्रयुज्यमानत्वाद् वा खरविषाणवदिति प्रयोगः।

यथा वा, रूप-रस-गन्ध-स्पर्शेभ्यो विशिष्टः—भिन्नो घटो नास्ति, प्रमाणैर्ग्रहणाभावात् खरविषाणवत्, तथाऽनाख्येयः—पर्यायविरहेण सर्वोपाख्यारहितः, ज्ञानादिभ्यो विशिष्टः—व्यतिरिक्तः

नाम? अनाख्येयः"॥ इति संस्कृतम्। उक्तगाथाद्वयार्थमुपदर्शयति- नास्तीति- अत्र 'परपरिकल्पितं द्रव्यं नास्ति' इति प्रतिज्ञा, 'पर्यायेभ्योऽर्थान्तरत्वाद्' इति हेतुः, 'खरविषाणवद्' इति दृष्टान्तः। परपरिकल्पितद्रव्यस्य नास्तित्वसाधने प्रकारान्तरेण प्रयोगमुपदर्शयति- यद्वेति-'पर्यायेभ्यो भेदेनाऽनुपलभ्यमानत्वाद्' इत्येको हेतुः, व्यवहारेऽप्रयुज्यमानत्वाद्' इति द्वितीयः। सामान्यतो द्रव्यनास्तित्वसाधनप्रयोगानुपदर्श्य विशेषतो द्रव्यनास्तित्वसाधनप्रयोगमुपदर्शयति- यथा वेति। 'विशिष्टः' इत्यस्य 'भिन्नः' इत्यर्थो दर्शितः। 'अनाख्येयः' इत्यस्य 'पर्यायविरहेण सर्वोपाख्यारहितः' इत्यर्थ उक्तः। समासानात्मकमखण्डं नाम उपाख्या, शक्त्या तत्प्रतिपादितोऽर्थः सोपाख्यः, शक्तिसम्बन्धेन उपाख्यया सहितः सोपाख्य इति व्युत्पत्तेः, गगनकुसुम-खरविषाण-बन्ध्यासुतादयो येऽलीकतया प्रसिद्धास्ते सर्वेऽपि समासशब्देनैवोट्टङ्किता भवन्ति, नहि किमप्यलीकं समासानात्मकाखण्डशब्दोल्लिखितम्, घटादयस्तु पदार्था घट-कुटाद्यखण्डनामप्रतिपाद्या यद्यपि सोपाख्या एव तथापि द्रव्यानभ्युपगन्त्रा पर्यायार्थिकेन रूप-रसादिपर्यायव्यतिरिक्ततनवस्ते नाभ्युपगताः, घटादिशब्दस्तु रूपादिपर्यायात्मके तत्र प्रवर्तमानो 'घटनाद् घटः, कुटनात् कुटः' इत्यादिव्युत्पत्त्या जलाहरणादिक्रियालक्षणविशेषादि-

को नाम जीवः ? नास्ति कश्चनाप्यसाविति भावः। उक्तप्रयोगेषु धर्मिदृष्टान्ताद्यसिद्धिर्नाशङ्कनीया, विकल्पसिद्धानां तेषां साम्प्रदायिकैरभ्युपगमात्। स च विकल्पोऽखण्डाऽलीकव्यवहारनिर्वाहकासत्-

---

लक्षणपर्यायमुपादायैव प्रवर्तते, न तु पर्यायं परित्यज्य, ततः पर्यायविरहेण-पर्यायविनिर्मोकेण सर्वासामप्यखण्डनामस्वरूपाणामुपाख्यानां शक्यथाऽप्रतिपाद्य एव, अखण्डनामवाच्या धर्मा अपि 'उपाख्या' इति गीयन्ते, तदाश्रयणे च सर्वधर्मानाश्रयः सर्वोपाख्यारहित इत्यर्थः। 'को नाम जीवः ?' इत्यत्र किम आक्षेपार्थकत्वमवलम्ब्य 'नास्ति' इत्याद्युक्तम्। पर्यायनये द्रव्यस्याप्रसिद्धत्वात् तत् पक्षीकृत्योक्ता अनुमानप्रयोगा न सम्भवन्तीत्याशङ्कां प्रतिक्षिपति- उक्तप्रयोगेष्विति-'नास्ति परपरिकल्पितं द्रव्यम्' इत्यादिप्रयोगेष्वित्यर्थः। धर्मिदृष्टान्ताद्यसिद्धिरिति-क्रमेण द्रव्य-घट-जीवा धर्मिणः, खरविषाणं दृष्टान्तः, आदिपदग्राह्या दृष्टान्ते प्रकृतसाध्य-हेत्वोरविनाभावः, तेषामसिद्धिरित्यर्थः। धर्मि-दृष्टान्तयोर्विकल्पसिद्धत्वे तत्राऽविनाभावस्यापि विकल्पसिद्धत्वम्, "धर्मिणः प्रसिद्धिः क्वचिद् विकल्पतः, कुत्रचित् प्रमाणतः, क्वापि विकल्प-प्रमाणाभ्याम्" [प्रमाण०, परि० ३, सू० २१] इत्यनेनाकरसूत्रेण विकल्पसिद्धत्वं धर्मिण उपगतमिति धर्मिसिद्धिवद् दृष्टान्तादिसिद्धिरपि विकल्पत इति नाऽसिद्धिस्तेषामित्याह-'विकल्पसिद्धानामिति। तेषां धर्मिदृष्टान्तादीनाम्। विकल्प एव कः? यत्प्रसिद्धत्वं धर्म्यादीनामित्याकाङ्क्षायामाह- स च विकल्प इति। अखण्डेति-शशस्य शृङ्गं शशशृङ्गमित्येवं सखण्डो न शशशृङ्गादिलक्षणोऽलीकः. किन्त्वखण्ड एव शशशृङ्गादिलक्षणोऽलीकः, तद्व्यवहारः 'शशशृङ्गमसन्नार्थक्रियाकारि' इत्यादिरूपः, तस्य निर्वाहकः व्यवहारे व्यवहर्तव्यज्ञानस्य प्रयोजकत्वाच्छशशृङ्गादिव्यवहारे शशशृङ्गज्ञानं प्रयोजकमिति निर्वाहकः। असत्ख्यातिरूपः असतः शशशृङ्गादेः ख्यातिर्ज्ञानं तदात्मकः,

ख्यातिरूपः, खण्डशः प्रसिद्धपदार्थयोरलीकसम्बन्धव्यवहारनियामकाऽऽहार्यशाब्दभ्रमलक्षणान्यथाख्यातिरूपो वेत्यन्यदेतत् । द्वितीय-

---

एतच्च असत्ख्यात्यभ्युपगन्तृबौद्धमतमवलम्ब्य। असत्ख्यात्यनभ्युपगन्तृमतमवलम्ब्याह- खण्डश इति- शशोऽपि प्रसिद्धः शृङ्गमपि प्रसिद्धमिति खण्डशः प्रसिद्धयोः पदार्थयोः शशशृङ्गयोरलीकस्य सम्बन्धस्य 'सदुपरागेणासन्नपि संसर्गो भासते' इति वचनाद् यो व्यवहारस्तस्य नियामकः । आहार्यशाब्दभ्रमलक्षणेति- एतच्च परोक्षज्ञानं निश्चयरूपमेव, अनाहार्यमेव, प्रत्यक्षमेव तु संशयादिरूपमिति मतमनादृत्य, तन्मते शशपदाच्छशस्य शृङ्गपदाच्छृङ्गस्योपस्थित्यनन्तरं मानस आहार्यभ्रमः, शब्दाच्छशशृङ्गं प्रत्येमीत्यनुव्यवसायानुपपत्तिरतस्तादृशानुव्यवसायानुरोधेन आहार्योऽपि शाब्दभ्रम ऊरीकरणीय इत्यभिसन्धिः, तथा च आहार्यशाब्दभ्रमलक्षणा याऽन्यथाख्यातिस्तद्रूपो वेत्यर्थः । अन्यथाख्यातिर्नाम अन्यात्मना स्थितस्य तदन्यात्मना ज्ञानम्, तदभाववति तत्प्रकारकं ज्ञानमिति यावत्, प्रकृते शशीयत्वाभाववति शृङ्गे शशीयत्वप्रकारकं शशशृङ्गमिति ज्ञानं भवत्यन्यथाख्यातिरिति । अन्यदेतत् वादान्तरम्, विकल्पोऽसत्ख्यातिर्भवतु, अन्यथाख्यातिर्वा भवतु, उभयथाऽपि तत्सिद्धत्वमुपादाय द्रव्यादीनां धर्म्यादिरूपतयाऽभिधानं सम्भवतीति तदेकपक्षखण्डन-मण्डनयोः प्रकृते नोपयोग इत्याशयः । ननु विकल्पोऽन्यथाख्यातिरूप इति पक्षे द्रव्यस्य क्वचित् प्रसिद्धस्यैव पर्याये ख्यातिर्विकल्प इति स्यात्, तथा च तदनुरोधेन द्रव्यस्य सत्त्वमायातमिति तदनभ्युपगमो न पर्यायार्थिकस्य सङ्गतो भवेदित्याशङ्कते— द्वितीयपक्ष इति- विकल्पस्यान्यथाख्यातिरूपत्वपक्ष इत्यर्थः । पूर्वोत्तरकालवृत्ति एकमखण्डं द्रव्यमेव पर्यायनयो नाभ्युपगच्छति, सौसादृश्याऽऽकलितपूर्वापरपर्यायक्षणसन्ततिरूपं द्रव्यमभ्युपगच्छत्येव, तच्च पर्यायतोऽभिन्नमेव, एवमपि तत्र पर्यायतो भिन्न-

पक्षेऽन्यत्र सत एवान्यत्रारोप इति द्रव्यस्य सत्त्वप्रसक्तिरिति चेत्, न—सभागक्षणसन्ततिरूपद्रव्यपदार्थे पर्यायात् पृथक्त्वभ्रमोत्तरं पर्याये तत्सम्बन्धोपचारेणापि तत्सत्त्वासिद्धेरिति दिग् ॥

एतदेव पर्यायार्थिकमतं निर्युक्तिकृदपि समर्थयन्नाह—

"उप्पज्जंति वियंति य परिणमंति य गुणा ण दव्वाइं ।
दव्वप्पभवा य गुणा ण गुणप्पभवाइं दव्वाइं" ॥

[विशेषावश्यकभाष्यगाथा—२६४८]

त्वभ्रमे तदनन्तरं पर्याये तत्सम्बन्धोपचारतस्तद्व्यवहार इति न द्रव्यस्य वास्तविकस्य सत्त्वसिद्धिरिति समाधत्ते—नेति । सभागेति—समानाः सदृशा भागा यस्याः सा सभागा, सभागा चासौ क्षणसन्ततिश्च सभागक्षणसन्ततिः, तद्रूपस्तदात्मको यो द्रव्यपर्यायस्तस्मिन्नित्यर्थः । तत्सम्बन्धोपचारेणाऽपि निरुक्तस्वरूपस्य द्रव्यस्य सम्बन्धोपचारेणापि । तत्सत्त्वाऽसिद्धेः अतिरिक्तद्रव्यपदार्थसत्त्वासिद्धेः। पर्यायार्थिकमते सर्वं वस्तु क्षणिकपर्यायस्वरूपमेव, क्षणमात्रस्थायित्वात् पर्यायाणां क्षणरूपत्वम्, तदधिकरणकालात्मकक्षणस्वतिरिक्तो न तन्मते उपेयते, अतः 'सभागक्षणसन्ततिरूपद्रव्यपदार्थे' इत्यत्र क्षणशब्देनैकसन्ततिपतिततपर्यायस्वरूपस्यैव ग्रहणम्, कालस्यातिरिक्तस्याऽभावादेव न ग्रहणम् । काष्ठपर्यायस्यानन्तरं भस्मपर्यायः, तस्य च विसदृशो मृत्तिकादिपर्याय इत्येवं विसभागानां विसदृशानां पूर्वापरभावेन व्यवस्थितानामपि पर्यायाणां सन्ततिर्न द्रव्यम्, किन्तु सभागानां सदृशानां प्रतिक्षणं विभिन्नानां पूर्वापरीभावमापन्नानां काष्ठपर्यायाणां सन्ततिरेव द्रव्यम्, तथा च घटादिपर्यायाणां सदृशानां सन्ततिरेव द्रव्यमित्यावेदनाय 'सभाग' इति विशेषणम् ।

उक्तपर्यायार्थिकमतसमर्थनं विशेषावश्यकनिर्युक्तिकृतोऽप्यभिप्रेतमित्याह— एतदेवेति— अनन्तरोपवर्णितमेवेत्यर्थः । उप्पज्जंति० इति—

अस्यार्थः–उत्पद्यन्ते, व्ययन्ते, उत्पादव्ययावच्छिन्नस्वभावेन च परिणमन्ते, द्वितीयचकारस्यैवकारार्थस्य 'गुणाः' इत्यनन्तरं सम्बन्धाद् गुणा एव–पर्याया एव, न तु द्रव्याणि, अतस्त एव सन्ति, पत्रनील-रक्ततादिवत्, न तु द्रव्याणि, उत्पाद-व्यय-परिणामरहितत्वाद् वन्ध्यासुतादिवदित्यर्थः। किञ्च, द्रव्यात् प्रभवो येषां ते द्रव्यप्रभवा गुणा नेत्यत्र विश्रामः, ततो 'द्रव्यप्रभवाः' इत्यनन्तरं चकारस्याप्यर्थस्य व्यवहितसम्बन्धान्नकारस्य चाऽऽवृत्तिकरणात् नापि गुणप्रभवाणि द्रव्याणि भवन्तीत्यर्थसिद्धेर्न कारणत्वं नापि

"उत्पद्यन्ते व्ययन्ते च परिणमन्ते च गुणा न द्रव्याणि। द्रव्यप्रभवाश्च गुणा न गुणप्रभवाणि द्रव्याणि" ॥ इति संस्कृतम्। उक्तगाथां विवृणोति–अस्यार्थ इति। द्वितीयचकारस्य 'परिणमन्ते च' इति चकारस्य। अतः गुणानामेवोत्पाद-व्ययाऽवच्छिन्नस्वभावेन परिणमनभावतः। त एव गुणा एव। द्रव्याणि न सन्तीत्यत्र हेतुः उत्पाद-व्ययपरिणामरहितत्वादिति। वन्ध्येति–यद् यद् उत्पादव्ययपरिणामरहितं तन्न सत्, यथा–वन्ध्यासुतादीत्यर्थः। पूर्वार्द्धं व्याख्याय उत्तरार्द्धं विवृणोति–किञ्चेति–'द्रव्यप्रभवाश्च गुणा न इति सम्बन्धे अग्रे 'गुणप्रभवाणि द्रव्याणि' इत्येतावन्मात्रभावाद् गुणकार्यत्वतो द्रव्यस्य सत्त्वमायातं स्याद्, अतः 'द्रव्यप्रभवाश्च' इति चकारोऽप्यर्थकः, स आवृत्तितो लब्धस्य द्वितीयनकारस्यानन्तरं सम्बन्धनीय इति 'नापि गुणप्रभवाणि द्रव्याणि' इति वाक्यं द्वितीयं पर्यवस्यति, तेन न गुणप्रभवत्वमपि द्रव्याणामित्यर्थो लभ्यते इत्याह–ततो द्रव्यप्रभवा इत्यनन्तरमिति। तथा च कार्यत्वस्य कारणत्वस्य चाभावान्न द्रव्याणां सत्त्वमित्याह–न कारणत्वमिति। तानि द्रव्याणि। नकारस्यावृत्तिकरणमन्तरेणैव उत्तरार्धमन्यथा व्याचष्टे–अथवेति। कथं गुणप्रभवत्वं द्रव्याणाम्?, तथाऽभ्युपगमे वा द्रव्यस्य सत्त्व-

ते जप्पभवा जं वा तप्पभवं होज्ज होज्ज तो दव्वं ।
ण य तं ते चेय जओ परोप्परप्पच्चयप्पभवा " ॥
[विशेषावश्यकभाष्यगाथे-२६४९, २६५०]

एकदेशिमतमुत्थापयति-

" आहाऽवक्खाणमिदं इच्छइ दव्वमिह पज्जवणओ वि ।
किंतच्चंतविभिन्ने मन्नइ सो दव्वपज्जाए ॥
उप्पायाइसहावा, पज्जाया जं च सासयं दव्वं ।
ते तप्पभवा ण तयं तप्पभवं तेण ते भिन्ना ॥

वत्त्वात्, पत्रनीलतादिवदिति । अनभिमतप्रतिषेधमाह- न उ इत्यादि, ' सन्ति ' बहुवचनव्यत्ययाद् एकवचनान्तमिहापि सम्बध्यते, न तु द्रव्यमस्ति, इत्यभीष्टं पर्यायार्थिकनयस्य, तद्विरहात्- उत्पादव्यय-परिणामाभावात्, खपुष्पवदिति ॥

यदि हि यस्मात् प्रभवो येषां ते यत्प्रभवाः, ते प्रसिद्धा नीलादयो गुणाः, ' जं वा तप्पभवं ति- यद् वा तत्प्रभवं- तेभ्यो गुणेभ्यः प्रभवो यस्य तत् तत्प्रभवम्, गुणेभ्यो व्यतिरिक्तं किमपि वस्तु, 'होज्ज'त्ति-.भवेदित्यर्थः, ' होज्ज ता दव्वं 'ति- ततस्तदेव वस्तु पार-मार्थिकं द्रव्यं भवेदिति । ण य तमित्यादि- न च तद् गुणानां कारण-भूतं कार्यभूतं वा गुणेभ्यो व्यतिरिक्तं किमपि वस्त्वस्ति, यतस्त एव नील-रक्तादयो गुणाः पूर्वापरीभावतः सातत्येन प्रवृत्ता दृश्यन्ते, न पुनस्तदतिरिक्तं किमपि द्रव्यमीक्ष्यते । कथम्भूता गुणाः ? इत्याह- परोप्परेत्यादि- परस्परमन्योऽन्यं प्रत्ययः प्रत्ययभावः प्रत्ययत्वमित्यर्थः, तस्मात् प्रभवो जन्म येषां ते परस्परप्रत्ययप्रभवाः, प्रतीत्यसमुत्पा-देनोत्पन्ना इत्यर्थः । तस्मान्न गुणेभ्यो व्यतिरिक्तं द्रव्यमस्तीति ॥

अत्र एकदेशिव्याख्यानमपाकर्तुं भाष्यकृद् यदाह तदवतारयति- एकदेशीति । एकदेशिव्याख्यानोपदर्शकं भाष्यवचनम्- आहा• इति—

जीवस्स य सामाइअं पज्जाओ तेण तं तओ भिन्नं।
इच्छइ पज्जायणओ वक्खाणमिणं जहत्थं ति" ॥

[विशेषावश्यकभाष्यगाथाः–२६५१, २६५२, २६५३]

आह कश्चिद् व्याख्यात्राभासः–ननु पर्यायार्थिकनयमते यदिदं सर्वथा द्रव्याभावव्याख्यानं भवद्भिः कृतं तदयुक्तमेव, यत इह पर्यायनयोऽपि द्रव्यमिच्छत्येव, किन्तु परस्परमत्यन्तभिन्नावेव द्रव्यपर्यायावसौ मन्यते, न पुनः कथञ्चिदेव, इत्येतावता सिद्धान्तादस्य भेद इति।

कुतः पुनरस्य द्रव्यपर्याययोरत्यन्तं भेद इत्याह–यद् यस्माद्,

"आहाऽव्याख्यानमिदम्– इच्छति द्रव्यमिह पर्यवनयोऽपि। किन्त्वत्यन्तविभिन्नौ मन्यते स द्रव्यपर्यायौ ॥ उत्पादादिस्वभावाः पर्याया यच्च शाश्वतं द्रव्यम्। ते तत्प्रभवा न तत् तत्प्रभवं तेभ्य ते भिन्नाः ॥ जीवस्य च सामायिकं पर्यायस्तेन तत् ततो भिन्नम्। इच्छति पर्यायनयो व्याख्यानमिदं यथार्थमिति" ॥ इति संस्कृतम्। उक्तगाथाचर्चार्थमुपदर्शयति– आहेति। क आहेत्यपेक्षायामाह– कश्चिद् व्याख्यात्राभास इति। तद् व्यक्तमुपदर्शयति– नन्वित्यादिना। ननु पर्यायनयः पर्यायं स्वीकरोत्येव यदि द्रव्यमप्यभ्युपेयात् तदा प्रमाणरूपत्वात् सिद्धान्तरूपतैवास्य स्यादित्यत आह–किन्त्विति। असौ पर्यायनयः। न पुनः कथञ्चिदेवेति– कथञ्चिदेव भिन्नौ द्रव्य-पर्यायाविति्येवं न पुनः इच्छतीत्यर्थः, स्याद्वादसिद्धान्तः कथञ्चिद् भिन्नौ द्रव्य-पर्यायावभ्युपगच्छति, पर्यायनयस्तु सर्वथा भिन्नौ द्रव्य-पर्यायौ स्वीकरोति, इत्येतावन्मात्रेण सिद्धान्तात् पर्यायनयस्य भेद इत्याह– इत्येतावतेति। अस्य पर्यायनयस्य ॥

कुतः? कस्माद्धतोः। अस्य पर्यायनयस्य, 'मते' इति शेषः। 'यद्' इत्यस्य यस्मादित्यर्थः। 'उत्पादादि०' इत्यादिपदग्राह्यव्ययपरि-

उत्पाद-व्यय-परिणामस्वभावाः पर्यायाः, शाश्वतं–नित्यम्, पुनर्द्रव्यम्, किञ्च, ते–गुणाः, तत्प्रभवाः–द्रव्यलब्धात्मलाभाः, न पुनस्तद्–द्रव्यम्, तत्प्रभवं–गुणेभ्यो लब्धात्मस्वरूपम्, तेन, ते–द्रव्य–पर्याया भिन्नाः ॥

यस्माच्च जीवस्य शाश्वतस्य, तद्व्यतिरिक्तं सामायिकं पर्यायः, तेन तत्–सामायिकम्, ततो जीवाद्, भिन्नम्–अत्यन्तव्यतिरिक्तम्, इच्छति पर्यायनयः, अतो मदीयं व्याख्यानमिदं यथार्थं घटमानकम्, पर्यायार्थिकाभिमतद्रव्य-पर्यायात्यन्तभेदव्याप्यवैधर्म्यज्ञानपरतया "उप्पज्जंति वियंति य०" [पत्र०६८] इत्यादिनिर्युक्तिगाथाया न्याय्यत्वादिति निर्गलितार्थः।

णाममुपादाय उत्पाद-व्यय-परिणामस्वभावा इति। 'शाश्वतम्' इत्यस्य नित्यमित्यर्थः। 'ते' इत्यस्य गुणा इत्यर्थः। 'तत्प्रभवाः' इत्यस्य द्रव्यलब्धाऽऽत्मलाभा इत्यर्थः। 'तद्' इत्यस्य द्रव्यमिति 'तत्प्रभवम्' इत्यस्य च गुणेभ्यो लब्धात्मस्वरूपमित्यर्थः। 'ते' इत्यस्य द्रव्यपर्याया इत्यर्थः ॥

तदिति– सामायिकम्, 'तत' इत्यस्य जीवात्, 'भिन्नम्' इत्यस्य अत्यन्तव्यतिरिक्तमित्यर्थः, अत इति पूरणम्, 'यथार्थम्' इत्यस्य घटमानकमित्यर्थः ॥

तथा च "उप्पज्जंति०" [पत्र–६८] इत्यादिनिर्युक्तिगाथाया एतद्व्याख्याने निर्गलितमर्थमावेदयति–पर्यायार्थिकेति– विरुद्धधर्माध्यासाद् वस्तूनां भेदः सिद्ध्यति, नान्यथेत्यतो भेदो व्यापकः साध्यत्वात्, विरुद्धधर्मश्च व्याप्यो लिङ्गत्वात्, एवं चोत्पाद-व्ययौ पर्याये वर्तेते न द्रव्य इति द्रव्यावृत्तित्वाद् द्रव्यस्य विरुद्धौ यावुत्पाद-व्ययौ धर्मौ, तद्वत्त्वात् पर्याया द्रव्यादत्यन्तभिन्नाः, नित्यत्वपर्यवसितं शाश्वतत्वं पर्यायाऽवृत्तित्वात् पर्यायाणां विरुद्धधर्मः, तद्वत्त्वाद् द्रव्यं पर्यायेभ्योऽत्यन्तभिन्नमिति, तथा च पर्यायार्थिकनयाभिमतो यो द्रव्य-

एतन्मतमपाकुर्वन् स्वव्याख्यानं समर्थयन्नाह–

"जइ पज्जायनउ च्चिय सम्मन्नइ दो वि दव्व-पज्जाए।
दवट्ठिओ किमट्ठं ? जह व मई दो वि जमभिन्ने ॥
इच्छइ सो तेणोभय-मुभयग्गाहे वि सइ पिहब्भूअं।
मिच्छत्तमिहेगंता-देगत्तऽण्णत्तगाहाओ ॥
एगत्ते नणु दव्वं गुणो त्ति पज्जायवयणमित्तमियं।
तम्हा तं दव्वं वा गुणो व दव्वट्ठिअग्गाहो ॥
जह भिन्नोभयगाही पज्जायनओ तदेगपक्खंमि।
अविरुद्धं चेव तयं किमओ दव्वट्ठियनएण ॥

पर्याययोरत्यन्तभेदस्तद्व्याप्यं यत् पर्यायागतमुत्पाद-व्ययलक्षणं वैधर्म्यं यच्च द्रव्यगतं शाश्वतत्वलक्षणं वैधर्म्यं तद्विषयकं यल्लिङ्गज्ञानं तत्परतया तज्जनकत्वेन तात्पर्यविषयतया "उपज्जंति वियंति परिणमंति य गुणा ण दव्वं" [पत्र–६८] इत्यादि निर्युक्तिगाथाया न्याय्यत्वादिति "आहऽवक्खाणमिण०" इत्यादेर्विगलितार्थः पर्यवसितार्थ इत्यर्थः॥

जइ० इत्यादि– यदि पर्यायनय एव सम्मन्यते द्वावपि द्रव्य-पर्यायौ। द्रव्यार्थिकः किमर्थम्? यदि वा मतिर्द्वावपि यदभिन्नौ॥ इच्छति स तेनोभयमुभयग्राहेऽपि सति पृथग्भूतम्। मिथ्यात्वमिहैकान्तादेकत्वा-ऽन्यत्वग्राहात्॥ एकत्वे ननु द्रव्यं गुण इति पर्यायवचनमात्रमिदम्। तस्मात् तद् द्रव्यं वा गुणो वा द्रव्यार्थिकग्राहः॥ यदि भिन्नोभयग्राही पर्यायनयस्तदेकपक्षे। अविरुद्धमेव तत् किमतो द्रव्यार्थिकनयेन॥ तस्मात् किं सामायिकं भवति? द्रव्यं गुण इति चिन्तेयम्। द्रव्यार्थिकस्य द्रव्यं गुणश्च तत् पर्यवनयस्य॥ इतरथा जीवाऽनन्यं द्रव्यनयस्येतरस्य भिन्नमिति उभयनयोभयग्राहे घटेत नैकैकग्राहेऽपि" इति संस्कृतम्।

तम्हा किं सामइअं हवेज्ज दव्वं गुणो त्ति चिंतेयं ।
दव्वट्ठियस्स दव्वं गुणो य तं पज्जवणयस्स ॥
इहरा जीवाऽणन्नं दव्वनयस्सेयरस्स भिन्नं ति ।
उभयनओभयगाहे घडेज्ज णेक्केक्कगाहंमि" ॥
[विशेषावश्यकभाष्यगाथाः—२६५४, ५५, ५६, ५७, २६५८,]

व्याख्या—यदि भोः! पर्यायनय एव द्रव्य-पर्यायौ द्वावपि, सम्मन्यते—अभ्युपगच्छति, तर्हि द्रव्यार्थिकः किमर्थम्? द्रव्यपरिकल्पना 'त्वयेष्यत' इति शेषः, पर्यायनयाभ्युपगमेनापि द्रव्यस्य सिद्धत्वादिति भावः । यदि चैवम्भूता मतिः स्यात् परस्य, द्वावपि—द्रव्य-पर्यायौ, यद्-यस्माद् अभिन्नौ—परस्परात्म(स्परमे)कत्वमापन्नौ॥

इच्छति, सः—द्रव्यार्थिकनय इति सम्बन्धः । तेन कारणेनेदमुभयं द्रव्यपर्यायार्थिकनयद्वयम्, उभयग्राहेऽपि सति—प्रत्येकमुभयाभ्युपगमेऽपि सति, पृथग्भूतं-भिन्नम्, एकेनोभयोरत्यन्तमभेदाभ्यु-

---

षडपि गाथाः क्रमेण विवृणोति- यदि भोरिति । 'सम्मन्यते' इत्यस्य 'अभ्युपगच्छति' इत्यर्थः । 'द्रव्यार्थिक' इत्यस्यैव द्रव्यपरिकल्पनारूपत्वे 'त्वयेष्यते' इत्येतावन्मात्रस्यैव शेषः । द्रव्यसिद्ध्यर्थं द्रव्यार्थिकनयस्त्वयेष्यते, द्रव्यसिद्धिश्च पर्यायार्थिकतयैव सञ्जातेति व्यर्थं द्रव्यार्थिकनयपरिकल्पनं त्वन्मते स्यादित्याह- पर्यायनयाभ्युपगमेनापीति । परस्येति पूरणम्, अन्यत् स्पष्टम् ॥

प्रत्येकमिति- द्रव्यार्थिकस्य द्रव्य-पर्यायोभयाभ्युपगमे पर्यायार्थिकस्यापि द्रव्य-पर्यायोभयाभ्युपगमे च सति । एवमपि द्रव्य-पर्यायार्थिकनयद्वयमन्योन्यभिन्नमित्यत्र हेतुमाह- एकेनेति- द्रव्यार्थिकनयेन द्रव्य-पर्यायोरत्यन्तभेदस्याभ्युपगमात् पर्यायार्थिकनयेन पुनर्द्रव्य-पर्याययोरत्यन्तभेदस्याभ्युपगमादित्यतस्तयोर्द्रव्य-पर्यायाभ्यु-

पगमादन्येन चात्यन्तभेदाभ्युपगमादित्यर्थः। तथा प्रत्येकमुभयग्रहेऽप्युभयं मिथ्यात्वम्, एकान्ताद्–एकान्तेन प्रत्येकमेकत्वान्यत्वग्रहात्।

तत्रोच्यते–ननु द्रव्य-पर्याययोरेकत्वे त्वदभिप्रायतो द्रव्यार्थिकेनेष्यमाणे 'द्रव्यं गुणः' इति ध्वनिद्वयमिदमेकार्थवाचकत्वादिन्द्रपुरन्दरादिध्वनिवत् पर्यायवचनमात्रमेव स्यात्। तस्मात् 'सामायिकं द्रव्यं वा गुणो वा' इति द्रव्यार्थिकनयग्रहः स्यात्, न पुनः 'तद् द्रव्यमेव' इति तद्ग्रहो भवेत्, न चैवमिष्यते, द्रव्यार्थिकनयमतेन द्रव्यरूपस्यैव तस्य प्रसिद्धेरिति॥

तथा, यदि भिन्नोभयग्राही पर्यायनयस्त्वयेष्यते, तदैकपक्षे

पगमवैचित्र्यसद्भावाद् भिन्नत्वमित्यर्थः। तथा एवमभ्युपगमे। प्रत्येकं द्रव्यार्थिकस्य पर्यायार्थिकस्य च। उभयग्रहेऽपि द्रव्य-पर्यायोभयाऽभ्युपगमेऽपि सति। उभयं द्रव्य-पर्यायनयद्वयम्। एकान्तेनेति– द्रव्यार्थिक एकान्तेन द्रव्यपर्यायोभयैकत्वग्राहकत्वात् पर्यायार्थिक एकान्तेन द्रव्य-पर्यायोभयान्यत्वग्राहकत्वान्मिथ्यात्वमित्यर्थः॥

एवं सति परमते यदापतितं तदुपदर्शयति– तत्रोच्यत इति। द्रव्यार्थिकनये द्रव्य-पर्यायशब्दयोः पर्यायत्वे परमते प्राप्ते सति द्रव्यं वा गुणो वा सामायिकमिति स्यान्न तु द्रव्यमेव सामायिकम्, इष्टं च द्रव्यनये द्रव्यमेव सामायिकमिति तद्धानिः स्यादित्युपसंहरति–तस्मादिति। तद्ग्रहो द्रव्यार्थिकनयग्रहः। न चैवमिष्यते द्रव्यनये द्रव्यं वा गुणो वा सामायिकमिति नेष्यते। तत्र हेतुः–द्रव्यार्थिकेति। तस्य सामायिकस्य॥

परमते पर्यायार्थिकस्य द्रव्यग्राहकत्वं पर्यायग्राहकत्वमिति द्रव्यग्राहकत्वे सामायिकस्य द्रव्यत्वेन द्रव्यमेव सामायिकमित्यस्य सिद्धौ तदर्थं द्रव्यार्थिकनयोपन्यासो व्यर्थः स्यादित्याह–'तयेति। 'त्वयेष्यते' इति पूरणम्। 'एकपक्षे' इत्यस्य व्याख्यानम्– एकद्रव्यांशग्रहवेलायामिति।

एकद्रव्यांशग्रहवेलायाम्, अविरुद्धमेव, तत् सामायिकम्, द्रव्यत्वेनेति शेषः, अतः किं द्रव्यार्थिकनयेनोपन्यस्तेन ? तदर्थस्यान्यत एव सिद्धेः, अनन्यलभ्यस्यैव विषयस्य नयान्तरकल्पकत्वात् ॥

तस्मात् किं द्रव्यं गुणो वा सामायिकमितीयं चिन्ता प्रस्तुता, अस्यां चिन्तायामुच्यते–द्रव्यार्थिकनयस्याभिप्रायेण द्रव्यम्, पर्यायार्थिकनयस्य मतेन गुणश्च, तत् सामायिकमित्येव व्याख्यानं श्रेयः॥

इतरथा-अन्यथा, पुनर्द्रव्यार्थिकस्य जीवादनन्यत् सामायिकम्, इतरस्य तु पर्यायार्थिकस्य, जीवाद् भिन्नं तद् , इति–एवं व्याख्यायमानम्, प्रागुक्तयुक्त्या, न घटेतेति शेषः। कथं पुनर्घटेत ? इत्याह उभयनयस्य-उभयोर्नययोर्मिलितयोः, उभयग्राहे–प्रत्येकोपनीतैकै-

उपन्यस्तेनेति पूरणम्। द्रव्यार्थिकनयोपन्यासवैयर्थ्यं हेतुमाह–तदर्थस्येति–द्रव्यार्थिकनयप्रयोजनस्य द्रव्यं सामायिकमित्यस्येत्यर्थः। अन्यत एव सिद्धेः पर्यायार्थिकनयाऽभिप्रेतद्रव्याऽभ्युपगमत एव सम्भवात्। ननु ततस्तस्य सिद्धत्वेऽपि द्रव्यार्थिकनयतोऽपि सिद्धिरित्यतो द्रव्यार्थिकनयोपन्यास इत्यत आह– अनन्यलभ्यस्यैवेति ।

इत्थ परव्याख्यानस्यायुक्तत्वे स्थापिते स्वव्याख्यानस्य युक्तत्वं भाष्यकृदुपसंहरति– तस्मादिति ।

इतरथेत्यस्य विवरणम्–अन्यथेति - अस्मदुपदर्शितव्याख्यानानादरणे इति तदर्थः। तत् सामायिकम्। 'इति' इत्यस्य 'एवं व्याख्यायमानम्' इति विवरणम्। प्रागुक्तेत्यादि पूरणम्, " जइ पज्जाय नउ च्चिअ० " [पत्र-७४] इत्यादिपूर्वोक्तयुक्त्येति तदर्थः। उत्तरार्द्धमवतारयति– कथमिति। 'उभयनयोभयग्रहे' इति समस्तस्य विग्रहमुपादाय व्याख्यानम्– उभयनयस्येत्यादि। 'उभयनयस्य' इत्यस्य 'उभयोर्नययोर्मिलितयोः' इत्यर्थकथनम्। 'उभयग्राहे' इत्यस्य 'प्रत्येकोपनीतैकैकविषयसमावेशेनाऽ-

कविषयसमावेशेनाभ्युपगम्यमाने सर्वं घटेत, न त्वेकैकग्राहे-एकैकस्योभयविषयकत्वाभ्युपगमे, एवं हि मिलनस्याधिकविषयानुपनायकत्वेनानतिप्रयोजनत्वादित्यर्थः ॥

स्यादेतत्, प्रत्येकमेकैकविषयत्वेऽप्युभयोर्मिलनस्य स्यात्कारलाञ्छनेन सम्यक्त्वापादनमेव प्रयोजनम्, तत् प्रत्येकमुभयविषय-

---

भ्युपगम्यमाने ' सति, इत्येवं विशिष्योपादानम् । सर्वं घटेत द्रव्यार्थिकमते द्रव्यं सामायिकं पर्यायार्थिकनये गुणः सामायिकमित्युपपद्येत । ' न त्वेकैकग्राहे ' इत्यस्य 'एकैकस्योभयविषयकत्वाभ्युपगमे ' इति विवरणम्, द्रव्यार्थिकनयस्य द्रव्यपर्यायोभयविषयकत्वाभ्युपगमे पर्यायार्थिकस्य चेति तदर्थः, ' न घटेत ' इत्यनुषज्यते । एवं हि हि-यतः, एकैकनयस्योभयविषयकत्वाभ्युपगमे । मिलनस्य द्रव्य-पर्यायोभयमिलनस्य । अधिकेति-एकेनापि नयेनोभयविषयोपदर्शनं तदेव नयद्वयेनापीति नाधिकविषयोपदर्शकत्वं नयद्वयमिलनस्येत्यधिकविषयानुपनायकत्वेनेत्यर्थः ।

परः शङ्कते- स्यादेतदिति । प्रत्येकमिति- भाष्यकृन्मते द्रव्यार्थिकस्य द्रव्यविषयकत्वे पर्यायार्थिकस्य पर्यायविषयकत्वेऽपि, द्रव्य-पर्यायनयोभयमिलनस्य, स्यात्कारलाञ्छनेन विषये स्यात्पदार्थप्रवेशेन, स्याद्द्रव्यविषयत्वेन स्यात्पर्यायविषयत्वेन च, सम्यक्त्वाऽऽपादनम् द्रव्यस्य सामायिकत्वाभ्युपगमस्य गुणस्य सामायिकत्वाभ्युपगमस्य च सम्यक्त्वाऽऽपादनम् । तत् सम्यक्त्वाऽऽपादनलक्षणं प्रयोजनम्, अस्मन्मतेऽपि, प्रत्येकमिति- द्रव्यार्थिकनयस्य द्रव्य-पर्यायोभयविषयकत्वं पर्यायार्थिकनयस्य द्रव्य-पर्यायोभयविषयकत्वमित्येवमभ्युपगमेऽपि । निष्प्रत्यूहं निर्विघ्नम् । तदेवोपदर्शयति-तवेति-भाष्यकर्तुरित्यर्थः । मम मते द्रव्यार्थिकस्य पर्यायार्थिकस्य च प्रत्येकं द्रव्यपर्यायोभयविषयकत्वमित्यभ्युपगन्तुर्मते । स्याज्जीवाऽभिन्नगुण एक सामायिक-

कत्वाभ्युपगमे निष्प्रत्यूहम्, तव मते स्याद्गुणविशिष्टजीव एव सामायिकम्, स्याज्जीवगुण एव सामायिकमिति मिलिताभिलापवन्मम मते स्याज्जीवाभिन्नगुण एव सामायिकम्, स्याज्जीवभिन्नगुण एव सामायिकमिति मिलिताभिलापस्यापि सम्भवात्। न चैवं भङ्गद्वयेऽपि द्रव्यप्रधान्यालाभः, 'स्याज्जीवाभिन्नगुण एव०' इत्यादेः 'स्याद्गुणाभिन्नजीव एव०' इत्यादेरपि सामानसंवित्संवेद्यतया लाभाभ्युपगमात्॥

किञ्च, मम मते "जीवो गुणप्रतिपन्न०" [पत्र-६१] इति निर्युक्तिप्रतीके गुणाभिन्न इत्यर्थे साम्मुख्यम्, तव मते तु गुणाना-

---

मिति द्रव्यार्थिकनये, स्याज्जीवभिन्नगुण एव सामायिकमितीति पर्यायार्थिकनये। ननूक्तमिलिताऽभिलापे गुणस्यैव विशेष्यतयोक्तत्वेन प्राधान्यमिति न द्रव्यप्राधान्यलाभ इत्याशङ्क्य प्रतिक्षिपति-न चेति। जीवाऽभिन्नतया गुणस्याऽधिगतौ गुणाभिन्नतया जीवस्याप्याधिगतिः समानसंवित्संवेद्यतया स्यादेवेति द्रव्यस्याऽपि प्राधान्यलाभ इति निषेधहेतुमुपदर्शयति— स्याज्जीवाऽभिन्नगुण एवेत्यादेरिति- अत्राऽऽदिपदात् स्याज्जीवभिन्नगुण एवेत्यस्योपग्रहः। 'स्याद्गुणाऽभिन्नजीव एवेत्यादेः' इत्यत्राऽऽदिपदात् स्याद्गुणभिन्नजीव एवेत्यस्योपग्रहः। स्याज्जीवाभिन्नगुण इति ग्रहे गुणस्य जीवाभिन्नतयाऽवगाहने जीवस्यापि गुणाऽभिन्नतयाऽवगाहनम्, स्याज्जीवभिन्नगुण एवेति ग्रहे गुणस्य जीवभिन्नतयाऽवगाहने जीवस्यापि गुणभिन्नतयाऽवगाहनमिति।

परः स्वमते निर्युक्तिगाथानुगुण्यं भाष्यकृन्मते तदनानुगुण्यं दर्शयति- किञ्चेति। मम मते नयद्वयस्य प्रत्येकमुभयविषयकत्वमिति मते 'तव मते तु' भाष्यकर्तुर्मते पुनः। औत्प्रेक्षिकत्वेन कल्पितत्वेन। अर्थः 'गुणप्रतिपन्नः' इत्यस्यार्थः। शुक्तौ रजतारोपस्थल इति- शुक्तौ

मौत्प्रेक्षिकत्वेन शुक्तौ रजतारोपस्थले शुक्तौ रजतस्येव जीवे गुणानां वैज्ञानिकसम्बन्धस्यैवाभ्युपगमेन गुणनिरूपितवैज्ञानिकसम्बन्धवानित्यर्थो वाच्य इत्यसाम्मुख्यम्। ननु मम मते द्रव्यास्तिकपक्षे द्रव्य-गुणपदयोरर्थाभेदेन पर्यायत्वापत्त्या द्रव्यं गुणो वेत्येकतरनिर्धारणानुपपत्तिः, तव मते द्रव्यार्थिकपक्षे गुणस्येव मम मते द्रव्यार्थिकपक्षे

साक्षादभेदसम्बन्धो न रजतस्य बाधितत्वादिति. शुक्तौ रजतभ्रमानन्तरं यद् 'इदं रजतम्' इति वाक्यं प्रयुज्यते तत्र बाधाच्छुक्तौ रजतस्य नाभेदसम्बन्धः, किन्तु 'इदम् अभेदसम्बन्धावच्छिन्नरजतनिष्ठप्रकारतानिरूपितज्ञानीयविशेष्यतासम्बन्धवद्' इत्येवं शुक्तौ रजतस्य विज्ञानकृतसम्बन्धस्य यथाभ्युपगमस्तथा वास्तविके जीवे कल्पितानां गुणानां कथञ्चित्तादात्म्यलक्षणाऽविष्वग्भावः सम्बन्धो न सम्भवतीति विज्ञानकृतसम्बन्धस्यैव स्वप्रकारकज्ञानविशेष्यत्वलक्षणस्य तव मतेऽभ्युपगमेन स्वप्रकारकज्ञानविशेष्यत्वलक्षणो यो गुणनिरूपितो गुणप्रतियोगिको वैज्ञानिकः– विज्ञानघटितो विज्ञानप्रयुक्तो वा सम्बन्धः, तद्वान् जीव इति 'जीवो गुणप्रतिपन्नः' इत्यस्यार्थो वाच्य इत्यर्थः। 'ननु मम मते' इति स्थाने 'न तु मम मते' इति पाठो युक्तः, 'न तु' इत्यस्य 'एकतरनिर्धारणाऽनुपपत्तिः' इत्यात्रान्वयः। मम मते नयद्वयस्य प्रत्येकं द्रव्य-पर्याययोर्भयविषयकत्वमित्यभ्युपगन्तुर्मते। द्रव्यास्तिकपक्षे द्रव्य-पर्याययोरत्यन्तभेद इति द्रव्यार्थिकनये, अस्मिन् पक्षे द्रव्यवत् तदत्यन्ताभिन्नस्य गुणस्यापि भाव एव, न तु तदपलाप इति द्रव्यं सामायिकमितिवत् गुणः सामायिकमित्यपि सम्भवत्येवेति 'द्रव्यमेव सामायिकं द्रव्यनये' इत्येकतरनिर्धारणानुपपत्तिरिति न पुनरित्यर्थः। तत्र हेतुः– तव मत इति भाष्यकर्तुर्मत इत्यर्थः। द्रव्यार्थिकपक्षे "आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा" [अध्यात्मोपनिषत्] इति

द्रव्य-गुणयोरभेदस्य वास्तवत्वेऽपि गुणे द्रव्यभेदस्यौत्प्रेक्षिकस्याङ्गीकारेण तमादाय द्रव्य-गुणपदयोः पर्यायत्वापत्त्युद्धारादिति चेत्? मैवम्–सामायिके द्रव्यगुणत्वान्यतरव्याप्यशुद्धधर्मप्रकारकजिज्ञासायां तादृशविशिष्टधर्मप्रकारकबोधजनकनयशब्दप्रयोगस्याऽसङ्गतत्वापत्तेर्दुरुद्धरत्वात्, नहि कोऽयमिति घटजिज्ञासायां चैत्रावलोकितमैत्रनिर्मितघटोऽयमित्यनुन्मत्तः प्रयुङ्क्ते ।

न्यायाद् द्रव्यव्यतिरेकेणानुपलम्भाद् गुणा असन्त एवेति द्रव्यार्थिकनये । गुणस्येवेति– गुणस्य परमार्थतोऽसत औत्प्रेक्षिकस्याङ्गीकार इवेत्यर्थः । मम मते नयद्वयस्योभयविषयकत्वाभ्युपगन्तृमते । द्रव्यार्थिकपक्षे द्रव्यार्थिकस्यापि द्रव्याभिन्नगुणविषयकत्वमिति पक्षे । औत्प्रेक्षिकस्य कल्पितस्य । तमादाय औत्प्रेक्षिकद्रव्य-गुणभेदमादाय ॥

'स्यादेतद्' इत्यारभ्य 'पर्यायात्वापत्त्युद्धारादिति चेद्' इत्यन्तेन परशङ्कामुपदर्श्य प्रतिक्षिपति– मैवमित्यादिना। किं द्रव्यं गुणो वा सामायिकमिति जिज्ञासा 'शुद्धद्रव्यत्वप्रकारकसामायिकविशेष्यकं शुद्धगुणत्वप्रकारकसामायिकविशेष्यकं वा ज्ञानं जायताम्' इत्याकारिका, तस्यां सत्यां तन्निवृत्तये 'द्रव्यं सामायिकम्' इति प्रयोगस्य 'गुणः सामायिकम्' इति प्रयोगस्य वा सङ्गतत्वम्; न तु भवन्मते द्रव्यास्तिकनये 'जीवद्रव्याभिन्नो गुणः सामायिकम्' इति प्रयोगस्य, पर्यायास्तिकमते 'गुणभिन्नं जीवद्रव्यं सामायिकम्' इति प्रयोगस्य वा सङ्गतत्वम्, द्रव्य-गुणत्वान्यतरव्याप्यशुद्धधर्मस्यैव जिज्ञासाविषयज्ञाननिरूपितप्रकारताश्रयत्वाद्, जीवाभिन्नगुणत्वस्य गुणभिन्नजीवत्वस्य चातथात्वादित्याह– सामायिके इति। तादृशविशिष्टधर्मेति– द्रव्य-गुणत्वान्यतरव्याप्यगुणभिन्नजीवत्व-जीवाभिन्नगुणत्वधर्मेत्यर्थः । शुद्धधर्मप्रकारकजिज्ञासायां विशिष्टधर्मप्रकारकबोधजनकशब्दप्रयोगस्यासङ्गतत्वं तथाप्रयोगस्य क्वचिदप्यनुन्मत्तपुरुषकर्तृकत्वादर्शनतो द्रढयति– नहीति। परः शङ्कते–

अथ सामायिकपदात् सामायिकोपस्थितौ, तत्र द्रव्यार्थिक-पर्यायार्थिकनयान्यतरप्रकारप्रकारकज्ञानस्येष्टसाधनत्वज्ञानात्, तथैव जिज्ञासया, तथैव प्रश्नात्, तथैव प्रतिवचनरूपनयशब्दप्रयोगो

अथेति। तत्र सामायिके, विशेष्यत्वं सप्तम्यर्थः, तस्य च ज्ञानेऽन्वयः, तथा च सामायिकनिष्ठविशेष्यताकद्रव्यार्थिकपर्यायार्थिकनयान्यतर-प्रकारनिष्ठप्रकारताकज्ञानस्य 'सामायिकं द्रव्यार्थिक-पर्यायार्थिकनया-न्तरप्रकारवद्' इत्याकारकज्ञानस्य, विषयत्वं विशेष्यतारूपं ज्ञानपदो-त्तरषष्ठीविभक्तेरर्थः, एवं च निरुक्तज्ञाननिष्ठविशेष्यताकेष्टसाधनत्वनिष्ठ-प्रकारताकज्ञानात् 'सामायिकनिष्ठविशेष्यताकद्रव्यार्थिक-पर्यायार्थिक-नयान्यतरप्रकारनिष्ठप्रकारताकज्ञानं सामायिकं द्रव्यार्थिक-पर्याया-र्थिकनयाऽन्यतरप्रकारवदित्याकारकं मदिष्टसाधनम्. इत्या-कारकात्, तथैव जिज्ञासया 'सामायिकं द्रव्यार्थिक-पर्यायार्थिक-नयान्यतरप्रकारवदिति ज्ञानं मे जायताम्' इत्याका-रिकयेच्छया, तथैव प्रश्नात् 'सामायिकं किं द्रव्यार्थिक-पर्यायार्थिक-नयाऽन्यतरप्रकारवत्' इति प्रश्नात्, तथैव प्रतिवचनरूपनयशब्दप्रयोगः 'सामायिकं द्रव्यार्थिकनयप्रकारवत्, सामायिकं पर्यायार्थिकनय-प्रकारवत्' इत्येवं प्रतिवचनरूपनयशब्दप्रयोगः, द्रव्यार्थिकनयप्रका-रश्च जीवाऽभिन्नगुणत्वं गुणाऽभिन्नजीवत्वं च, पर्यायार्थिकनय-प्रकारश्च जीवभिन्नगुणत्वं गुणभिन्नजीवत्वं च, एवं च द्रव्यार्थिक-नयेन जीवाभिन्नगुणो गुणाऽभिन्नजीवो वा सामायिकमित्युत्तरवचन-प्रयोगः, पर्यायार्थिकनयेन जीवभिन्नगुणो गुणभिन्नजीवो वा सामा-यिकमित्युत्तरवचनप्रयोगो नाऽनुपपन्न इत्यर्थः। प्रश्नयितुः प्रतिवचन-विधातृवक्तृप्रतिवचनतस्तदभिप्रायलक्षणनयपरिज्ञानतस्तदभिप्रायस्व-रूपद्रव्यार्थिक- पर्यायार्थिकनयाऽन्यतरप्रकारप्रकारकज्ञानस्येष्टसाधन-ताज्ञानादितः प्रश्नप्रवृत्तिः, प्रश्नप्रवृत्तौ च वक्तृप्रतिवचनप्रवृत्तितो वक्तृभिप्रायलक्षणनयपरिज्ञानम्,इत्यन्योऽन्याश्रयादुपदर्शितपरामिप्रायो

नानुपपन्न इति चेत्, न– वक्त्रभिप्रायरूपनयपक्षेऽन्योन्याश्रयात्, एवं सति सामायिके द्रव्यपर्यायात्मकत्वस्याद्वादात् तत्कुक्षिप्रविष्ट-तद्भेदाऽभेदस्याद्वादस्यानतिरिक्तत्वप्रसङ्गाच्च । न चेष्टापत्तिः, तत्र द्रव्यपर्यायात्मकत्वस्याद्वादसिद्धावपि तद्भेदाभेदस्याद्वादोत्थापन-मूलाकाङ्क्षाऽव्युपरमाभावादिति दिग् ॥

न सङ्गत इति समाधत्ते–नेति । परमते दोषान्तरमप्याह–एवं सतीति–जीवाऽभिन्नगुणत्वादेः सामायिके द्रव्यनयाऽऽदितस्तव मते प्रसिद्धयुपगमे सतीत्यर्थः । तत्कुक्षिप्रविष्टेति–द्रव्यविशेषणतया पर्यायभेदाऽभेदयोः पर्यायविशेषणतया द्रव्यभेदाभेदयोस्तत्कुक्षिप्रविष्टत्वं बोध्यम् उक्तप्रसङ्गे इष्टापत्तित्वमाशङ्क्य प्रतिक्षिपति–न चेति । सामायिके द्रव्य-पर्यायात्मकत्वस्याद्वादसिद्धावपि तद्भेदाऽभेदस्याद्वादोत्थापन-मूलाऽऽकाङ्क्षा भवत्येव, ततश्च तन्निवृत्तये तद्भेदाऽभेदस्याद्वादोऽवतरत्येवेत्यनुभूयमानस्य सामायिके द्रव्य-पर्यायात्मकत्वसिद्ध्यनन्तर-मुक्ताऽऽकाङ्क्षाव्युपरमाऽभावस्याऽपलापाऽसम्भवादुक्तप्रसङ्गस्येष्टाऽऽपत्त्या परिहरणं न सम्भवतीत्याह–तत्रेति–सामायिके इत्यर्थः । 'आकाङ्क्षाऽव्युपरमाभावाद्' इत्युक्तया निरुक्ताकाङ्क्षाऽव्युपरमप्रसङ्गस्यात्र दोषतयाऽभिप्रेतस्यानुभवविरोधत इष्टापत्तिर्न सम्भवतीति गूढाभिसन्धिः । 'एवं सति' इत्यारभ्य 'दिग्' इति पर्यन्तग्रन्थस्यायं भावः–यद्यपि सामायिके द्रव्यार्थिकनयात्मकं यत् 'सामायिकं द्रव्यम्' इति ज्ञानं तत्र प्रकारतया भासमानं यद् द्रव्यत्वम्, यच्च 'सामायिकं गुणः' इति पर्यायार्थिकनयात्मके ज्ञाने प्रकारतया भासमानं गुणत्वम्, तदन्यतरप्रकारकज्ञानमिष्टसाधनमिति तादृशज्ञानविशेष्यकेष्टसाधनत्वप्रकारकज्ञानात् 'तादृशज्ञानं मे जायताम्' इति जिज्ञासतः किं द्रव्यं सामायिकम्? किं वा गुणः सामायिकम्? इति प्रश्ने सति तत्प्रतिविधानं द्रव्यार्थिकनयावष्टम्भेन गुण-द्रव्ययोरभेदमुपादाय पर्यायार्थिकनयावष्टम्भेन तयोर्भेदमुपादाय च स्याद्गुण-

अथ यदुक्तम्–"सो चेव पज्जवट्ठियनयस्य जीवस्य एस गुणो" त्ति [पत्र-६१] एतदवष्टभ्य परः प्राह–

"णणु भणियं पज्जायट्ठियस्य जीवस्स एस हि गुणो त्ति ।
छट्ठीए तओ दव्वं, सो तं च गुणो तओ भिन्नो"॥

[विशेषावश्यकभाष्यगाथा–२६६०]

व्या०-ननु "सो चेव०" [पत्र-६१] इत्यादिनिर्युक्तिगाथोत्तरार्धे भणितम्-पर्यायार्थिकनयमतेन जीवस्यैष-सामायिकलक्षणो गुण इति।

भिन्नाऽभिन्नं द्रव्यं सामायिकम्, स्याद्द्रव्यभिन्नाऽभिन्नो गुणः सामायिकमिति सम्भवति, तथाऽपि 'सामायिकं स्याद्द्रव्यं स्यात्पर्यायश्च' इत्येवं सामायिके द्रव्य-पर्यायात्मकत्वस्याद्वादतो निरुक्तोत्तरप्रविष्टद्रव्यगुणभेदाऽभेदस्याद्वादस्याऽभेद एवेति प्रमाणोत्तरमेवैतत्, न तु नयोत्तरम्। ननु पूर्णोत्तरत्वादभ्यर्हितत्वेनेष्टमेवैतदिति चेत्? मैवं मंस्थाः—ईदृशेन प्रमाणोत्तरेण सामायिके द्रव्यपर्यायात्मकत्वलक्षणस्याद्वादार्थत्वस्य सिद्धावपि कथं 'द्रव्य-पर्याययोर्भेदाऽभेदौ' इति स्याद्वादलक्षणोत्तराभिधानमूलीभूताया जिज्ञासायास्तदानीमपि व्युपरमाऽभावेन तदनन्तरमपि तदपेक्षावचनलक्षणनयोत्तरस्यावश्यं वक्तव्यत्वाऽऽपातात्, अतः प्रथमं नयोत्तरवचनम्, ततः प्रतिनियतत्तद्धर्मनिमित्तावच्छेदकसिद्ध्या तत्तन्निमित्तलब्धाऽविरोधभेदाऽभेदादिधर्मात्मकानेकधर्मसंघटितमूर्तिवस्तुप्रतिपादकस्याद्वादप्रमाणराजात्मकमुत्तरं व्युपरतजिज्ञासमुचितमिति ॥

पुनः परः शङ्कते–अथेति "णणु०" इति–"ननु भणितं पर्यायार्थिकस्य जीवस्यैष हि गुणइति। षष्ठ्या ततो द्रव्यं स तच्च गुणस्ततो भिन्नः" ॥ इति संस्कृतम्। विवृणोति–नन्विति। 'भणितम्' इत्युक्तम्, तत् क्व भणितमित्यपेक्षायामाह–'सो चेव' इत्यादिनिर्युक्तिगाथोत्तरार्द्धे इति। 'एष' इत्यस्य विवरणम्–सामायिकलक्षण इति। 'षष्ठ्या'

हि–यस्मात् , षष्ठ्या–षष्ठीनिर्देशाद् , अवसीयते, ततः, सः-जीवो द्रव्यम्, तच्च-सामायिकं गुणः, स च सामायिकगुणः, ततः-जीव-द्रव्याद् , भिन्न इति, पर्यायनयमते भिन्नद्रव्य–पर्यायोभयसद्भावस्य श्रौतत्वान्मदीयमेव व्याख्यानं श्रेय इति परस्याकूतम् ॥

अत्रोत्तरमाह–

"उप्पायभंगुराणं, पइक्खणं जो गुणाण संताणो ।
दव्वोवयारमेत्तं , जइ कीरइ तम्मि तन्नाम ॥
तब्भेयकप्पणाओ, तं तस्य गुणो त्ति होउ सामइयं ।
पत्तस्स नीलया जह, तस्संताणोदियत्थमिया ॥

[विशेषावश्यकभाष्यगाथे–२६६०, २६६१]

व्या०–ननु पर्यायार्थिकमते वास्तवं द्रव्यं त्वयेष्यते? कल्पितं वा ? यद्याद्यः पक्षः, स न युक्तः "जइ पज्जायनओ च्चिय" [पत्र-७४]

इत्यस्य विवरणम्–षष्ठीनिर्देशादिति । अवसीयत इति पूरणम् , अन्यत् स्पष्टम् । पराऽभिप्रायमुपवर्णयति–पर्यायनयमत इति ।

उत्तरभाष्यमवतारयति–अत्रोत्तरमाहेति । "उप्पाय०" इति–'उत्पादभङ्गुराणां प्रतिक्षणं यो गुणानां सन्तानः । द्रव्योपचारमात्रं यदि क्रियते तस्मिन् तन्नाम" ॥ तद्भेदकल्पनातस्तत् तस्य गुण इति भवतु सामायिकम् । पत्रस्य नीलता यथा तत्सन्तानोदिताऽस्तमिता" ॥ इति संस्कृतम् । उक्तगाथाद्वयार्थं व्याख्यातुकामस्तत्सङ्गमनार्थं परं पृच्छति–नन्विति । त्वया पूर्वपक्षवादिना । यद्याद्यः पक्षः पर्यायार्थिकमते वास्तवं द्रव्यमिति कल्पो यदि । स आद्यपक्षः । " पज्जायनओ च्चिय० " इत्यादिनेति–'आदिपदात् "सम्मन्नइ दो वि दव्व-पज्जाए । दव्वट्ठिओ 'किमट्ठं जइ व मई दो वि जमभिन्ने " ॥ इत्यादेरुपग्रहः, तदर्थस्तु प्रागुपदर्शित एवेति । अथ द्वितीयः

इत्यादिनोक्तोत्तरत्वात्। अथ द्वितीयः, तत्रोच्यते–उत्पादभङ्गुराणां प्रतिक्षणमुत्पादव्ययगुणयोगिनाम्, गुणानां यः सन्तानः–सभागसन्ततावनवरतप्रवृत्तिः, तस्मिन् यदि समानबुद्ध्यभिधानहेतुत्वेन निबन्धनेन द्रव्योपचारमात्रं क्रियते षष्ठीवादिना भवता, तदा तन्नाम-'नामेत्यभ्युपगमे' मन्यामहे तदित्यर्थः, नहि कल्पितद्रव्यसद्भावो वास्तवं द्रव्याभावं विरुणद्धि ॥

ततश्च तद्भेदकल्पनात्–तेन कल्पितद्रव्येण सह भेदकल्पनात्, तत्–सामायिकम्, तस्य–कल्पितजीवद्रव्यस्य गुणो भवतु, को

यदि पर्यायार्थिकमते कल्पितं द्रव्यमिति पक्षः। 'उत्पाद-भङ्गुराणाम्' इत्यस्य विवरणम्– उत्पाद-व्ययगुणयोगिनामिति, । 'सन्तानः' इत्यस्य स्वरूपकथनम्–सभागसन्ततावनवरतप्रवृत्तिरिति, गुणानां या सभागसन्ततावनवरतप्रवृतिरिति तदर्थः। तस्मिन् उक्तस्वरूपसन्ताने, यदि द्रव्योपचारमात्रं क्रियते इति सम्बन्धः। केन हेतुना द्रव्योपचारमात्रं क्रियते? इत्यपेक्षायामाह– 'समानबुद्ध्यभिधानहेतुत्वेन निबन्धनेनेति। केन क्रियते? इत्यपेक्षायाम्– षष्ठीवादिना भवतेति। 'नाम' इत्यस्याभ्युपगमपरत्वे 'तन्नाम' इत्यस्य कोऽर्थ इत्यपेक्षायामाह— मन्यामहे तदित्यर्थः। नन्वेवं पर्यायनये द्रव्याभ्युपगमे पर्यायनयो द्रव्यं नाभ्युपगच्छतीति भवन्मतस्य हानिः स्यादित्यत आह- नहीति– अस्मन्मते पर्यायनयो वास्तवं द्रव्यं नेच्छतीत्येवाभ्युपगमो न तस्य विरोधः कल्पितद्रव्याभ्युपगमेऽपीति ॥

ततश्च कल्पितद्रव्यसद्भावस्य वास्तवद्रव्याभावाविरोधाच्च। 'सद्भेदकल्पनाद्' इत्यस्य 'तेन कल्पितद्रव्येण सह भेदकल्पनाद्' इत्यर्थः। 'तस्य' इत्यस्य 'कल्पितजीवद्रव्यस्य' इत्यर्थः। पत्रस्य वास्तवत्वे न प्रकृतदृष्टान्ततासम्भव इति 'गुणसमुदायव्यतिरिक्तस्य कल्पितस्य' इति

निवारयिता ?, यथा–पत्रस्य गुणसमुदायव्यतिरिक्तस्य कल्पितस्य, तत्सन्ताने–तस्मिन्नेव [पत्रसन्ताने,] उदिता–उत्पन्ना, अस्तमिता–च विनष्टा, नीलता गुणो व्यवह्रियते, तथा प्रकृतकल्पनायामपि व्यवहर्तृणां न बाधकम् । आशूत्पत्तिदोषेण क्षणिकगुणसन्ताने भेदाऽग्रहादभेदेनाऽध्यवसिते तत्र द्रव्यप्रवृत्तेरित्यर्थः ॥

न च वक्तव्यम्–'देवदत्तस्य गावः' इत्यादौ वास्तव एव सम्बन्धिद्वये षष्ठीदर्शनान्नोक्तोपपत्तिरिति, 'राहोः शिरः, शिलापुत्रकस्य

तद्विशेषणमुक्तम् । 'उदिता' इत्यस्य 'उत्पन्ना' 'अस्तमिता' इत्यस्य च 'विनष्टा' इत्यर्थः । क्षणिकगुणसन्ताने द्रव्यपदप्रवृत्तिहेतुमुपदर्शयति– आशूत्पत्तिदोषेणेति–क्षणिकगुणसन्ताने एकगुणोत्पत्त्यनन्तरक्षण एव द्वितीयगुणोत्पत्तिरित्येवमाशूत्पत्तिलक्षणदोषेणेत्यर्थः, अस्य 'भेदाऽग्रहाद्' इत्यत्रान्वयः, भेदग्रहस्याऽध्यवसायप्रतिबन्धकत्वम्; तदभावे च भिन्नयोरपि पूर्वोत्तरगुणक्षणयोरभेदाऽध्यवसाय इत्येवममेदाऽध्यवसिते गुणसन्ताने द्रव्यपदप्रवृत्तेः– द्रव्यमिदमित्येवं व्यवहारादित्यर्थः ।

ननु जीवस्य गुणसन्तानस्य कल्पितद्रव्यरूपस्य, सामायिकस्य वास्तवगुणरूपस्याकल्पितस्य भेदप्रतिपादिका जीवस्य सामायिकगुण इति षष्ठी न सम्भवति, वास्तवयोरेव सम्बन्धिनोर्भेदलक्षणसम्बन्धप्रतिपादकत्वस्य षष्ठीविभक्तौ 'देवदत्तस्य गावः' इत्यादौ दर्शनादित्याशङ्क्य प्रतिक्षिपति– न चेति । अभिन्नस्यापि वस्तुनो भिन्नतया कल्पनायां 'राहोः शिरः' इत्यादौ षष्ठीविभक्तिदर्शनात् सम्बन्धिद्वयवास्तवत्वस्य तत्रातन्त्रत्वादिति निषेधहेतुमुपदर्शयति– राहोः शिर इति– एकस्यैव सिंहिकापुत्रस्य छिन्नं शिरो राहुः शिरोरहितं तत्कलेवरं च केतुरिति द्विधा व्यवहारः, तथा च यदेव शिरस्तदेव राहुः, यदेव शिलापुत्रकं तदेव शरीरमिति भिन्नस्य

शरीरम् ' इत्यादिभिर्व्यभिचारात् ॥

ननु गुण सन्तानयोर्घट-तत्स्वरूपवद् भेदकल्पनैव न सम्भवति तन्निबन्धनधर्माऽभावात्, षष्ठी चाऽभेदार्थिकैव ' घटस्य स्वरूपम् ' इत्यत्रेव । न चैवं 'घटस्य स्वरूपम्' इतिवद् 'घटस्य घटः' इति प्रयोगाऽऽपत्तिः, 'अप्रयोगादेवाऽप्रयोगः' इति न्यायेन तदना-

---

सम्बन्धिद्वयस्याभावेऽपि षष्ठीविभक्तिर्दृश्यत इति वास्तव एव सम्बन्धिद्वये षष्ठीति नियमस्य व्यभिचाराद्- असम्भवादित्यर्थः ॥

गुण-तत्सन्तानयोर्भेदनिबन्धवैधर्म्योपदर्शकगाथामवतारयितुमाशङ्कते- नन्विति । घट-तत्स्वरूपयोर्भेदकल्पनानिमित्तधर्माऽभावाद् यथा भेदकल्पना न सम्भवति तथा गुण-तत्सन्तानयोरपि भेदकल्पनानिमित्तधर्माऽभावाद् भेदकल्पना न सम्भवतीति भेदकल्पनामुपादाय जीवस्य सामायिकगुण इति षष्ठी भेदार्थिका न सम्भवतीत्याह- गुण-सन्तानयोरिति । तन्निबन्धनधर्माऽभावात् भेदकल्पनानिमित्तस्य विरुद्धधर्माऽध्यासस्य गुण-सन्तानयोरभावात् । एवं च भवन्मते जीवस्यैष गुण इति नोपपद्यते, अस्मन्मते च द्रव्यार्थिकनये द्रव्य-गुणयोरभेद इत्यभेदरूपार्थमुपादायोक्तषष्ठीविभक्तिरुपपन्नेत्याह- षष्ठी चाऽभेदार्थिकैवेति । अभेदे च षष्ठी दृश्यते, यथा- घटस्य स्वरूपमित्याह- घटस्य स्वरूपमित्यत्रेवेति । ननु यद्यभेदे षष्ठी तर्हि घटस्य स्वरूपम् ' इतिवद् ' घटस्य घटः ' इत्यपि स्यात्, स्वस्मिन् स्वाऽभेदे सर्वेषामविप्रतिपत्तेरित्याशङ्क्य प्रतिक्षिपति- न चैवमिति । 'घटस्य स्वरूपम् ' इति प्रयुज्यते इति तथाप्रयोगोपपत्तयेऽभेदेऽपि षष्ठीति स्वीक्रियते, ' घटस्य घटः ' इति तु न प्रयुज्यत एवेति किमत्र क्रियताम्? नहि अभेदार्थिका षष्ठीविभक्तिर्भवतीत्येतावतैव न तत्प्रयोगः, निमित्तसत्त्वेऽपि तथा न केनचित् प्रयुज्यत इत्यत एव

पत्तेः, समानविशेष्यत्वप्रत्यासत्त्या घटादिनिरूपितषष्ठ्यर्थाभेदप्रकारकशाब्दबोधे स्वरूपादिपदजन्यपदार्थोपस्थितेर्हेतुत्वान्न तदापत्तिरिति न्यायमार्गः। तथा च कथं कल्पितस्यापि गुणव्यतिरेकिणो द्रव्यस्य सद्भाव इत्याशङ्कायां भेदकल्पनानिबन्धनं धर्मभेदमुपदिदर्शयिषुराह—

'घटस्य घटः' इति न प्रयोगः, 'घटस्य स्वरूपम्' इति तु सर्वैरपि प्रयुज्यत इति तथाप्रयोगः, तन्निर्वाहाय चाऽभेदार्थिका षष्ठी स्वीक्रियत इत्याह— अप्रयोगादेवेति। तदनापत्तेः 'घटस्य घटः' इति प्रयोगाऽनापत्तेः। नन्वप्रयोगदेवाऽप्रयोग इति न्यायमात्रेण 'घटस्य घटः' इति प्रयोगाऽनापत्तिर्न सम्भवति कार्यकारणभावाऽऽदिमूलरहितस्य न्यायस्य न्यायाभासत्वाद्, अतो वाच्यमस्य मूलं येन 'घटस्य स्वरूपम्' इति प्रयोग उपपद्येत, 'घटस्य घटः' इतिप्रयोगाऽनापत्तिश्चेत्यत आह—समानविशेष्यत्वप्रत्यासत्त्येति—विशेष्यतासम्बन्धेन घटादिनिरूपितषष्ठ्यर्थाभेदप्रकारकशाब्दबोधं प्रति विशेष्यतासम्बन्धेन स्वरूपाऽऽदिपदजन्योपस्थितिः कारणम्, तथा च 'घटस्य स्वरूपम्' इत्यत्र स्वरूपादिपदजन्योपस्थितेः स्वरूपे विशेष्यतासम्बन्धेन सत्त्वेन तद्रूपकारणबलात् स्वरूपे घटनिरूपितषष्ठ्यर्थाऽभेदप्रकारकशाब्दबोधः सम्भवतीति तत्प्रयोजको 'घटस्य स्वरूपम्' इति प्रयोग उपपद्यते, 'घटस्य घटः' इत्यादौ च स्वरूपपदस्याऽभावेन तज्जन्योपस्थितेरपि विशेष्यतासम्बन्धेन घटेऽभावेन कारणाऽभावादेव न घटे घटनिरूपितषष्ठ्यर्थाऽभेदप्रकारकशाब्दबोधस्य विशेष्यतासम्बन्धेन सम्भव इति न तत्प्रयोजको 'घटस्य घटः' इति प्रयोग इति प्रयोज्याभावात् तादृशप्रयोगाऽनापत्तिरित्यर्थः। तथा च गुण-तत्सन्तानयोर्भेदकल्पनाया असम्भवे च॥

" उप्पायभङ्गुरा जं गुणा य न य सो त्ति ते य तप्पभवा ।
न य सो तप्पभवो त्ति य जुज्जइ तं तदुवयाराओ ॥

[विशेषावश्यकभाष्यगाथा—२६६३]

व्या०-यत्-यस्माद्, उत्पादभङ्गुरा गुणाः, न चासौ सन्तान उत्पाद-भङ्गुरः, तस्य प्रवाहनित्यतया स्थितत्वादित्येको गुण-सन्तानयोर्धर्मभेदः, तथा, ते-सामायिकादयो नीलतादयो वा गुणाः, तत्रैव सन्ताने प्रभवः-उत्पत्तिर्येषां ते तथा, न पुनरसौ सन्तानः, तत्प्रभवः-गुणेभ्यो लब्धात्मलाभः, तस्य गुणसादृश्य-निबन्धनत्वात्, तथा च कारणमेव सन्तानः, न कार्यम्, कार्यमेव च गुणाः, न कारणम्, इत्येष द्वितीयो गुणसन्तानयोर्धर्मभेदः, इति युज्यते तद्-जीवद्रव्यम्, तदुपचारात्-तत्र गुणसन्ताने गुणेभ्यो भेदकल्पनात्। तदेवं पर्यायार्थिकनयमतं युक्तितः समर्थितम् ॥

अथ द्रव्यार्थिकनयाभिप्रायं दिदर्शयिषुराह-

" बीयस्स दव्वमेत्तं णत्थि तदत्थंतरं गुणो णाम ।
सामन्नावत्थाणाऽभावाओ खरविसाणं व ॥

उप्पायभङ्गुर० इति " उत्पाद-भङ्गुरा यद् गुणाश्च न च स इति ते च तत्प्रभवाः। न च स तत्प्रभव इति च युज्यते तद् तदुपचारतः " ॥ इति संस्कृतम् । विवृणोति- अथेति। तस्य सन्तानस्य। तथा तत्प्रभवाः। ननु गुणसन्तानस्य गुणाऽप्रभवत्वे गुणसन्तान इति कथमुच्यत इत्यत आह- तस्येति- गुणसन्तानस्येत्यर्थः । तथा च गुणस्य गुणसन्तानप्रभवत्वं न तु गुणसन्तानस्य गुणप्रभवत्वमिति व्यवस्थितौ च । ' तदुपचारात् ' इत्यस्य विवरणम्- ' तत्र गुणसन्ताने गुणेभ्यो भेदकल्पनात् ' इति । उपसंहरति- तदेवमिति ॥

आविब्भाव-तिरोभावमेत्तपरिणामि दव्वमेवेयम् ।
णिच्चं बहुरूवं पि य णडो व्व वेसंतरावण्णो ॥
[विशेषावश्यकभाष्यगाथे–२६६५, २६६६]

व्या०—द्वितीयस्य द्रव्यार्थिकनयस्य सर्वं सुवर्ण-रजतादिकं द्रव्यमात्रमेवास्ति, गुणस्तु रक्तत्वश्वेतत्वादिकस्तदर्थान्तरभूतो नास्ति, तस्य सामान्यरूपतयाऽवस्थानाभावात् खरविषाणवत्, तथाहि–आविर्भावः कुण्डलादिरूपेणाभिव्यक्तिः, तिरोभावश्च मुद्रिकादिरूपेणानभिव्यक्तिः, तावेव तन्मात्रम्, तेन परिणन्तुं–प्रवर्तितुं शीलं यस्य तत् तथा। द्रव्यमेवेदं-सुवर्णादिकमस्ति, न तु तदतिरिक्ता गुणाः। किम्भूतं द्रव्यम्? नित्यम्-अविचलितस्वभावम्, बहुरूपं च–कङ्कण-ऽङ्गद-कुण्डल-मुद्रिकादिबहुपरिणामम्, राम-रावण-भीमा-ऽर्जुनादिसम्बन्धीनि वेषान्तराण्यापन्नो नट इव ॥

द्रव्यार्थिकमन्तव्योपदर्शकं भाष्यगाथाद्वयमवतारयति– अथेति। बीयस्स० इति– "द्वितीयस्य द्रव्यमात्रं नास्ति तदर्थाऽन्तरं गुणो नाम। सामान्याऽवस्थानाऽभावात् खरविषाणमिव। आविर्भाव-तिरोभावमात्रपरिणामि द्रव्यमेवेदम्। नित्यं बहुरूपमपि च नट इव वेषान्तराऽऽपन्नः" ॥ इति संस्कृतम्। विवृणोति– द्वितीयस्येति। तदर्थाऽन्तरभूतः द्रव्याद् भिन्नः। तावेव आविर्भाव-तिरोभावावेव। तन्मात्रम् आविर्भाव-तिरोभावमात्रम्। तेन आविर्भाव-तिरोभाव-मात्रेण। तथा आविर्भाव–तिरोभावमात्रपरिणामि। तदतिरिक्ता द्रव्य-व्यतिरिक्ताः। कङ्कणत्यादि सुवर्णद्रव्यमधिकृत्य, अन्यत् स्पष्टम् ॥

द्रव्यार्थिकाऽभिप्रायोपदर्शकं निर्युक्तिकृद्वचनमवतारयति– द्रव्यार्थिकस्येति। जं जं० इति– "यद् यद् यान् यान् भावान् परिणमते प्रयोग-विस्रसाभ्यां द्रव्यम्। तत् तथा जानाति जिनोऽपर्यवे परिच्छा

द्रव्यार्थिकस्य समर्थनार्थं निर्युक्तिकृदप्याह–

" जं जं जे जे भावे परिणमइ पओग-वीससा दव्वं ।
तं तह जाणाइ जिणो अपज्जवे जाणणा णत्थि ॥

[विशेषावश्यकनि० २६६७]

व्या०—'पओगवीसस'त्ति लुप्तविभक्तिको निर्देशः, प्रयोगः-चेतनवतो व्यापारः, विस्रसा–स्वभावः, ताभ्यां यान् यान् भावान्-कृष्णत्व-रक्तत्व-पीतत्व-शुक्लत्वादीन् , यद् यद् द्रव्यं–घटाऽभ्रधनु-रादि, परिणमति–आत्मसात् कुरुते । 'प्रयोगविस्रसाद्रव्यम् ' इत्येक-समासस्वीकारे तु प्रयोगविस्रसानिष्पन्नद्रव्यमित्यर्थे द्रव्यपदस्य व्यक्तिवचनत्वेन तदुभयनिष्पन्नमिश्रद्रव्यस्यैव सङ्ग्रहः स्यात्, न प्रयोगिक-वैस्रसिका(कयोः), जातिवचनत्वे च जातेरनिष्पन्नत्वेन

नास्ति " ॥ इति संस्कृतम् । विवृणोति– पओग-वीससत्तीति– अत्र तृतीयाविभक्तिर्लुप्तेति लुप्तविभक्तिकः ' पओग-वीससा ' इति निर्देश इत्यर्थः । ताभ्यां प्रयोगविस्रसाभ्याम् । ननु ' पओग-वीससा-दव्वम् ' इति समासवाक्यमेव कुतो नाङ्गीक्रियते ? येन ' पओग-वीससा ' इति लुप्तविभक्तिकनिर्देशकल्पनाऽङ्गीकारोऽपि न कर्तव्यः स्यादित्यत आह– प्रयोगेति । तस्य समासवाक्यत्वे प्रयोग-विस्रसा-निष्पन्नद्रव्याऽर्थकत्वं वाच्यम् ; तत्र द्रव्यपदं व्यक्तिवाचि भवेत्, सामान्यवाचि वा ? आद्ये यदेव द्रव्यं प्रयोग-विस्रसानिष्पन्नं तस्यैव सङ्ग्रहः स्यात् , न तु यत् प्रयोगमात्रनिष्पन्नं यच्च विस्रसा-मात्रनिष्पन्नं तयोर्द्रव्ययोः प्रयोगविस्रसोभयनिष्पन्नत्वाभावात् , द्वितीये सामान्यस्य नित्यतया केनचिदपि 'निष्पत्तेरभावेन बाध एव स्यादतो न समासवाक्यत्वमित्याह– प्रयोग–विस्रसानिष्पन्नद्रव्यमित्यर्थ इति। तदुभयेति-प्रयोग-विस्रसोभयेत्यर्थः। 'प्रायोगिकवैस्रसिकयोः' इत्यनन्तरं 'सङ्ग्रहः

बाध इत्यालोच्य प्रयोग-विस्रसाभ्यामिति व्याख्यातम् । तथा च यान् यान् भावानिति कर्मवीप्सामाहिम्ना 'वाम-दक्षिणहस्ताभ्यां यं यं गृह्णाति' इत्यत्रेव प्रत्येककरणान्वयतात्पर्यान्नाऽनुपपत्तिरिति ध्येयम् । 'तं तह' त्ति वीप्साप्रधानत्वान्निर्देशस्य तत् तत् तथा तथा-तेन तेन रूपेण परिणमद् द्रव्यमेव, जानाति जिनः केवली, न पुनस्तदतिरिक्तान् पर्यायानिति भावः, तेषामुत्प्रेक्षामात्रेणैव सत्त्वात्,

---

स्याद्' इत्यनुषङ्गः । नन्वेवमप्युक्तदोषतादवस्थ्यमेवेत्यत आह– तथा चेति– लुप्तविभक्तिकस्य 'पओग-वीससा' इत्यस्य 'प्रयोग-विस्रसाभ्यामित्येवं व्याख्यातत्वे च । यत्र कर्मवीप्सा तत्र प्रत्येकं करणान्वय इत्यत्र दृष्टान्तमाह– वाम-दक्षिणहस्ताभ्यामिति– कस्यचिद् वस्तुनो वामहस्तेन ग्रहणं कस्यचिद् दक्षिणहस्तेन ग्रहणं कस्यचित् पुनर्वाम-दक्षिणहस्तद्वयेन ग्रहणम्, तस्य सर्वस्य ग्रहणस्य 'वाम-दक्षिणहस्ताभ्यां यं यं गृह्णाति' इत्यनेनावबोधो भवति, कर्मवीप्सामाहात्म्यात्, तथा प्रकृतेऽपीति नाऽनुपपत्तिलेशोऽपीत्यर्थः । 'जं जं जे जे भावे' इति वीप्सासद्भावात् 'तं तह' इति निर्देशो वीप्साप्रधानक इति तत् तत् तथा तथेत्येवंस्वरूपत्वमित्याह– तं तहत्तीति । येन येन रूपेण न परिणमति द्रव्यं तथाभूतान् द्रव्यव्यतिरिक्तान् पर्यायान् सर्वज्ञोऽपि जिनो न जानातीत्याह— न पुनरिति । तादृशपर्यायाणां परमार्थतोऽसत्त्वादेव केवलज्ञानाऽविषयत्वमतो न जिनस्य सर्वज्ञत्वहानिरित्याह– तेषामिति–तथाभूतपर्यायाणामित्यर्थः, येन येन परिणमति द्रव्यं तत् तद् रूपं द्रव्यस्वरूपमेव, न तु तद्व्यतिरिक्तम्, तस्मात् पर्याया द्रव्यव्यतिरिक्ता न सन्त्येवेति परमार्थतोऽसतां तेषां ज्ञानाऽभावेऽपि सतां सर्वेषां पर्यायाणां द्रव्यस्वरूपत्वमेवेति द्रव्याणामेव केवलिज्ञानविषयत्वं परमार्थतः सत्त्वात्, तद्व्यतिरिक्तानां पर्यायाणां केवलिज्ञानाऽविषयत्वात् परमार्थतोऽसत्त्वमेव;

नह्युत्फण-विफण-कुण्डलिनाद्यवस्थासु सर्पादिद्रव्यस्य स्वरूपव्यतिरिक्तः कोऽपि पर्यायः, सर्वावस्थाऽविचलितस्वरूपस्य सर्पादिद्रव्यस्यैव संलक्षणात्। यदि पर्याया न विद्यन्ते तदा कथमुच्यते यान् यान् भावान् परिणमत इत्यत आह—अपर्याये—पर्यायरहिते वस्तुनि, 'जाणण'त्ति— केवल्यादीनां परिज्ञा, नास्ति, ज्ञानविषयतयोत्प्रेक्षामात्रेणैव तत्पर्यायाः सन्ति, न तु द्रव्यव्यतिरेकिणः, अतो द्रव्यान्यसत्त्वाऽभावादसन्त एव पर्यायाः, द्रव्यमेव च परमार्थसदित्यर्थः ॥

ननु द्रव्यान्यसत्त्वाभावाद् यदि पर्यायाणामसत्त्वं तदा द्रव्यस्याप्यसत्त्वं स्यात्, नहि द्रव्येऽपि द्रव्यान्यसत्ता द्रव्यार्थिकेनाभ्युपगम्यते, किन्तु द्रव्याऽऽत्मिकैव, कालवृत्त्यत्यन्ताभावप्रतियोगित्वरूपमसत्त्वं तु परिभाष्यमाणमपि न मौलं सत्त्वं विरुणद्धीति चेत्? न-अवि-

---

व्यवहारस्तु पृथक्तया तथाकल्पितत्वादेवेति भावः। येन येन परिणमति द्रव्यं तत् तद् द्रव्यस्वरूपमेवेति दृष्टान्ततो भावयति— नहीति। संलक्षणात् अनुभूयमानत्वात्। 'अपर्याये परिज्ञा नास्ति' इत्येतदुक्तिमवतारयति-यदीत्यादिना। तत्पर्यायाः द्रव्यपर्यायाः। अतः द्रव्यव्यतिरेकिपर्यायाऽभावात् ॥

शङ्कते—नन्विति। किन्तु द्रव्याऽऽत्मिकैवेति—तथा च द्रव्याऽऽत्मकसत्तातो यथा द्रव्यस्य सत्त्वं तथा द्रव्याऽऽत्मकसत्ताया द्रव्यरूपेषु पर्यायेष्वपि भावात् तेषामपि सत्त्वमङ्गीकरणीयमेवेति कुतो भवन्मते द्रव्यनये पर्याया न सन्तीत्युक्तिरुपपन्नेति भावः। ननु पर्यायाणां कालवृत्त्यत्यन्ताऽभावप्रतियोगित्वरूपस्याऽसत्त्वस्य सत्त्वविरोधिनो भावान्न सत्त्वमुपपद्यत इत्यत आह—कालेति—निरुक्ताऽसत्त्वस्य पारिभाषिकस्य मौलसत्त्वविरोधित्वाऽभावात् तदभावेऽपि मौलसत्त्वं स्यादेवेत्यर्थः। मौलसत्त्वाऽभावादेव पर्यायाणामसत्त्वमभ्युपगम्यते, न तु

चलितैकस्वभावत्वेन 'सत् सत्' इति व्यवहारविषयतया द्रव्यमेव हि मौलं सत्त्वम्, तदभावाच्च पर्यायाणामसत्त्वमित्यर्थात्, तर्ह्यसत्यपर्यायांशे तदवगाहिकेवलज्ञानस्य भ्रान्तत्वं स्यादिति चेत् ? न-तदुपहित-द्रव्यस्यैव तेन ग्रहणाभ्युपगमेन तदंशेऽभ्रान्तत्वात् । न चोपहिता-ऽनुपहितभेदेऽपि द्रव्यभेदापत्तिः, घट-पटाकाशाभेदवत् तदभावात् । न चाऽसतोऽनुपधायकत्वम्, प्रतिसूर्यस्य जलोपधायकत्ववदविरोधात्

निरुक्तपारिभाषिकाऽसत्त्वयोगादिति समाधत्ते-नेति । अविचलितेति-पर्यायाणां नाऽविचलितैकस्वभावत्वमिति न तद्रूपेण 'सत् सत्' इति व्यवहारविषयत्वमतो द्रव्यमेवाऽविचलितस्वभावत्वेन 'सत् सत्' इति-व्यवहार विषयत्वेन मौलं सत्त्वमित्यर्थः । तदभावाच्च मौलसत्त्वाभावाच्च । ननु अपर्याये केवल्यादीनां परिज्ञा नास्तीत्यतः सपर्यायस्यैव द्रव्यस्य ग्राहकं केवलिज्ञानम् . पर्यायाश्चाऽसन्त इति तद्विषयकत्वाद् भ्रान्तत्वं केवलिज्ञानस्य स्यादित्याशङ्कते-तर्हीति । तदवगाहीति-सपर्यायद्रव्याऽ-वगाहीत्यर्थः । पर्यायाणामसत्त्वात् तदवगाहित्वं नास्त्येव केवलज्ञानस्य, किन्तु तदुपहितद्रव्यग्राहित्वमेव, द्रव्यं च सदेवेति तदंशेऽभ्रान्त-त्वान्न भ्रान्तत्वाऽऽपत्तिः केवलज्ञान इति समाधत्ते-नेति । तदुप-हितद्रव्यस्यैव पर्यायोपहितद्रव्यस्यैव; एवकारेण पर्यायग्रहणस्य व्यव-च्छेदः । तेन केवलज्ञानेन । तदंशे द्रव्यांशे । ननु पर्यायोपहितद्रव्यस्य केवलज्ञानविषयतयाऽभ्युपगमे द्रव्यस्य यत् पर्यायोपहितं स्वरूपं ततः पर्यायाऽनुपहितस्य द्रव्यस्य भेदे द्रव्यभेदः स्यादित्याशङ्क्य प्रतिक्षिपति-न चेति । निषेधे हेतुमाह-घटेति-घटाऽऽकाश-पटाऽऽ-काशादीनां भेदेऽपि आकाशस्य यथाऽभेदस्तथेत्यर्थः । 'घट-पटाऽऽ-काशाऽभेदवद्' इति स्थाने 'घट-पटाऽऽकाशभेदेऽपि आकाशाभेदवद्' इति पाठो युक्तः । तदभावात द्रव्यभेदाऽभावात् । ननु पर्यायाणा-मसत्त्वेऽसतां तेषां द्रव्योपधायकत्वमपि न भवेदिति तदुपहित-

केवलिना केवलज्ञानोपयोगे प्रधान्येनाऽविषयीक्रियमाणत्वमेव वा द्रव्यार्थिकमते पर्यायाणामसत्त्वम् । न चेदं परिभाषामात्रम् , निश्चयतः केवलज्ञानस्यैव पदार्थसत्तायां प्रमाणत्वात् , छाद्मस्थिकज्ञानानां संवादादिना व्यवहारत एव प्रामाण्याभिमानादिति दिग् ॥

द्रव्यस्याभावे कथं केवलज्ञानविषयत्वमित्याशङ्क्य प्रतिक्षिपति—न चेति । प्रतिसूर्यस्थित-जल सूर्यप्रतिबिम्बमसदपि जलस्योपधायकं भवति, ततः सूर्यप्रतिबिम्बापाहृतमिदं जलमिति व्यवह्रियते, तथा चासतोऽपि प्रतिसूर्यस्योपधायकत्वदनेनासत्त्वस्योपधायकत्वेन सह विरोधाऽभावादित्यर्थः । ननु उपधायकभानमन्तरोपाहृतस्य भानं न सम्भवतीति पर्यायोपाहृतद्रव्यभानं पर्यायभानमावश्यकमिति केवलज्ञानविषयत्वात् पर्यायाणां सत्त्वं स्यादित्यत आह—केवलेनेति । प्रधान्येनेति-पर्यायोपाहृतद्रव्यभानं पर्यायाणां प्रकारतयैव भानं न विशेष्यतयेति प्राधान्येनाऽविषयीक्रियमाणत्वमस्त्येव पर्यायाणामिति तद्रूपमसत्त्वं केवलज्ञानविषयत्वेऽपि पर्यायाणां निर्वहत्येवेत्यर्थः । ननु केवलज्ञाने भवतु पर्यायाणां प्राधान्येनाऽविषयीकरणम् , अस्मदादिज्ञाने तु तेषामपि प्राधान्येन विषयीकरणं भवत्येवेति केवलज्ञानोपयोगे प्राधान्येनाऽविषयीक्रियमाणत्वमसत्त्वमिति परिभाषामात्रम् , अस्मदादिज्ञाने प्राधान्येन विषयीक्रियमाणत्वतो वास्तविकसत्त्वस्य पर्यायाणां सम्भवादित्याशङ्कां प्रतिक्षिपति—न चेति । इदं केवलज्ञानोपयोगे प्राधान्येनाऽविषयीक्रियमाणत्वमसत्त्वम् । निषेधे हेतुमाह—निश्चयत इति-केवलज्ञानमेव सम्पूर्णवस्तुस्वरूपग्राहकत्वान्निश्चयतः प्रमाणमिति प्राधान्येन यदेव तद्विषयस्तदेव सदिति पदार्थसत्तायां तस्यैव प्रमाणत्वात् , छाद्मस्थिकज्ञानानां तु सम्पूर्णवस्तुविषयकत्वाऽभावान्न निश्चयतः प्रामाण्यं किन्तु संवादादिना व्यवहारतः प्रामाण्याऽभिमानमेवेति न प्राधान्येन तद्विषयत्वतः पर्यायाणां सत्त्वमित्यर्थः ॥

उक्तमेव प्रकृतगाथार्थं भाष्यकृद् विवृणोति—

"जं जाहे जं भावं, परिणमइ तयं तया तओऽणन्नं ।
परिणइमेत्तविसिट्ठं दव्वं चिय जाणइ जिणिंदो" ॥

[विशेषावश्यकभाष्यगाथा—२६६८]

व्या०—इह यद्—घटेन्द्रधनुरादि द्रव्यम् , यदा—यस्मिन् काले, यं—रक्त-श्वेतादिकम् , भावं परिणमति तत् तदा ततः-पर्यायादनन्यद् द्रव्यमेव, परिणतिमात्रविशिष्टं वस्तुतोऽविचलितस्वभावं जानाति, कुण्डलादिकमिव संस्थानविशेषविशिष्टं सुवर्णम् ॥

कुण्डलादिपर्यायासत्त्वे कथं तद्व्यपदेश इति जिज्ञासायामाह-

"न सुवन्नादन्नं कुण्डलाइ तं चेव तं तमागारं ।
पत्तं तव्ववएसं लहइ सरूवादभिन्नं पि" ॥

[विशेषावश्यकभाष्यगाथा—२६६९]

व्या०—न सुवर्णादन्यत् कुण्डलादिकमभ्युपगच्छामः, किन्तु

"जं जं जे जे भावे०" [पत्र-९२] इत्यादिनिर्युक्तिगाथाऽर्थोपदर्शिकां भाष्यगाथामवतारयति—उक्तमेवेति । जं जाहे० इति—"यद् यदा यं भावं परिणमति तत् तदा ततोऽनन्यत् । परिणतिमात्रविशिष्टं द्रव्यमेव जानाति जिनेन्द्रः" ॥ इति संस्कृतम् । विवृणोति—इहेति, विवरणं स्पष्टम् । उक्ताऽर्थदार्ढ्याय दृष्टान्तमाह—कुण्डलाऽऽदिकमिवेति ॥

भाष्यस्यैवोक्तदृष्टान्तोपोद्बलिकां गाथामवतारयति— कुण्डलाऽऽदिपर्यायाऽसत्त्व इति । तद्व्यपदेशः कुण्डलादिव्यपदेशः । न सुवन्न० इति—"न सुवर्णादन्यत् कुण्डलादि तदेव तं तमाकारम् । प्राप्तं तद्व्यपदेशं लभते स्वरूपादभिन्नमपि" ॥ इति संस्कृतम् । विवृणोति—न सुवर्णादन्यदिति । कुण्डलादीनां सुवर्णादभिन्नत्वेऽपि तत्तद्विलक्ष-

तदेव–सुवर्णमेव, तं तं–कुण्डलादिरूपम्, आकारं प्राप्तं तद्व्यपदेशं–कुण्डलादिव्यपदेशं लभते, स्वरूपात्–पूर्वावस्थाभाविनः, उत्तरावस्थायाम्, अभिन्नमपि तत्तद्विशिष्टाकारनिबन्धनत्वान्न निर्निबन्धनस्तद्व्यपदेशः, न च विशिष्टभेदः शुद्धाभेदप्रतिबन्धीति भावः ॥

एवमपि यदि गुणानामन्यत्वमिष्यते तत्राह–

"जइ वा दव्वादन्ने गुणादओ नूण सप्पएसत्तं ।
होज्ज व रूवाईणं विभिन्नदेसोवलंभो वि" ॥

[विशेषावश्यकभाष्यगाथा–२६७०]

व्या०–यदि पुनर्द्रव्याद् रूपादयो गुणाः, आदिशब्दान्नवपुराणादयश्च पर्यायाः, अन्ये–व्यतिरेकिण इष्यन्ते, तदा नूनं–निश्चितं गुणादीनां स्वप्रदेशत्वमापद्यते, द्रव्यप्रदेशा हि गुणादय इष्यन्ते, द्रव्यभेदाभ्युपगमे च तेषामनन्यशरणानां स्वप्रदेशत्वमेव स्यात्, न चैतद् दृष्टम्, इष्टं वा, गुणादीनां सदैव पारतन्त्र्येण परप्रदेशत्वस्यैव

णाऽऽकारयोगात् कुण्डलादिव्यपदेशभेद इति न विभिन्नव्यपदेशस्य निर्निमित्तत्वमित्याह–तत्तद्विशिष्टाऽऽकारेति । शुद्धाऽभेदेऽपि विशिष्टभेदसम्भवेन न कुण्डलाऽऽदिभेदतः सुवर्णभेदप्रसङ्ग इत्याह–न चेति, अन्यत् स्पष्टम् ॥

प्रकृतार्थसङ्गततयोत्तरगाथामवतारयति– एवमपीति । जइ वा० इति– "यदि वा द्रव्यादन्ये गुणादयो नूनं स्वप्रदेशत्वम् । भवेद् वा रूपादीनां विभिन्नदेशोपलम्भोऽपि" ॥ इति संस्कृतम् । विवृणोति– यदीति । आदिशब्दात् 'गुणादयः' इत्यत्राऽऽदिशब्दात् । 'अन्ये' इत्यस्य 'व्यतिरेकिणः' इत्यर्थः । 'इष्यन्ते' इति पूरणम् । तदेति यदीति बलाल्लुब्धम् । नूनमित्यस्य निश्चितमित्यर्थः । द्रव्याद् भेदे गुणानां स्वप्रदेशत्वाऽऽपत्तौ हेतुमाह– द्रव्यप्रदेशा हीति । हि यतः । तेषां गुणा-

न्याय्यत्वात् । किञ्च, एवं रूपादीनां विभिन्नदेशोपलम्भोऽपि स्यात् 'यद् यतो भिन्नं तत् ततो भिन्नदेश उपलभ्यते' इति व्याप्तेः। उपष्टम्भकभागेन व्यभिचार इति चेत् ? न–परिणामाभेदवादे तस्यापीतरभागाभिन्नत्वादिति भावः ॥

अथोपचारतो यदि पर्याया अप्यभ्युपगम्यन्ते तदा सिद्धसाध्यतेति दर्शयन्नाह–

"जइ पज्जवोवयारो लय-प्पयासपरिणाममित्तस्स ।
कीरई तन्नाम ण सो दवादत्थंतरब्भूओ" ॥

[विशेषावश्यकभाष्यगाथा–२६७१]

नाम् । न चेति– स्वप्रदेशत्वं न क्वचिद् दृष्टं नवा गुणानां स्वप्रदेशत्वं कस्याऽपीष्टमित्यर्थः । कथं नेष्टमित्यपेक्षायामाह– गुणादीनामिति। गुणादीनां द्रव्याद् भिन्नत्वाऽभ्युपगमे दोषान्तरमप्याह– किञ्चेति । एवं गुणादीनां द्रव्याद् भिन्नत्वे। यदिति– अत्र घटादिर्दृष्टान्तः, घटादिकं पटादितो भिन्नं ततो भिन्नदेशे उपलभ्यते, एवं गुणादिकमपि द्रव्याद् भिन्नं द्रव्यतो भिन्नदेशे उपलभ्येत । उक्तनियमे व्यभिचारमाशङ्कते– उपष्टम्भकभागेनेति– पार्थिवाऽऽदिशरीरादौ जलादीनामुपष्टम्भकत्वमभिमतमिति जलादिलक्षणमुपष्टम्भकं पार्थिवादिशरीरादितो भिन्नमपि न ततो भिन्नदेशे उपलभ्यत इति व्यभिचारः । उपष्टम्भकभागस्तद्रूपेण परिणमत इत्येतावतोपष्टम्भक उच्यते, तथा च परिणाम-परिणामिनोरभेदाऽभ्युपगमवादे न तस्य ततो भिन्नत्वमिति न व्यभिचार इति समाधत्ते– नेति। तस्याऽपि उपष्टम्भकभागस्यापि ॥

वस्तुतो द्रव्यात् पर्यायाणां भिन्नत्वाऽभावेऽप्युपचारतो भिन्नत्वमित्युपगमस्येष्टत्वप्रतिपादिकां भाष्यगाथामवतारयति– अथोपचारत इति। जइ० इति– "यदि पर्यवोपचारो लय-प्रकाशपरिणाममात्रस्य। क्रियते तन्नाम न स द्रव्यादर्थान्तरभूतः" ॥ इति संस्कृतम् ।

व्या०—लयः–तिरोभावः, दर्शनाऽयोग्यं रूपमिति यावत्, प्रकाशः–आविर्भावः, दर्शनयोग्यं रूपमिति यावत्, ताभ्यां यः परिणामः स एव तन्मात्रम्, तत्र यदि तत्तद्विशेषबुद्ध्यभिधाननिमित्तत्वेन पर्यायोपचारः क्रियते, तन्नाम–मान्यामहे तदित्यर्थः, केवलं नासौ पर्यायो वास्तवः कोऽपि द्रव्यादर्थान्तरभूत इत्येतदेव भुजमुत्क्षिप्य ब्रूमः ॥

ननु यदि न वास्तवः पर्यायः, किन्तु कल्पितस्तदा खरशृङ्गस्याप्यसौ कुतो न भवति ? कल्पनामात्रस्य तत्रापि सुकरत्वादित्यत आह–

"दव्वपरिणाममित्तं पज्जओ सो य ण खरसिंगस्स ।
तदपज्जवं ण णज्जइ, जं नाणं णेयविसयं ति ॥

[विशेषावश्यकभाष्यगाथा–२६७२]

व्या०–कालविशेषादिविशिष्टो द्रव्यपरिणाममात्रं पर्यायो नान्यः,

विवृणोति– लय इति। ताभ्यां निरुक्तलय-प्रकाशाभ्याम्। तत्र लय-प्रकाशपरिणाममात्रे। तत्तद्विशेषेति– 'कुण्डलमिदम्, कटकोऽयम्' इत्यादिका या विशेषबुद्धिः, यच्च तथाविधमभिधानं तन्निमित्तत्वेनेत्यर्थः। 'तन्नाम' इत्यस्य 'मन्यामहे तदित्यर्थः' इति विवरणं भावार्थमाश्रित्य। तर्हि पर्यायोऽभ्युपगत एवेति पर्यवसितं विवादेनेत्यत आह– केवलमिति ॥

कल्पितस्यैव पर्यायस्याऽभ्युपगमेऽपि द्रव्यस्यैव सः, न तु खरविषाणस्येत्युपदर्शिकां भाष्यगाथामवतारयति– नन्वित्यादिना। असौ कल्पितः पर्यायः। तत्रापि खरशृङ्गेऽपि। दव्व० इति– "द्रव्यपरिणाममात्रं पर्यायः स च न खरशृङ्गस्य। तदपर्यवं न ज्ञायते यज्ज्ञानं ज्ञेयविषयमिति" ॥ इति संस्कृतम्। विवृणोति– कालविशेषादि-

स च न द्रव्याद् भिन्नः, तथाऽनुपलम्भात्, नाप्यसौ खरशृङ्गस्य, द्रव्यपरिणामत्वात् पर्यायस्य, खरविषाणस्य चाद्रव्यत्वात्, अत एव तत्-खरशृङ्गम्, अपर्यवमित्यद्रव्यं सद् न ज्ञायते केवलिना, यतो ज्ञानं ज्ञेयविषयम्, ज्ञेयं च न खरशृङ्गम्, अपर्यवत्वेनाऽद्रव्यत्वात्। अत एवोक्तं निर्युक्तिकृता-"अपज्जवे जाणणा णत्थि" [पत्र-९२] त्ति, ज्ञेयत्वाऽभावव्याप्याऽद्रव्यत्वव्याप्यधर्मप्रदर्शनपरमेतत्, पर्यायनये उत्पाद-व्ययभागित्वमेव सत्त्वम्, द्रव्यनयेऽविचलितैकस्वभावत्वम्, सिद्धान्ते तु त्रैलक्षण्यमिति सिद्धान्तमाश्रित्य, ततोऽपर्याये परिज्ञा

विशिष्ट इति। स च निरुक्तस्वरूपः पर्यायश्च। तथाऽनुपलम्भात् द्रव्याद् भिन्नत्वेन पर्यायाणामनुपलम्भात्। असौ पर्यायः। अत एव खरविषाणस्याद्रव्यत्वादेव। कथं न ज्ञेयं खरशृङ्गमित्यपेक्षायामाह- अपर्यवत्वेनेति- सपर्यवं द्रव्यमेव ज्ञेयमित्यभिसन्धिः। अत एव अपर्यवत्वेनाऽद्रव्यत्वतोऽज्ञेयत्वादेव खरविषाणादेः। "अपज्जवे जाणणा नत्थि" इति-निर्युक्तिकृद्वचनरहस्यं यथोपदर्शितवन्तो भगवन्तो हरिभद्रसूरयस्तथा तदुल्लिखति- ज्ञेयत्वेनेति- ज्ञेयत्वाऽभावव्याप्यमद्रव्यत्वम्, यत्र यत्राऽद्रव्यत्वं तत्र तत्र ज्ञेयत्वाऽभावः, द्रव्यत्वस्य ज्ञेयत्वव्यापकत्वे द्रव्यत्वाऽभावलक्षणस्याऽद्रव्यत्वस्य व्यापकाऽभावतया व्याप्यज्ञेयत्वाऽभावव्याप्यत्वात् तद्व्याप्यधर्मोऽपर्यवत्वलक्षणः, यत्र यत्रापर्यवत्वं तत्र तत्र द्रव्यत्वाभावः, सपर्यवत्वस्य द्रव्यत्वव्यापकत्वे तदभावरूपस्यापर्यवत्वस्य द्रव्यत्वरूपव्याप्याऽभावलक्षणाऽद्रव्यत्वव्याप्यत्वात्, तादृशधर्मदर्शनपरम्, एतत् "अपज्जवे जाणणा नत्थि" इति निर्युक्तिकृद्वचनम्, ततश्च यत् सिद्धयति तदाह- पर्यायनय इति। सिद्धान्ते तु स्याद्वादे तु। त्रैलक्षण्यम् उत्पाद-व्यय-ध्रौव्यात्मकत्वम्, सत्त्वमित्यनुवर्तते। इति सिद्धान्तम् एवंस्वरूपजैनसिद्धान्तम्। तस्मात् सिद्धान्तसिद्धोत्पाद-व्यय-ध्रौव्यात्मकत्वलक्षणसत्त्वतः। उभयाऽऽत्मकं

नास्ति, तस्मादुभयात्मकं वस्तु, केवलिना तथाऽवगतत्वादिति हरिभद्राचार्या निगमयामासुः ॥

तदेवं द्रव्यार्थिकः पर्यायं प्रतिक्षिपति, पर्यायार्थिकस्तु द्रव्यमिति द्रव्यांशाऽप्रतिक्षेपान्नैगमो द्रव्यार्थिक इति व्यवस्थितम् । न च तथा तज्जातीयेन पर्यायाऽप्रतिक्षेपात् पर्यायार्थिकत्वमपि स्यादिति वाच्यम्, 'यज्जात्यवच्छेदेन द्रव्याऽप्रतिक्षेपित्वं तज्जातीयस्य तन्नयत्वम्' इत्येवं परिभाषणात् ॥

द्रव्य-पर्यायोभयाऽऽत्मकम् । कथ द्रव्यपर्यायोभयात्मकमेव वस्तु, न केवलद्रव्याऽऽत्मकं केवलपर्यायाऽऽत्मकं वेत्यत आह- केवलिनेति । तथाऽवगतत्वात् द्रव्यपर्यायोभयाऽऽत्मकत्वेनैव वस्तुनो दृष्टत्वात् । नैगमस्य सामान्यावषयकत्वे पर्यायविषयकत्वे च सति पर्यायोपगन्तृत्वे पर्यायनयेऽपि परिगणनमुचितम्, कथ च द्रव्यनय एव तस्य परिगणनामत्याशङ्कासमुद्धरणायायमुपक्रमः, ततश्चोक्तयुक्त्या नैगमस्य द्रव्यांशाऽप्रतिक्षेपित्वाद् द्रव्यार्थिकत्वमतो द्रव्यार्थिके तस्य परिगणनामत्युपसंहरति- तदेवमिति । ननु नैगमो द्रव्यग्राही यथा द्रव्यं न प्रतिक्षिपति तथा पर्यायग्राही नैगमजातीयः पर्यायं न प्रतिक्षिपतीति पर्यायाऽप्रतिक्षेपित्वात् पर्यायार्थिकत्वमपि तस्य स्यादिति पर्यायार्थिकेऽप्येवमपि तस्य परिगणनं प्रसज्यत इत्याशङ्क्य प्रतिक्षिपति- न चेति- 'वाच्यम्' इत्यनेनान्वयः । नैगममात्रस्य द्रव्यग्राहित्वम्, योऽपि नैगमः पर्याय गृह्णाति तद्विषयोऽपि पर्यायो नाऽन्त्यविशेष इति तस्य स्वविशेषाऽपेक्षया सामान्यत्वेन द्रव्यत्वमिति नैगमजात्यवच्छेदेन द्रव्याऽप्रतिक्षेपित्वेन नैगमस्य द्रव्यार्थिकत्वम्, परसामान्यस्य तु न कस्याऽप्यपेक्षया विशेषत्वमिति तद्ग्राहिणो नैगमस्य पर्यायप्रतिक्षेपित्वेन नैगमजात्यवच्छेदेन पर्यायाऽप्रतिक्षेपित्वस्याऽभावान्न नैगमस्य पर्यायार्थिकत्वमिति प्रतिक्षेपहेतुमुपदर्शयति- यज्जात्यवच्छेदेनेति ।

वस्तुतः क्षणिकत्वादिविशेषणशुद्धपर्यायं नैगमो नाभ्युपगच्छत्येव, किञ्चित्कालस्थाय्यशुद्धतदभ्युपगमस्तु सत्तामहासामान्यरूपद्रव्यांशस्य घटादिसत्तारूपविशेषप्रस्तारमूलतयाऽशुद्धद्रव्याभ्युपगम

शुद्धपर्यायाऽभ्युपगन्तृत्वमेव पर्यायार्थिकत्वे तन्त्रम्, शुद्धपर्यायश्च क्षणिकत्वाऽऽदिविशेषणविशिष्ट एव, तादृशपर्यायाऽभ्युपगन्तृत्वाऽभावान्न नैगमस्य पर्यायार्थिकत्वमित्याह- वस्तुत इति। किञ्चित्कालस्थायित्वमेव पर्यायेऽशुद्धत्वमिति तद्विशिष्टपर्यायाऽभ्युपगमस्त्वशुद्धद्रव्याऽभ्युपगम एवेति तथाऽभ्युपगमपरस्य नैगमस्य द्रव्यार्थिकत्वमेव न पर्यायार्थिकत्वमित्याह- किञ्चित्कालेति। तदभ्युपगमस्तु पर्यायाभ्युपगमस्तु। तस्य किञ्चित्कालस्थाय्यशुद्धपर्यायाऽभ्युपगमस्य। किञ्चित्कालस्थाय्यशुद्धपर्यायाऽभ्युपगमस्याऽशुद्धद्रव्याऽभ्युपगमरूपत्वे हेतुः सत्तामहासामान्यरूपद्रव्यांशस्य घटादिसत्तारूपविशेषप्रस्तारमूलतयेति, अस्यायमर्थः- सत्तालक्षणं यत् सकलवस्त्वनुगतत्वान्महासामान्यम्, तद्रूपो यो द्रव्यांशः, द्रव्यस्य शुद्धद्रव्या-ऽशुद्धद्रव्यभेदेन द्वैविध्यम्, तत्र यदनुगाम्येव, न तु कुतोऽपि व्यावृत्तम्, तदनुगाम्येकस्वभावत्वाच्छुद्धद्रव्यम्, यच्च केषुचित् पर्यायेष्वनुगच्छति, केषुचित् पर्यायेषु च नानुगच्छति, किन्तु व्यावर्तते तदनुगाम्यननुगाम्युभयस्वभावत्वादशुद्धद्रव्यम्, ततश्च सत्तामहासामान्यरूपो द्रव्यांशः शुद्धद्रव्यम्, तदेव घटादिसत्तारूपेणावभासते घटादिसत्तायास्तद्व्यतिरेकेण वस्तुस्थित्याऽभावादिति तस्य सत्तामहासामान्यरूपद्रव्यांशस्य, घटादिसत्तारूपो यो विशेषप्रस्तारः- पटादिसत्ताव्यावृत्तत्वेन विभिन्नस्वरूपतया विभजनम्, तन्मूलतया- तन्निमित्ततया, सत्ता एकैव तथा तथाऽवभासत इति विशेषसम्पृक्तद्रव्यविषयकत्वेन घटादिसत्ताऽभ्युपगमो नैगमस्याऽशुद्धद्रव्याभ्युपगम एवेति द्रव्यार्थिकत्वमेव, न पर्यायार्थिकत्वमिति। तथा च महासामान्यशुद्धद्रव्याभ्युपगन्तुरस्य सङ्ग्रहेऽन्तर्भावः, घटादिसत्तारूपविशेषाऽऽत्मकाऽशुद्ध-

एव पर्यवस्यतीति न पर्यायार्थत्वं तस्य, अत एव सामान्यविशेषविषयभेदेन सङ्ग्रह-व्यवहारयोरेवान्तर्भावेन शुद्धाशुद्धद्रव्यास्तिकोऽयमिष्यत इति

"दव्वट्ठियनयपयडी सुद्धा संगहपरूवणाविसओ ।
पडिरूवे पुण वयणत्थणिच्छओ तस्स ववहारो" ॥ त्ति

सम्मतिगाथायां [प्रथमकाण्डे—गा० ४] पृथग् नोदाहृतः ।

अस्या अर्थः—"द्रव्यास्तिकनयस्य, प्रकृतिः—स्वभावः, शुद्धा—विशेषाऽसंस्पर्शवती, संग्रहस्य अभेदग्राहिनयस्य, या प्ररूपणा—प्ररूप्यतेऽनयेति कृत्वाऽभिधायकपदसंहतिः, तस्या विषयः, उपचारात् तदेकविषयेत्यर्थः । प्रतिरूपं प्रतिबिम्बम् , घटादिनाऽशुद्धद्रव्येण

द्रव्याभ्युपगन्तुश्चास्य व्यवहारेऽन्तर्भाव इति कृत्वा शुद्धाऽशुद्धद्रव्यास्तिकत्वमस्येत्याह- अत एवेति- शुद्धाऽशुद्धद्रव्यविषयकत्वादेवेत्यर्थः । अयं नैगमः ।

यत एव सङ्ग्रह-व्यवहारयोरेव नैगमस्यान्तर्भावस्तत एव सम्मतौ नैगमनयो न गणित इति सम्मतिगाथामुल्लिख्य दर्शयति- दव्वट्ठिय० इति—"द्रव्यास्तिकनयप्रकृतिः शुद्धा सङ्ग्रहप्ररूपणाविषयः । प्रतिरूपे पुनर्वचनार्थनिश्चयस्तस्य व्यवहारः" ॥ इति संस्कृतम् । अस्यां गाथायां द्वावेव सङ्ग्रह-व्यवहारौ द्रव्यार्थिकतयोदाहृतौ, ताभ्यामन्यस्तु नैगमो द्रव्यार्थिकतया नोदाहृत इत्यर्थः । अस्याः "दव्वट्ठिय०" इति सम्मतिगाथायाः । 'प्रकृतिः' इत्यस्य 'स्वभावः' इत्यर्थः । 'शुद्धा' इत्यस्य 'विशेषाऽसंस्पर्शवती' इत्यर्थः । तस्याः अभेदग्राहिनयाभिधायकपदसंहतेः । तदेकविषया अभेदग्राहिसंग्रहनयाऽभिधायकपदसंहत्येकविषया द्रव्यास्तिकनयप्रकृतिः । तथा च शुद्धद्रव्यार्थिकनयः सङ्ग्रह एवेति भावः । 'प्रतिरूपम्' इत्यस्य 'प्रतिबिम्बम्' इत्यर्थः ।

सङ्कीर्णा सत्तेति यावत्, तत्र, पुनस्तस्य-द्रव्यास्तिकस्य, यो वचनार्थ-निश्चयः- निवृत्ति-प्रवृत्त्युपेक्षालक्षणव्यवहारसम्पादकशब्दार्थनिर्णय :, स व्यवहारः। प्रतिरूपं-सङ्कीर्णा सत्ता, पुनःशब्देन प्रकृतिः स्मार्यते, वचनं-व्यवहारसम्पादकः शब्दः, 'घटः' इति विभक्तरूपतया 'अस्ति' इत्यविभक्तात्मतया प्रतीयमानस्तदर्थः, तस्य निर्गतः-पृथग्भूतः, चयः-परिच्छेदः, तथा च तस्य द्रव्यार्थिकस्य सङ्कीर्णसत्ता प्रकृतिर्वचनार्थनिश्चयो व्यवहारः" इति टीकानुगतार्थः ॥

अत्र नैगमो न प्रथग् जगृहे सङ्ग्रहव्यवहारविषयातिरिक्ततद्विषयासिद्धेरिति। येषां तु मते पृथक् नैगमनयो विद्यते ते प्रतिपत्तृभेदान्नाना तदभिप्रायं वर्णयन्ति। यतः केचिदाहुः-"पुरुष एवेदं सर्वं०" [पुरुषसूक्तान्तर्गतोऽयं मन्त्रः] इत्यादि, यदाश्रित्योक्तम्-

---

तस्याऽसन्दिग्धस्वरूपप्रतिपत्तये त्वाह-घटादिनेति। तत्र घटादिनाऽशुद्धद्रव्येण सङ्कीर्णायां सत्तायाम्। उत्तरार्द्धस्य व्याख्यान्तरमाह-प्रतिरूपमिति-'सङ्कीर्णा सत्ता' इति तदर्थः। 'वचना-ऽर्थ-निश्चयः' इत्यत्र त्रयाणां वचना-ऽर्थ-निश्चयानां क्रमेण स्वरूपमुपदर्शयति- वचनमिति -अस्य व्यवहारसम्पादकः शब्द इत्यर्थः। घट इत्यादिना तदर्थस्वरूपकथनम्। तस्येत्यादिना निश्चयस्वरूपनिर्वचनम् ॥

एवं सति यत्स्वरूपो व्यवहारः पर्यवसितस्तमाह-तथा चेति। अत्र उक्तगाथायाम्। नैगमस्य पृथक्तयाऽग्रहणे हेतुमाह-सङ्ग्रहेति। तद्विषयेति-नैगमविषयेत्यर्थः। ते सङ्ग्रह-व्यवहारभिन्नतया नैगमनयाऽभ्युपगन्तारः। तदभिप्रायं नैगमनयाऽभिप्रायम्। अभिप्रायभेदमेव दर्शयति यत इति। 'इत्यादि' इत्यादिपदात् "यद् भूतं यच्च भाव्यम्०" इत्यादेरुपग्रहः। यदाश्रित्य यन्मतमवलम्ब्य। उक्तं श्रीकृष्णेनाऽर्जुनं प्रति गीतायां पञ्चदशाध्याये उक्तम्। ऊर्ध्वमूलमिति-अस्य विवरणात्मकं शाङ्करभाष्यमुपदर्श्यते—

"ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" ॥
—[गीता—अ० १५, श्लो० १]

" यस्मान्मदधीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञानफलमतो भक्तियोगेन मां ये सेवन्ते ते मत्प्रसादाज्ज्ञानप्राप्तिक्रमेण गुणाऽतीता मोक्षं गच्छन्ति, किमु वक्तव्यमात्मनस्तत्त्वमेव सम्यग्विजानन्त इत्यतो भगवान् अर्जुनेनाऽपृष्ट एवाऽऽत्मनस्तत्त्वं विवक्षुरुवाच-ऊर्ध्वमूलमित्यादिना, तत्र तावद् वृक्षरूपककल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति, विरक्तस्य हि संसाराद् भगवत्तत्त्वज्ञानेऽधिकारो नान्यस्येति । ऊर्ध्वमूलमिति-ऊर्ध्वमूलं कालतः सूक्ष्मत्वात् कारणत्वान्नित्यत्वान्महत्त्वाच्चोर्ध्वमुच्यते ब्रह्माऽव्यक्तं मायाशक्तिमत्, तन्मूलमस्येति सोऽयं संसारवृक्ष ऊर्ध्वमूलः, श्रुतेश्च "ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः" [कठ० ६, १] इति । पुराणे च-

"अव्यक्तमूलप्रभवस्तस्यैवाऽनुग्रहोत्थितः ।
बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः ॥ १ ॥
महाभूतविशाखश्च विषयः पत्रवांस्तथा ।
धर्माऽधर्मसुपुष्पश्च सुखदुःखफलोदयः ॥ २ ॥
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ।
एतद् ब्रह्मवनं चैव ब्रह्माचरति नित्यशः ॥ ३ ॥
एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमाऽसिना ।
ततश्चात्मरतिं प्राप्य यस्मान्नाऽऽवर्तते पुनः" ॥ ४ ॥
[म० भा० अश्व० ४७, १२, १५] इत्यादि ।

तमूर्ध्वमूलं संसारं मायामयं वृक्षम्, अधःशाखं महदहङ्कारतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोऽयमधःशाखस्तमधःशाखम् । न श्वोऽपि स्थातेत्यश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थम्, प्राहुः कथयन्ति, अव्ययम् संसारमायाया अनादिकालप्रवृत्तत्वात्

पुरुषोऽप्येकत्व-नानात्वभेदात् कैश्चिदभ्युपगतो द्वेधा, नानात्वेऽपि तस्य कर्तृत्वाऽकर्तृत्वभेदः परैराश्रितः, कर्तृत्वेऽपि सर्वगतेतरभेदः, असर्वगतत्वेऽपि शरीरव्याप्यव्यापिभ्यां भेदः, व्यापित्वेऽपि मूर्त्तेतरविकल्पाद् भेद एव ॥

अपरैस्तु प्रधानकारणकं जगदभ्युपगतम्, तत्रापि कैश्चित् सेश्वरानीश्वरभेदोऽभ्युपगतः ।

सोऽयं संसारवृक्षोऽव्ययोऽनाद्यनन्तदेहादिसन्तानाऽऽश्रयो हि सुप्रसिद्धस्तमव्ययम् । तस्यैव संसारवृक्षस्येदमन्यद् विशेषणम्–छन्दांसि छादनाद् ऋग्यजुःसामलक्षणानि, यस्य संसारवृक्षस्य, पर्णानि पर्णानीव, यथा–वृक्षस्य परिरक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षपरिरक्षणार्थाः धर्माऽधर्मतद्धेतुफलप्रकाशनार्थत्वात् । यथाव्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदवित्–वेदार्थावदित्यर्थः । 'न हि संसारवृक्षादस्मात् समूलाज्ज्ञेयोऽन्याऽणुमात्रोऽप्यवशिष्टोऽस्ति, अतः सर्वज्ञः स यो वेदार्थावादिति समूलवृक्षज्ञानं स्तौति ॥" इति ।

एतन्मते एक एव ब्रह्मात्मा पुरुषो जगद्रूपेण परिणत इति ब्रह्मणो विवर्तोऽयं संसारो ब्रह्मपुरुषाऽऽत्मक एवेति ॥

नैगमस्याऽभिप्रायान्तरमाह-पुरुषोऽपीति–ईश्वरलक्षणः पुरुष एकः, जीवलक्षणः पुरुषो नानेत्येवं पुरुषस्यैकत्वं नानात्वं चेति केचित् प्रतिपन्नाः, तन्मते पुरुष एको नाना चेति द्विविधः । अभिप्रायान्तरं दर्शयति–नानात्वेऽपीति । तस्य पुरुषस्य । कर्तृत्वाऽकर्तृत्वभेदः ईश्वरो न कर्ता, जीवस्तु कर्ता । कर्तृत्वेऽपीति–आत्मनः कर्तृत्वेऽपि कस्यचिन्मते सर्वगतत्वं कस्यचिन्मते त्वसर्वगतत्वमित्येवं भेदः । असर्वगतत्वेऽपीति–असर्वगतोऽप्यात्मा केनचिद् देहव्यापी स्वीक्रियते, केनचिदणुपरिमाणः । व्यापित्वेऽपीति–आत्मा शरीरव्यापकोऽपि केनचिन्मूर्तः केनचिदमूर्तः स्वीकृतः, इत्येवं पुरुषमधिकृत्य बहवो नैगमाभिप्रायाः । अन्येऽपि नैगमाभिप्रायाः, तान् दर्शयति–अपरैस्त्विति । प्रधानकारणक-

अन्यैस्तु परमाणुप्रभवमभ्युपगतं जगत्, तत्रापि सेश्वर-निरीश्वरभेदाद् भेदोऽभ्युपगत एव, सेश्वरपक्षेऽपि स्वकृतकर्मसापेक्षत्वाऽनपेक्षत्वाभ्यां तदवस्थ एव भेदाभ्युपगमः ॥

कैश्चित् स्वभाव-काल-यदृच्छादिवादाः समाश्रिताः, तेष्वपि सापे-

मिति-प्रधानं प्रकृतिः, सत्त्व-रजस्तमसां साम्याऽवस्था, तत् कारणं यस्य तत् तथेत्यर्थः। तत्रापि जगतः प्रधानकारणकत्वेऽपि । कैश्चित् पतञ्जलि-कपिलाऽनुयायिभिः । अन्यैस्तु कणभक्षाऽक्षपादानुयायिभिः पुनः । परमाणुप्रभवमिति-परमाणुभ्यः प्रभव उत्पत्तिर्यस्य तत् तथा, साक्षात् परम्परया वा परमाणुकारणकं जगदित्यर्थः । तत्रापि जगतः परमाणुकारणकत्वाऽभ्युपगमेऽपि । सेश्वरपक्षेऽपीति-ईश्वरः परमाणूनुपादाय जगद् विदधातीति पक्षेऽपीत्यर्थः । स्वकृतेति-ईश्वरः साक्षात् परम्परया वा यदात्मोपभोगसाधनं यत् कार्यं जनयति तत्र तदात्मकृतकर्मसापेक्षस्तज्जनयति, ईश्वरः प्राण्यदृष्टापेक्षो यदि कार्यं जनयेत् तदा कर्मपरतन्त्रत्वात् तस्य स्वातन्त्र्यहान्येश्वरत्वमेव न स्यादिति प्राणिकृतकर्माऽनपेक्ष एवेश्वरो जगद् विदधाति, अथवेश्वरो जीवेषु तत्तत्फलोपभोगसमर्थमदृष्टमुत्पाद्य तत्तत्सहकृतस्तत्तदुपभोगानुकूलकार्यं जनयति, स्वतन्त्रत्वाद् वेश्वरो विलक्षणाऽदृष्टमजनयित्वैव कार्यविशेषमुत्पादयतीत्येवं स्वकृतकर्मसापेक्षत्वानपेक्षत्वाभ्यां पूर्ववदेव भेदाऽभ्युपगमः। 'कैश्चिद्' इत्यस्य 'समाश्रिताः' इत्यनेनाऽन्वयः। स्वभावेति-स्वभाववादः, कालवादः, यदृच्छावादः, आदिपदान्नियतिवादादीनामुपग्रहः । स्वभाववादश्च-यस्य यः स्वभावः स तस्यैव नान्यस्येति प्रतिनियतस्वभावान्यथाऽनुपपत्त्या स्वभावादेव कार्यं प्रतिनियतस्वभावमुपजायत इति नान्यत् किञ्चित् कस्यचित् कारणम्, यदुक्तम्—

"नित्यसत्त्वा भवन्त्येके नित्याऽसत्त्वाश्च केचन ।
विचित्रा केचिदित्यत्र तत्स्वभावो नियामकः ॥

क्षत्वानपेक्षत्वाभ्युपगमाद् भेदव्यवस्थाऽभ्युपगतैव ॥

तथा कारणं नित्यं कार्यमनित्यमित्यपि द्वैतं कैश्चिदभ्युपगतम्, तत्रापि काय स्वरूपं नियमेन त्यजति नवा इत्ययमपि भेदाभ्युपगमः ।

वह्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात् स्वभावात् तद्व्यवस्थितिः" ॥ इति

कालवादश्च-वासन्तिको वसन्ततावेवोपजायते, ग्रैष्मो ग्रीष्मतावेवोपजायत इत्येवं प्रतिनियतकालप्रभवत्वाऽन्यथाऽनुपपत्त्या यद् यद् यदा यदा भवति तत्तद्धस्तुनः स स काल एव कारणमिति, यदुक्तम्—

"कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः" ॥ इत्यादि ।

एवं यदृच्छादिवादा अपि समयसमुद्रप्रसिद्धा ज्ञेयाः । तेष्वपि स्वभावादिवादेष्वपि । सापेक्षत्वेति-कारणान्तरसापेक्षत्वाऽनपेक्षत्वाऽभ्युपगमादित्यर्थः । कारणमिति-यद्यपि नयायिकादयोऽपि परमाण्वात्मादिलक्षणं कारणं नित्यम्, द्व्यणुकज्ञानादिलक्षणं कार्यमनित्यमित्यभ्युपगच्छन्ति, तथापि नैतद् विशेषप्रतिपत्त्याधायकं मतान्तराणामपि बहूनामेतादृशानामेव सम्भवात्, किन्तु यन्मते एकं ब्रह्मैवाऽशेषस्य जगतोऽनित्यस्य कारणम्, प्रकृतिरेवकजातीया नित्यं कारणम्, ध्वंसोऽपि किञ्चित्कार्यायत्तस्वभावाऽनित्य एवेत्येवमुपगमः, तद् द्वैतमतमनेनाविष्कृतम्, तदेतन्मतं केषामिति न ज्ञायते। तत्रापि अनित्यं कार्यमित्यभ्युपगमेऽपि । कार्यं स्वरूपं नियमेन त्यजति कार्यसन्ततावेककार्यानन्तरं द्वितीयस्मिन् कार्ये समुत्पन्नं प्रथमं कायं स्वस्वरूपं सर्वथा परित्यजति, नवा केनचित् स्वरूपेणोत्तरकार्येऽनुगच्छत्यपीति न स्वरूपं नियमेन परित्यजतीत्येतादृशोऽपि भेदाऽभ्युपगमो नैगमनयविशेष एवेत्यर्थः । मूर्तैरेवेति-मूर्ते

एवं मूर्तैरेव मूर्तमारभ्यते, अमूर्तैरमूर्तम्, मूर्तैरमूर्तम्, अमूर्तैर्मूर्तम् इत्याद्यनेकधा निगमार्थः संमतिवृत्तौ व्यवस्थितः ॥

एतन्नयमालम्ब्य वैशेषिकदर्शनं प्रवृत्तम्, तन्मते–'द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाख्याः षडेव पदार्थाः' तत्र द्रव्याणि पृथिव्या-

---

रूपादिमद्भिः परमाण्वादिभिरेव, मूर्तं द्व्यणुकादिकम्, आरभ्यते उत्पद्यते। अमूर्तैः रूपादिविकलै रूपादिभिः, अमूर्तं रूपादिविकलं रूपादिकम्, 'आरभ्यते' इत्यनुवर्तते। मूर्तैः रूपादिमद्भिद्रव्यैः, अमूर्तं गुण-कर्मादिकम्, उत्पद्यते। अमूर्तैः कपालसंयोगादिभिः, मूर्तं घटादिकम्, उत्पद्यते। अनेकैरवयवैरेकमवयवि द्रव्यम्, अनेकैरवयविगुणैरेकोऽवयविगुणः, अनेकैर्मूर्तद्रव्यैस्त्रित्वादिसङ्ख्यालक्षणमेकममूर्तम्, सहस्रतन्तुकपटस्थलेऽनेकैस्तन्तुसंयोगैरेकं मूर्तं पटात्मकद्रव्यमुत्पद्यत इत्येवमनेकप्रकारेण निगमार्थो नैगमनयविषय इत्यर्थः। उक्ताऽनेकाऽभ्युपगमवादपरिज्ञानाय सम्मतिवृत्तिरवलोकनीयेत्याशयेनाह– सम्मतिवृत्तौ व्यवस्थित इति। एतन्नयमवलम्ब्य नैगमनयमवलम्ब्य। तन्मते वैशेषिकदर्शने। कारणाभावात् कार्याभाव इत्यादीनां दर्शनादभावोऽपि सप्तमः पदार्थो वैशेषिकाऽभ्युपगतोऽस्ति, ततश्च 'पदार्थाः' इत्यस्य भावपदार्था इत्यर्थः, तेन 'षडेव' इत्येवकारेणातिरिक्तस्य भावपदार्थस्यैव व्यवच्छेद इति बोध्यम्। तत्र षट्सु भावपदार्थेषु। द्रव्याणीति–द्रव्यत्वजातिमन्तीत्यर्थः, घृतादौ 'द्रव्यं द्रव्यम्' इत्युनुगतप्रत्यक्षाऽऽत्मकप्रतीतेरभावात् प्रत्यक्षप्रमाणस्य द्रव्यत्वेऽभावेऽप्यनुमानं तत्र प्रमाणम्, तथाहि–समवायसम्बन्धेन कार्यमात्रं द्रव्य एवोत्पद्यत इति समवायसम्बन्धेन कार्यं प्रति तादात्म्यसम्बन्धेन द्रव्यं कारणमिति, कार्यत्वं कारणत्वं च सखण्डोपाधिरूपत्वान्नियमतः किञ्चिद्धर्मावच्छिन्नम्, तथा येन सम्बन्धेन कार्यमुत्पद्यते तत्सम्बन्धावच्छिन्नं कार्यत्वं भवति, कार्याधिकरणे येन सम्बन्धेन वर्तमानं सत् कारणं तत्सम्बन्धावच्छिन्नं

दीनि नवैव, गुणा रूपादयश्चतुर्विंशतिरेव, कर्म उत्क्षेपणादि पञ्च-

कारणत्वम्, कार्यत्व-कारणत्वयोश्च निरूप्य-निरूपकभावसम्बन्धः, अन्यूनाऽनतिप्रसक्तधर्मस्यैव चाऽवच्छेदकत्वम्, तथा च समवाय-सम्बन्धावच्छिन्नकार्यत्वाच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धाव-च्छिन्नद्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना, यथा समवायसम्ब-न्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धा-वच्छिन्नकपालनिष्ठकारणता कपालत्वावच्छिन्नेति, अनेन निरुक्त-कारणतायां सामान्यतः किञ्चिद्धर्मावच्छिन्नत्वे सिद्धे, सा कार-णता न पृथिवीत्वावच्छिन्ना अधिकदेशवृत्तित्वात्, सा कारणता न सत्त्वाद्यवच्छिन्ना न्यूनदेशवृत्तित्वाद्, इतीतरबाधकानुमानेन द्रव्यत्वातिरिक्तधर्मावच्छिन्नत्वे व्यवच्छिन्ने सा कारणता द्रव्यत्वा-वच्छिन्ना द्रव्यत्वेतरधर्मानवच्छिन्नत्वे सति सावच्छिन्नत्वात्, यन्नैवं तन्नैवं यथा-घटादिकारणतेति केवलव्यतिरेकिपर्यवसितेन परिशेषानुमानेन निरुक्तकारणतावच्छेदकतया द्रव्यत्वजातिः सिध्यति, अनयैव रीत्या संयोगसमवायिकारणतावच्छेदकतया विभागसम-वायिकारणतावच्छेदकतया च द्रव्यत्वजातिसिद्धिर्ज्ञेया।

'पृथिव्यादीनि' इत्यादिपदाद् जल-तेजो-वाय्वाकाश-काल-दिगात्म-मनसां ग्रहणम्। 'नवैव' इत्येवकारेण तमस्सुवर्णादीनां द्रव्यान्तर-त्वस्य व्यवच्छेदः, तत्र तमस आवश्यकतेजोऽभावरूपत्वेन द्रव्यत्व-मेव नास्ति, सुवर्णस्य तेजसि अन्तर्भावः, तत्रानुमानं प्रमाणम्-सुवर्णं तैजसम् असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमान-जन्यद्रवत्वात्, यन्नैवं तन्नैव यथा-घृतादीति। तत्र गन्धवत्त्वं पृथिव्या लक्षणम्, पृथिवीत्वजातिमत्त्वं वा, पृथिवीत्वजातिस्तु गन्धसम-वायिकारणतावच्छेदकतया सिध्यति, पाषाणादावपि गन्धवत्त्वम-स्त्येव, अनुपलब्धिस्तु तत्र गन्धस्यानुत्कटत्वेनाप्युपपद्यते, अन्यथा

तन्नस्मनि गन्धोपलब्धिर्न स्यात्, भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वम्, यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमिति व्याप्तेः, दृष्टं च महापटध्वंसजन्ये खण्डपटे महापटोपादानोपादेयत्वमिति। स्नेहवत्त्वं जलस्य लक्षणम्, जलत्वजातिमत्त्वं वा, जन्यस्नेहसमवायिकारणतावच्छेदकतया जन्यजलत्वसिद्धिः, तदवच्छिन्नसमवायिकारणतावच्छेदकतया नित्य-जन्यजलसाधारणजलत्वजातिसिद्धिः। उष्णस्पर्शवत्त्वं तेजस्त्वजातिमत्त्वं वा तेजसो लक्षणम्, अत्रापि जन्योष्णस्पर्शसमवायिकारणतावच्छेदकतया जन्यतेजस्त्वस्य तदवच्छिन्नसमवायिकारणतावच्छेदकतया जन्य-नित्यतेजस्साधारणतेजस्त्वस्य सिद्धिः। अपाकजानुष्णाशीतस्पर्शवत्त्वं वायुत्वजातिमत्त्वं वा वायोर्लक्षणम्, अत्रापि जन्याऽपाकजानुष्णाशीतस्पर्शसमवायिकारणतावच्छेदकतया जन्यवायुत्वस्य तदवच्छिन्नसमवायिकारणतावच्छेदकतया जन्य-नित्यवायुसाधारणवायुत्वस्य सिद्धिः। शब्दवत्त्वमाकाशस्य लक्षणम्, तस्यैकत्वाद् व्यक्त्यभेदस्य जातिबाधकतया तत्राकाशत्वं न जातिः। मूर्तभिन्नत्वे सति कालिकपरत्वाऽपरत्वाऽसमवायिकारणसंयोगाश्रयत्वं कालस्य लक्षणम्, क्षण-लव-मासादिव्यवहारस्यौपाधिकत्वात् कालस्त्वेक एवेत्येकव्यक्तिवृत्तित्वात् कालत्वं न जातिः, कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणताशालित्वं वा कालस्य लक्षणम्, कालिकसम्बन्धेन जन्यमात्रं प्रत्येव तादात्म्यसम्बन्धेन कालस्य कारणत्वादुक्तलक्षणं तत्र समन्वेति। मूर्तभिन्नत्वे सति दैशिकपरत्वाऽपरत्वाऽसमवायिकारणसंयोगाश्रयत्वं दिशो लक्षणम्, 'प्राची-प्रतीची' इत्यादिदशदिग्व्यवहारस्योपाधिभेदत एवोपपत्तेर्दिश एकत्वेन तत्रैकव्यक्तिवृत्तित्वाद् दिक्त्वं न जातिः, दिक्कृतविशेषणतासम्बन्धेन जगत एव दिशि सत्त्वेन दिक्कृतविशेषणतासम्बन्धेन जगदाधारत्वमपि दिशो लक्षणं सम्भवतीति। ज्ञानवत्त्वमात्मसामान्यलक्षणम्, जन्य-

ज्ञानवत्त्वं जीवस्य, नित्यज्ञानवत्त्वमीश्वरस्य लक्षणम्, जीवास्त्वनेके विभवश्च, ईश्वरस्त्वेको विभुर्जगत्कर्ता च। ज्ञानादिगुणसाक्षात्कारकरणेन्द्रियत्वं मनसो लक्षणम्, आत्मभिन्नत्वे सति ज्ञानाद्यसमवायिकारणसंयोगाश्रयत्वमपि तल्लक्षणम्, मनसामनेकत्वात् तत्र मनस्त्वजातिसम्भवेन तादृग्जातिमत्त्वमपि तल्लक्षणं ज्ञेयम्॥

गुणः गुणत्वजातिमत्तः, द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन गुणत्वजातिसिद्धिः। द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं वा गुणस्य लक्षणम्। रूपादय इति- "रूप-रस-गन्ध-स्पर्शाः सङ्ख्या परिमाणानि पृथक्त्वं संयोग-विभागौ परत्वाऽपरत्वे बुद्धयः सुख-दुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" [वैशेषिकदर्शनोपस्कार] इति सूत्रे कण्ठतः सप्तदश चशब्देन च गुरुत्व-द्रव्यत्व-स्नेह-संस्कार-धर्माऽधर्म-शब्दाः सप्त दर्शिता इति मिलित्वा चतुर्विंशतिर्गुणाः, एवकारेण तदतिरिक्तगुणव्यवच्छेदः। तत्र चक्षुर्मात्रग्राह्यगुणत्वं रूपस्य लक्षणम्। रसनाग्राह्यगुणत्वं रसस्य लक्षणम्। घ्राणग्राह्यगुणत्वं गन्धस्य लक्षणम्। त्वगिन्द्रियमात्रग्राह्यगुणत्वं स्पर्शस्य लक्षणम्। गणनव्यवहाराऽसाधारणकारणगुणत्वं सङ्ख्याया लक्षणम्। मानव्यवहाराऽसाधारणकारणगुणत्वं परिमाणस्य लक्षणम्। पृथग्व्यवहाराऽसाधारणकारणगुणत्वं पृथक्त्वस्य लक्षणम्। संयुक्तव्यवहाराऽसाधारणकारणगुणत्वं संयोगस्य लक्षणम्। विभक्तव्यवहाराऽसाधारणकारणगुणत्वं विभागस्य लक्षणम्। परापरव्यवहाराऽसाधारणकारणगुणत्वे परत्वाऽपरत्वयोर्लक्षणे। सर्वव्यवहाराऽसाधारणकारणगुणत्वं बुद्धेर्लक्षणम्। अन्येच्छानधीनेच्छाविषयत्वं सुखस्य लक्षणम्। अन्यद्वेषानधीनद्वेषविषयत्वं दुःखस्य लक्षणम्। कामनास्वरूपत्वमिच्छाया लक्षणम्। क्रोधस्वरूपत्वं द्वेषस्य लक्षणम्। प्रवृत्ति-निवृत्ति-जीवनयोनियत्नान्यतमत्वं यत्नस्य लक्षणम्। तत्र चिकीर्षाद्वारेष्टसाधनताज्ञानजन्ययत्नत्वं प्रवृत्तेर्लक्षणम्, द्वेषद्वारा द्विष्ट-

विधमेव, सामान्यं परम् अपरं परापरं चेति त्रिविधम्, विशेषा

साधनताज्ञानजन्यफलत्वं निवृत्तेर्लक्षणम्, शरीरे प्राणसञ्चारकारणयत्नत्वं जीवनयोनियत्नस्य लक्षणम्। आद्यपतनाऽसमवायिकारणत्वं गुरुत्वस्य लक्षणम्। आद्यस्यन्दनाऽसमवायिकारणत्वं द्रवत्वस्य लक्षणम्। चूर्णादिपिण्डीभावहेतुगुणत्वं स्नेहस्य लक्षणम्। वेग-स्थितिस्थापकभावनान्यतमत्वं संस्कारस्य लक्षणम्, तत्र मूर्तमात्रवृत्तिसंस्कारत्वं वेगस्य लक्षणम्, क्षितिमात्रवृत्तिसंस्कारत्वं स्थितिस्थापकस्य लक्षणम्, अनुभवजन्यत्वे सति स्मृतिजनकत्वं भावनाया लक्षणम्। विहितक्रियाजन्यत्वे सति सुखसाधनत्वं धर्मस्य लक्षणम्। निषिद्धक्रियाजन्यत्वे सति दुःखसाधनत्वमधर्मस्य लक्षणम्। श्रोत्रग्राह्यगुणत्वं शब्दस्य लक्षणम्।

कर्मेति- संयोग-विभागोभयाऽसमवायिकारणत्वम् द्रव्यगुणभिन्नत्वे सति सामान्यवत्त्वं, कर्मत्वजातिमत्त्वं वा कर्मणो लक्षणम्, कर्मत्वजातिस्तु चलति गच्छतीत्यादिप्रत्यक्षसिद्धा। उत्क्षेपणादीति- 'उत्क्षेपणाऽवक्षेपणा-ऽऽकुञ्चन-प्रसारण-गमनानि' इति पञ्चविधं कर्म, 'भ्रमण-रेचन-स्पन्दनोर्ध्वज्वलन-तिर्यग्गमनानि' इति तु गमनान्तर्गतान्येवेति पञ्चविधकर्माधिककर्मव्यवच्छेदक एकारः। तत्र ऊर्ध्वदेशसंयोगानुकूलं कर्म उत्क्षेपणम्, अधोदेशसंयोगानुकूलं कर्म अवक्षेपणम्, अवयवानां परस्परसन्निकृष्टदेशसंयोगानुकूलं कर्म आकुञ्चनम्, अवयवानां विप्रकृष्टदेशसंयोगानुकूलं कर्म प्रसारणम्, अनियतदिग्देशसंयोगानुकूलं कर्म गमनमित्येवमुत्क्षेपणादीनां लक्षणमवसेयम्।

सामान्यमिति- नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणम्, अनुगतबुद्धिनिमित्ततया कार्य-कारणभावाव्यवच्छेदकतया शब्दप्रवृत्तिनिमित्ततया च सामान्यस्य सिद्धभवात्। परमात- तच्च सामान्य 'परसामान्यमपरसामान्यं परापरसामान्यं च' इति त्रिविधम्, परत्वमधिकदेशवृत्तित्वम्, सर्वजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्ताजातिः परसामान्यम्, न्यूनदेशवृत्तित्वमपरत्वम्, सर्वजात्यपेक्षया

नित्यद्रव्यवृत्तयोऽनन्ता एव, समवायस्त्वेक एव, इत्यादि निरपेक्षतया सामान्य-विशेषाभ्यां बहुधा प्रपञ्चितम्, तच्चायुक्तम्—'नव द्रव्याणि, चतुर्विंशतिर्गुणाः' इत्यादिस्ववचनानुरोधेनैव संख्याया

न्यूनदेशवृत्तित्वात् घटत्व-पटत्वादि जातिरपरसामान्यम्, यच्च किञ्चिज्जात्यपेक्षयाऽधिकदेशवृत्ति किञ्चिज्जात्यपेक्षया च न्यूनदेशवृत्ति तच्च परापरसामान्यमुच्यते, यथा—द्रव्यत्वादि सामान्यम्, तद्धि पृथिवीत्वादिजात्यपेक्षयाऽधिकदेशवृत्ति सत्ताऽपेक्षया च न्यूनदेशवृत्ति भवतीति, एवं पृथिवीत्वादिकमपि घटत्वाद्यपेक्षयाऽधिकदेशवृत्तित्वात् द्रव्यत्वाद्यपेक्षयाऽल्पदेशवृत्तित्वात् पराऽपरसामान्यमिति।

विशेषा इति— जातिभिन्नत्वे सति नित्यद्रव्यवृत्तित्वे सति स्वतो व्यावृत्तत्वं विशेषस्य लक्षणम्।

समवाय इति— प्रतियोग्ययुतसिद्धानियतसम्बन्धत्वं समवायस्य लक्षणम्।

एतावता वैशेषिकमतमुपवर्ण्य प्रतिक्षिपति— तच्चायुक्तमिति— वैशेषिकमतं चायुक्तमित्यर्थः। अयुक्तत्वे हेतुमाह— नव द्रव्याणीति—'नवैव' इत्यनेन द्रव्येषु नवत्वसंख्यायाः, 'चतुर्विंशतिरेव' इत्यनेन गुणेषु चतुर्विंशतित्वसङ्ख्यायाः, 'पञ्चविधमेव' इत्यनेन कर्मसु पञ्चत्वसङ्ख्यायाः, 'त्रिविधम्' इत्यनेन सामान्ये त्रित्वसङ्ख्यायाः, 'अनन्ताः' इत्यनेन विशेषेष्वनन्तत्वसङ्ख्यायाः, 'एक एव' इत्यनेन समवाये एकत्वसङ्ख्यायाः प्रतिपादनेन स्वयमेव वैशेषिकेन षट्पदार्थवृत्तितया सङ्ख्याया उपगतत्वेन द्रव्यादयो न षट्पदार्थवृत्तय इति षट्पदार्थेष्वनन्तर्भूता सङ्ख्याऽतिरिक्ततयाऽभ्युपगतैवेति षडेव पदार्था इति पदार्थविभजनमयुक्तमित्यर्थः।

ननु द्रव्यगतैव गुणस्वरूपा सङ्ख्या द्रव्ये समवायसम्बन्धेन प्रतीयते, गुणादौ तु स्वसमवायिसमवेतत्वसम्बन्धेन प्रतीयते, घट-पटादयस्तु चतुर्विंशतिरपीति घट-पटादिगतचतुर्विंशतित्वमादाय

अतिरिक्तत्वात्, न च द्रव्य-गुणादिषु संख्याप्रतीतौ सम्बन्धांशेऽपि वैलक्षण्यमनुभूयते, येन द्रव्ये समवायेन तत्प्रतीतिः, गुणादौ तु संयुक्त[स्वाश्रय]समवायादिनेति वक्तुं शक्यते ।

किञ्च, शक्तिरप्यतिरिच्यते, मण्यादिसमवहितेन वह्निना दाह-वारणाय मण्यादिसमवधानेन कुण्ठनीयाया नाश्याया वा दाहानुकूलाया वह्निनिष्ठायाः शक्तेः स्वीकार्यत्वात् । न च, उत्तेजका-

---

गुणेषु चतुर्विंशतित्वप्रतीत्युपपत्तिः, एवं कर्मादावपि पञ्चत्वादि-सङ्ख्याप्रतीत्युपपत्तिरित्यर्थः आह– न चेति– अस्य 'अनुभूयते' इत्यनेन सम्बन्धः । येन सम्बन्धांशे वैलक्षण्यानुभवेन । तत्प्रतीतिः– सङ्ख्या-प्रतीतिः । 'समवायादिना' इत्यादिपदात् स्वाश्रयसमवेतसमवाय-स्वाश्रयविशेषणत्वादेरुपग्रहः । वस्तुतः परम्परासम्बन्धेन तत्प्रतीत्यु-पपादने द्रव्यगतचतुर्विंशतित्ववदन्यसङ्ख्याया अपि गुणे, कर्मणि पञ्चत्वसङ्ख्यावदन्यसङ्ख्याया अपि, जात्यादावप्यन्यसङ्ख्यायाश्च सम्भवेन 'चतुर्विंशतिरेव' इत्यादावेवकारेणान्यसङ्ख्याव्यवच्छेदो न भवेदित्यपि बोध्यम ।

एवं द्रव्यादिभ्योऽतिरिक्तायाः शक्तेरपि सम्भवात् षट्पदार्थ-विभजनमनुपपन्नमित्याह– किञ्चेति । शक्तिरपि– इत्यपिना सङ्ख्यातिरिक्त-त्वस्य समुच्चयः । यदि दाहं प्रति वह्नेर्वह्नित्वेन कारणत्वं तदा मणि-समवहितोऽपि वह्निर्वह्नेरेवेति ततोऽपि दाहः स्याद् , अतो दाहं प्रति वह्नेर्दाहानुकूलशक्तिमत्त्वेन कारणत्वमवश्यमभ्युपेयम् , एवं च मणिसम-वधाने सा शक्तिः कुण्ठिता भवति, ततो न सा दाहानुकूला, अथवा विन-श्यत्येवेति दाहानुकूलशक्तिमद्वह्नेर्मणिसमवधानकालेऽभावान्न दाहः, मणिसमवधानाऽभावे पुनर्दाहानुकूलशक्तिरकुण्ठिता भवति, जायते वेति दाहानुकूलशक्तिमद्वह्नेः सत्त्वाद् दाह उपजायत इति शक्तिपदार्थ-सिद्धिरित्याह– मण्यादिसमवहितेनेति– आदिपदान्मन्त्रौषधादीनां ग्रहणम् । अत्र नैयायिकाऽऽशङ्कामुत्थाप्य प्रतिक्षिपति-न चेति-अस्य 'वाच्यम्' इत्युत्त-

भावविशिष्टमण्याद्यभावस्यैव दाहहेतुत्वेन तत्र दाहवारणाच्छक्ति-कल्पनावैयर्थ्यम् , न चैवं गौरवम् , तत्रापि तदभावस्य शक्त्यादि-हेतुत्वस्वीकाराद् , वस्तुतो रूपादिध्वंसाऽऽत्मकदाहे तद्धेतुत्वे गौर-

---

रेण योगः। उत्तेजकमण्यादिसमवधाने चन्द्रकान्तमण्यादिसमवधानेऽपि वह्निना दाहो जायत इति मणित्वादिना मण्यादे प्रतिबन्धकत्वं तदभावस्य च दाहं प्रति कारणत्वमिति न सम्भवति, किन्तूत्तेजकाऽभावविशिष्ट-मणेस्तत्त्वेन प्रतिबन्धकत्वम् ,उत्तेजकाऽभावविशिष्टमणित्वाद्यवच्छिन्न-प्रतियोगिताकाऽभावत्वेन च कारणत्वमित्याशयेन 'उत्तेजकाभावविशिष्ट०' इति मण्यादेर्विशेषणतयोपात्तम् , उत्तेजकत्वं च प्रकृते प्रतिबन्धकता-वच्छेदकीभूताभावप्रतियोगित्वम् । 'मण्याद्यभावस्यैव' इत्येवकारेण न वह्नेर्व्यवच्छेदः , तथा सति वह्नेरभावेऽपि केवलोक्ताऽभावतो दाहः स्यात् , किन्तु शक्तेरेव व्यवच्छेदः । तत्र मण्यादिसमवहितवह्नि-स्थले। ननु शक्तिवादिनो दाहं प्रति दाहानुकूलशक्तिमत्त्वेनैकमेव कारणत्वम् , भवतां तु निरुक्ताऽभावत्वेनोक्ताऽभावस्य दाहं प्रति कारणत्वम् , वह्नेश्च वह्नित्वेन तं प्रति कारणत्वमिति द्विविधकारण-परिकल्पनमिति गौरवमित्याशङ्कां प्रतिक्षिपति- न चेति। एवं प्रतिबन्धकाभावस्य दाहं प्रति कारणत्वाङ्गीकारे। निषेधे हेतुमाह- तत्राऽपीति- दाहं प्रति शक्तिमत्त्वेन कारणत्वपक्षेऽपीत्यर्थः, मणि-समवधानकाले शक्तिनाशे मणिसमवधानाऽभावकाले शक्त्युत्पत्तये दाहानुकूलशक्तिं प्रति उत्तेजकाऽभावविशिष्टमण्याद्यभावस्य कारण-त्वस्वीकारादित्यर्थः। दाहं प्रति उत्तेजकाऽभावविशिष्टमण्याद्य-भावस्य न कारणत्वं किन्तु विजातीयवह्निं प्रत्येव, तावताऽपि मण्यादियुक्ते दाहाऽसम्भवान्न शक्तिकल्पनाऽऽवश्यकी, दाहं प्रति च विजातीयवह्नेरेव कारणत्वमिति न तं प्रति कारणत्वद्वयकल्पना-प्रयुक्तगौरवमपीत्याह- वस्तुत इति। तद्धेतुत्वे उत्तेजकाऽभावविशिष्ट-मण्याद्यभावस्य कारणत्वे। तथा दाहं प्रत्येव निरुक्ताऽभावस्य

वाद्, मण्यादियुक्ते तृणादौ वह्न्याद्युत्पत्तेर्वारणीयाच्च विजातीयवह्नौ-

कारणत्वे मण्यादियुक्ते तृणादौ दाहो मा जायतां वह्न्याद्युत्पत्तिस्तु स्यादेवाऽतस्तद्वारणाय विजातीयवह्निं प्रत्येवोत्तेजकाऽभावविशिष्ट-मण्याद्यभावो हेतुः। मणिसमवधानस्थलेऽपि पूर्वपूर्ववह्निनोत्तरोत्तर-वह्निरुत्पद्यत एव, अन्यथा स्वकारणेन्धनादुत्पन्नस्य वह्नेः प्रतिक्षणं स्वावयवस्यान्यत्र गमनतो विनाशे वह्न्यन्तरस्याऽनुत्पादे च वह्न्य-भावादेव वह्निलक्षणकारणाऽभावान्न दाह इति किमित्युत्तेजकाऽभाव-विशिष्टमण्यभावस्य कारणत्वकल्पनया? तथा च वह्निरूपकारण-सद्भावान्मणिसंयुक्ततृणादेर्दाहः स्यादतो मणेस्तत्र प्रतिबन्धकत्वं तदभावस्य च कारणत्वमुपेयते, यदा च तृणादिदाहं प्रति वह्नित्वेन वह्नेर्न कारणत्वं किन्तु तृणजन्यवह्नौ वैजात्यमुपेयते, तादृशवैजात्येन वह्नेस्तृणादिदाहं प्रति कारणत्वम्, तादृशविजातीयवह्निं प्रत्युत्तेज-काभावविशिष्टमण्याद्यभावस्य कारणत्वम्, एवं चोत्तेजकाभाव-विशिष्टमण्याद्यभावस्य कारणत्वम्, एवं चोत्तेजकाभावविशिष्ट-मण्यादिसमवधानस्थले पूर्वपूर्ववह्निनोत्तरोत्तरवह्निर्जायत एव किन्तु तृणादिदाहजनकतावच्छेदकवैजात्यकलितस्तु वह्निर्न जायत इति तादृशविजातीयवह्निरूपकारणाभावादेव न तृणादेर्दाह इति न तृणा-दिदाहं प्रत्युत्तेजकाभावविशिष्टमण्याद्यभावस्य कारणत्वमिति वह्नि-सामान्यं प्रति नोक्ताभावस्य कारणत्वं किन्तु विजातीयवह्निं प्रत्ये-वेत्येतदवगमाय 'विजातीय' इति वह्नौ विशेषणम्। नन्वेवं मण्यादि-संयुक्ते तृणादौ विजातीयवह्निर्मा जायतां पूर्ववह्निना मण्यादिसंयुक्ते तृणादौ दाहः स्यादिति चेत्? न- 'स्वजन्यवह्नेरेव स्वस्मिन् दाहजन-कत्वम्' इति नियमेन मण्यादिसंयुक्ततृणादितो वह्नेरनुत्पादेन पूर्व-वह्नेश्च मण्यादिसंयुक्ततृणाद्यजन्यत्वेन ततो निरुक्ततृणादेर्दाहाऽ-सम्भवादित्याह- मण्यादियुक्त इति। 'वारणीयाच्च' इति स्थाने 'वारणी-यत्वाच्च' इति पाठो युक्तः। स्वजन्येति- तृणादिजन्यवह्नेरेव तृणादौ दाहजनकत्वादित्यर्थः। मण्यादियुक्त इति- मण्यादियुक्ततृणादिजन्यस्य

वेवोक्ते तत्काभाववविशिष्टमण्याद्यभावो हेतुः, 'स्वजन्यवह्नेरेव स्वस्मिन् दाहजनकत्वाद्' मण्यादियुक्ते न दाह इति वाच्यम् ; अपरिदृश्यमानाऽनुद्भूतरूपविलक्षणवह्नेस्तज्जनकाऽदृष्टविशेषादेश्च कल्पनायां गौरवाद् दाहजनकशक्तिकल्पनाया एव न्याय्यत्वात्, मण्यादि-

---

वह्नेरभावान्न मण्यादियुक्ते तृणादौ दाह इत्यर्थः। निषेधे हेतुमाह- अपरिदृश्यमानेति- मणिसमवधानात् प्राग् यादृशो वह्निस्तृणादिदाहकारी उपलम्भगोचरस्तादृश एव वह्निस्तत्समवधानकालेऽपि दृश्यते, तत्र मण्यादिसमवधानकाले तृणादिजनको विजातीयवह्निर्नास्ति, किन्तु तद्विजातीयवह्निरेव पूर्ववह्निसमुत्थो यः सन्नपि न तृणादिजनकः, ईदृशो वह्निस्तृतवैजात्याऽग्रहणतोऽपरिदृश्यमानः, अत एवाऽनुद्भूतरूपः-अनुद्भूतं रूपं यस्येति व्युत्पत्त्या अनुद्भूतरूपवान्, तत एव च मणिसमवधानप्राक्कालीनवह्नितो विलक्षणः, एवम्भूतस्य वह्नेः, अस्य 'कल्पनायाम्' इत्यनेन सम्बन्धः, स च वह्निस्तृणादितो न जायते, किन्तु पूर्ववह्नेरेवेति यदि तदा तत्सहकारी अदृष्टविशेषोऽवश्यमभ्युपेयः, अन्यथाऽदृष्टविशेषनिरपेक्षात् केवलादेव वह्नेस्तादृशवह्नेरुत्पत्त्यभ्युपगमे सर्वत्र वह्नितस्तादृशवह्नेरुत्पत्तिः स्यादिति तादृशवह्निजनकाऽदृष्टविशेषादेश्च कल्पनायां गौरवादित्यर्थः। एतच्च 'वस्तुतः' इत्यादिना दर्शितस्य विजातीयवह्निं प्रत्युत्तेजकाभावविशिष्टमण्याद्यभावकारणत्वस्य प्रतिक्षेपे हेतुतयाऽभिहितम्। यच्च, उत्तेजकाभावविशिष्टमण्याद्यभावस्य दाहं प्रति कारणत्वे आशङ्कितस्य गौरवस्य परिहारायोक्तम्- शक्तिं प्रति परेणापि उत्तेजकाभावविशिष्टमण्याद्यभावस्य कारणत्वस्य कल्पनीयतया तुल्यत्वमेवेति तत्प्रतिक्षेपायाह- मण्यादीति- तथा च शक्तिस्वीकारपक्षे न शक्तिं प्रति निरुक्ताभावस्य कारणत्वं कल्प्यते, किन्त्वप्रतिबद्धस्वकारणादेव मण्यादिसमवधानापगमे शक्त्युत्पत्तिरिति दाहं प्रति निरुक्ताभावस्य कारणत्वकल्पने गौरवं स्यादेवेत्यर्थः। एतच्च न मया स्वबुद्ध्यैवोत्प्रेक्षितं श्रीमद्भिर्देवसूरिभिः स्याद्वादरत्नाकरे प्रतिपा-

समवधानापगमानन्तरं शक्त्युत्पत्तिस्त्वप्रतिबद्धस्वकारणादेवेत्याकरे व्यवस्थितम् । अप्रतिबद्धत्वं च मण्यादिसमवधानापगमकालविशेषविशिष्टत्वम् , कालविशेषस्य सम्बन्धघटकत्वं च यथा त्वयाऽभावीयविशेषणताविशेषादौ वाच्यं तथाऽस्माभिः कारणपरिणामविशेष

दितमित्याह– आकरे व्यवस्थितमिति । न त्वप्रतिबद्धत्वं शक्तिकारणे प्रतिबन्धकाभावविशिष्टत्वमेवेति शक्तिकारणतावच्छेदकतया प्रतिबन्धकाभावस्वीकार आवश्यकः, एवं च दाहं प्रति उत्तेजकाभावविशिष्टमण्याद्यभावलक्षणप्रतिबन्धकाभावविशिष्टवह्नेः कारणत्वमिति कारणतावच्छेदकतैव निरुक्ताभावेऽस्त्विति समानमेव, यदि च निरुक्ताभावविशिष्टवह्नेः कारणत्वं वह्निविशिष्टनिरुक्ताभावस्य वा कारणत्वमिति विनिगमनाविरहाद् गुरुधर्मावच्छिन्नकारणत्वद्वयकल्पनापेक्षया पृथगेव प्रतिबन्धकाभावस्य वह्नेश्च कारणत्वमिति कारणताद्वयं स्यादेवेति विभाव्यते, तदा शक्ति प्रत्यप्रतिबद्धशक्तिकारणस्य कारणत्वपक्षेऽप्युक्तयुक्त्या कारणताद्वयं स्यादेवेति तदवस्थं तुल्यत्वमित्यत आह- अप्रतिबद्धत्वं चेति । मण्यादीति–यस्मिन् काले मण्यादिसमवधानापगमस्तत्कालविशेषविशिष्टत्वमप्रतिबद्धत्वम् , तत्र कालविशेषस्य परिचायक एव मण्यादिसमवधानापगमो न तु तत्कोटिप्रविष्ट इति न तस्य कारणतावच्छेदकत्वम् , तत्तत्कालीनतत्तद्भूतलादिकं तत्तद्भावानां सम्बन्ध इत्यभ्युपगच्छता वैशेषिकेणाऽप्यभावीयविशेषणताविशेषात्मकस्वरूपसम्बन्धस्य घटकत्वं कालविशेषस्योपेयते, तत्र कालविशेषस्य परिचायकमेव घटशून्यत्वादिकम् , तथा शक्तिकारणपरिणामविशेषे घटकत्वं कालविशेषस्य, तत्परिचायक एव मण्यादिसमवधानापगम इत्याह— काल विशेषस्येति । त्वया वैशेषिकेण । अस्माभिः शक्त्यभ्युपगन्तृभिः । यदि च कालविशेषविशिष्टवह्निरेव दाहजनकः , कालविशेषस्य परिचायक एवोत्तेजकाभावाविशिष्टमण्याद्यभाव इति न वैशेषिकमतेऽपि प्रतिबन्धकाभावस्य कारणत्वम् , नवा दाहा-

इति युक्तमुत्पश्यामः । किञ्च, तृणादिजन्यवह्नौ वैजात्यस्याऽनानुभविकत्वात् तज्जन्यतावच्छेदकवैजात्यत्रयादिकल्पनातस्तृणादौ जनकतावच्छेदकैकशक्तिकल्पनैव लघीयसी, तृणनिर्मथनादितो वह्न्यनुत्पादस्तु तृणफूत्कारादिसमवधानस्याप्येकशक्तिमत्त्वेन हेतुत्वात् ।

व्यर्थं शक्तिकल्पनाया आवश्यकत्वमिति परो ब्रूयात् तदा शक्त्यभ्युपगमे युक्त्यन्तरमुपदर्शयति- किञ्चेति । तृणा-ऽरणि-मणीनामेकैकसद्भावेऽपि वह्निरुपजायते, तत्र सामान्यतो वह्नित्वावच्छिन्नं प्रति तृणत्वादिना तृणादेः कारणता तृणाभावेऽप्यरणेस्तदभावेऽपि मणेर्वह्न्युत्पादाद् व्यभिचारेण न सम्भवतीति विजातीयवह्नित्वावच्छिन्नं प्रति तृणत्वेन तृणस्य, विजातीयवह्नित्वावच्छिन्नं प्रति अरणित्वेनारणेः, विजातीयवह्नित्वावच्छिन्नं प्रति मणित्वेन मणेश्च कारणत्वमिति तृणादिजन्यतावच्छेदकतया वह्निगतं वैजात्यत्रयमभ्युपगम्य कारणतात्रयं कल्पनीयमिति तदपेक्षया लाघवात् तृणाऽरणि-मणिषु वह्न्यनुकूलशक्तिमत्त्वमभ्युपेत्य तृणा-ऽरणि-मणीनां वह्न्यनुकूलशक्तिमत्त्वेन वह्नित्वावच्छिन्नं प्रत्येकमेव कारणत्वं कल्पनीयम्, न च वह्नौ वैजात्यत्रयमनुभूयते येनानुभवानुरोधेन गुरूभूताऽपि तत्कल्पना युक्ता स्यादित्याह- तृणादिजन्यवह्नाविति- आदिपदादरणि-मण्योरुपग्रहः । तज्जन्यतावच्छेदकेति- तृणादिजन्यतावच्छेदकेत्यर्थः । 'वैजात्यत्रयादि' इत्यादिपदात् कारणतात्रयपरिग्रहः । ननु तृणादीनां यथैकशक्तिमत्त्वेन कारणत्वं तथैव निर्मन्थनादीनामप्येकशक्तिमत्त्वेन कारणत्वमित्येकशक्तिमतोऽपरशक्तिमदेव सहकारीति निर्मन्थनसहकृतात् तृणात् फूत्कारसमवहितादरणेः फूत्कारसमवहितान्मणेर्वा वह्न्युत्पत्त्यापत्तिरित्यत आह- तृणनिर्मन्थनादित इति- आदिपदान्मणिफूत्कारादेरुपग्रहः । 'तृणफूत्काराद्' इत्यादिपदादरणि-निर्मन्थन-मणिसूर्यकिरणप्रतिफलनयोरुपग्रहः, तथा च तृणफूत्कारसमवधानादेरेवैकशक्तिमत्त्वेन कारणत्वम्, न तु तृण-निर्मन्थनादेरिति, ततो वह्न्यनुत्पादो युक्त एवेत्यर्थः । शक्तिकल्पने युक्त्य-

किञ्च, व्रीह्यादिजननियामकोऽपि शक्तिविशेषोऽवश्यं कल्पनीयः, अन्यथा व्रीहिवापे व्रीह्यादीनामारम्भकपरमाण्वन्तभङ्गे 'व्रीह्यारम्भकपरमाणुभिर्व्रीहय एव जन्यन्ते' इति नियमो न स्यात्, तैरपि कदाचिद् यवारम्भात् । न च पाकजविलक्षणरूपरसादिविशिष्टपरमाणूनां यवाद्यारम्भकत्वान्नोक्तनियमानुपपत्तिः, यत्र पाकजा न विशेषास्तत्र जलादौ क्वचिदुद्भूतं रूपादिकं क्वचिन्न इत्यत्र नियामकाभावात् तदनु-

---

न्तरमाह- किञ्चेति । अन्यथा व्रीह्यादिजननियामकशक्तेरनङ्गीकारे । ननु व्रीह्यारम्भकपरमाणवोऽन्य एव, तदन्य एव च यवाद्यारम्भकपरमाणव इति व्रीह्यनुकूलशक्तिमत्त्वादिना व्रीहिं प्रति व्रीह्यारम्भकपरमाणूनामकारणत्वेऽपि विलक्षणपरमाणुत्वादिना परमाणूनां व्रीह्यादिं प्रति कारणत्वतोऽपि व्रीह्युत्पत्तिनियमः स्यादेवेत्यत आह- तैरपीति- व्रीह्यारम्भकपरमाणुभिरपीत्यर्थः, शक्त्यनङ्गीकारे व्रीह्यारम्भकपरमाणूनां जातिविशेषाभावात् तैः कदाचिद् व्रीहेरुत्पत्तिः कदाचिद् यवादेरुत्पत्तिरिति नियमो नियामकविशेषाभावान्न भवेत्, शक्तिस्वीकारे तु शक्तिविशेष एव नियामक इति यदा ते व्रीह्युत्पत्त्यनुकूलशक्तिमत्त्वेन परिणतास्तदा तैर्व्रीहेरुत्पत्तिः, यदा यवोत्पत्त्यनुकूलशक्तिमत्त्वेन परिणतास्तदा तैर्यवोत्पत्तिरित्येवं नियम उपपद्यत इत्याशयः। स्वरूप-जात्यादिकृतविशेषाभावेऽपि पाकजरूपादिकृतवैलक्षण्यसंभवतस्तत्तद्व्रीह्युत्पत्तिनियमो भवतीत्याशङ्क्य प्रतिक्षिपति- न चेति। निषेधे हेतुमाह- यत्रेति- पाकजा रूप-रस-गन्ध-स्पर्शाः पृथिव्यामेव न जलादावित्यत वैशेषिकैरभ्युपगमाज्जलादिपरमाणूनां पाकजरूपादिकृतं वैलक्षण्यं नास्त्येव, अथापि क्वचिज्जलादावुद्भूतं रूपादिकम्, क्वचिज्जलादौ च तन्नास्तीत्यत उद्भूतरूपाद्यनुकूलशक्तिमद्भिः परमाणुभिरुद्भूतजलरूपाद्युत्पत्तिः, अनेवम्भूतैरनुद्भूतरूपाद्यनुकूलशक्तिमद्भिः परमाणुभिरनुद्भूतजलरूपाद्युत्पत्तिरित्येवमेव स्वीकरणीयतया तदनुकूलशक्तेरावश्य-

कूलशक्तेरवश्यं स्वीकार्यत्वात् । न च तत्र शक्तिविशेषप्रयोजनकादृष्टविशेषादेवोद्भूतरूपादिसम्भवः, परिणामवादे तथातथापरिणतस्वकारणादेव शक्त्युत्पत्तेरभ्युपगमात् तत्रादृष्टविशेषहेतुत्वाकल्पनात्, न

कत्वादित्यर्थः। ननु येष्वेव परमाणुष्वनुद्भूतरूपजननशक्तिस्तेष्वेव परमाणुषु कदाचिदुद्भूतरूपजननशक्तिरित्येतदर्थं तादृशशक्तिविशेषजनकोऽदृष्टविशेषः शक्तिवादिभिरवश्यमभ्युपगन्तव्यः, तथा चाऽदृष्टविशेषाभ्युपगमस्यावश्यकत्वे तादृशादृष्टविशेषसहकृतेभ्यः परमाणुभ्य एवोद्भूतरूपादेरुत्पत्तिः, अलमतिरिक्तशक्तिविशेषकल्पनयेत्याशङ्क्य प्रतिक्षिपति- न चेति। तत्र शक्त्यभ्युपगन्तुः, 'अभिमतात्' इति शेषः, तस्य 'अदृष्टविशेषात्' इत्यनेनान्वयः। प्रतिक्षेपे हेतुमाह- परिणामवाद इति। तथातथेति- तत्तच्छक्तिजननस्वभावतयेत्यर्थः। तत्र शक्त्युत्पत्तौ, अदृष्टे वैजात्यरूपविशेषोऽपि साङ्कर्यान्न सम्भवतीत्याह- न चेति- अपाकजजलादिगतानुद्भूतरूपादिकं प्रति अदृष्टविशेषस्य पुण्यत्वेन कारणत्वं न सम्भवति, यत्र न पुण्याद् तादृशरूपाद्युत्पत्तिः किन्तु पापादेव तत्र व्यभिचारेण तादृशरूपादिनिष्ठकार्यतानिरूपितकारणताया अवच्छेदकत्वस्य पुण्यत्वेऽभावात्, नाऽपि पापत्वेन यत्र पुण्यात् तादृशरूपाद्युत्पत्तिस्तत्र व्यभिचारेण तादृशरूपादिनिष्ठकार्यतानिरूपितकारणताया अवच्छेदकत्वाऽसम्भवात्, नाऽपि पुण्यविशेष-पापविशेषसाधारणवैजात्यविशेषेण तयोस्तथा कारणत्वं सम्भवति, पुण्यत्वाऽभाववति निरुक्तरूपविशेषजनकपापविशेषे निरुक्तवैजात्यस्य तादृशवैजात्याऽभाववति कार्यान्तरजनकपुण्यविशेषे पुण्यत्वस्य सत्त्वेन तयोः परस्पराऽभावसामानाधिकरण्यम्, पुण्यविशेषे च निरुक्तरूपादिजनके तादृशवैजात्यस्य पुण्यत्वस्य च सत्त्वेन सामानाधिकरण्यमित्येवं पुण्यत्वेन समनुक्तदिशा पापत्वेनाऽपि समं साङ्कर्यात् तादृशवैजात्यस्यैवाऽसिद्धेरित्यर्थः।

ननु मास्त्वदृष्टविशेषः, एवमपि शक्तिविशेषो नोक्तनियमानुरोधेन कल्पनीयः, यस्यावयविनोऽवयवे उद्भूतरूपादिकं तत्रावय-

चादृष्टे पाप-पुण्यरूपे साङ्कर्यादनुगतविशेषसम्भवः। न चावयवोद्भूत-रूपादिकमेवावयव्युद्भूतरूपादिजनकमिति नोक्तनियमानुपपत्तिः, योग्या-ऽयोग्यजलारम्भकपरमाणुभेदाभ्युपगमे गौरवाद्, वाय्वाद्याकृष्टसुरभिभागाद्यारब्धतायाश्चम्पकादावनुपपत्तेश्च। न चेष्टापत्तिः, एवं सति गृह्यमाणकर्पूरादिभागानां कर्पूराद्यनारम्भकाणामपगमाभ्युपगमे कर्पूरादेर्वाय्वादिनाऽप्रक्षयप्रसङ्गादिति दिग् ॥

विन्यवयवोद्भूतरूपादित उद्भूतरूपादिकमुत्पद्यते, यस्यावयविनः पुनरवयवेऽनुद्भूतरूपादिकं तत्रावयविन्यवयवानुद्भूतरूपादितोऽनुद्भूतरूपादिकमुत्पद्यत इति नियमसम्भवादित्याशङ्कां प्रतिक्षिपति– न चेति। पार्थिवपरमाणौ पाकादुद्भूता-ऽनुद्भूतरूपविशेषसम्भवेऽपि जलादिपरमाणुषु पाकासम्भवान्नित्यान्येव तेषूद्भूतान्यनुद्भूतानि च रूपादीनीति येषूद्भूतानि रूपादीनि ते योग्याः परमाणवो येष्वनुद्भूतानि तेऽयोग्याः परमाणव इत्येवं जलारम्भकपरमाणुभेदाभ्युपगमे गौरवं प्रसज्यते, तथा यैरेव पार्थिवपरमाणुभिरुद्भूतरूपादिमद्भिश्चम्पकादिकमुत्पद्यते तैरेव पार्थिवपरमाणुभिः सङ्कटितस्यावयव्यात्मनश्चम्पकभागस्य वाय्वाद्याकृष्टस्य गन्धमात्रमुपलभ्यते न तु रूपादिकमतस्ते परमाणवो नोद्भूतरूपादिमन्तस्तदारब्धत्वेन सम्मता भागा अप्यनुद्भूतरूपादिमन्तो वाय्वाद्याकृष्टा इति तदारब्धत्वमुद्भूतरूपादिमतश्चम्पकादेर्न स्यादिति निषेधहेतुमुपन्यस्यति– योग्यायोग्येति। चम्पकादौ वाय्वाद्याकृष्टसुरभिभागारब्धत्वानुपपत्ताविष्टापत्तिमाशङ्क्य प्रतिक्षिपति– न चेति। निषेधे हेतुमाह– एवं सतीति– चम्पकादौ वाय्वाद्याकृष्टसुरभिभागाद्यारब्धत्वाभावाभ्युपगम इत्यर्थः। वाय्वादिनाऽऽकृष्टा ये कर्पूरादिभागा उपलभ्यमानगन्धकास्ते यदि न कर्पूराद्यारम्भकास्ते कर्पूराद्यनवयवा एवेति तेषामपगमेऽपि कर्पूरादीनां क्षयो न स्यात्, न चात्रेष्टापत्तिस्तत्क्षयस्यानुभूयमानत्वादित्युद्भूतानुद्भूतरूपादिनियामकतयोद्भूतरूपादिजननानुकूलशक्तिविशेषोऽवश्यमभ्युपगन्तव्य इति

वैशिष्ट्यमप्यतिरिच्यते, जलादौ वह्न्याद्यभावप्रमायाः सम्बन्धनियतत्वाद्, अभावस्य संयोगादिबाधादतिरिक्तसम्बन्धसिद्धेः। न च, स्वरूपसम्बन्धेनैव तत्प्रमासम्भवान्न वैशिष्ट्यसिद्धिः, अतिरिक्तवैशिष्ट्यप्रमायामपि तथैव वाच्यत्वादिति वाच्यम्; समवायोच्छेद-

---

शक्तेरपि पदार्थान्तरतया परिगणनमुचितम्, तदनभिधानात् षोढा पदार्थविभजनं वैशेषिकाणामनुचितमित्याह- गृह्यमाणेति।

वैशिष्ट्यनामकस्य पदार्थान्तरस्य सत्त्वादपि षोढा पदार्थविभजनमयुक्तमित्याह- वैशिष्ट्यमप्यतिरिच्यत इति। जलादाविति- जलादौ वह्न्याद्यभावप्रमा तदा भवेद् यदि जलादौ वह्न्याद्यभावस्य कश्चित् सम्बन्धः स्यात्, सम्बन्धमन्तरेण प्रमात्मकविशिष्टबुद्ध्यनुपपत्तेः, न च संयोगादिरभावस्य सम्बन्ध इति वैशिष्ट्याख्योऽतिरिक्तः सम्बन्धोऽभ्युपगन्तव्य इत्यर्थः, अत्र वह्न्यभाववान् जलादिरिति विशिष्टप्रमा विशेषण-विशेष्यसम्बन्धनिमित्तका विशेषण-विशेष्यसम्बन्धविषया वा विशिष्टप्रमात्वाद् दण्डी पुरुष इति विशिष्टप्रमावदित्यनुमानप्रयोगो बोध्यः। ननूक्तविशिष्टप्रमा स्वरूपसम्बन्धेनैव भविष्यति, अतिरिक्तवैशिष्ट्याभ्युपगमेऽपि तद्विशिष्टप्रमायाः स्वरूपसम्बन्धविषयकत्वस्य स्वरूपसम्बन्धनिमित्तकत्वस्य वावश्यमनवस्थाभयेनाङ्गीकरणीयतयाऽभावविशिष्टबुद्धेरेव स्वरूपसम्बन्धनिमित्तकत्वस्य स्वरूपसम्बन्धविषयकत्वस्य वा स्वीकारौचित्यादित्याशङ्कां प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः। तत्प्रमासम्भवात् जलादौ वह्न्याद्यभावप्रमासम्भवात्। तथैव वाच्यत्वात् स्वरूपसम्बन्धनिमित्तकत्वस्यैव वाच्यत्वात्, तद् वरं प्रथमत एव स्वरूपसम्बन्धनिमित्तकत्वस्वीकार इति निगर्वः। निषेधे हेतुमाह- समवायोच्छेदप्रसङ्गादिति- गुण-क्रियादिविशिष्टबुद्धिर्विशेषण-विशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेनैव संयोगादिबाधात् समवायसिद्धिरुपेयते भवद्भिः, सोऽपि न स्यात्, गुणक्रियादिविशिष्ट-

प्रसङ्गात्। न च, गुण-गुण्यादिस्वरूपद्वये सम्बन्धत्वमतिरिक्तसमवाये वेत्यत्र विनिगमकाभावेनापि तत्सिद्धिः, न चैवं प्रकृते, अभावस्यानुगतत्वेन तस्यैव सम्बन्धत्वादिति वाच्यम्; एवमपि जाति-व्यक्ति-

---

बुद्धेरपि स्वरूपसम्बन्धविषयकत्वेनैव सम्भवादिति समवाय उच्छेद्येतेत्यर्थः। अत्र पराकूतमाशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः, प्रतियोग्यनुयोगिभिन्नसम्बन्धमन्तरेण विशिष्टबुद्धिनियामकत्वमेव प्रतियोगिस्वरूपेऽनुयोगिस्वरूपे वा स्वरूपसम्बन्धत्वमिष्यते, रूपवान् घट इति विशिष्टबुद्धौ रूपस्वरूपस्य घटस्वरूपस्य वा संसर्गतया भानमित्यत्र विनिगमकस्य कस्यचिदभावात् स्वरूपद्वयस्य संसर्गतया भानमभ्युपेयम्, तदपेक्षया लाघवादेकस्यैवातिरिक्तस्य समवायस्य संसर्गतया भानकल्पनमुचितमिति गुण-गुण्यादीनां समवायसम्बन्धसिद्धिः, बह्वयभाववान् जलादिरिति विशिष्टबुद्धौ च जलादीनामनुयोगिनामनेकत्वादनेकतत्स्वरूपाणां संसर्गविधया भानकल्पनापेक्षया बह्वयभावस्वरूपस्यैकस्यैव संसर्गविधया भानकल्पनमुचितमिति विनिगमकस्य सम्भवेनाभावस्वरूपस्यैव संसर्गत्वमिति नातिरिक्तस्य वैशिष्ट्यस्य संसर्गतया कल्पनमुचितमिति नातिरिक्तवैशिष्ट्यसिद्धिरिति शङ्कानिर्मूलितोऽर्थः। तत्सिद्धिः समवायसिद्धिः। न चैवं प्रकृते अभावविशिष्टबुद्धौ विनिगमनाविरहात् स्वरूपद्वयसंसर्गत्वकल्पनापेक्षयाऽतिरिक्तवैशिष्ट्यस्य सम्बन्धत्वकल्पनमिति वैशिष्ट्यसिद्धिर्न च। तस्यैव अभावस्वरूपस्यैव, एवकारेणाधिकरणानामनुगतत्वेन तत्स्वरूपाणां सम्बन्धत्वव्यवच्छेदः। निषेधे हेतुमाह-एवमपीति-उक्तयुक्त्या गुण-गुण्यादीनामतिरिक्तसमवायसम्बन्धसिद्धावपीत्यर्थः। जातीति-जातिविशिष्टव्यक्तिबुद्धौ व्यक्तीनामानन्त्यात् तत्स्वरूपाणामनन्तानां संसर्गत्वकल्पनापेक्षयैकस्या जातेः स्वरूपस्यैकस्य सम्बन्धत्वकल्पने लाघवमिति विनिगमकस्य सत्त्वेन जातिस्वरूपस्य संसर्गविधया भानसम्भवेन नातिरिक्तस्य समवायस्य संसर्गतया भानमिति तद्विशिष्टबुद्धिनिमित्ततया

स्थले समवायोच्छेदप्रसङ्गात् । न च, समवायेन जन्यभावत्व-संयोगत्वाद्यवच्छिन्ने द्रव्यत्वादिना हेतुत्वात् समवायसिद्धिः, न च स्वरूपेण तत्सम्भवः, स्वरूपाणामानन्त्येन गौरवात्, कालिकादिस्व-

---

जाति-व्यक्त्योः समवायो न सिध्येदित्यर्थः ।

प्रकारान्तरेण समवायसिद्धिमाशङ्क्य प्रतिक्षिपति–न चेति– अस्य 'वाच्यम्' इत्यनेनान्वयः, जन्यभावमात्रं समवायेन द्रव्य एवोत्पद्यते, संयोगो विभागो वा समवायेन द्रव्य एवोत्पद्यते, ततस्तन्नियमनाय समवायसम्बन्धेन जन्यभावत्वावच्छिन्नं प्रति समवायसम्बन्धेन संयोगत्वावच्छिन्नं प्रति च तादात्म्यसम्बन्धेन द्रव्यत्वेन द्रव्यं कारणमिति तादात्म्यसम्बन्धावच्छिन्नद्रव्यत्वावच्छिन्नद्रव्यनिष्ठकारणतानिरूपितजन्यभावत्वाद्यवच्छिन्नजन्यभावादिनिष्ठकार्यतावच्छेदकसम्बन्धतया समवायसिद्धिरित्यर्थः । ननु स्वरूपेण जन्यभावत्वाद्यवच्छिन्नं प्रत्येव तादात्म्येन द्रव्यत्वेन द्रव्यं कारणमस्त्विति निरुक्तकारणतानिरूपितनिरुक्तकार्यताया अवच्छेदकसम्बन्धः स्वरूपमेवास्त्विति न समवायसिद्धिरित्याशङ्कां प्रतिक्षिपति– न चेति । तत्सम्भवः जन्यभावत्वाद्यवच्छिन्नकार्यत्वसम्भवः । कालिकादीति–कालिकसम्बन्धस्यापि स्वरूपसम्बन्धतया तेन सम्बन्धेन जन्यभावस्य स्वप्नादावप्युत्पद्यमानत्वेन तत्र तादात्म्येन द्रव्यस्याभावेन व्यभिचारेण स्वरूपसम्बन्धेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यत्वावच्छिन्नस्य कारणत्वासम्भवेन स्वरूपसम्बन्धस्य निरुक्तकारणतानिरूपितनिरुक्तकार्यतावच्छेदकत्वासम्भवादित्यर्थः । निषेधे हेतुमाह– तथापीति– व्यभिचारेण स्वरूपसम्बन्धस्य निरुक्तकार्यतानवच्छेदकत्वेऽपीत्यर्थः । यथा समवायसम्बन्धेन जन्यभावमात्रं द्रव्य एवोत्पद्यत इत्यभ्युपगमस्तव तथा जन्यभावमात्रं वैशिष्ट्यसम्बन्धेन द्रव्य एवोत्पद्यत इत्यभ्युपगमो ममापि सम्भवतीति निरुक्तकार्यतावच्छेदकसम्बन्धतया वैशिष्ट्यमेवाभ्युपगम्यताम्, तच्च

रूपेण स्पन्दादेरपि जन्यभाववत्त्वाच्चेति वाच्यम् ; तथापि कालिक-विशेषणतादिभिन्नपदार्थमात्राधारतानियामकसम्बन्धस्यैव सिद्धौ तस्यैव वैशिष्ट्याभिधानत्वात्, तेन जन्यभावादेः कार्यत्वोक्तौ दोषाभावात्। न च, प्रतियोगितया घटादिसमवेतनाशे स्वप्रतियोगि-समवेतत्वेन घटादिनाशस्य हेतुत्वात् समवायसिद्धिः, स्वप्रतियोगि-

---

वैशिष्ट्यं न जन्यभावस्य स्पन्दादाविति न व्यभिचार इत्याह-कालिकेति। 'पदार्थमात्राधारताऽनियामक०' इत्यकारप्रश्लेषः, अथवाऽकार-प्रश्लेषो न कर्तव्यः, पदार्थमात्रं- पदार्थ एव हि निरुक्तसम्बन्धेन स्व-स्वप्रतिनियताधिकरणे वर्तत इति तदपि पदार्थमात्राधारतानियामक-मिति बोध्यम्। तस्यैव निरुक्तसम्बन्धस्यैव। तेन वैशिष्ट्यसम्बन्धेन।

परस्य समवायसिद्धये प्रकारान्तमाशङ्क्य प्रतिक्षिपति-न चेति-अस्य 'वाच्यम्' इत्यनेनान्वयः। प्रतियोगितासम्बन्धेन घटादिसम-वेतनाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटादिनाशस्य हेतुत्वम्, घटादिनाशः स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटादिसम-वेते वर्तत इति तत्र घटादिसमवेतनाशोऽपि प्रतियोगितासम्बन्धे-नोत्पद्यत इति, स्वप्रतियोगिसमवेतत्वं च स्वप्रतियोगिनिरूपित-समवायसम्बन्धावच्छिन्नवृत्तित्वमिति कारणतावच्छेदकसम्बन्ध-घटकतया समवायसिद्धिरित्यर्थः। ननु स्वप्रतियोगिनिरूपितवृत्तित्व-सम्बन्धेनैव घटादिनाशस्य हेतुत्वमस्त्विति कारणतावच्छेदकसम्बन्ध-कोटौ समवायस्याऽप्रवेशान्न समवायसिद्धिरित्यत आह-स्वप्रतियोगि-वृत्तित्वेनेति-स्वप्रतियोगिनिरूपितवृत्तित्वसम्बन्धेनेत्यर्थः। घटादीति-घटादिवृत्तिर्यः संयोगादिध्वंसस्तत्र स्वप्रतियोगिनिरूपितवृत्तित्व-सम्बन्धेन घटादिनाशस्य सत्त्वात् घटादिसमवेतनाशस्तत्र प्रतियोगि-तया जायेतेति घटादिवृत्ति[संयोगादि]ध्वंसस्य ध्वंसः स्यादित्यर्थः। ननु घटादिसमवेतनाशस्य प्रतियोगिता घटादिसमवेते वर्तते घटादि-वृत्तिध्वंसस्तु घटादिसमवेत एव न भवतीति घटादिवृत्तिध्वंस-

वृत्तित्वेन हेतुत्वे घटादिवृत्तिध्वंसध्वंसापत्तेरिति वाच्यम्; तवाऽपि जात्यादौ तदापत्तेर्महाप्रलयाऽवृत्तित्वेन सत्त्वेन वा प्रतियोगिनो हेतुत्वध्रौव्ये ममापि ध्वंसे तदनापत्तेः। न च स्वप्रतियोगिसमवायि-

---

ध्वंसस्य कार्यतावच्छेदकघटादिसमवेतनाशत्वरूपधर्मानाक्रान्तत्वादेव न तदापत्तिरिति चेत्, न- यतः कार्यतावच्छेदकधर्मकोटौ समवेतत्वनिवेशे तद्घटकतयैव समवायसिद्धिः स्याद्, अतः कार्यतावच्छेदककोटौ समवेतत्वपदेन समवायसम्बन्धावच्छिन्नवृत्तित्वं न विवक्षितम्, किन्तु वृत्तित्वमात्रमेव विवक्षितमिति बोध्यम्। निषेधे हेतुमाह-तवापीति-समवायाभ्युपगन्तुरपीत्यर्थः। तदापत्तेः प्रतियोगितया ध्वंसापत्तेः, घटादिनाशरूपकारणस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटादिसमवेतजात्यादावपि सत्त्वात्। ननु प्रतियोगितासम्बन्धेन नाशं प्रति तादात्म्यसम्बन्धेन प्रतियोग्यपि कारणम्, तस्य कारणत्वं च महाप्रलयावृत्तित्वेन सत्त्वेन वा, तथा च प्रतियोगिनिष्ठतादात्म्यसम्बन्धावच्छिन्नकारणतावच्छेदकस्य महाप्रलयावृत्तित्वस्य सत्त्वस्य वाऽभावान्न जात्यादौ प्रतियोगितया ध्वंसापत्तिरित्यत आह- महाप्रलयावृत्तित्वेनेति। ममापि समवायमनभ्युपगम्य स्वप्रतियोगिवृत्तित्वसम्बन्धेनैव घटादिनाशस्य हेतुत्वाभ्युपगन्तुरपि। तदनापत्तेः प्रतियोगितासम्बन्धेन ध्वंसानापत्तेः, घटादिवृत्तिध्वंसस्य महाप्रलयवृत्तित्वेन सत्त्वलक्षणजात्यनाक्रान्तत्वेन च तादात्म्यसम्बन्धेन महाप्रलयावृत्तिस्वरूपस्य सत्त्वलक्षणजातिमतश्चानाश्रयत्वात् तद्रूपकारणाभावादित्यर्थः। ननु प्रतियोगितासम्बन्धेन घटादिसमवेतनाशं प्रति घटादिनाशस्य स्वप्रतियोगिसमवायिकारणकत्वसम्बन्धेन कालावच्छिन्नस्वप्रतियोगिसमवेतत्वसम्बन्धेन वा कारणत्वम्, तावतैव समवायाभ्युपगन्तृमते न जात्यादौ प्रतियोगितया नाशापत्तिः, घटादिनाशप्रतियोगिघटादि-समवायिकारणकत्वस्य नित्यत्वेन, तेनैव च कालावच्छिन्नघटसमवेतत्वस्य जात्यादावभावेन तत्सम्बन्धेन

कारणत्वेन कालावच्छिन्नस्वप्रतियोगिसमवेतत्वेन वा नाशकत्वस्वीकारान्मम न जात्यादौ तदापत्तिरिति वाच्यम्, सम्बन्धमध्ये समवायिकारणत्व-कालावच्छिन्नत्वप्रवेशापेक्षया लाघवात् सत्त्वनिवेशस्यैवौचित्येन मत्पक्ष एव दोषाभावात्। न च, घटादिसमवेतनाशमात्रे न घटादिनाशो हेतुः, घटादिकालीनतद्वृत्ति-क्रिया-संयोग-विभाग-वेग-द्वित्वादिनाशे व्यभिचारात्, किन्तु प्रति-

---

घटादिनाशस्य तत्राभावादित्याशङ्कां प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः। मम समवायाभ्युपगन्तुः, 'मते' इति शेषः। तदापत्तिः प्रतियोगितासम्बन्धेन ध्वंसापत्तिः। निषेधे हेतुमाह- सम्बन्धमध्य इति- सम्बन्धकोटावित्यर्थः। सत्त्वनिवेशस्यैवेति- प्रतियोगितासम्बन्धेन घटादिसमवेतनाशं प्रति सत्त्वे सति स्वप्रतियोगिवृत्तित्वसम्बन्धेन घटादिनाशस्य हेतुमित्येव स्वीकरणीयम्, सत्त्वस्य जात्यादाविव घटादिवृत्तिध्वंसेऽप्यभावात् तत्र प्रतियोगितया नाशापत्तेरयोगादित्यर्थः। मत्पक्षे समवायानभ्युपगन्तृमते। एवकारोऽप्यर्थकः। समवायवादिनः शङ्कामुद्भाव्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेन सम्बन्धः। घटादिसमवेतनाशमात्रे घटादिनाशस्य कुतो न हेतुत्वमित्यपेक्षायामाह- घटादिकालीनेति- घटादिकालीनो यः, तद्वृत्तेः- घटादिवृत्तेः, क्रिया-संयोग-विभाग-वेग-द्वित्वादेर्नाशः, तत्र व्यभिचारात् व्यतिरेकव्यभिचारात्, घटादिसत्त्वदशायां घटादिनाशस्याभावेऽपि घटादिवृत्तिक्रियासंयोग-विभाग-वेग-द्वित्वादिनाशस्य भावात्। तर्हि कीदृशः कार्यकारणभावोऽभ्युपेय इत्यपेक्षायामाह- किन्विति- प्रतियोगितया इत्यस्य प्रतियोगितासम्बन्धेनेत्यर्थः, अयं च नाशवन्निष्ठप्रतियोगितानिरूपकनाशनिष्ठा या नाशवन्नाशत्वावच्छिन्ना कार्यता तदवच्छेदकः सम्बन्धः, 'नाशवद्' इत्यत्र नाशवत्त्वे 'स्वप्रतियोगिसमवेतत्वस्वाधिकरण-

योगितया स्वप्रतियोगिसमवेतत्व-स्वाधिकरणत्वोभयसम्बन्धेन नाश-वन्नाशत्वावच्छिन्न एव स्वप्रतियोगिसमवेतत्वेन नाशत्वावच्छिन्नस्य

त्वाभयसम्बन्धेन' इत्यास्यान्वयः, नाशत्वावच्छिन्ना नाशनिष्ठा या जनकता तदवच्छेदकसम्बन्धश्च स्वप्रतियोगिसमवेतत्वमिति 'स्वप्रतियोगिसमवेतत्वेन' इत्यस्य 'हेतुत्वाद्' इत्यनेनान्वयः, घट-नाशात् तद्गतरूपादिनाशे तद्गतरूपादिनाशो निरुक्तनाशवन्नाशत्व-लक्षणकार्यतावच्छेदकधर्माक्रान्त इत्थमवसेयः- नाशो घटनाशः, तस्य स्वप्रतियोगिसमवेतत्वं घटगतरूपादौ वर्तते, स्वं घटनाशः, तत्प्रतियोगी घटः, तत्र समवायसम्बन्धेन रूपादिकं वर्तत इति तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्वरूपं तत्समवेतत्वं सम-स्तीति घटनाशोत्पत्त्यनन्तरक्षणे घटगतरूपादिर्नश्यतीति घटनाशोत्पत्ति-क्षणे समस्त्येवेति स्वसमानकालीने जन्ये कालिकसम्बन्धेन स्वाधिकरणत्वमनुगतमिति घटनाशस्य कालिकसम्बन्धेन स्वाधिकर-णत्वमपि घटगतरूपादौ वर्तत इति भवति घटगतरूपादिः स्वप्रति-योगिसमवेतत्व-स्वाधिकरणत्वोभयसम्बन्धेन घटनाशवानिति तन्निष्ठ-प्रतियोगिताको नाशो घटगतरूपादिनाशो नाशवन्नाशत्वलक्षणकार्य-तावच्छेदकधर्माऽऽक्रान्तः, स च प्रतियोगितासम्बन्धेन घटगतरूपादा-वुत्पद्यते, तत्र नाशत्वलक्षणकारणतावच्छेदकधर्माक्रान्तो घटनाशो-ऽपि कारणतावच्छेदकीभूतेन स्वप्रतियोगिसमवेतत्वसम्बन्धेन वर्तते, स्वं घटनाशः, तत्प्रतियोगी घटः, तन्निरूपितसमवायसम्बन्धावच्छिन्न-वृत्तित्वलक्षणतत्समवेतत्वं घटगतरूपादौ समस्तीति निरुक्तकार्य-कारणभावबलाद् घटनाशेन घटगतरूपादिनाशो युज्यते। निरुक्त-कार्यकारणभावस्याभावाच्च न घटनाशेन घटगतजात्यादेर्नाशः, तथाहि- यद्यपि घटनाशः स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटगतजातौ वर्तते, स्वं घटनाशः, तत्प्रतियोगी घटः, तन्निरूपितसमवायसम्बन्धावच्छिन्न-वृत्तित्वलक्षणतत्समवेतत्वं घटगतजातौ समस्तीति, तथापि नित्यानां

हेतुत्वान्न जात्यादेर्नाशापत्तिः, परस्य तु ध्वंसध्वंसापत्तिर्दुर्वारेति

कालिकसम्बन्धेन जन्यमात्रे कालोपाधौ सत्त्वेऽपि कालानुपाधौ नित्ये न कस्यापि कालिकसम्बन्धेन वृत्तिरिति न नित्यं कालिकसम्बन्धेन कस्याप्यधिकरणमिति घटगतजातौ घटनाशस्य न कालिकसम्बन्धावच्छिन्नघटनाशनिष्ठनिरूपकतानिरूपिताधिकरणत्वलक्षणस्वाधिकरणत्वसम्बन्ध इति घटगतजातिर्न घटनाशवतीति तन्निष्ठप्रतियोगिताकनाशो न नाशवन्नाशत्वलक्षणकार्यतावच्छेदकाक्रान्त इति न घटनाशात् तद्गतजातिनाशापत्तिरिति। निरुक्तकार्यकारणभावे घटकाले तद्गतक्रियानाशे व्यतिरेकव्यभिचारोऽपि न भवति, यतः तद्गतक्रियायां तद्घटनाशस्योत्तरकालभाविनः स्वप्रतियोगी तद्घटः, तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्वरूपतत्समवेतत्वस्य सत्त्वेऽपि घटगतक्रियाकाले न घटनाश इति विभिन्नकालीनघटनाशस्य कालिकसम्बन्धावच्छिन्नस्वनिष्ठनिरूपकतानिरूपिताधिकरणत्वलक्षणस्वाधिकरणत्वस्याभावान्निरुक्तोभयसम्बन्धेन घटनाशवती घटगतक्रिया न भवति, ततस्तन्निष्ठप्रतियोगिताकनाशस्य नाशवन्नाशत्वलक्षणनिरुक्तकार्यतावच्छेदकधर्मानाक्रान्तत्वेन घटनाशस्य तं प्रति कारणत्वाभावेन तदभावे तस्य भावस्य व्यतिरेकव्यभिचाररूपत्वाभावात्। परस्य त्वित्यादि– समवायानभ्युपगन्तुर्वैशिष्ट्यसम्बन्धवादिनः परस्य पुनः, स्वमते तावत्, घटगतस्य पाकजरूपादिनाशस्य संयोग-विभागादिनाशस्य क्रियानाशस्य च नाशापत्तिर्न सम्भवति, यतो घटगतक्रियादिनाशः स्वप्रतियोगिसमवेतत्वस्वाधिकरणत्वोभयसम्बन्धेन न किञ्चिन्नाशवान्, कस्यापि नाशस्य प्रतियोगिनि समवायसम्बन्धेन वृत्तित्वस्य क्रियादिनाशेऽभावादिति क्रियादिनाशनिष्ठप्रतियोगिताकनाशो नाशवन्नाशत्वरूपकार्यतावच्छेदकधर्माक्रान्तो न भवति, सम्भाव्यमानः स च प्रतियोगितासम्बन्धेन क्रियादिनाशे उत्पद्येत, न च तत्रासमवेते स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशोऽपि

विद्यत इति, वैशिष्ट्यसम्बन्धवादिमते पुनः स्वप्रतियोगिसमवेतत्व-सम्बन्धस्थाने स्वप्रतियोगिनिरूपितवैशिष्ट्यसम्बन्धावच्छिन्नवृत्ति-त्वस्वरूपस्य स्वप्रतियोगिवैशिष्ट्यसम्बन्धस्यैव प्रवेशः, एवं च घटगतक्रियादिध्वंसः स्वप्रतियोगिवैशिष्ट्यस्वाधिकरणत्वोभयसम्ब-न्धेन घटनाशवान् भवति, ततो घटगतक्रियादिध्वंसनिष्ठप्रतियोगिताक-ध्वंसो निरुक्तनाशवन्नाशत्वरूपकार्यतावच्छेदकधर्माक्रान्तः प्रतियोगि-तया घटगतक्रियादिनाशे उत्पद्येत, तत्र घटनाशोऽपि स्वप्रतियोगिनि-रूपितवैशिष्ट्यसम्बन्धावच्छिन्नवृत्तित्वलक्षणस्वप्रतियोगिवैशिष्ट्य-सम्बन्धेन वर्तत इति निरुक्तकार्यकारणभावाभ्युपगमेऽपि ध्वंस-ध्वंसापत्तिरित्यर्थः, नाशवन्नाशत्वलक्षणकार्यतावच्छेदकधर्मघट-कनाशवत्त्वं स्वप्रतियोगिसमवेतत्व-स्वाधिकरणत्वोभयसम्बन्धेन सम-वायसम्बन्धवादिनो यदभिमतं, तत्र स्वप्रतियोगिसमवेतत्वसम्बन्धस्य प्रवेशो ध्वंसस्य नाशवत्त्वाभावसम्पादनाय, ध्वंसस्य नाशवत्त्वाभावे च ध्वंसध्वंसस्य नाशवन्नाशत्वलक्षणकार्यतावच्छेदकधर्माक्रान्त-त्वान्नापत्तिसम्भवः, कालिकसम्बन्धेन स्वाधिकरणत्वसम्बन्धस्य प्रवेशस्तु घटादिकालीनघटादिवृत्तिक्रियादिनाशे व्यतिरेकव्यभिचार-वारणाय, समानकालीनयोरेव कालिकसम्बन्धस्याभ्युपगमेन घट-वृत्तिघटकालीनक्रियाया असमानकालीनघटनाशस्य कालिकसम्बन्धे-नाधिकरणत्वासम्भवात्, यथा घटकालीनघटगतक्रियायाः कालिक-सम्बन्धेन घटनाशाधिकरणत्वाभावेन निरुक्तोभयसम्बन्धेन नाशव-त्त्वाभावाद् घटगतक्रियानाशस्य नाशवन्नाशत्वलक्षणकार्यतावच्छेदक-धर्माक्रान्तत्वाद् घटनाशलक्षणकारणमन्तरेण तद्भावेऽपि न व्यति-रेकव्यभिचारः, तथा घटगतजातौ घटनाशस्य कालिकसम्बन्धेन नाधिकरणत्वं नित्ये कालिकायोगादिति नाशवन्नाशत्वलक्षणकार्यता-वच्छेदकधर्मस्य जातिनाशेऽभावादेव न तदापत्तिर्घटनाशादिति तदा-पत्तिवारणमपि स्वाधिकरणत्वसम्बन्धनिवेशप्रयोजनम्, एतदभि-सन्धायैव कालिकसम्बन्धेन स्ववृत्तित्वं घटादिगतघटादिकालीन-

क्रियादिनाशे व्यतिरेकव्यभिचारवारणप्रयोजनकमपि जातिनाशापत्ति-वारणासमर्थत्वात् परित्यज्य कालिकसम्बन्धेन स्वाधिकरणत्वं सम्बन्धमध्ये समवायवादिना निवेशितम्, नित्ये कालिकायोग इति नियमतो यथा न जातौ घटध्वंसस्य कालिकसम्बन्धेनाधिकरणत्वं तथोक्तनियमादेव नित्याया जातेर्न कालिकसम्बन्धेन घटध्वंस-निरूपितवृत्तित्वमित्येतावताऽपि नाशवन्नाशत्वलक्षणकार्यतावच्छेदक-धर्मानाक्रान्तत्वान्न घटगतजातिनाशस्य घटनाशादापत्तिरिति न चेतसि निधेयम्, यत 'इदानीं घटोऽस्ति, इदानीं पटो नास्ति' इत्यादिप्रतीत्या पतत्काले घटस्य सत्त्वम्, पतत्काले पटस्यासत्त्वं चो-रीकरणीयम्, तत्र पतत्कालो यदि वर्तमानसूर्यपरिस्पन्द-स्तदा तेन सह घटस्य संयोगसमवायादिलक्षणः साक्षात्सम्बन्धो नास्तीति घटस्य स्वसंयुक्तसंयुक्तवृत्तित्वं सूर्यपरिस्पन्दे सूर्यपरि-स्पन्दस्य च स्वाश्रयसंयुक्तसंयुक्तत्वं घटे सम्बन्धो वाच्यः, उक्तपरम्परा-सम्बन्धघटकश्च कालः, यतः स्वं घटः, तत्संयुक्तः कालः, तत्सं-युक्तः सूर्यः, तद्वृत्तित्वं सूर्यपरिस्पन्दे वर्तते, एवं स्वं सूर्यपरिस्पन्दः, तदाश्रयः सूर्यः, तत्संयुक्तः कालः, तत्संयुक्तत्वं घटे समस्तीति सोऽयं परम्परासम्बन्धः कालं घटकतयोपादायैव सम्भवतीति कालस्यावश्यस्वीकर्तव्यत्वे तत्तत्सूर्यपरिस्पन्दावच्छिन्नकाल एव घटादेः स्वरूपसम्बन्धः साक्षादुररीकरणीयः, स च स्वरूपसम्बन्धः कालकृतत्वात् कालिक इत्युच्यते, कालश्च विभुर्नित्यो द्रव्यस्वरूपो महाकाल इति व्यपदिश्यते, तत्र च कालिकसम्बन्धेन सर्वं वस्तु वर्तते नित्यानामपि महाकाले कालिकसम्बन्धेन वृत्तित्वं समस्त्येव, कालिकसम्बन्धेन जगदाधारत्वमेव महाकालस्यान्यतो वैलक्षण्यम्, तथा च 'इदानीं तदानीम्' इत्यादिप्रतीतिविषयो यदि महाकाल एव, तदा तस्य कालिकसम्बन्धेन किञ्चिदनधिकरणत्वस्याभावेन 'इदानीं स घटो नास्ति, तदानीं स घटो नासीदेव' इत्यादिप्रतीति-र्नोपपद्येत, अतः तत्तत्सूर्यपरिस्पन्दाद्युपाध्यवच्छिन्नकालस्यैव 'इदानीं

तदानीम् ' इत्यादिप्रतीतिविषयत्वम्, इत्थं च तत्तत्कालोपाधित्वाज्जन्यस्य सूर्यपरिस्पन्दादेरपि कालत्वमुपचर्यत इति तत्रापि कालिकसम्बन्धेन तत्समानकालीनः पदार्थो वर्तते, जन्यस्य च तत्तद्वस्तुनः स्वासमानकालीनजन्यालिङ्गितकालतः स्वकालस्य व्यावर्तकत्वादुपाधित्वसम्भवेऽपि सर्वकालावस्थायिनो नित्यस्य न कस्यचित् कालस्य व्यावर्तकत्वमिति न नित्यस्य कालोपधित्वम्, कालोपाधित्वाभावाच्च न तत्रोपचरितमपि कालत्वमिति कालानात्मके नित्ये न कस्यापि कालिकसम्बन्धेन वृत्तित्वम्, नित्यं पुनर्महाकाले कालोपाधौ जन्ये च कालिकसम्बन्धेन वर्तत एव, नित्ये कालिकायोग इति नियमोऽपि नित्ये कालिकसम्बन्धानुयोगित्वनिषेधमेव प्रतिपादयति, कालिकसम्बन्धप्रतियोगित्वं च नित्येऽपि समस्त्येवेति भवति, कालिकसम्बन्धेन स्वाधिकरणत्वस्य सम्बन्धमध्ये प्रवेशे नाशवन्न जातिरिति तन्नाशो न निरुक्तनाशवन्नाशत्वलक्षणकार्यतावच्छेदकधर्माक्रान्त इति, स्वाधिकरणत्वसम्बन्धस्थाने कालिकसम्बन्धेन स्ववृत्तित्वनिवेशेनापि घटकालीनघटगतक्रियायामसमानकालीनायां कालिकसम्बन्धेन घटनाशनिरूपितवृत्तित्वविरहात् तेन सम्बन्धेन नाशवत्त्वाभावात् तन्नाशस्य निरुक्तनाशवन्नाशत्वलक्षणकार्यतावच्छेदकधर्मानाक्रान्तत्वाद् व्यतिरेकव्यभिचारवारणं सम्भवत्येव, जातिश्च नित्यत्वाज्जन्ये घटनाशोऽपि कालोपाधौ कालिकसम्बन्धेन वर्तत इति नाशवती भवति, ततो जातिनाशो यदि भवेद् भवेदपि तन्नाशस्य निरुक्तकार्यतावच्छेदकधर्माक्रान्तत्वाद् घटनाशापत्तिः, एवं समवायस्य स्वरूपसम्बन्धः समवाय एवेति स्वप्रतियोगिसमवेतत्वसम्बन्धो घटनाशस्यास्ति नित्यत्वाच्च समवायस्येति कालिकसम्बन्धेन घटनाशवृत्तित्वमप्यस्तीति तन्नाशो यदि भवेद् भवेत् तस्यापि निरुक्तकार्यतावच्छेदकधर्माक्रान्तत्वाद् घटनाशादापत्तिः, किन्तु प्रतियोगितया नाशं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनोऽपि कारणत्वमुररीक्रियते, जातेर्नित्यत्वान्यथानुपपत्त्या जातिनाशो न

वाच्यम्; स्वाधिकरणत्वस्थाने कालिकसम्बन्धेन स्ववृत्तित्वस्य सम्बन्धमध्यनिवेशे दोषाभावात्, प्रतियोगिनो विशिष्य हेतुत्वेन

भवति, तदुपपत्तये च प्रतियोगितया नाशं प्रति तादात्म्यसम्बन्धेन जातिर्न कारणम्, एवं नित्यान्तरमपि न कारणमित्येतावतैव जात्यादेर्न नाशापत्तिः, एवं ध्वंस्य ध्वंसो यदि भवेत् तदा तत्प्रतियोगिन उन्मज्जनमापद्यत इति ध्वंस्य ध्वंसो न भवति, तदुपपत्तये प्रतियोगितया ध्वंसं प्रति तादात्म्यसम्बन्धेन न ध्वंसस्य कारणत्वम्, यस्य ध्वंसो भवति तस्यैव तत्प्रतियोगितया ध्वंसं प्रति तादात्म्यसम्बन्धेन कारणत्वमित्येतावता ध्वंसस्यापि ध्वंसापत्तिर्न भवतीति प्रतियोगितया स्ववृत्तित्वसम्बन्धेन नाशवन्नाशं प्रति स्वप्रतियोगिनिरूपितवैशिष्ट्यसम्बन्धावच्छिन्नवृत्तित्वलक्षणस्वप्रतियोगिवैशिष्ट्यसम्बन्धेन घटनाशस्य कारणत्वमिति सुसङ्गतमेवेत्यभिप्रायवान् वैशिष्ट्यवादी प्रतिक्षेपहेतुमुपन्यस्यति– स्वाधिकारणत्वस्थान इति। दोषाभावात् व्यतिरेकव्यभिचारलक्षणदोषाभावात्।

यद्वा, घटादिनाशाद् घटादिसमवेतरूपादेर्नाशो भवति, न तु घटादिसमवेतघटत्वादिजातेरित्यस्योपपत्तये स्वाधिकरणत्वस्य सम्बन्धकुक्षौ प्रवेशः, तत्र वैशिष्ट्यवादी कथयति– स्वाधिकरणत्वनिवेशमन्तरापि जातिध्वंसापादनवारणसम्भवात् स्वाधिकरणत्वं तत्र न निवेश्यम्, यतः प्रतियोगितया नाशं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनोऽपि कारणत्वम्, यद्वलान्मुद्गरपातादिना जायमानो ध्वंसः प्रतियोगितया घट एवोत्पद्यते न पटादौ, नहि मुद्गरपातादिना यो घटादिध्वंसो भवति तस्य घटादिसमवेतनाशं प्रति घटादिनाशस्य कारणत्वमिति कार्यकारणभावेन गतार्थता, एवं च सामान्यतः प्रतियोगितया नाशं प्रति तादात्म्येन घटस्य कारणत्वे पटनाशोऽपि प्रतियोगितया घटे आपद्येत, यदि च प्रतियोगितया घटनाशं प्रति तादात्म्येन प्रतियोगिनः कारणत्वं तदा पटोऽपि कस्यचित् प्रतियोगी भवतीति तस्यापि तादात्म्येन प्रति-

ध्वंसध्वंसानापत्तेश्च। किञ्च, रूपाभावान्यमहद्वृत्ति चाक्षुषे चक्षुःसंयुक्त-महदुद्भूतरूपवद्वैशिष्ट्यस्य हेतुत्वात् तत्सिद्धिः। न च, एवमपि

योगित्वरूपेण प्रतियोगितया घटनाशं प्रति कारणत्वमिति घटनाशः प्रतियोगितया पटेऽप्युत्पद्येत, यदि च प्रतियोगितया घटनाशं प्रति तादात्म्येन घटत्वेन घटस्य कारणत्वम्, एवमपि यत्किञ्चिद् घट-नाशो यथा तद्घटे प्रतियोगितयोत्पद्यते तथा घटान्तरेऽप्युत्पद्येत, घटत्वेन तस्यापि कारणत्वात्, अतः प्रतियोगितया तद्घटनाशं प्रति तादात्म्येन तद्घटस्य कारणत्वमिति विशिष्यैव कार्यकारण-भावो नाश-प्रतियोगिनोः, तथा च यदि जातिनाशो भवेद् भवे-दपि प्रतियोगितया तं प्रति तादात्म्येन जातेः कारणत्वम्, न च भवति जातिनाशस्ततो जातेर्न तादात्म्येन कारणत्वमित्येतावतैव जातिनाशापत्त्यसम्भवान्न स्वाधिकरणत्वं तदापत्तिवारणाय सम्बन्ध-कोटौ निवेशनीयं समवायवादिना, तथैव वैशिष्ट्यवादिना वैशिष्ट्य-सम्बन्धघटितकार्यकारणभावेऽपि न कालिकसम्बन्धेन स्ववृत्तित्व-मपि सम्बन्धतया निवेशनीयम्. नाशस्य नाशाभावेन न प्रति-योगितया तं प्रति तादात्म्येन नाशस्य हेतुत्वमिति ध्वंसध्वंसा-पत्त्यभावादित्यर्थः।

वैशिष्ट्यसिद्धये प्रकारान्तरमुपदर्शयति- किञ्चेति- वायौ रूपा-भावस्य चाक्षुषमपि महद्वृत्तिचाक्षुषं भवति, तच्च विषयतासम्बन्धेन रूपाभावे उत्पद्यते, न च तत्र चक्षुःसंयुक्तमहदुद्भूतरूपवद्वैशि-ष्ट्यम्, वायोर्महत्त्वेऽप्युद्भूतरूपवत्त्वाभावेन वायुमुपादाय चक्षुः-संयुक्तमहदुद्भूतरूपवद्वैशिष्ट्यस्य तत्र योजयितुमशक्यत्वादिति व्यभिचारः स्यात्, तद्वारणाय 'रूपाभावान्य' इति महद्वृत्तिविशेष-णम्; 'रूपाभावान्यचाक्षुषे' इत्येतावन्मात्रोक्तौ रूपाभावान्यस्य महत्त्वाभावस्य परमाणौ चाक्षुषप्रत्यक्षमपि कार्यतावच्छेदकाक्रान्तं भवति, तच्च विषयतासम्बन्धेन महत्त्वाभावे उत्पद्यते न च तत्र

महत्त्वाभाव-रूपाभावयोश्चाक्षुषे कार्यकारणभावद्वयान्तरावश्यकत्वे, रूपाभावान्यद्रव्यवृत्त्यभावचाक्षुषे चक्षुःसंयुक्तोद्भूतरूपवद्विशेषणता, महत्त्वाभावान्यद्रव्यवृत्त्यभावचाक्षुषे चक्षुःसंयुक्तमहत्त्ववद्विशेषणता, महत्समवेतचाक्षुषे चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायो हेतुरिति

चक्षुःसंयुक्तमहदुद्भूतरूपवद्वैशिष्ट्यम्, परमाणोरुद्भूतरूपवत्त्वेऽपि महत्त्वाभावेन तमादाय तत्सम्पादनाऽसम्भवादिति तत्र व्यभिचारवारणाय 'महद्वृत्ति' इति, उक्तकार्यकारणभावेन द्रव्यवृत्तिगुणादिचाक्षुषस्य द्रव्यवृत्त्यभावचाक्षुषस्य चोपपत्तिरिति समवायवादिनो यथा द्रव्यसमवेतचाक्षुषे चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायस्य द्रव्यवृत्त्यभावचाक्षुषे चक्षुःसंयुक्तमहदुद्भूतरूपवद्विशेषणत्वस्य च कारणत्वमिति कार्यकारणभावद्वयं तथा कार्यकारणभावद्वयस्य नावश्यकता, निरुक्तैककार्यकारणभावेनैवोभयोरपि सङ्ग्रहादिति। तत्सिद्धिः वैशिष्ट्यसिद्धिः। ननु रूपाभावान्यमहद्वृत्तिचाक्षुषत्वस्य महत्त्वाभावचाक्षुषे रूपाभावचाक्षुषे चाभावात्, तयोरुपपादनाय कार्यकारणभावद्वयान्तरं वैशिष्ट्यवादिनाऽभ्युपेयमिति वैशिष्ट्यवादिनोऽपि कार्यकारणभावत्रयकल्पनमावश्यकमिति लाघवस्य विनिगमकस्याभावात् समवायवाद्यभ्युपगतकार्यकारणभावत्रयस्यैव युक्तत्वमित्याशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेन सम्बन्धः। एवमपि- उक्तदिशा कार्यकारणभावकल्पनेऽपि। कार्यकारणभावद्वयान्तरेति- द्रव्यवृत्तिमहत्त्वाभावचाक्षुषे चक्षुःसंयुक्तोद्भूतरूपवद्वैशिष्ट्यस्य कारणत्वम्, द्रव्यवृत्तिरूपाभावचाक्षुषे चक्षुःसंयुक्तमहद्वैशिष्ट्यस्य कारणत्वमित्येवं कार्यकारणभावद्वयेत्यर्थः। समवायाभ्युपगन्तृपक्षे कार्यकारणभावमुपदर्शयति- रूपाभावान्येति- द्रव्यवृत्त्यभावचाक्षुषं वायुवृत्तिरूपाभावचाक्षुषमपि तद्विषये रूपाभावे चक्षुस्संयुक्तोद्भूतरूपवद्विशेषणताया अभावाद् व्यभिचारः स्यादतो 'रूपाभावान्य' इति द्रव्यवृत्त्यभावविशेषणम्, द्रव्यवृत्त्यभावचाक्षुषं परमाणुवृत्तिमहत्त्वा-

कल्पनाया एव युक्तत्वमिति वाच्यम्; कार्यतावच्छेदके चरमाभावत्वाप्रवेशे द्वितीये च द्रव्यभेदप्रवेशे प्रथम-द्वितीयाभ्यामेव निर्वाहेन तृतीयकार्यकारणभावाकल्पनेन वैशिष्ट्यवादिनो लाघवात्। न चैवं तव पार्थिवाणुघ्राणमात्रेन्द्रियसन्निकर्षे पृथिवीत्वादिप्रत्यक्षतापत्तिः? तवापि तन्मात्रसन्निकर्षाज्जलत्वाभावादिप्रत्यक्षतापत्तेः; एतद्भिया च त्वया रूपाभावप्रत्यक्षे चक्षुःसंयुक्तमहत्त्ववद्विशेषणता, महत्त्वाभाव-

---

भावचाक्षुषमपि तद्विषये महत्त्वाभावे चक्षुस्संयुक्तमहत्त्ववद्विशेषणताया अभावाद् व्यभिचारः स्यादतो 'महत्त्वाभावान्य' इति द्रव्यवृत्त्यभावविशेषणम्, तृतीयकार्यकारणभावे कारणकोटौ 'महद्' इत्यस्यानुपादाने महत्समवेतस्य पृथिवीत्वादेश्चक्षुस्संयुक्तोद्भूतरूपवत्परमाणुसमवायेनापि चाक्षुषं स्यादिति तदुपादानम्, चक्षुस्संयुक्तवाय्वादिसमवायेनापि पृथिवीत्वादेश्चाक्षुषं स्यादत 'उद्भूतरूपवद्' इति। निषेधे हेतुमाह- कार्यतावच्छेदक इति- रूपाभावान्यद्रव्यवृत्त्यभावचाक्षुषत्वे महत्त्वाभावान्यद्रव्यवृत्त्यभावचाक्षुषत्वे चेत्यर्थः चरमाभावत्वाप्रवेश इति- 'द्रव्यवृत्त्यभावचाक्षुषे' इति स्थाने 'द्रव्यवृत्तिचाक्षुषे' इत्येव वाच्यमित्यर्थः। द्वितीये च महत्त्वाभावान्यद्रव्यवृत्त्यभावचाक्षुषे इत्यस्मिन्। द्रव्यभेदप्रवेशे चरमाभावत्वं न निवेश्यते द्रव्यभेदस्य च प्रवेशः क्रियते, एवं च वैशिष्ट्यवादिनो रूपाभावान्यद्रव्यवृत्तिचाक्षुषे चक्षुःसंयुक्तोद्भूतरूपवद्वैशिष्ट्यस्य हेतुत्वम्, महत्त्वाभावान्यद्रव्यभिन्नद्रव्यवृत्तिचाक्षुषे चक्षुःसंयुक्तमहत्त्ववद्वैशिष्ट्यस्य हेतुत्वमित्येवं प्रथम-द्वितीयाभ्यामेव निर्वाहेन तृतीयकार्यकारणभावाऽकल्पनेन महत्समवेतचाक्षुषे चक्षुस्संयुक्तमहदुद्भूतरूपवद्वैशिष्ट्यं हेतुरित्येवं तृतीयकार्यकारणभावस्याऽकल्पनेन। ननु इन्द्रियसन्निकर्षकार्यतावच्छेदककोटावभावत्वाऽप्रवेशे द्रव्यवृत्तिघ्राणजप्रत्यक्षे घ्राणसंयुक्तवैशिष्ट्यस्यैव हेतुत्वे घ्राणसंयुक्ताणुवैशिष्ट्यस्य पृथिवीत्वादौ सत्त्वात् तत्प्रत्यक्षं स्यादित्याशङ्क्य प्रतिक्षिपति- न चेति। तव वैशिष्ट्यवादिनः।

चाक्षुषे चक्षुःसंयुक्तोद्भूतरूपवद्विशेषणता, रूपमहत्त्वतद्वृत्ते रूपाभावमहत्त्वाभावभिन्नस्याभावस्य चाक्षुषे चक्षुःसंयुक्तमहदुद्भूतरूपवद्विशेषणता हेतुरित्यभावप्रत्यक्ष एव त्रयं वाच्यम् ; भावप्रत्यक्षे चान्यत्, तथा च तृतीये कार्यतावच्छेदकेऽभावत्वाप्रवेशे भावप्रत्यक्षेऽपि वैशिष्ट्यवादिनो निर्वाहः। एवं च चक्षुःसंयुक्तसमवायादेरप्यस्वीकाराल्लाघवमिति। चक्षुरप्राप्यकारित्वे द्रव्यचाक्षुषेऽपि चक्षुराभि-

---

अभावत्वस्य कार्यतावच्छेदककोटौ निवेशेऽपि घ्राणसंयुक्ताणुविशेषणत्वस्य जलत्वाभावादौ सत्त्वात् समवायवादिनोऽपि जलत्वाभावादिप्रत्यक्षं किं न स्यादिति निषेधहेतुमुपन्यस्यति– तवापीति– समवायवादिनोऽपीत्यर्थः। एतद्भिया अयोग्यवर्तिनस्तत्तदिन्द्रियायोग्यस्य तत्तदिन्द्रियजप्रत्यक्षापत्तिभिया। त्वया समवायवादिना। तथा च अभावप्रत्यक्षे कार्यकारणभावत्रयं भावप्रत्यक्षे चान्य एव कार्यकारणभाव इति भवन्मते आवश्यकत्वे च। तृतीये कार्यतावच्छेदके रूपमहत्त्ववद्वृत्तिरूपाभावमहत्त्वाभावभिन्नाभावचाक्षुषत्वे। अभावत्वाप्रवेशे एवं सति रूपमहत्त्ववद्वृत्तिरूपाभावमहत्त्वाभावभिन्नचाक्षुषे चक्षुस्संयुक्तमहदुद्भूतरूपवद्वैशिष्ट्यस्य हेतुत्वमिति वैशिष्ट्यवादिनाऽङ्गीकृते अभावचाक्षुषस्येव भावचाक्षुषस्यापि निरुक्तकार्यतावच्छेदकाक्रान्ततया चक्षुःसंयुक्तमहदुद्भूतरूपवद्वैशिष्ट्यत एव तदुत्पत्तेरपि सम्भवेन तदर्थं कारणत्वान्तरकल्पनं वैशिष्ट्यवादिनो नास्तीति लाघवमित्यर्थः। वैशिष्ट्यवादिनः चक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवेतसमवायादिसन्निकर्षस्थानेऽपि वैशिष्ट्यसम्बन्धेनैव निर्वाहे तदकल्पनलाघवमपीत्याह– एवं चेति– चक्षुस्संयुक्तवैशिष्ट्यादिमत्यपि चक्षुःसंयुक्तवैशिष्ट्यं समस्त्येवेत्यभिसन्धिः। जैनमते चक्षुषः प्राप्यकारित्वमेव नास्तीति चक्षुःसंयोगोऽपि न द्रव्यचाक्षुषे कारणं किन्तु चक्षुराभिमुख्यमेव, तच्च द्रव्य इव द्रव्यसमवेते तत्समवेतेऽपि चेति चक्षुःसंयोगादि-

मुख्यमेव नियामकमिति गुणादिचाक्षुषेऽपि तदेव नियामकं युक्तमिति सन्निकर्षमात्रान्यथासिद्धिकारकं तदप्यतिरिच्यत इति मदेकपरिशीलितो लतादिविदितः पन्थाः ॥

द्रव्य-जात्यन्यचाक्षुषे महदुद्भूतरूपवद्भिन्नसमवेतत्वेन प्रतिबन्धकत्वात् समवायसिद्धिरित्यन्ये, जात्यन्यत्वस्थाने नित्यान्यत्वनिवे-

---

सम्बन्धाकल्पनलाघवादाभिमुख्यमपि पदार्थान्तरमस्तीत्यतोऽपि षट्पदार्थविभजनमसङ्गतमित्याशयेनाह– चक्षुरप्राप्यकारित्व इति। तदेव चक्षुराभिमुख्यमेव। तदपि आभिमुख्यमपि। एतदुपपादनमुक्तदिशा स्वस्यैव स्वनिर्मितग्रन्थान्तरेऽपि स्याद्वादलतादौ तत्प्रपञ्चनमिति विशेषजिज्ञासुभिरवलोकनीयं स्याद्वादलतादिकमित्युपदिशति– इति मेदकपरिशीलितो लतादिविदितः पन्था इति।

समवायसाधनप्रगल्भं मतान्तरमुपदर्शयति– द्रव्येति– जात्यन्यचाक्षुषं त्रसरेणुचाक्षुषमपि, तदपि न स्यात्, तद्विषये त्रसरेणौ तादात्म्येन महदुद्भूतरूपवद्भिन्नद्व्यणुकसमवेतस्य त्रसरेणोः प्रतिबन्धकस्य सत्त्वाद् अतो द्रव्यान्यत्वनिवेशः, द्रव्यान्यचाक्षुषं पृथिवीत्वादिचाक्षुषमपि, तद्विषये महदुद्भूतरूपवद्भिन्नद्व्यणुकसमवेतस्य पृथिवीत्वस्य तादात्म्येन सत्त्वात् तदपि न स्यादतो जात्यन्येति, अत्र प्रतिबन्धके समवेतत्वस्थाने वैशिष्ट्यनिवेशो न सम्भवति, तथा सति द्रव्यजात्यन्यचाक्षुषं घटाभावादिचाक्षुषमपि, तद्विषये घटाभावादौ महदुद्भूतरूपवद्भिन्ने द्व्यणुकादौ वैशिष्ट्याख्यसम्बन्धेन वर्तमानस्य घटाभावादेस्तादात्म्येन सत्त्वात् तदपि न स्यादिति समवेतत्वमेव निवेशनीयमिति समवायसिद्धिरित्यर्थः।

एतन्मतस्यायुक्तत्वावेदकं मतान्तरमुपदर्शयति– जात्यन्यत्वस्थान इति नित्यत्वे सत्यनेकसमवेतत्वलक्षणजातित्वेन जात्यन्यत्वप्रवेशापेक्षया लाघवान्नित्यान्यत्वमेव तत्स्थाने निवेशनीयम्, एवं च द्रव्य-

शान्नेदं युक्तमित्यपरे, द्रव्यजात्यन्यत्वस्थाने द्रव्यान्यसत्त्वनिवेशेऽपि न क्षतिरित्यपि बोध्यम् ॥

सादृश्यमप्यतिरिच्यते, तद्भिन्नत्वे सति तद्वृत्तिधर्मवत्त्वेन तद्बुद्धेरनुपपत्तेरुत्कर्षा-ऽपकर्षादिवत् तस्य वैलक्षण्येनैवानुभवात् ॥

नित्यान्यचाक्षुषं घटाभावादिचाक्षुषमपि न भवति घटाभावादेर्नित्यत्वेन नित्यान्यत्वाभावादिति तत्प्रत्यक्षस्य निरुक्तप्रतिबध्यतावच्छेदकधर्मानाक्रान्तत्वेन तद्विषये घटाभावादौ महदुद्भूतरूपवद्भिन्ननिरूपितवैशिष्ट्याख्यसम्बन्धावच्छिन्नवृत्तितावतो घटाभावादेस्तादात्म्येन सत्त्वेऽपि न तदनुपपत्तिरिति न प्रतिबन्धककोटौ समवेतत्वनिवेशनं सप्रयोजनमिति नोक्तमतस्य युक्तत्वमित्यर्थः। द्रव्यान्यसच्चाक्षुषत्वस्य प्रतिबध्यतावच्छेदकत्वेऽपि तस्य जातिचाक्षुषेऽभावचाक्षुषे चाभावान्महदुद्भूतरूपवद्भिन्नवैशिष्ट्यस्य प्रतिबन्धकतावच्छेदकत्वेऽपि न क्षतिरिति न समवायसिद्धिरित्याह- द्रव्य-जात्यन्यत्वस्थान इति ॥

सादृश्यरूपपदार्थान्तरसत्त्वादपि द्रव्यादिषट्पदार्थविभागो वैशेषिकाणामयुक्त इत्याह- सादृश्यमप्यतिरिच्यत इति। ननु तद्भिन्नत्वे सति तद्वृत्तिधर्मवत्त्वमेव सादृश्यम्, तच्च कल्पितपदार्थान्तर्भूतमेवेत्यत आह- तद्भिन्नत्वे सतीति- यन्निरूपितसादृश्यमभिमतं तत्तत्पदेन ग्राह्यम्। तद्बुद्धेः सादृश्यबुद्धेः। कथमनुपपत्तिरित्यपेक्षायामाह- उत्कर्षेति- यथा नीलतर-नीलतमादिप्रतीत्योत्कर्षापकर्षादिकं नीलादिगतमनुभूयमानमन्यद्, एवं तदालिङ्गितो नीलादिरप्यन्यः, तथा सदृश-सदृशतर-सदृशतमादिप्रतीत्या तद्गतोत्कर्षापकर्षादिवत् तदालिङ्गितस्य सादृश्यस्य वैलक्षण्येनाऽनुभूयमानस्यान्यत्वमेव युक्तम्, 'तद्भिन्नत्वे सति०' इत्यादिरूपस्य तु सादृश्यस्योत्कर्षापकर्षाद्यसम्भवात् तद्वत्तया वैलक्षण्यानुभवस्याप्यनुपपत्तेर्न तद्रूपं सादृश्यमित्यर्थः।

कारणत्वस्यापि पदार्थान्तरस्य सद्भावादुक्तविभागोऽनुपपन्न इत्याह- कारणत्वमप्यतिरिच्यत इति। अतत्त्वात् कारणतारूपत्वाऽभावात्।

कारणत्वमप्यतिरिच्यते, अनन्यथासिद्धत्वे सति नियतपूर्ववर्तितायाः अतत्त्वात्, तथाहि—अनन्यथासिद्धत्वमन्यथासिद्धभिन्नत्वम्, अन्यथासिद्धं च पञ्चविधम्। तत्र येन सहैव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तदाद्यम्, यथा—दण्डादिना सहैव दण्डरूपादेर्घटादिकं प्रति पूर्ववर्तित्वग्रहाद् दण्डरूपादिकम्, दण्डादिनाऽत्र

अनन्यथासिद्धत्वे सति नियतपूर्ववर्तितायाः कारणतारूपत्वाऽभावमेव भावयति—तथाहीति। तत्र पञ्चस्वन्यथासिद्धेषु मध्ये। आद्यं प्रथममन्यथासिद्धम्। घटादिकं प्रति दण्डरूपादिकं प्रथमान्यथासिद्धत्वेन प्राचीननैयायिकसम्मतमिति तत्रोक्तलक्षणं सङ्गमयति—यथेत्यादिना विश्वनाथपञ्चाननेन तु—

"येन सह पूर्वभावः कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१२॥
जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद् भवेन्नियतावश्यकपूर्ववर्तिनः ॥२०॥
एते पञ्चाऽन्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥
तृतीयं तु भवेद् व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ' ॥२२॥

इत्येवं पञ्चान्यथासिद्धा उपवर्णिताः [कारिकावल्याम्] तेनैव च मुक्तावल्यामेताः कारिका व्याख्याताः, तत्र च द्वितीयान्यथासिद्धत्वेन दण्डरूपादिकं दर्शितमिति। प्रकृते च येन सहैव दण्डादिना सहैव, यस्य दण्डरूपादेः। यं प्रति घटादिकं प्रति, पूर्ववर्तित्वं गृह्यते पूर्ववर्तित्वग्रहात्, दण्डरूपादिकं घटादिकं प्रति प्रथममन्यथासिद्धमित्येवमुक्तलक्षणसङ्गमनम्। दण्डादिनेति—'दण्डरूपं घटपूर्ववर्ति' इत्येवंपूर्ववर्तित्वग्रहनिरूपितविशेष्यतावच्छेदकत्वं यद् दण्डे, तदेव

साहित्यं पूर्ववर्तित्वग्रहे विशेष्यतावच्छेदकत्वम्, रूपादावेव पूर्ववर्तित्वग्रहाद् विशेष्यत्वमित्यन्ये। अत्र येन-पृथगन्वयव्यतिरेकवता,

---

दण्डादिना रूपस्य साहित्यम्, अर्थाद् दण्डादिनिष्ठावच्छेदकतानिरूपिता या पूर्ववर्तित्वग्रहनिरूपितविशेष्यता तद्वत्त्वम्, अतस्तस्य रूपे सत्त्वाद् दण्डादिना साहित्यं तस्योपपद्यते, अथवा 'दण्डरूपं घटपूर्ववर्ति, रूपवान् दण्डो घटपूर्ववर्ती' इत्येवं द्विविधाऽपि पूर्ववर्तित्वग्रह इति दण्डस्यापि विशेष्यतावच्छेदकत्वं रूपस्यापि विशेष्यतावच्छेदकत्वमिति साहित्यम्, यद्वा विशेष्यता अवच्छेदकता च साहित्यमिति च्छेदः, तथा च 'दण्डरूपं घटनियतपूर्ववर्ति' इत्येवं ग्रहे रूपनिष्ठविशेष्यतानिरूपितावच्छेदकता दण्डे रूपसाहित्यम्, दण्डनिष्ठावच्छेदकतानिरूपितविशेष्यता रूपे दण्डसाहित्यमिति। ननु विशेष्यतावच्छेदकत्वं न साहित्यं किन्तु विशेष्यत्वम्, यथा-'दण्डो घटपूर्ववर्ती' तथा 'रूपं घटपूर्ववर्ति' इत्येवं दण्ड-रूपयोः पूर्ववर्तित्वग्रहविशेष्यत्वं दण्डे दण्डरूपे च समस्ति, पूर्ववर्तित्वं नाम कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणे कारणतावच्छेदकसम्बन्धेन वृत्तित्वम्, तच्च समवायसम्बन्धेन घटात्मककार्याधिकरणे कपाले स्वाश्रयदण्डजन्यचक्रभ्रमिजन्यत्वसम्बन्धेन वर्तमाने रूपे समस्तीति मतान्तरमाह-रूपादावेवेति-एवकारेण दण्डविशेषितस्य रूपादेः पूर्ववर्तित्वग्रहव्यवच्छेदः, यदा च केवलस्यैव रूपादेः पूर्ववर्तित्वग्रहविशेष्यत्वं तदा पूर्ववर्तित्वग्रहविशेष्यतावच्छेदकत्वं न दण्डादेरिति न तल्लक्षणं साहित्यम्, दण्डस्यापि रूपाद्यविशेषितस्यैव 'दण्डो घटपूर्ववर्ती' इत्येवंग्रहविशेष्यत्वम्, ततो न रूपस्यापि निरुक्तविशेष्यतावच्छेदकत्वं किन्तु निरुक्तविशेष्यत्वमेवेति तदेवानुगतत्वात् साहित्यम्। नन्वेवं 'दण्डो घटनियतपूर्ववर्ती' इति ग्रहे दण्डनिष्ठविशेष्यतानिरूपितावच्छेदकत्वलक्षणसाहित्यस्य दण्डत्वे दण्डत्वनिष्ठावच्छेदकतानिरूपितविशेष्यत्वस्य दण्डे सत्त्वात् येन सहैव

यस्य तद्रहितस्येति वाच्यम् , तेन दण्डत्वादिना दण्डादेर्नान्यथासिद्धिः, नवा दण्डसंयोगादेर्दण्डादिना, सत्यपि दण्डादौ विना तत्संयोगादिकं कार्यव्यतिरेकात् तस्य पृथगन्वयादिमत्त्वात् । न च,

---

दण्डस्य घटादिकं प्रति पूर्ववर्तित्वग्रहाद् घटादिकं प्रति दण्डत्वेन दण्डोऽपि प्रथमान्यथासिद्धः स्यात्, एवं चक्रत्वादिना चक्रादिकमप्युक्तान्यथासिद्धं भवेदित्यत आह–अत्रेति–तथा च पृथगन्वयव्यतिरेकवता येन सहैव पृथगन्वयव्यतिरेकरहितस्य यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तदाद्यमिति पर्यवसितम्, 'येन' इत्यस्य 'पृथगन्वयव्यतिरेकवता' इति विशेषणाद् घटादिकं प्रति दण्डत्वादेः पृथगन्वय-व्यतिरेकाभावाद् 'येन' इत्यनेन 'दण्डत्वादिना' इति ग्रहीतुं न शक्यत इति न दण्डत्वादिना दण्डादेरन्यथासिद्धिः ।, 'यस्य' इत्यस्य 'पृथगन्वय-व्यतिरेकरहितस्य' इति विशेषणाद् घटादिकं प्रति पृथगन्वय-व्यतिरेकवतो दण्डसंयोगादेः पृथगन्वय-व्यतिरेकराहित्याऽभावाद् 'यस्य' इत्यनेन 'दण्डसंयोगादेः' इति ग्रहीतुं न शक्यत इति दण्डादिना दण्डसंयोगादेर्नान्यथासिद्धिरित्याह–तेनेति–'पृथगन्वय-व्यतिरेकवता' इत्यादिविशेषणोपादानेनेत्यर्थः । दण्डसंयोगादेः पृथगन्वय-व्यतिरेकवत्त्वं भावयति– सत्यपि दण्डादाविति । तत्संयोगादिकं दण्डसंयोगादिकम् । कार्यव्यतिरेकात् घटादिकार्याऽभावात् । तस्य दण्डसंयोगादेः । ननु 'यस्य' इत्यस्य पृथगन्वय-व्यतिरेकरहितस्य' इति विशेषणोक्तौ 'येन' इत्यस्य 'पृथगन्वय–व्यतिरेकवता' इति विशेषणं न देयम्, दण्डत्वादिना दण्डादेरन्यथासिद्धिवारणायैव तद्विशेषणं दीयते, परं तददाने 'येन' इत्यनेन 'दण्डत्वादिना' इत्यस्य ग्रहणेऽपि 'पृथगन्वय-व्यतिरेकरहितस्य यस्य' इत्यनेन 'दण्डादेः' इत्यस्य ग्रहणं न सम्भवति दण्डादेः पृथगन्वय-व्यतिरेकादिमत्त्वेन पृथगन्वय-व्यतिरेकराहित्याऽभावादिति दण्डत्वादिना दण्डादेरन्यथासिद्धत्वप्रसङ्गाऽभावे व्यर्थमेव 'येन' इत्यस्य

एवं दण्डादेरपि पृथगन्वयादिमत्त्वादेव न दण्डत्वादिनाऽन्यथासिद्धिरिति, येन 'पृथगन्वयादिमता' इति व्यर्थम्, स्वाश्रयसंयोगेन सति दण्डत्वादौ दण्डादिव्यतिरेकासिद्धेर्दण्डादेरतथात्वात्। न च, एवं

'पृथगन्वय-व्यतिरेकवता' इति विशेषणमित्याशङ्कां प्रतिक्षिपति-न चेति। एवं दण्डादिना दण्डसंयोगादेरन्यथासिद्धत्ववारणाय 'यस्य' इत्यस्य 'पृथगन्वय-व्यतिरेकरहितस्य' इति विशेषणोपादाने सति। 'अन्वयादि०' इत्यादिपदाद् व्यतिरेकस्य ग्रहणम्, एवमग्रेऽपि। स्वाश्रय-संयोगसम्बन्धेन दण्डत्वादिसत्त्वं तदैव स्याद् यदि संयोगसम्बन्धेन दण्डादिसत्वं मेवेदिति निरुक्तसम्बन्धेन दण्डत्वादिसत्त्वे तदानीं दण्डाद्यभावे घटाद्यभाव इति व्यतिरेको वक्तुमशक्य इति न पृथगन्वय-व्यतिरेकशालित्वं दण्डादेरिति 'पृथगन्वय-व्यतिरेक-रहितस्य यस्य' इत्यनेन 'दण्डादेः' इत्यस्य ग्रहसम्भवेन 'येन' इत्यस्य 'पृथगन्वय-व्यतिरेकवता' इति विशेषणाऽदाने 'येन' इत्यनेन दण्डत्वादिना' इति ग्रहीतुं शक्यमिति दण्डत्वादिना दण्डादेरन्यथा-सिद्धत्वं प्रसज्यत एवेति तद्वारणाय 'येन' इत्यस्य पृथगन्वय-व्यति-रेकवता' इति विशेषणं देयमेवेति प्रतिषेधहेतुमुपदर्शयति-स्वाश्रय-संयोगेनेति। अतथात्वात् पृथगन्वय-व्यतिरेकशालित्वाभावात्, तथा च 'पृथगन्वय-व्यतिरेकरहितस्य यस्य' इत्यनेन दण्डादेर्ग्रहणं सम्भवतीत्याशयः। ननु दण्डत्वादिना दण्डादेरन्यथासिद्धत्ववारणाय 'येन' इत्यस्य 'पृथगन्वय-व्यतिरेकवता' इति विशेषणदाने दण्डा-दिना दण्डसंयोगादेरन्यथासिद्धत्वप्रसङ्गवारणाय 'यस्य' इत्यस्य 'पृथगन्वय-व्यतिरेकरहितस्य' इति विशेषणं न देयं दण्डसंयोगादि-सत्त्वे दण्डादिसत्त्वस्यावश्यकतया तदानीं दण्डाद्यभावे घटाद्य-भाव इति व्यतिरेकाऽसम्भवात्, तथा च 'येनान्वय-व्यतिरेकवता' इत्यनेन 'दण्डादिना' इत्यस्य ग्रहणाऽसम्भवात् तावतैव दण्डा-दिना दण्डसंयोगादेरन्यथासिद्धत्वप्रसक्त्यभावादित्याशङ्कां प्रति-

सति दण्डसंयोगादौ दण्डादिव्यतिरेकाद् घटादिव्यतिरेकासिद्धेर्दण्डादेः पृथगन्वयाद्यभावात् 'येन पृथगन्वयादिमता' इत्यत एव दण्डसंयोगादेरनन्यथासिद्धौ 'तद्रहितस्य' इति व्यर्थमिति वाच्यम्, चक्षुः-कपालादिना तत्संयोगान्यथासिद्धिवारणार्थं तदुपादानात्, तत्संयोगे सत्यपि चक्षुः-कपालादिनाशकाले तद्व्यतिरेके कार्यव्यतिरेकाच्चक्षुः-कपालादेः पृथगन्वयादिमत्त्वात्। नन्वेवमपि दण्डादेर्दण्डत्वा-

---

क्षिपति– न चेति– अस्य 'वाच्यम्' इत्यनेनान्वयः। एवं दण्डत्वादिना दण्डादेरन्यथासिद्धत्ववारणाय 'येन' इत्यस्य 'पृथगन्वय-व्यतिरेकवता' इति विशेषणदाने। दण्डसंयोगादौ सतीत्यन्वयः। चक्षुरिन्द्रियस्य प्रत्यक्षं प्रति कार्यसहभावेन कारणत्वम्, एवं कपालादेर्विषयस्य कार्यकालवृत्तितया स्वविषयकप्रत्यक्षं प्रति कारणत्वम्, समवायिकारणस्य वा कपालादेर्घटादिकार्यं प्रति कार्यकालवृत्तितया कारणत्वम्, एवं चक्षुर्विषयसंयोगानन्तरक्षणे चक्षुषो नाशे विषयनाशे वा, कपालादिसंयोगानन्तरक्षणे कपालादिनाशे वा तदानीं प्रत्यक्षं घटादिकार्यं च न जायत इति चक्षुस्संयोगसत्त्वेऽपि चक्षुषोऽभावात् प्रत्यक्षाभावः, एवं कपालादिलक्षणविषयाऽभावात् तत्प्रत्यक्षाऽभावः, कपालादिद्वयसंयोगसत्त्वेऽपि कपालाद्यभावाद् घटादिकार्याऽभाव इति पृथगन्वय-व्यतिरेकवत्त्वमवश्यं चक्षुः-कपालादेरिति पृथगन्वय-व्यतिरेकवता चक्षुः-कपालादिना चक्षुर्विषयसंयोगस्य कपालद्वयसंयोगादेश्चान्यथासिद्धत्वं प्रसज्यत इति तद्वारणाय 'यस्य' इत्यस्य 'पृथगन्वय-व्यतिरेकरहितस्य' इति विशेषणं देयमिति प्रतिषेधहेतुमुपदर्शयति– चक्षुःकपालादिनेति। तत्संयोगेति– चक्षुःकपालादिसंयोगेत्यर्थः। तदुपादानात् 'यस्य' इत्यस्य विशेषणतया 'पृथगन्वय-व्यतिरेकरहितस्य' इत्यस्योपादानात्। तत्संयोगे सत्यपि चक्षुः-कपालादिसंयोगे सत्यपि। तद्व्यतिरेके चक्षुः-कपालाद्यभावे। कार्यव्यतिरेकात् प्रत्यक्षलक्ष-

दित इव दण्डरूपादेरपि पृथगन्वयाद्यभावात् कथं तेन तद्रूपान्यथासिद्धिरिति चेत्? न - 'पृथग्०' इत्यादेस्तदन्वय-व्यतिरेकाऽनियतान्वय-व्यतिरेकशालित्वं नार्थः, किन्तु तदन्वयाद्यघटितान्वयादिमत्त्वम्, इत्थं च दण्ड-दण्डत्वयोर्न मिथस्तथात्वम्, दण्डत्व-तत्समवाय-दण्डसंयोगादीनामुभयशरीरघटकत्वात्, दण्डादेस्तु

णस्य घटादिस्वरूपस्य वा कार्यस्याभावात्। 'पृथगन्वयादि०' इत्यादिपदात् पृथग्व्यतिरेकपरिग्रहः। ननु यथा स्वाश्रयसंयोगसम्बन्धेन दण्डत्वादिसत्त्वे संयोगसम्बन्धेन नियमतो दण्डादिसत्त्वमिति दण्डत्वाद्यन्वय-व्यतिरेकतो न पृथगन्वय-व्यतिरेकौ दण्डादेः, तथा स्वाश्रयसंयोगसम्बन्धेन दण्डरूपादिसत्त्वे नियमतः संयोगेन दण्डादिसत्त्वमिति दण्डरूपाद्यन्वय-व्यतिरेकतोऽपि न पृथगन्वयव्यतिरेकौ दण्डादेरिति 'येन पृथगन्वय-व्यतिरेकवता' इत्यनेन 'दण्डादिना' इत्यस्य ग्रहीतुमशक्यत्वेन दण्डादिना दण्डरूपादेरपि नोक्तान्यथासिद्धत्वसम्भव इत्याशङ्कते–नन्वेवमपीति। 'दण्डरूपादेरपि' इत्यत्र दण्डरूपादेरिति पञ्चम्यन्तम्, तथा च दण्डरूपादितोऽपि दण्डादेः पृथगन्वय-व्यतिरेकाऽभावादित्यर्थः। तेन दण्डादिना। तद्रूपान्यथासिद्धः दण्डरूपादेरन्यथासिद्धिः। समाधत्ते– नेति॥ तदन्वयेति– तदन्वय-व्यतिरेकाऽघटितान्वय-व्यतिरेकशालित्वं पृथगन्वय-व्यतिरेकवत्त्वमित्यर्थः। इत्थं च पृथगन्वय-व्यतिरेकवत्त्वस्य निरुक्तस्वरूपत्वे च। तथात्वं तदन्वयाद्यघटितान्वयादिमत्त्वम्। उभयशरीरघटकत्वात् दण्डत्वाद्यन्वय-व्यतिरेक-दण्डाद्यन्वयव्यतिरेकोभयशरीरघटकत्वात्; यत स्वाश्रयसंयोगसम्बन्धेन दण्डत्वसत्त्वं दण्डत्वस्यान्वयः, तत्र दण्डत्वम्, तदाश्रयश्च समवायेनेति समवायः, तदाश्रयो दण्ड इति दण्डः संयोगश्चैते घटकाः, संयोगेन दण्डसत्त्वं दण्डस्यान्वयः, तत्रापि दण्डः समवायेन दण्डत्वाश्रय इति दण्डत्व-तत्समवाय-दण्ड-तत्संयोगा घटका

तद्रूपादेस्तथात्वम्, दण्डाद्यन्वयस्य तद्रूपाद्यन्वयघटकतत्समवायाऽघटितत्वात्, न तु दण्डरूपादेर्दण्डादितः, तद्रूपाद्यन्वयस्य तदन्वयघटितत्वात्; चक्षुः-कपालादेरन्वयः कालिकतादात्म्यादितः,

---

इति दण्ड-दण्डत्वयोः परस्परं तदन्वयादिघटितान्वयादिमत्त्वमेव, न तदन्वयाद्यघटितान्वयादिमत्त्वमतो न दण्डत्वादिना दण्डादेरन्यथासिद्धिरित्यर्थः। दण्डादिना दण्डरूपादेस्त्वन्यथासिद्धिस्तु सम्भवति, यतो दण्डादेर्दण्डरूपाद्यन्वयाद्यघटितान्वयादिमत्त्वलक्षणं पृथगन्वयादिमत्त्वं समस्ति, स्वाश्रयसंयोगसम्बन्धेन दण्डरूपादिसत्त्वलक्षणदण्डरूपाद्यन्वये प्रविष्टस्य दण्डरूपसमवायस्य संयोगसम्बन्धेन दण्डसत्त्वलक्षणदण्डान्वयेऽप्रविष्टत्वादिति 'येन पृथगन्वयादिमता' इत्यनेन 'दण्डादिना' इत्यस्य ग्रहीतुं शक्यत्वात्, संयोगसम्बन्धेन दण्डसत्त्वलक्षणदण्डान्वये दण्डत्व-समवाय-दण्ड-संयोगाः प्रविष्टाः, ते सर्वेऽपि स्वाश्रयसंयोगेन दण्डरूपसत्त्वलक्षणदण्डरूपान्वये प्रविष्टा एव, रूपविशेषणीभूते दण्डे दण्डत्व-तत्समवाय-दण्डानां प्रविष्टत्वात्, स्वाश्रयसंयोगलक्षणसम्बन्धे च दण्डसंयोगस्य प्रविष्टत्वादिति दण्डाद्यन्वयाद्यघटितान्वयादिमत्त्वलक्षणपृथगन्वयादिमत्त्वं न दण्डरूपादेरिति 'पृथगन्वयादिरहितस्य यस्य' इत्यनेन दण्डरूपादेर्ग्रहीतुं शक्यत्वादित्याह—दण्डादेस्त्विति। तद्रूपादेः दण्डरूपादितः। तथात्वं दण्डरूपाद्यन्वयाद्यघटितान्वयादिमत्त्वलक्षणपृथगन्वयादिमत्त्वम्। तदुपपादनायाह—दण्डाद्यन्वयस्येति। तद्रूपेति—दण्डरूपेत्यर्थः। तत्समवायेति—दण्डरूपादिसमवायेत्यर्थः। न त्विति—दण्डरूपादेर्दण्डादितो निरुक्तस्वरूपं पृथगन्वयादिमत्त्वं नास्तीत्यर्थः। तद्रूपाद्यन्वयस्य दण्डरूपाद्यन्वयस्य। तदन्वयघटितत्वात् दण्डाद्यन्वयघटितत्वात्। एवं च 'यस्य पृथगन्वयादिरहितस्य' इत्यनेन 'दण्डरूपादेः' इत्यस्य ग्रहणं सम्भवतीत्याशयः। चक्षुः-कपालादिना तत्संयोगादेर्निरुक्तान्यथासिद्धिर्न सम्भवति, तत्र द्वयोरपि परस्परापेक्षया निरुक्तपृथगन्वयादिमत्त्वेन 'यस्य पृथगन्वयादिरहितस्य'

तत्संयोगस्य तु समवायत इति मिथस्तत्त्वमेवेत्यदोषात् । न च, एवं विनापि दण्डादिज्ञानं रूपत्वादिना दण्डरूपादौ घटादिपूर्ववर्तित्वग्रहसम्भवाद् रूपत्वादिना तद्धेतुत्वापत्तिः, प्रत्यक्षेण ग्रहे

इत्यनेन तत्संयोगादेः' इत्यस्य वारणासम्भवादित्याह–चक्षुःकपालादेरिति–यत्काले प्रत्यक्षं तत्काले चक्षुरिति कृत्वा चक्षुषोऽन्वयः कालिकसम्बन्धघटितः, समवायसम्बन्धेन घटादिकं प्रति तादात्म्यसम्बन्धेन कपालादिकं कारणमिति कपालादेरन्वयस्तादात्म्यघटितः, एवं विषयतासम्बन्धेन प्रत्यक्षं प्रति तदात्म्यसम्बन्धेन कपालादेर्विषयस्य कारणत्वमित्यतोऽपि कपालादेरन्वयस्तादात्म्यघटितः, चक्षुःसंयोगस्तु विषये समवायेन वर्तत इति तदन्वयः समवायघटितः, एवं समवायेन घटादिकं प्रति समवायेन कपालादिसंयोगः कारणमिति तदन्वयः समवायघटित इति द्वयोरपि निरुक्तपृथगन्वयादिमत्त्वेन 'पृथगन्वयादिमत्त्वरहितस्य यस्य' इत्यनेन 'चक्षुःसंयोगादेः कपालसंयोगादेः' इत्यस्य धारणाऽसम्भवेन न चक्षुः–कपालादिना तत्संयोगादेर्निरुक्तान्यथासिद्धिरित्यर्थः । ननु दण्डरूपत्वादिना दण्डरूपादेर्ज्ञानस्य दण्डज्ञानसापेक्षत्वेन दण्डरूपत्वादिना दण्डरूपादौ घटादिकार्यनियतपूर्ववर्तित्वग्रहस्य दण्डज्ञानं विनाऽसम्भवात् तदानीं निरुक्तान्यथासिद्धिसम्भवेऽपि रूपत्वादिना दण्डरूपादौ नियतपूर्ववर्तित्वग्रहो दण्डादिज्ञानं विनाऽपीति रूपत्वादिना दण्डरूपादेरन्वयो न दण्डाद्यन्वयघटित इति रूपत्वेन रूपेण दण्डरूपादेः पृथगन्वयादिमत्त्वमेवेति नोक्तान्यथासिद्धिरिति रूपत्वेन दण्डरूपादेः घटादिकं प्रति कारणत्वं स्यादित्याशङ्क्य प्रतिक्षिपति–न चेति–अस्य 'वाच्यम्' इत्यनेनान्वयः । तद्धेतुत्वापत्तिः दण्डरूपादेर्घटादिकारणत्वप्रसङ्गः । पृथगन्वय-व्यतिरेकवता येन सहैव यं प्रति यस्य पूर्ववर्तित्वं प्रत्यक्षेण गृह्यते तं प्रति तदन्यथासिद्धम्, तथा च प्रत्यक्षेण दण्डरूपे घटनियतपूर्ववर्तित्वग्रहो दण्डग्रहनियत एवेति दण्ड-

नियमोक्तौ च द्व्यणुकादिकं प्रति परमाण्वादिना तद्रूपादेरन्यथासिद्ध्यनापत्तिः, नियमाविवक्षायां तु वैपरीत्यमपि स्यादिति वाच्यम्, 'पूर्ववर्तित्वम्' इत्यस्यान्वय-व्यतिरेकित्वमित्यर्थात्, न च तद् अतिप्रसक्तेन रूपत्वादिना सुग्रहमिति ॥ १ ॥

अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एव यं प्रति यस्य पूर्वर्तित्वं

ग्रहमन्तरेण प्रत्यक्षेण दण्डरूपे रूपत्वेन घटनियतपूर्ववर्तित्वग्रहो न भवत्येवेति रूपत्वादिनाऽपि दण्डरूपादेरन्यथासिद्धिः स्यादेवेति यदि तदा द्व्यणुकादिकं प्रति परमाण्वादिना परमाणुरूपादेरन्यथासिद्धत्वं न स्यात्, परमाणुरूपादेरतीन्द्रियत्वेन प्रत्यक्षेण द्व्यणुकादिपूर्ववर्तित्वस्य ग्रहाऽसम्भवादित्याह–प्रत्यक्षेणेति । तद्रूपादेः परमाणुरूपादेः । ननु 'येन सहैव' इत्यत्र नियमार्थकैवकारो नोपादीयते, तथा च रूपत्वादिना दण्डरूपादौ घटादिपूर्ववर्तिताग्रहो दण्डज्ञानं विनाऽपि भवतु परं दण्डरूपत्वादिना दण्डरूपादौ तद्ग्रहस्तु दण्डादिना सह भवतीत्येतावता दण्डादिना दण्डरूपादेरन्यथासिद्धिः स्यादित्यत आह– नियमाऽविवक्षायां त्विति–कदाचिद् दण्डादावपि घटादिनियतपूर्ववर्तिताग्रहो दण्डरूपादिना सह भवतीति दण्डरूपादिना दण्डादेरपि निरुक्तान्यथासिद्धिः स्यादित्यर्थः । निषेधे हेतुमाह–पूर्ववर्तित्वमित्यस्येति–तथा च येन सहैव यस्य यं प्रत्यन्वयव्यतिरेकित्वं गृह्यते तदन्यथासिद्धमिति फलितम् । इत्थमपि कुतोऽनन्यथासिद्धिपरिहार इत्यपेक्षायामाह–न चेति- अस्य 'सुग्रहम्' इत्यनेनान्वयः । तत् अन्वयव्यतिरेकित्वम् । रूपत्वं हि दण्डरूपेऽपि रूपान्तरेऽपि, घटं प्रत्यन्वय-व्यतिरेकित्वं तु दण्डरूप एव न रूपान्तर इति रूपत्वस्यातिप्रसक्ततया न घटं प्रत्यन्वय-व्यतिरेकित्वस्यावच्छेदकत्वमिति न रूपत्वेन दण्डरूपे घटं प्रत्यन्वय-व्यतिरेकित्वस्य ग्रहः सम्भवति, किन्तु दण्डरूपत्वेन, तादृशग्रहश्च दण्डादिना सहैवेति भवत्येव दण्डादिना दण्डरूपादेर्निरुक्तान्यथासिद्धिः ॥१॥

गृह्यते तद् द्वितीयम्, यथा-आकाशस्य शब्दं प्रति पूर्ववर्तित्वे ज्ञात एव ज्ञान-घटादिकं प्रति तद्ग्रहादाकाशो ज्ञान-घटादौ। न च शब्दाश्रयत्वेनाऽन्यथासिद्धत्वमाद्येनैवेति किमनेनेति वाच्यम्, अष्टद्रव्यान्यत्वादिना तथात्वायैतदुक्तेः, शब्दस्य घटादिकं प्रति पृथगन्वय-

---

द्वितीयामन्यथासिद्धिं दर्शयति- अन्यं प्रतीति-निरुक्तान्यथासिद्धिराकाशस्य ज्ञान-घटादिकं प्रति भवति, शब्दातिरिक्तं कार्यमात्रं प्रत्याकाशस्यान्यथासिद्धत्वमित्यावेदनाय ज्ञानपदोपादानम्, तत्समन्वयं भावयति- यथेत्यादिना। तद्ग्रहात् पूर्ववर्तित्वग्रहात्। शब्दाश्रयत्वेन सहैवाकाशस्य ज्ञान-घटादिकं प्रति पूर्ववर्तित्वं गृह्यत इति ज्ञान-घटादिकं प्रति आकाशस्यान्यथासिद्धिरिति प्रथमान्यथासिद्धयैव गतार्थत्वाद् द्वितीयान्यथासिद्धिपरिकल्पना व्यर्थेत्याशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः। शब्दाश्रयत्वेनाकाशस्य प्रथमान्यथासिद्धत्वेऽपि अष्टद्रव्यान्यत्वादिना न प्रथमान्यथासिद्धिरिति तद्रूपेणाऽन्यसिद्धत्वाय द्वितीयान्यथासिद्धेरावश्यकतेति निषेधहेतुमुपदर्शयति- अष्टद्रव्यान्यत्वादिनेति- पृथिवी-जल-तेजो-वायु-काल-दिगात्म-मनोभिन्नद्रव्यत्वादिनेत्यर्थः। तथात्वाय अन्यथासिद्धत्वाय। तदुक्तेः 'अन्यं प्रति०' इत्यादिद्वितीयान्यथासिद्धयुक्तेः, शब्दं प्रति पूर्ववर्तित्वज्ञाने सत्येव पृथिव्यादीनां शब्दं प्रति पूर्ववर्तित्वाभावात् तद्रूपवैधर्म्यज्ञानतः पृथिव्याद्यष्टद्रव्यान्यत्वग्रहे सति पृथिव्याद्यष्टद्रव्यान्यत्वेनाकाशस्य घटं प्रति पूर्ववर्तित्वं गृह्यत इति भवत्यष्टद्रव्यान्यत्वेनाकाशस्य घटं प्रत्यन्यथासिद्धत्वमित्यभिसन्धिः। शब्दाश्रयत्वमप्याकाशस्य पृथिव्याद्यष्टद्रव्येभ्यो वैधर्म्यं भवति, तज्ज्ञानेनाप्यष्टद्रव्यान्यत्वज्ञानं सुकरमिति नाष्टद्रव्यान्यत्वेनाकाशस्य घटादिकं प्रत्युक्तान्यथासिद्धिसम्भव इति यदि कश्चिद् ब्रूयाद् तदापि शब्दाश्रयत्वेनैव घटादिकं प्रत्याकाशस्य द्वितीयान्यथासिद्धिर्न शब्दाश्रयत्वेनाकाशस्य प्रथमान्यथासिद्धिसम्भवः, शब्दाश्रयत्वं शब्द

व्यतिरेकरहिततया तेन प्राक्तनान्यथासिद्धेर्दुर्वचत्वाच्च । ननु शब्दो द्रव्याश्रितो गुणत्वादित्याद्यनुमानाच्छब्दाश्रयत्वादिनोपस्थिते आकाशे विनापि शब्दपूर्ववृत्तित्वग्रहं ज्ञान-घटादिपूर्ववर्तित्वग्रहसम्भव इति चेत् ? न-शब्दो द्रव्यहेतुको जन्यगुणत्वादित्याद्यनुमानादेव कार्य-कारणभावलक्षणानुकूलतर्कप्रयुक्तात् तत्सिद्धेः । न चैवं संयोग-

---

एव, तस्य न घटं प्रति पृथगन्वयादिमत्त्वमिति 'पृथगन्वयादिमता 'येन' इत्यनेन 'शब्देन' इत्यस्य ग्रहणाऽसम्भवादित्याह- शब्देस्येति । तेन शब्दाश्रयत्वेन । ननु आकाशे शब्दाश्रयत्वग्रहणं शब्द प्रति पूर्व-वर्तित्वग्रहमन्तरापि 'शब्दो द्रव्याश्रितो गुणत्वाद्' इत्यनुमानेन द्रव्या-श्रितत्वे सिद्धे पृथिव्याद्याश्रितत्ववाधात् पृथिव्याद्यष्टद्रव्यातिरिक्त-द्रव्यसिद्धौ तद् द्रव्यमाकाशनामकमेवेत्याकाशाश्रितत्वे सिद्धे शब्दस्या-काशाश्रितत्वमाकाशस्य शब्दाश्रयत्वमन्तराऽनुपपन्नमित्यन्यथानुप-पत्त्यैवेति शब्दाश्रयत्वेनाकाशस्य ज्ञान-घटादिकं प्रति जनकत्वाभ्यु-पगमेनोक्तान्यथासिद्धिसम्भव इत्याशङ्कते- नन्विति। समाधत्ते- नेति। 'शब्दो द्रव्याश्रितो गुणत्वाद्' इत्यनुमाने गुणत्वमस्त द्रव्याश्रितत्वं मास्त्विति व्यभिचारशङ्कानिवर्तकोऽनुकूलतर्को नास्तीति न तेना-काशसिद्धिसम्भवः. किन्तु जन्यगुणत्वावच्छिन्नं प्रति द्रव्यत्वेन कारणत्वमिति कार्यकारणभावलक्षणानुकूलतर्कसहकृतात् शब्दो द्रव्यहेतुको जन्यगुणत्वादित्यनुमानादेवाकाशस्य सिद्धिः, समवायेन शब्दं प्रति तादात्म्येन कारणत्वमेवाकाशस्य शब्दं प्रति कारणत्वम्, ततश्चाकाशस्य शब्दसमवायिकारणत्वतः शब्दाश्रयत्वमपि सिध्यत्ये-वेति शब्दाश्रयत्वज्ञाने शब्दं प्रति पूर्ववर्तित्वज्ञानस्य नियमेनापेक्ष-णाद् भवति शब्दाश्रयत्वेनाकाशस्य ज्ञान-घटादिकं प्रति कारणत्वे निरुक्तान्यथासिद्धिरित्याह- शब्दो द्रव्यहेतुक इति। तत्सिद्धेः शब्दा-श्रयतयाऽऽकाशसिद्धेः। ननूक्तदिशा यथा ज्ञान-घटादिकं प्रति शब्दाश्रयत्वेनाकाशस्य जनकत्वाभ्युपगमेऽन्यथासिद्धिस्तथा संयोग-

विभागादावप्याकाशस्याहेतुत्वापत्तिः ? द्रव्यत्वेन तद्धेतुत्वसम्भवात् । अत एवाधारत्वेन काल-दिशोः कार्यसामान्यहेतुत्वं निष्प्रत्यूहम्, विनापि कालिकपरत्वादिपूर्ववर्तित्वग्रहमाधारत्वेन पूर्ववर्तित्वग्रहसम्भवात् । न चैवं विभुत्वेनाकाशस्यापि कार्यसामान्यहेतुत्वं स्यात् ?

विभागादिकं प्रत्यपीति संयोग-विभागादिकारणत्वमपि तस्य न स्यादित्याशङ्क्य प्रतिक्षिपति- न चेति । एवं शब्दाश्रयत्वेन जनकत्वे उक्तदिशा निरुक्तान्यथासिद्धत्वे । निषेधे हेतुमाह- द्रव्यत्वेनेति- संयोग-विभागादेः समवायेन द्रव्यमात्र एवोत्पादेन तदनुरोधेन समवायेन संयोग-विभागादिकं प्रति तादात्म्येन द्रव्यत्वेन द्रव्यमात्रस्य कारणत्वस्य वाच्यतया द्रव्यत्वेनाकाशस्यापि संयोग-विभागादिहेतुत्वसम्भवादित्यर्थः । अत एव एकरूपेणान्यथासिद्धस्याप्यन्यरूपेण कारणत्वादेव । 'कालिकपरत्वादि' इत्यादिपदात् कालिकाऽपरत्व-दैशिकपरत्वापरत्वानामुपग्रहः । विनापीति- कालिकपरत्वाऽपरत्वनिमित्तकारणत्वेन कालस्य दैशिकपरत्वाऽपरत्वनिमित्तकारणत्वेन दिशश्च कार्यसामान्यं प्रति कारणत्वं स्वीक्रियेत तर्हि कालस्य कालिकपरत्वाऽपरत्वे प्रति-पूर्ववर्तित्वं गृहीत्वैव कार्यसामान्य प्रति पूर्ववर्तित्वं गृह्यत इति कालस्य कार्यसामान्यं प्रत्यन्यथासिद्धत्वं स्यात्, एव दिशोऽपि दैशिक-परत्वाऽपरत्वे प्रति पूर्ववर्तित्वं गृहीत्वैव कार्यसामान्यं प्रति पूर्ववर्तित्वं गृह्यत इति दिशः कार्यसामान्यं प्रत्यन्यथासिद्धत्वं भवेत्; न चैवम्, किन्तु कार्यसामान्यं प्रति कालदिशोराधारत्वेनैव कारणत्वम्, कालस्य कालकृतविशेषणतासम्बन्धेन कालिकसम्बन्धापरपर्यायेण जगत आधारत्वम्, दिशश्च दिक्कृतविशेषणतासम्बन्धेन जगत आधारत्वमिति तद्रूपेण तयोः कार्यसामान्यं प्रति कारणत्वाभ्युपगमे आधारत्वेन कार्यसामान्यं प्रति पूर्ववर्तित्वग्रहस्य कालिकपरत्वाऽपरत्वादिपूर्ववर्तित्वग्रहं विनापि सम्भवेन निरुक्तान्यथासिद्ध्यापत्त्यसम्भवादित्यर्थः । कार्यसामान्यं प्रत्याकाशस्य विभुत्वेन कारणत्वमाशङ्क्य प्रति-

आत्मत्वव्यापकविभुत्वेनान्यथासिद्धेः। न च स्वर्गादिपूर्ववर्तित्वेन गृहीत एव यागादावपूर्वपूर्ववर्तित्वग्रहाद् यागादिकमपूर्वादावन्यथासिद्धम्? अन्यं प्रति पूर्ववर्तित्वानुपपादकं यस्य पूर्ववर्तित्वं गृह्यत इत्यर्थात्, वस्तुतोऽन्यं प्रति पूर्ववर्त्तित्वग्रहनियतो यं प्रति यद्धर्मा-

क्षिपति- न चैवमिति। कार्यसामान्यं प्रति कारणत्वं काल-दिगात्मनाम्, तत्र कालस्य कालिकसम्बन्धेन सर्वकार्याधारत्वतः सर्वकार्यं प्रति कारणत्वम्, दिशश्च दिक्कृतविशेषणतया कार्यसामान्याधारत्वतः कार्यसामान्यकारणत्वम्, कर्तृत्वेन कार्यत्वेन कार्यकारणभावस्य तु कुलालस्य घटं प्रति तन्तुवायस्य पटं प्रति कारणत्वमिति विशिष्य कार्यकारणभावे सति 'यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि' इति न्यायात् सिद्धावात्मत्वेन सर्वात्मगतेन समान्यरूपेण कार्यसामान्यं प्रति आत्मनः कारणत्वम्, आकाशस्य कार्यसमान्यं प्रति कारणत्वे न काचिद् युक्तिरस्ति, अथाप्यात्मनो विभुत्वेन यदि कार्यसामान्यं प्रति हेतुत्व भवेत् तदा विभुत्वस्य कारणतावच्छेदकस्याकाशेऽपि सत्त्वात् तस्यापि विभुत्वेन कार्यसामान्यं प्रति कारणत्वं सिद्धयेदपि, किन्तु व्याप्यधर्मेण कारणत्वे सम्भवति व्यापकधर्मेणान्यथासिद्धत्वम्, अत एव दण्डादीनां घटादिकं प्रति दण्डत्वादिरूपव्याप्यधर्मेण कारणत्वे सम्भवति तद्व्यापकेन द्रव्यत्वेनान्यथासिद्धत्वम्, तथा चात्मन आत्मत्वेन कारणत्वे तद्व्यापकेन विभुत्वेनान्यथासिद्धत्वमिति विभुत्वेन कारणतावच्छेदकतयाऽऽकाशस्याप्यन्यथासिद्धिरिति निषेधहेतुमुपदर्शयति-आत्मत्वेति। यागादेरदृष्टं प्रति द्वितीयान्यथासिद्धिमाशङ्क्य परिहरति- न चेति। निषेधे हेतुमाह-अन्यं प्रतीति- तथा च अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यं प्रति यस्यान्यं प्रति पूर्ववर्तित्वानुपपादकं पूर्ववर्तित्वं गृह्यते तद् द्वितीयमिति फलितम्, न च तल्लक्षणं तत्र समन्वेति, स्वर्गादिकं प्रति पूर्ववर्तित्वे गृहीत एवादृष्टं प्रति यागस्यान्यं प्रति पूर्ववर्तित्वा-

वच्छिन्नस्य पूर्ववर्तित्वग्रहस्तं प्रति तद्धर्मावच्छिन्नमन्यथासिद्धमित्यर्थात्, यागादेः सुखहेतुतया विहितत्वेनापूर्वं प्रत्यन्यथासिद्धत्वेऽपि यागत्वादिना हेतुत्वं निष्प्रत्यूहम्, आकाशस्यापि ज्ञान-घटादौ शब्दजनकत्वेनैवैतदन्यथासिद्धत्वम्, शब्दाश्रयत्वेन तु 'अन्यत्र

नुपपादकं पूर्ववर्तित्वं गृह्यत इत्येवं सङ्गटने सत्युक्तलक्षणसमन्वयः स्याद्, न चवम्, अदृष्टं प्रति पूर्ववर्तित्वस्य यागगतस्य स्वर्गं प्रति पूर्ववर्तित्वस्योपपादकत्वेन तदनुपपादकत्वस्याभावात्। उक्तदोषोद्धाराय प्रकारान्तरमाह-वस्तुत इति। यागादेः सुखहेतुतया विहितत्वेन रूपेण यद्यपूर्वं प्रति कारणत्वमुपेयते तदा सुखहेतुतया विहितत्वावच्छिन्नस्य यागादेरपूर्वं प्रति पूर्ववर्तित्वग्रहः सुखविशेषलक्षणस्वर्गं प्रति पूर्ववर्तित्वग्रहनियत इत्यपूर्वं प्रति सुखहेतुतया विहितत्वेन रूपेण यागो निरुक्तान्यथासिद्धिवानेव, अपूर्वं प्रति यागत्वादिना यागादेः कारणत्वाभ्युपगमे तु यागत्वाद्यवच्छिन्नस्यापूर्वं प्रति पूर्ववर्तित्वग्रहो न स्वर्गं प्रति पूर्ववर्तित्वग्रहनियत इति यागत्वाद्यवच्छिन्नस्य यागादेर्नोक्तान्यथासिद्धत्वमिति यागत्वादिना यागादेरपूर्वं प्रति कारणत्वं स्यादेवेत्याह-यागादेरिति। आकाशस्यापि शब्दजनकत्वावच्छिन्नस्य ज्ञान-घटादिकं प्रति पूर्ववर्तित्वग्रहः शब्दं प्रति पूर्ववर्तित्वग्रह नियत इति शब्दजनकत्वेन रूपेणाकाशस्य ज्ञान-घटादिकं प्रति निरुक्तान्यथासिद्धत्वम्, यदि तु शब्दाश्रयत्वेन रूपेणाकाशस्य ज्ञान घटादिक प्रति कारणत्वमुपेयते तदा शब्दाश्रयत्वावच्छिन्नस्याकाशस्य ज्ञान-घटादिकं प्रति पूर्ववर्तित्वग्रहो न शब्दं प्रति पूर्ववर्तित्वग्रहनियत इति न शब्दाश्रयत्वेनाकाशस्य ज्ञान-घटादिक प्रति निरुक्तान्यथासिद्धत्वम्, किन्तु 'अन्यत्र कृत्स्ननियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम्, इति तृतीयान्यथासिद्धिलक्षणाक्रान्तत्वात् तृतीयान्यथासिद्धिरेवेत्याह- आकाशस्यापीति। एतत् द्वितीयम्।

कल्पम०' इत्यादिनैव। न चैवं मननव्यापारकश्रवणत्व-भ्रमिजनकत्वादिना जनकत्वानुपपत्तिः? 'अन्यं प्रति पूर्ववर्तित्व एव०' इत्यत्र फलाननुगुणमन्यं प्रतीति वाच्यत्वात्।

दीधितिकृतस्तु– "फलाननुगुणमन्यं प्रतीति न वाच्यम्, अत एव परामर्शजनकत्वेन तद्व्याप्तिज्ञानानां न कारणत्वमेतदन्यथासिद्धेः।

ननु मननव्यापारकश्रवणेत्वेन रूपेणात्मश्रवणस्यात्मसाक्षात्कारं प्रति कारणत्वम्, भ्रमिजनकत्वेन रूपेण दण्डस्य घटं प्रति कारणत्वं च न स्यात्, मननव्यापारकश्रवणत्वावच्छिन्नस्यात्मश्रवणस्यात्मसाक्षात्कारं प्रति पूर्ववर्तित्वग्रहो मननं प्रति पूर्ववर्तित्वग्रहनियत इति निरुक्तद्वितीयान्यथासिद्धिलक्षणाक्रान्तत्वात्, एवं भ्रमिजनकत्वावच्छिन्नस्य दण्डस्य घटं प्रति पूर्ववर्तित्वग्रहो भ्रमिं प्रति पूर्ववर्तित्वग्रहनियत इति तस्यापि निरुक्तान्यथासिद्धित्वादित्याशङ्क्य प्रतिक्षिपति– न चैवमिति। 'अन्यम्' इत्यस्य फलाननुगुणमिति विशेषणं दीयते, मननमात्मसाक्षात्काररूपफलानुगुणम्, भ्रमिश्च घटात्मकफलानुगुणेति फलाननुगुणान्यशब्देन मननभ्रम्यादेर्धारणाऽसम्भवादुक्तलक्षणाभावान्न निरुक्तान्यथासिद्धत्वं श्रवणदण्डादीनामिति मननव्यापारकत्वेन श्रवणस्य, भ्रमिजनकत्वेन दण्डस्य च कारणत्वं निर्वहत्येवेति प्रतिक्षेपहेतुमाह– अन्यं प्रतीति।

'दीधितिकृतस्तु' इत्यस्य 'आहुः' इत्यनेन सम्बन्धः। अत एव फलाननुगुणत्वस्यान्यविशेषणतयाऽविवक्षितत्वादिव। एतदन्यथासिद्धेः 'अन्यं प्रति०' इत्यादिद्वितीयान्यथासिद्धेः, परामर्शजनकत्वावच्छिन्नस्य तत्तद्व्याप्तिज्ञानस्यानुमितिं प्रति पूर्ववर्तित्वग्रहः परामर्शं प्रति पूर्ववर्तित्वग्रहनियत इति परामर्शजनकत्वावच्छिन्नं तत्तद्व्याप्तिज्ञानमन्यथासिद्धमित्येवंलक्षणसद्भावात्, 'अन्यम्' इत्यस्य फलाननुगुणमिति विशेषणे तु परामर्शस्यानुमितिरूपफलानुगुणत्वेन 'फलाननुगुणमन्यम्' इत्यनेन तद्धारणाऽसम्भवान्न निरुक्तान्यथासिद्धिः

न चैवं भ्रमिजनकत्वलक्षणदृढत्वेन दण्डे घटहेतुत्वं न स्यात्, इष्टत्वात्, दण्डत्वेनैव तत्त्वात्, क्वचिद् घटानुत्पादस्य भ्रमिरूपद्वाराऽभावेन सम्भवात्, क्षुद्रचक्रभ्रमिसमर्थान्महाचक्रसहिताद् दण्डात् घटानुत्पत्तौ तथैव वाच्यत्वाद्" इत्याहुः ॥२॥

'अन्यत्र कल्पनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतं तृतीयम्, यथा-गन्धं प्रत्यन्यत्र कल्पपूर्ववर्तिताकगन्धप्रागभावेन

स्यादित्याशयः। यदि च फलाननुगुणमिति विशेषणं न दीयते तदा निरुक्तान्यथासिद्धिसद्भावाद् भ्रमिजनकत्वेन दण्डस्य घटकारणत्वं न स्यादित्याशङ्कामिष्टापत्त्या परिहरति- न चेति। तत्त्वात् घटहेतुत्वात्। क्वचित् भ्रमिजननाऽसमर्थदण्डसमवधानस्थले। भ्रमिजनकत्वलक्षणदृढत्वशालिदण्डत्वेन घटं प्रति दण्डस्य कारणतोभ्युपगमपक्षेऽपि तस्य भ्रमिद्वारा कारणत्वमवश्यं वाच्यमन्यथा क्षुद्रभ्रमिजननसमर्थदण्डोऽपि भ्रमिजनकदण्डो भवत्येवेति ततोऽपि महाचक्रसहिताद् घटोत्पत्तिः स्यात्, भ्रमिद्वारा कारणत्वे तु क्षुद्रचक्रभ्रमिमात्रसमर्थेन दण्डेन महाचक्रभ्रमणानुत्पादात् तदूपव्यापाराभावेन न घटोत्पत्तिरिति भ्रमिजनकत्वस्य कारणतावच्छेदकत्वे मानाभावादित्याह- क्षुद्रेति। तथैव भ्रमिद्वारा कारणत्वस्यैव दीधितिकृन्मते यथा भ्रमिजनकत्वलक्षणदृढत्वेन न दण्डस्य कारणत्वं किन्तु दण्डत्वेनैव, क्वचिद् घटानुत्पादस्य भ्रमिरूपव्यापाराभावादेव सम्भवः, तथा श्रवणस्याप्यात्मसाक्षात्कारं प्रति निदिध्यासं प्रति च न मननव्यापारकश्रवणत्वेन कारणत्वं किन्तु श्रवणत्वेनैव, क्वचित् तत आत्मसाक्षात्कारानुत्पादस्य मननलक्षणव्यापाराभावादेव सम्भव इत्याशयः।

तृतीयान्यथासिद्धिं निरूपयति- अन्यत्रेति। उदाहरति- यथेति। अन्यत्र अपाकजगन्धस्थले। तत्सहभूतेति-गन्धप्रागभावसहभूतेत्यर्थः।

तत्सहभूतरूपप्रागभावादि पाकजगन्धं प्रत्यन्यथासिद्धम्,' यथा वा-घटान्तरं प्रति कलशपूर्ववर्तिताकदण्डादिजातीयेन तत्सहभूतं तद्रासभादिकं तद्घटादौ, दण्डादिना चक्रादेर्मिथोऽन्यथासिद्धिवारणायोक्तम्-'कार्यसम्भवे' इति। न च पञ्चम्यर्थहेतुत्वप्रवेशे आत्माश्रयः? 'पृथगन्वय-व्यतिरेकराहित्ये सत्यन्यत्रकलशनियतपूर्ववर्तिताकसहभूतम्' इत्यर्थस्य वाच्यत्वात्, हन्त! एवं रूपप्रागभावेनैव गन्धप्राग-

---

उदाहरणान्तरमाह- यथा वेति। घटान्तरं प्रति रासभाऽसमवधाने दण्ड-चक्रादितो जायमानघटं प्रति। तत्सहभूतं दण्डादिजातीयसहभूतम्। तद्घटादाविति- घटत्वावच्छिन्नं प्रति नियतपूर्ववर्तित्वाभावादेव रासभस्य न कारणत्वसम्भव इति न घटत्वावच्छिन्ने तद्रासभादेरन्यथासिद्धत्वमित्यभिसन्धाय 'तद्घटादौ' इत्युक्तम्, 'अन्यथासिद्धम्' इत्यनुषज्यते। अन्यत्र कुलालनियतपूर्ववर्ति प्रत्येकं दण्डादि तत्सहभूतं चक्रादि, एवमन्यत्र कुलालनियतपूर्ववर्ति चक्रादि तत्सहभूतं दण्डादीति कृत्वा सर्वेषां दण्ड-चक्रादीनामन्यथासिद्धत्वं प्रसज्यत इत्यत उक्तम्-'कार्यसम्भवे' इति। दण्ड-चक्रादीनां मध्यादेकैकमात्रसत्त्वतो न कार्यसम्भवः, किन्तु समग्रादेव दण्ड-चक्रादित इति तत्सहभूतत्वं तद्भिन्न एवेति न दण्डादिपूक्तान्यथासिद्धिप्रसङ्ग इत्याह- दण्डादिनेति। ननु 'अन्यत्र कलशनियतपूर्ववर्तिनः' इत्यत्र पञ्चम्यर्थः कारणत्वम्, तस्यान्यथासिद्धिशरीरे प्रवेशः, अन्यथासिद्धेश्च कारणत्वघटकान्यथासिद्धिशून्यत्वे प्रतियोगिविधया प्रवेश इत्येवमन्योन्याश्रये परम्परया कारणत्वस्य कारणत्वापेक्षत्वादात्माश्रयोऽपि स्यादित्याशङ्कां प्रति- न चैति। कारणत्वाऽघटितनिरुक्तान्यथासिद्धिनिर्वचनेन तत्परिहारहेतुमुपदर्शयति- पृथगन्वय-व्यतिरेकराहित्ये सतीति- अन्यत्र कलशनियतपूर्ववर्तिताकस्य चक्रस्य सहभूतत्वं चक्रादौ समस्ति, अन्यत्र कुलालनियतपूर्ववर्तिताकस्य चक्रस्य सहभूतत्वं च दण्डादौ समस्तीत्येवं सर्वेषां दण्ड-चक्रादीनामन्यथासिद्धत्वं प्रसज्येतेति

भावः किं नान्यथासिद्धः? पृथगन्वयव्यतिरेकसाहित्यराहित्ययोरुभयत्र तौल्यात्, मैवम्-'अन्यत्र क्लृप्त०' इत्यस्य 'अवश्यक्लृप्त०' इत्यर्थकरणात्, अवश्यक्लृप्तश्च गन्धप्रागभाव एव, गन्धरूपप्रतियोग्युपस्थितौ शीघ्रोपस्थितिलाघवात्, इत एव महत्त्वस्यान्यत्र क्लृप्तत्वा-

---

तद्वारणाय सत्यन्तम्, तथा च दण्ड-चक्रादीनां पृथगन्वय-व्यतिरेकवत्त्वस्यैव भावेन तद्राहित्याभावान्नान्यथासिद्धिप्रसङ्गः। इत्थं तृतीयान्यथासिद्धिनिर्वचने परः शङ्कते- हन्त! एवमिति- गन्धप्रागभावेन रूपभागभावस्यान्यथासिद्धीकरणे यथा पृथगन्वय-व्यतिरेकराहित्यं रूपप्रागभावे, गन्धप्रागभावसत्त्वे नियमतो रूपप्रागभावसत्त्वमिति कृत्वा, तथा रूपप्रागभावसत्त्वे नियमतो गन्धप्रागभावसत्त्वमित्यतो गन्धप्रागभावेऽपि पृथगन्वय-व्यतिरेकराहित्यं समस्ति, यथा चान्यत्रक्लृप्तनियतपूर्ववर्तिताकस्य गन्धप्रागभावस्य साहित्यं रूपप्रागभावे, तथाऽन्यत्रक्लृप्तनियतपूर्ववर्तिताकस्य रूपप्रागभावस्य साहित्यं गन्धप्रागभावेऽपीत्युभयत्र लक्षणसद्भावाद् गन्धप्रागभावेन पाकजगन्धं प्रति यथा रूपप्रागभावोऽन्यथासिद्धस्तथा तं प्रत्येव रूपप्रागभावेन गन्धाभावोऽप्यन्यथासिद्धः स्यादित्यर्थः। समाधत्ते- मैवमिति। गन्धं प्रति गन्धप्रागभाव एवावश्यक्लृप्तो न रूपप्रागभाव इत्यत्र किं विनिगमकमित्यपेक्षायामाह- गन्धरूपेति- यस्य कारणत्वकल्पने लाघवं सोऽवश्यक्लृप्त इति, लाघवं च शरीरकृतं सम्बन्धकृतमुपस्थितिकृतं चेति, प्रकृते गन्धं प्रति कारणत्वविचारे गन्धरूपप्रतियोगिज्ञानसद्भावाद् गन्धप्रागभावो झटित्युपस्थितो भवति, गन्धरूपसहचरितज्ञानतश्च रूपात्मकप्रतियोगिन उपस्थितौ रूपप्रागभावोपस्थितिर्भवतीति रूपप्रागभावस्तदपेक्षया विलम्बोपस्थितिक इत्येवमुपस्थितिकृतलाघवसद्भावाद् गन्धप्रागभाव एवाऽवश्यक्लृप्तनियतपूर्ववर्तिताक इति तत्सहभूतत्वाद् रूपप्रागभावस्य पाकजगन्धं प्रत्यन्यथासिद्धत्वमित्यर्थः। इत एव लाघवतोऽवश्यक्लृप्तत्वस्यादरणादेव,

भावेऽप्यनेकद्रव्यवत्त्वं द्रव्यचाक्षुषादौ तेनान्यथासिद्धम्, महत्त्वस्य शरीरलाघवेनावश्यकत्वात्, अत एव च व्यापकधर्मावच्छिन्नस्य व्याप्यधर्मावच्छिन्नेनान्यथासिद्धिः, कारणाल्पत्वलाघवात्। न चैवं

यत्र यत्र अपकृष्टमहत्त्वं तत्र तत्रानेकद्रव्यवत्त्वमपि समस्तीति अनेकद्रव्यवत्त्वं विहाय नान्यत्र कल्पतं महत्त्वमिति महत्त्वस्यान्यत्र कल्पत्वाभावेऽपि लाघवतोऽवश्यकल्पं महत्त्वमिति तेन द्रव्यचाक्षुषादावनेकद्रव्यवत्त्वमन्यथासिद्धमित्यर्थः। केन लाघवेन महत्त्वस्यावश्यकल्पत्वमित्यपेक्षायामाह–महत्त्वस्येति–महत्त्वत्वं सामान्यम्, तद्वद् महत्त्वम्, अनेकद्रव्यवत्त्वं चानेकद्रव्याश्रिताश्रितत्वमित्यनेकद्रव्यवत्त्वशरीरापेक्षया महत्त्वशरीरं लघुभूतमिति शरीरलाघवेन महत्त्वस्यावश्यकल्पत्वमित्यर्थः। अत एव लाघवतोऽवश्यकल्पत्वस्य स्वीकारादेव। व्यापकधर्मावच्छिन्नस्य द्रव्यत्वरूपव्यापकधर्मावच्छिन्नस्य। व्याप्यधर्मावच्छिन्नेन दण्डत्वरूपव्याप्यधर्मावच्छिन्नेन। अन्यथासिद्धिः घटकार्ये प्रत्यन्यथासिद्धिः। व्यापकधर्मावच्छिन्नापेक्षया व्याप्यधर्मावच्छिन्ने किंकृतं लाघवम्? उभयत्र कारणतावच्छेदकत्वस्य सामान्य एव भावादित्यपेक्षायामाह– कारणाल्पत्वलाघवादिति– द्रव्यत्वावच्छिन्नस्य कारणत्वे कारणतावच्छेदकधर्मवत्त्वरूपस्वरूपयोग्यतालक्षणं कारणत्वं द्रव्यमात्र एव स्यादिति बहूनि द्रव्याणि कारणानि स्युः, दण्डत्वावच्छिन्नस्य कारणत्वे तु कारणतावच्छेदकदण्डत्ववत्त्वरूपस्वरूपयोग्यतालक्षणं कारणत्वमलघीयसामेव दण्डानामिति कारणाल्पत्वलाघवाद् दण्डस्य दण्डत्वेन घटं प्रति कारणत्वं द्रव्यत्वेनान्यथासिद्धिरित्यर्थः। ननु दण्डस्य घटं प्रति जनकत्वं स्वजन्यभ्रमिजन्यत्वसम्बन्धेन, दण्डरूपस्य तु स्वाश्रयजन्यभ्रमिजन्यत्वसम्बन्धेनेति दण्डरूपस्य कारणतावच्छेदकसम्बन्धापेक्षया दण्डस्य सम्बन्धो लघुभूत इति सम्बन्धकृतलाघवादवश्यकल्पनियतपूर्ववर्तिनो दण्डस्य सहभूतत्वाद् दण्डरूपादिकमन्यथासिद्धमिति तृतीयान्यथासिद्धयैव दण्डरूपा-

सम्बन्धलाघवाद् दण्डादिनाऽऽवश्यकेन दण्डरूपादेरित एवान्यथासिद्धौ प्रथमवैयर्थ्यम् ? तल्लाघवकृतावश्यकत्वस्यात्राप्रवेशात् ॥३॥

यमादायव यस्यान्वय-व्यतिरेकौ गृह्येते तेन तद् अन्यथासिद्धमिति चतुर्थम्, यथा-घटं प्रति दण्डेन दण्डत्वम्, आद्येऽवच्छेदकेनावच्छेद्यस्यात्र चावच्छेद्येनावच्छेदकस्यान्यथासिद्धिरिति भेदः ॥४॥

देरन्यथासिद्धत्वे तदर्थम् 'येन सहैव यस्य यं प्रति पूर्ववर्तित्वं गृह्यते तदन्यथासिद्धम्' इति प्रथमान्यथासिद्धपरिकल्पनं व्यर्थमित्याशङ्कां प्रतिक्षिपति– न चेति। एवम् उक्तप्रकारेण। इत एव तृतीयान्यथासिद्धित एव। निषेधे हेतुमाह–तल्लाघवकृतेति– सम्बन्धलाघवकृतेत्यर्थः। अत्र तृतीयान्यथासिद्धिलक्षणे सम्बन्धलाघवकृतावश्यकत्वस्य तृतीयान्यथासिद्धिलक्षणे प्रवेशे प्रथमान्यथासिद्धेरनेनैव गतार्थत्वे प्रथमान्यथासिद्धिमुपादाय प्राचां पञ्चान्यथासिद्धिप्रवादो भज्येतेति तत्प्रवादरक्षणमेव तदप्रवेशबीजमिति भावः ॥ ३ ॥

चतुर्थान्यथासिद्धिं निरूपयति– यमदायैवेति। उदाहरति– यथेति। यमदायैव दण्डमादायव, यस्य दण्डत्वस्य, अन्वय-व्यतिरेकौ गृह्येते, तेन दण्डेन तद् दण्डत्वमन्यथासिद्धमित्येवं लक्षणसमन्वयः। प्रथमान्यथासिद्धितस्तुरीयान्यथासिद्धेर्वैलक्षण्यं दर्शयति– आद्य इति– प्रथमान्यथासिद्धौ दण्डरूपनिष्ठकारणत्वे दण्डस्य विशेषणत्वादवच्छेदकत्वं रूपस्य विशेष्यत्वादवच्छेद्यत्वं 'दण्डरूपं घटपूर्ववर्ति' इति प्रतीतौ भासत इत्यवच्छेदकेन दण्डेनावच्छेद्यस्य तद्रूपस्यान्यथासिद्धिः, चतुर्थे दण्डत्वस्य कारणत्वे दण्डत्वस्याखण्डस्य पूर्ववर्तित्वग्रहे न किमप्यवच्छेदकतया भासत इति 'दण्डः घटपूर्ववर्ती' इत्येव ग्रहो दण्डत्वस्यापि पूर्ववर्तित्वग्रहरूपो वाच्यः, तत्र विशेषणतया भासमानस्य दण्डत्वस्यावच्छेदकत्वं विशेष्यतया भासमानस्य दण्डस्यावच्छेद्यत्वमित्यवच्छेद्येन दण्डेनावच्छेदकस्य दण्डत्वस्यान्यथासिद्धिरित्येवं प्रथमचतुर्थान्यथासिद्धयोर्भेद इत्यर्थः ॥ ४ ॥

स्वजन्यस्य यं प्रति पूर्ववर्तित्वे ज्ञाते स्वस्य तत्त्वं ज्ञायते तं प्रति स्वमन्यथासिद्धमिति पञ्चमम्, यथा-घटं प्रति कुलालेन तत्पिता, घटं प्रत्यस्य साक्षादहेतुत्वेन कुलाले घटजनकत्वं ज्ञात्वैव तद्द्वारा तस्य पूर्वभावग्रहात्, तदुक्तं मणिकृता- "यत्र जन्यस्य पूर्वभावं ज्ञात्वा जनकस्य तद्ग्रहस्तत्र जन्येन जनकमन्यथासिद्धम्, यत्र तु जनकस्य पूर्वभावं ज्ञात्वा जन्यस्य तद्ग्रहस्तत्र तद्द्वारा जनकत्वं यागस्येवापूर्वद्वारा" इति। न चायमाद्येन सङ्गृह्यते, भ्रमिजनकत्वादिना हेतुत्व-

---

पञ्चमान्यथासिद्धिं निरूपयति- स्वजन्यस्येति। तत्त्वं पूर्ववर्तित्वम्। उदाहरति- यथेति। लक्षणसङ्गमनमित्थम्- स्वजन्यस्य कुलालपितृजन्यस्य कुलालस्य, यं प्रति घटं प्रति, पूर्ववर्तित्वे ज्ञाते सति, स्वस्य कुलालपितुः, घटं प्रति पूर्ववर्तित्वं ज्ञायत इति तं प्रति घटं प्रति, स्वं कुलालपिताऽन्यथासिद्ध इति। कथं कुलालस्य घटपूर्ववर्तित्वे ज्ञाते सत्येव कुलालपितुर्घटपूर्ववर्तित्वं ज्ञायत इत्यपेक्षायामाह- घटं प्रतीति। अस्य कुलालपितुः। साक्षादहेतुत्वेन कुलालमव्यापारीकृत्य हेतुत्वाभावेन। तद्द्वारा कुलालद्वारा। तस्य कुलालपितुः। उक्तार्थे चिन्तामणिग्रन्थरत्नप्रणेतुर्गङ्गेशोपाध्यायस्य सम्मतिं दर्शयति- तदुक्तमिति। यत्र घटे, जन्यस्य कुलालस्य, पूर्वभावं पूर्ववर्तित्वम्, ज्ञात्वा ज्ञात्वैव, जनकस्य कुलालपितुः, तद्ग्रहः पूर्ववर्तित्वग्रहः, तत्र घटे, जन्येन कुलालेन, जनकं जनकः कुलालपिता, अन्यथासिद्ध इत्यर्थः। यत्र तु स्वर्गादौ पुनः, जनकस्य अपूर्वजनकस्य यागस्य, पूर्वभावं ज्ञात्वा पूर्ववर्तित्वं ज्ञात्वा, जन्यस्य यागजन्यस्यापूर्वस्य, तद्ग्रहः तत्पूर्ववर्तित्वग्रहः, तत्र स्वर्गादौ, तद्द्वारा अपूर्वद्वारा। ननु कुलालेन सहैव कुलालपितुर्घटं प्रति पूर्ववर्तित्वं गृह्यत इति कुलालेन कुलालपितुर्घटं प्रत्यन्यथासिद्धिरित्येवं प्रथमान्यथासिद्धयैव कुलालपितुरन्यथासिद्धत्वसम्भवात् पञ्चमान्यथासिद्धिकल्पना तदर्थं व्यर्थेत्याशङ्कां प्रतिक्षिपति- न चेति- अयं कुलाल-

रक्षायै तत्र 'यस्य' इति यत्पदार्थे 'येन' इति यत्पदार्थनियतपूर्व-वर्तिभिन्नस्येति विशेषणध्रौव्यात्, नापि द्वितीयेन, तत्र फलानानु-

---

पिता, आद्येन प्रथमान्यथासिद्धत्वेन, न च संगृह्यत इत्यन्वयः। भ्रमि-जनकत्वादिना दण्डस्य घटं प्रति जनकत्वमपि यथाश्रुतप्रथमान्यथा-सिद्धिसद्भावतो न स्यात्, यतो भ्रमणेन सहैव भ्रमिजनकस्य दण्डस्य घटं प्रति पूर्ववर्तित्वं गृह्यत इत्येवमाद्यान्यथासिद्धिलक्षणस्य यथाश्रुत-स्यास्ति सद्भाव इति, तस्मादाद्यान्यथासिद्धिलक्षणमित्थं परिष्क-रणीयम्- येन सहैव यत्पदार्थनियतपूर्ववर्तिभिन्नस्य यस्य यं प्रति पूर्व-वर्तित्वं गृह्यते तेन तस्यान्यथासिद्धिरिति, 'यत्पदार्थनियत' इत्यत्र यत्प-दार्थश्च 'येन' इति तृतीयान्तयत्पदार्थो ग्राह्यः, तथा च 'येन' इत्यनेन 'भ्रमणेन' इत्यस्य ग्रहणे यत्पदार्थो भ्रमणमेव, तन्नियतपूर्ववर्त्येव भ्रमिजनको दण्ड इति तद्भिन्नत्वस्य भ्रमिजनकदण्डेऽभावाद् 'यस्य' इत्यनेन 'भ्रमिजनकदण्डस्य' इत्यस्य ग्रहणं न सम्भवतीति नाद्याऽ-न्यथासिद्धिस्तस्य, एवं च 'येन' इत्यनेन 'कुलालेन' इत्यस्य ग्रहणे यत्पदार्थः कुलाल एव, तन्नियतपूर्ववर्त्येव कुलालपितेति तद्भिन्नत्वं न कुलालपितुरिति 'यत्पदार्थनियतपूर्ववर्तिभिन्नस्य यस्य' इत्यनेन 'कुलालपितुः' इत्यस्य ग्रहणासम्भवेन नोक्तलक्षणं कुलालपितरीति प्रथमेन गतार्थत्वाऽसम्भवात् पञ्चमान्यथासिद्धिकल्पनाऽऽवश्यकीति निषेधहेतुमुपदर्शयति- भ्रमिजनकत्वादिनेति। हेतुत्वरक्षायै घटं प्रति दण्डस्य कारणत्वरक्षायै। तत्र प्रथमान्यथासिद्धिलक्षणे। 'यस्य' इति यत्पदार्थे 'यस्य' इत्येतद्घटकयत्पदार्थे। 'येन' इति यत्पदार्थेति- 'येन' इत्येतद्घटकयत्पादार्थेत्यर्थः। नन्वेवमपि अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववर्तित्वं गृह्यते तं प्रति तदन्यथासिद्धमिति द्वितीयान्यथासिद्धयैव कुलालपितुरन्यथासिद्धत्वं सम्भवति, यतोऽन्यं प्रति कुलालं प्रति कुलालपितुः पूर्ववर्तित्वे ज्ञाते एव घटं प्रति पूर्ववर्तित्वं गृह्यत इति, तथा च कुलालपितुरन्यथासिद्धत्वाय पञ्च-

गुणं प्रतीति वाच्यत्वादिति दिग् ॥५॥

तृतीय-चतुर्थ्योरभेदात् पञ्चम्याश्च द्वितीयस्यामन्तर्भावात् त्रैविध्यवाऽन्यथासिद्धिरिति केचित् ।

परे तु-"एकैवान्यथासिद्धिः 'अवश्यक्लृप्त०' इत्याद्या, नानाविधलाघवकृतावश्यकत्वप्रपञ्चार्थमन्याभिधानम्" इत्याहुः ॥

अथ कपालादेर्द्रव्यत्वादिनाऽन्यथासिद्धत्वात् कपालत्वादिनापि हेतुत्वं न स्यादिति चेत् ? न-अन्यथासिद्धियनिरूपकनियतपूर्व-

---

मान्यथासिद्धिकल्पना व्यर्थेत्याशङ्कां प्रतिक्षिपति- नापि द्वितीयेनेति । निषेधहेतुमाह- तत्रेति- द्वितीयान्यथासिद्धावित्यर्थः । फलाननुगुणं प्रतीति वाच्यत्वात् 'अन्यं प्रति' इत्यनेन 'फलाननुगुणमन्यं प्रति' इत्यस्य विवक्षितत्वात्, तथा च कुलालो घटरूपफलानुगुण एवेति 'कुलालं प्रति' इत्यस्य ग्रहीतुमशक्यत्वान्न द्वितीयान्यथासिद्धिः कुलालापेतुरिति तत्सङ्ग्रहाय पञ्चमान्यथासिद्धिकल्पनाऽऽवश्यकीत्यर्थः ॥५॥

अन्यथासिद्धित्रैविध्यवादिमतमुपदर्शयति- तृतीयेति- स्पष्टम् । अन्यथासिद्धिरेकैवेति मतमुपदर्शयति- परे त्विति-अस्य 'आहुः' इत्यनेन सम्बन्धः । 'अवश्यक्लृप्त०' इत्याद्येति-अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वमिति तृतीयान्यथासिद्धित्वेनोपदर्शिताऽन्यथासिद्धिरेकैव, तेनैव सर्वेषामन्यथासिद्धानां सङ्ग्रहादित्यर्थः । किमर्थं तर्हि प्राचां पञ्चान्यथासिद्धिनिरूपणमित्यपेक्षायामाह- नानाविधेति ।

नन्वनन्यथासिद्धत्वे सति नियतपूर्ववर्तित्वं कारणत्वं न सम्भवति, तथा सति व्यापकधर्मेण द्रव्यत्वादिनाऽन्यथासिद्धत्वस्यैव कपालादौ सत्त्वेन सत्यन्ताऽभावात् कपालादेः कारणत्वमेव न स्यादित्याशङ्कते- अथेति । प्रतिक्षिपति- नेति- द्रव्यत्वादिनाऽन्यथासिद्धत्वे द्रव्यत्वादिकमन्यथासिद्धिनिरूपकम्, न तु कपालत्वादिकं तथेति

वर्तितावच्छेदकरूपवत्त्वं तत्त्वमित्यदोषात्, धूमाद्यनुपधायकवह्न्यादिसाधारण्यायाऽवच्छेदकरूपनिवेशः, धूमादौ रासभादेर्धूमध्वंसादेश्च हेतुत्ववारणाय नियतपूर्ववर्तीति, नियमतोऽव्यवहितपूर्वकालवर्तीत्यर्थः। न च धूमाव्यवहितपूर्वकाले क्वचिद्रासभादेरपि सत्त्वाद् एतद् रासभाद्यव्यावर्तकम् ? तद्रासभत्वादिना रासभादिव्यावर्तकत्वेनास्य

अन्यथासिद्ध्यनिरूपकं सद् नियतपूर्ववर्तितावच्छेदकरूपं कपालत्वादि, तद्वत्त्व कपालादावस्तीति कारणत्वं तस्य निर्वहतीत्यर्थः। येन वह्न्यादिना धूमादिकं नोत्पद्यते तत्र धूमादिनियतपूर्ववर्तित्वस्याभावाद् धूमादिकारणत्वं न स्यादतो नियतपूर्ववर्तितावच्छेकरूपनिवेश इत्याह- धूमाद्यनुपधायकेति-तथा च नियतपूर्ववर्तितावच्छेदकवह्नित्वादिरूपवत्त्वस्य धूमाद्यनुपधायकवह्न्यादावपि सत्त्वात् कारणत्वं सम्भवतीत्यर्थः। अन्यथासिद्ध्यनिरूपकधर्मवत्त्वस्य कारणत्वलक्षणत्वे तद्घटत्वाद्यवच्छिन्नं प्रति अन्यथासिद्ध्यनिरूपकस्यापि रासभत्वादेर्घटत्वाद्यवच्छिन्नं प्रत्यन्यथासिद्ध्यनिरूपकतया तद्वत्त्वमादाय रासभादेः कारणत्वं स्यादतो नियतत्वस्य निवेशः, धूमध्वंसत्वादिकं धूमत्वाद्यवच्छिन्नं प्रत्यन्यथासिद्ध्यनिरूपकं धूमस्योत्तरकाले नियमतस्तद्ध्वंसो भवत्येवेति धूमानियतितावच्छेदकमपीति तद्वत्त्वाद् धूमध्वंसादेर्धूमादिकं प्रति कारणत्वं प्रसज्येतेत्यतो नियतपूर्ववर्तितावच्छेदकनिवेश इत्याह- धूमादाविति। रासभत्वादिकमपि घटत्वाद्यवच्छिन्नस्य पूर्ववर्तितावच्छेदकं स्यादेव, सर्वेषामपि घटादीनां यदा कदाचित् पूर्वकाले रासभस्य यस्य कस्यचित् सत्त्वसम्भवादत आह- नियमतोऽव्यवहितेति। धूमाद्यव्यवहितकालेऽपि नियमतः क्वचिद्रासभादिसत्त्वादेवमपि तत्र कारणत्वापत्तिः स्यादित्याशङ्क्य प्रतिक्षिपति- न चेति। एतत् 'नियमतोऽव्यवहित०' इत्यादि विशेषणम्। निषेधे हेतुमाह- तद्रासभत्वादिनेति- यदि नियमतोऽव्यवहितपूर्ववर्तित्वं कारणत्वलक्षणे न निवेश्यते किन्त्वव्यवहितपूर्ववर्तित्वमात्रं तदा तद्रासभत्वादिना रासभादेरपि

सफलत्वात् , रासभत्वादिना त्वन्यथासिद्धेरेवाहेतुत्वात् । न च तद्रासभत्वादिनापि तत एवाहेतुत्वम् , तद्धूमादिकं प्रति तद्विरुद्धदिक्कालतद्रासभादेस्तत्कारणासहभूतत्वेन यथोक्तान्यथासिद्ध्यभावात् ,

---

धूमत्वाश्रययत्किञ्चिद्धूमाव्यवहितपूर्ववर्तित्वाद् धूमं प्रति तद्रासभत्वादिना रासभादेरपि कारणत्वमापद्येत, नियमतोऽव्यवहितपूर्ववर्तित्वस्य तत्र प्रवेशे च तस्य कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपतया तद्रासभत्वस्य धूमाव्यवहितप्राक्क्षणावच्छेदेन धूमसमानाधिकरणात्यन्ताभावप्रतियोगितायां अवच्छेदकत्वेन न तदनवच्छेदकत्वमिति तद्रासभत्वमादाय निरुक्तस्य नियमतोऽव्यवहितपूर्ववर्तित्वस्य धूमं प्रति रासभादेरभावेन न कारणत्वप्रसङ्ग इति तद्रासभत्वादिना रासभादिव्यावर्तकत्वेनास्य नियमांशनिवेशस्य सफलत्वादित्यर्थः । ननु धूमाव्यवहितपूर्वक्षणावच्छेदेन धूमाधिकरणे रासभत्वावच्छिन्नस्य कालिकेन सत्तया रासभत्वस्य तद्वृत्त्यभावप्रतियोगितानवच्छेदकत्वेन तद्वत्त्वाद् रासभस्य धूमं प्रति कारणत्वापत्तिर्नियमांशनिवेशेऽपीत्यत आह- रासभत्वादिनेति- तथा च रासभत्वादिना धूमं प्रति नियमतोऽव्यवहितपूर्ववर्तित्वेऽपि, अन्यथासिद्धेरेव- अन्यथासिद्धिशून्यत्वस्य कारणलक्षणसन्निविष्टस्याभावादेव, अहेतुत्वात्- कारणत्वाभावादित्यर्थः । ननु धूमत्वावच्छिन्नं प्रति तद्रासभत्वादिनाऽप्यन्यथासिद्धेरेव न रासभादेः कारणत्वापत्तिरिति नियमांशो व्यर्थ एवेत्याशङ्क्य प्रतिक्षिपति- न चेति । तत एव अन्यथासिद्धेरेव । 'अन्यत्रकलसनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम्' इति तृतीयान्यथासिद्धिमत्त्वादेव तद्रासभत्वादिना रासभादेर्धूमादिकं प्रत्यन्यथासिद्धत्वं वाच्यम्, न च तत् सम्भवति, तद्रासभाद्यसमानकालीनस्य तद्रासभादिविरुद्धदिग्वर्तितद्धूमादेरपि धूमत्वाद्यवच्छिन्नतया तत्कारणसहभूतत्वस्य तद्विरुद्धदिक्कालस्य तद्रासभा-

विशेष्यभागसाफल्याय नियतपूर्ववर्तितावच्छेदकेन येन कारणत्वाव्यवहारस्तद्रूपेणैवान्यथासिद्धेर्वाच्यत्वाच्च । यद्वा दैशिकव्यापकतावच्छेदकत्वमपि नियतपूर्ववर्तितावच्छेदकविशेषणम्, इत्थं च दैशिक-

---

देरभावादिति निषेधहेतुमुपदर्शयति- तद्धूमादिकं प्रतीति । तद्विरुद्धेति- तद्धूमादिविरुद्धेत्यर्थः । तत्कारणेति- तद्धूमादिकारणेत्यर्थः । यथोक्तान्यथासिद्धयभावादिति- 'अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतम्' इतिलक्षणलक्षितान्यथासिद्ध्यभावादित्यर्थः । यद् यद् न कारणं तस्य सर्वस्यान्यथासिद्धत्वाभ्युपगमेऽनन्यथासिद्धत्वमात्रस्यैव कारणत्वलक्षणत्वसम्भवान्नियतपूर्ववर्तित्वरूपविशेष्यभागः कारणत्वलक्षणप्रविष्टो व्यर्थः स्याद्, अतस्तस्य व्यर्थत्वापत्तिपरिहाराय नियतपूर्ववर्तितावच्छेदकेन येन रूपेण न कारणत्वव्यवहारस्तेनैव रूपेणान्यथासिद्धत्वमित्यस्य वाच्यत्वेन तद्रासभत्वादेर्धूमत्वाद्यवच्छिन्नं प्रति नियतपूर्ववर्तितावच्छेदकत्वाभावात् तद्रूपेणाऽनन्यथासिद्धित्वस्य भावेन तद्रूपेण रासभादेः कारणत्ववारणाय 'नियमतोऽव्यवहितपूर्वकालवृत्तितावच्छेदक' इति विशेषणं सफलमित्याह- विशेष्यभागसाफल्यायेति- नियतपूर्ववर्तितांशसाफल्यायेत्यर्थः । धूमत्वाद्यवच्छिन्नाव्यवहितपूर्वकाले यत्र कुत्रचिद् देशे नियमतो रासभत्वाद्यवच्छिन्नस्य सत्त्वेऽपि यत्र यत्र देशे धूमत्वाद्यवच्छिन्नमुत्पद्यते तत्र सर्वत्र न रासभत्वाद्यवच्छिन्नस्य सत्त्वमिति नियतपूर्ववर्तितावच्छेदके दैशिकव्यापकतावच्छेदकत्वविशेषणदाने रासभत्वादेस्तादृशरूपतया धारणाऽसम्भवान्न तेन रासभादेः कारणत्वप्रसङ्ग इत्याह- यद्वेति । यदि दैशिकव्यापकतावच्छेदकत्वमपि नियतपूर्ववर्तितावच्छेदकधर्मविशेषणतया कारणतालक्षणे निवेश्यते तदा तत्कार्याधिकरणदेशवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमित्येव कारणत्वलक्षणमस्तु, कार्याव्यवहितप्राक्क्षणावच्छेदेनेत्यादिकालिकव्यापकत्वनिवेशस्तत्र त्यज्यतामित्यत आह- इत्थं चेति- दैशिकव्यापकता-

व्यापकताशालितत्तद्धूमादेर्मिथो हेतुत्ववारणाय कालिकव्यापकत्वनिवेशः, अत एव दैशिक-कालिकव्यापकताद्वयगर्भमेकमेव कारणत्वमिति वदन्ति ।

वच्छेकत्वस्य नियतपूर्ववर्तितावच्छेदकविशेषणतयोपादाने चेत्यर्थः । दैशिकेति - यद्देशे पर्वतादिस्वरूपे पर्वतीयधूमो वर्तते पर्वतीयवह्निरपि वर्तत इति पर्वतीयधूमाधिकरणदेशवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकपर्वतीयवह्नित्ववत्त्वलक्षणपर्वतीयधूमनिरूपितकारणत्वं यथा पर्वतीयवह्नेस्तथा पर्वतीयवह्न्यधिकरणदेशवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकपर्वतीयधूमत्ववत्त्वलक्षणपर्वतीयवह्निनिरूपितकारणत्वं पर्वतीयधूमेऽपि वर्तत इति पर्वतीयधूमस्य कारणं वह्निरिव पर्वतीयवह्निकारणं पर्वतीयधूमोऽपि स्यादित्येवमेकदेशवर्तितत्तद्धूमादेर्मिथः कारणत्वापत्तेर्वारणाय कालिकव्यापकत्वस्यापि कारणत्वलक्षणे निवेशः, तथा च तद्धूमाव्यवहितप्राक्क्षणे यथा तद्वह्नेः सत्त्वात् कालिकतद्धूमव्यापकत्वं तद्वह्नौ समस्ति न तथा कालिकतद्वह्निव्यापकत्वं तद्धूमे तस्य तद्वह्न्यधिकरणदेशे तद्वह्न्यव्यवहितप्राक्क्षणावच्छेदेनाऽसत्त्वेन कालिकतद्वह्निव्यापकत्वस्याभावादित्यर्थः । अत एव दैशिकव्यापकत्व कालिकव्यापकत्वोभयस्य कारणत्वलक्षणे निवेशस्यावश्यकत्वादेव । कारणत्वस्य निष्कृष्टं लक्षणं दर्शयति- वस्तुत इति । धूमत्वाद्याश्रया इति- अत्र 'धूमत्वादि' इत्यादिपदात् तत्तत्कार्यतावच्छेदकानां घटत्वादीनां ग्रहणम्, इदं लक्षणं धूमात्वावच्छिन्नं प्रति कारणत्वं वह्नित्वेन वह्नेर्यत् तत्रेत्थं समनुगतम्- धूमत्वाश्रया यावन्तः पर्वतीय-महानसीयादिधूमव्यक्तयः प्रत्येकं तत्तद्धूमव्यक्तित्वेन रूपेण तत्तद्धूमाव्यवहितप्राक्क्षणावच्छेदेन तत्तत्पर्वतीयधूमादिव्यक्तीनामधिकरणे तत्तत्पर्वत-महानसादिदेशे विशेषणतया अभावप्रतियोगिकस्वरूपसम्बन्धेन वर्तमानोऽभावो न संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावः किन्तु संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्न-

वस्तुतो धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तद्व्यवहितपूर्वकालावच्छेदेन तत्तदधिकरणे विशेषणतया वर्तमानस्याभावस्य कारणतावच्छेदकतत्तत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकरूपवत्त्वं तत्, तत्तद्द्रव्ये तत्तच्चरमसंयोगस्य चाक्षुषादौ चक्षुरादेश्च कालिकेनैव हेतुत्वेऽपि तत्तत्कार्याधिकरणे स्थूलकाले तत्तत्कार्याव्यवहितप्राक्कालावच्छेदेन वर्तमानत्वमभावस्य सुलभम् , तेन तत्कार्याधिकरण-

---

प्रतियोगिताकाभावः 'संयोगेन घटो नास्ति' इति प्रतीतिसिद्धः, तस्य तन्निरूपिता या कारणतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्ना प्रतियोगिता तदवच्छेदकं घटत्वं तदनवच्छेदकं वह्नित्वं तद्वत्त्वं वह्नौ समस्तीति, अत्र कार्याधिकरणे येन सम्बन्धेन वर्तमानं सद् यत् कारणं भवति तन्निष्ठा कारणता तत्सम्बन्धावच्छिन्ना, स च सम्बन्धस्तन्निष्ठकारणतावच्छेदको बोध्यः। तत् कार्यनियतपूर्ववर्तित्वलक्षणं कारणत्वम्।

ननु कालिकसम्बन्धेन कार्य-कारणभावस्थले कालिकसम्बन्धेन कार्याधिकरणं कार्योत्पत्त्याद्यधिकरणक्षण एव, तत्र कार्याव्यवहितपूर्वकालावच्छेदेन वर्तमानत्वं न कस्याप्यभावस्य सम्भवति, पूर्वकालस्य तदधिकरणक्षणासमानकालीनतया तत्क्षणवृत्तितायामवच्छेदकत्वासम्भवादिति तदव्यवहितपूर्वकालानवच्छेदेन तदधिकरणक्षणे वर्तमानस्याभावस्याप्रसिद्ध्या तत्प्रतियोगितानवच्छेदकधर्मवत्त्वलक्षणं कारणत्वमपि तत्राप्रसिद्धमित्यत आह- तत्तद्द्रव्य इति- तत्तत्पटादिद्रव्य इत्यर्थः। तत्तच्चरमसंयोगस्य तत्तदन्त्यसंयोगस्य, अस्य 'कालिकेनैव हेतुत्वेऽपि' इत्यनेनैवान्वयः, अन्यसम्बन्धेन कार्य-कारणभावस्थले अन्यसम्बन्धेन कार्याधिकरणं स्थिरद्रव्यम्, पूर्वकालस्यापि समानकालीनतया तद्वृत्तितायां पूर्वकालस्यावच्छेदकत्वसम्भवेन पूर्वकालावच्छेदेन तादृशस्थिरद्रव्यवर्तमानत्वमभावस्य सुलभमेवेति न तत्राप्रसिद्धिशङ्कोदयसम्भव इति कालिकेन कार्य-कारणभावस्थला-

क्षणे तदसत्त्वेऽपि न क्षतिः । न च 'तत्तद्भूमाद्यधिकारणावच्छेदेन तत्तदव्यवहितपूर्वकाले विशेषणतया०' इत्यादिकमप्यस्त्विति व्याप-

नुसरणम्, कालिकेन तत्तत्कार्याधिकरणं यदि क्षणरूपकाल एव भवेत् तदा स्यादुक्तदिशाऽप्रसिद्धिः, न चैवम्, किन्तु तत्तत्कार्याव्यवहितपूर्वकालमारभ्य तत्तत्कार्याधिकरणक्षणपर्यन्तस्थायिस्थूलकालोऽपि कालिकसम्बन्धेन तत्तत्कार्याधिकरणं भवति, तस्य स्थूलकालस्य तत्तत्कार्याव्यवहितपूर्वकालोऽपि समकालीन इति तादृशस्थूलकालवृत्तितायां तत्तत्कार्याव्यवहितपूर्वकालस्यावच्छेदकत्वसम्भवेन तदवच्छेदेन तत्तत्कार्याधिकरणस्थूलकाले वर्तमानत्वमभावस्य सुलभमिति तत्प्रतियोगितानवच्छेदकधर्मवत्त्वलक्षणं कारणत्वं न तत्राऽप्रसिद्धमित्यर्थः । तेन तत्तत्कार्याधिकरणस्थूलकाले तत्तत्कार्याव्यवहितकालावच्छेदेन वर्तमानत्वस्याभावे सुलभत्वेन, अस्य 'न क्षतिः' इत्यनेनान्वयः । तदसत्त्वेऽपि तत्तत्पूर्वकालावच्छेदेनाभावाऽसत्त्वेऽपि । सहस्रतन्तुकपटादिस्थले द्वितीय-तृतीयादितन्तुसंयोगानामपि तत्पटं प्रति असमवायिकारणत्वेन द्वितीय-तृतीयादिसंयोगान्तरं तत्पटोत्पत्तिवारणाय सहस्रतन्तुकतत्पटद्रव्यं प्रति नवशतोत्तरनवनवतितमतन्तुना समं यः सहस्रसङ्ख्यापूरकतन्तोः संयोगः स चरमसंयोगस्तस्य कारणत्वम्, तस्य द्वितीय-तृतीयादितन्तुसंयोगाद्युत्पत्तिकालेऽभावान्न पूर्वं सहस्रतन्तुकपटोत्पत्तिः, तत्र यद्यपि समवायसम्बन्धेन कार्यद्रव्यं प्रति समवायसम्बन्धेनावयवसंयोगस्य कारणत्वमित्येतावतैवासमवायिकारणताऽवयवसंयोगस्य कार्यद्रव्यं प्रति निर्वहति, तथापि सामान्यतः समवायेन पटत्वावच्छिन्नं प्रति समवायेन तन्तुसंयोगत्वावच्छिन्नस्य कारणत्वम्, विशिष्य तु कालिकसम्बन्धेन सहस्रतन्तुकतत्पटं प्रति कालिकसम्बन्धेन निरुक्तान्त्यसंयोगस्य हेतुत्वमित्येव स्वीकरणीयम्, न तु समवायेन सहस्रतन्तुकतत्पटं प्रति समवायेन निरुक्तचरमतन्तुसंयोगस्य हेतुत्वम्, तथा सति निरुक्तचरमसंयोगस्य समवायेन प्रथम-द्वितीयादितन्तुष्वभावेन तत्र

कताद्वयगर्भत्वमत्राप्यावश्यकम् ? तयोरैक्यात्, कार्यतावच्छेदक-सम्बन्धेन कार्यस्य व्यापकतायाः कारणताघटकत्वौचित्याच्च । न च, अस्तु धूमादेः कार्यमात्रस्य कालिकेनापि कार्यत्वं विनिगमनाभावात्, यदधिकरणावच्छेदेन काले कारणं तदधिकरणे कार्यमित्यतोऽपि देशनियमसम्भवादिति वाच्यम्, तादात्म्येन तन्तुसम्बन्धि-

---

सहस्रतन्तुकपटस्य समवायेन भावेन व्यभिचारः स्यादिति बोध्यम्।

ननु यथा तत्तद्व्यवहितपूर्वकालावच्छेदेन तत्तत्कार्याधिकरणे विशेषणतया वर्तमानस्याभावस्य कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वम्, तथा तत्तत्कार्याधिकरणावच्छेदेन तत्तद्व्यवहितपूर्वकाले विशेषणतया वर्तमानस्याभावस्य कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वमित्यपि सम्भवति, यथा पूर्वत्र देशकालयोरुभयोरपि प्रवेशाद् दैशिक-कालिकव्यापकताद्वयगर्भत्वं तथाऽत्रापीत्याशङ्क्य प्रतिक्षिपति- न चेति। निषेधहेतुमुपदर्शयति- तयोरैक्यादिति- पूर्वदर्शितकारणत्वाऽनन्तरदर्शितकारणत्वयोरैक्यादित्यर्थः, तथा चात्रेष्टापत्तिरेवेति भावः। व्यापकतागर्भं हि कारणत्वम्, व्यापकत्वं च तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमिति कार्यव्यापकत्वे कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणवृत्तित्वमेवाभावे प्रविष्टमिति प्रथमस्यैव कार्याधिकरणवृत्त्यभावघटितस्य समीचीनत्वादित्याह- कार्यतावच्छेदकसम्बन्धेनेति। ननु धूमादेः कालिकसम्बन्धेनापि कार्यत्वमस्तु, तथा च कालिकसम्बन्धस्यापि कार्यतावच्छेदकतया 'कालिकसम्बन्धेन कार्याधिकरण०' इत्याद्यपि कारणत्वलक्षणं सम्भवति विनिगमनाविरहात्, यदधिकरणदेशावच्छेदेन काले कारणं तदधिकरणदेशावच्छेदेन कार्यमित्यभ्युपगमेन कारणाधिकरणदेशस्यैव कार्याधिकरणदेशत्वमिति देशनियमस्यापि सम्भवादित्याशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः। निषेधे हेतुमाह-

तन्त्ववच्छेदेन काले तन्त्वभावात् तन्तौ पटानुत्पत्तिप्रसङ्गात् । अत्र धूमत्वावच्छिन्नाव्यवहितपूर्वत्वमसिद्धम् , नहि 'धूमप्रागभावाधिकरणत्वे सति धूमप्रागभावाधिकरणसमयप्रागभावानधिकरणसमयत्वलक्षणम्' धूमत्वावच्छिन्नाव्यवहितपूर्वत्वं सम्भाव्येताऽपि, सर्वस्यैव समयस्य यत्किञ्चिद्धूमप्रागभावाधिकरणसमयप्रागभावाधिकरणतया तदन्यत्वाभावात् , तद्धर्माश्रययत्किञ्चिदव्यवहितपूर्वत्वगर्भनियमो-

तादात्म्येनेति– समवायसम्बन्धेन पटं प्रति तादात्म्यसम्बन्धेन तन्तुः कारणमिति कारणतावच्छेदकसम्बन्धेन तन्तुरूपकारणसम्बन्धी देशस्तन्तुरेव, इदानीं तन्तौ तन्तुरिति प्रतीत्यभावेन न तन्त्ववच्छेदेन काले तन्तुरिति यदधिकरणावच्छेदेन काले कारणं तदधिकरणावच्छेदेन काले कार्यमिति नियमत एव भवता देशनियमोऽभ्युपगत इति तन्त्ववच्छेदेन काले तन्त्वभावात् तन्तौ पटरूपकार्योत्पत्तिर्न स्यादित्यर्थः । 'धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तद्व्यवहितपूर्वकालावच्छेदेन' इति यदुक्तं तस्य प्रयोजनमुपदर्शयति– अत्रेति– कारणत्वलक्षणे इत्यर्थः । यदि तथा नोपादीयते तदा 'धूमत्वावच्छिन्नाव्यवहितपूर्वकालावच्छेदेन' इत्येवोपादेयम्, तथोपादानं च न सम्भवति, यतो धूमत्वावच्छिन्नाव्यवहितपूर्वत्वमसिद्धमित्यर्थः । कथं तदप्रसिद्धमित्यपेक्षायामाह- नहीति– अस्य 'सम्भाव्येतापि' इत्यनेनान्वयः । कथं नास्य सम्भावनेत्यपेक्षायामाह– सर्वस्यैवेति। तदन्यत्वाभावात् धूमप्रागभावाधिकरणसमयप्रागभावाधिकरणभिन्नत्वाभावात् । ननूक्तरीत्याऽप्रसिद्धया धूमत्वावच्छिन्नाव्यवहितकालावच्छेदेनेत्येवं नोपादेयं किन्तु धूमत्वाश्रययत्किञ्चिदव्यवहितपूर्वकालावच्छेदेनेति, धूमत्वाश्रययत्किञ्चिद्धूमाव्यवहितपूर्वत्वं च नाप्रसिद्धम्, तद्धूमव्यक्तिप्रागभावाधिकरणत्वे सति तद्धूमव्यक्तिप्रागभावाधिकरणसमयप्रागभावानधिकरणसमयत्वरूपस्य तस्य तद्धूमोत्पत्त्यव्यवहितपूर्वसमये प्रसिद्धत्वादित्यत आह– तद्धर्माश्रयेति । 'तद्धर्माश्रय०' इत्यादि-

ऽपि नोपादेयः ? द्रव्यत्व-जन्यद्रव्यत्वाद्यवच्छिन्नं प्रत्यपि कपालादिना हेतुतापत्तेरिति 'धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तदव्यवहितपूर्वकालावच्छेदेन' इत्युक्तम्, अत एव 'कार्यमात्रवृत्तिधर्म-

---

निवेशे द्रव्यत्वाद्यवच्छिन्नं प्रति कपालत्वादिनाऽपि कपालादेः कारणत्वं स्यात्, तद्धर्मो द्रव्यत्वं तदाश्रयो यत्किञ्चिद्घटादिस्तद्व्यवहितपूर्वसमयावच्छेदेन द्रव्यत्वाद्यवच्छेदेन द्रव्यत्वाद्यवच्छिन्नाधिकरणे कपालादौ विशेषणतया वर्तमानस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदककपालत्वादिरूपवत्त्वस्य कपालादौ सत्त्वादित्याह- द्रव्यत्वेति- द्रव्यत्वं च जन्यद्रव्यत्वं च द्रव्यत्व-जन्यद्रव्यत्वे ते आदी येषां ते द्रव्यत्व-जन्यद्रव्यत्वादयः, तैरवच्छिन्नं द्रव्यत्व-जन्यद्रव्यत्वाद्यवच्छिन्नमित्येवं द्रव्यत्वस्याप्यवच्छिन्नमित्यनेनान्वयः, द्रव्यत्वस्य जन्याऽजन्यवृत्तितया कार्यतानवच्छेदकतया तदवच्छिन्नं प्रति न कस्यापि कारणत्वापादनं सम्भवतीत्यतो जन्यद्रव्यत्वादीति, आदि-आदि पदाज्जन्यपृथिवीत्वादेरुपग्रहः । कपालादिनेत्यस्य भावप्रधाननिर्देशात् कपालत्वादिनेत्यर्थः । इति एतस्मात् कारणात्, तथा च जन्यद्रव्यत्वाद्यवच्छिन्नकारणत्वलक्षणं 'जन्यद्रव्यत्वाद्याश्रया यावन्तः प्रत्येकं तत्तदव्यवहितपूर्वकालावच्छेदेन.' इत्यादिघटितं स्यात्, तथा च जन्यद्रव्यत्वाद्याश्रययावदन्तर्गतं पटाद्यपि, प्रत्येकं तत्तदव्यवहितपूर्वकालः पटाद्यव्यवहितपूर्वकालोऽपि, तदवच्छेदेन जन्यद्रव्यत्वाद्यवच्छिन्नाधिकरणे तन्त्वादौ कपालाद्यभावस्य वर्तमानस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकमेव कपालत्वादिकमिति न कपालादौ जन्यद्रव्यत्वाद्यवच्छिन्नकारणत्वापादनमिति । अत एव उक्तदिशा 'कार्याव्यवहितपूर्वसमयावच्छेदेन' इत्यस्य कारणत्वशरीरे निवेशादेव, यदि नित्याऽनित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वमाश्रीयेत तदाश्रययावदन्तर्गतं नित्यमपि, तदव्यवहितपूर्वकालाऽप्रसिद्धया नोक्तलक्षणकारणत्वं तद्धर्मावच्छिन्नं प्रति सङ्गतिमङ्गति,

स्यैव कार्यतावच्छेदकत्वम्' इति प्राचीनगाथापि सङ्गच्छते । अथात्र शिखराद्यवच्छेदेन वह्न्यभावसत्त्वादव्याप्तिः, प्रतियोगिव्यधिकरणत्व-निवेशे तु धूमध्वंसातिव्याप्तिरिति चेत् ? न—देशानवच्छिन्नविशेषणतया वर्तमानत्वस्य वाच्यत्वात्, न च वह्न्यभावः पर्वतादौ देशानवच्छिन्नविशेषणतया वर्तते । वृत्त्यनियामकसम्बन्धस्य प्रतियोगि-

---

किन्तु कार्यमात्रवृत्तिधर्मस्यैव जन्यतावच्छेदकत्वे तदाश्रयाणां प्रत्येकं तत्तदव्यवहितपूर्वकालप्रसिद्ध्या तदवच्छिन्ने उक्तकारणत्वलक्षणं सुसङ्गतमिति कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वमिति प्राचीनोक्तिः सुसङ्गता भवतीत्यर्थः ।

ननु धूमाद्यधिकरणे पर्वतादौ तत्तद्धूमाद्यव्यवहितपूर्वकालावच्छेदेनापि शिखराद्यवच्छेदेन वह्न्याद्यभावसत्त्वात् तत्प्रतियोगितावच्छेदकधर्मवत्त्वमेव वह्न्यादावित्युक्तलक्षणाऽव्याप्तिः, तद्वारणाय यद्यभावे प्रतियोगिव्यधिकरणत्वविशेषणमुपादीयते तदा धूमध्वंसस्यापि धूमं प्रति कारणत्वं स्यात्, तद्धूमाधिकरणे तद्धूमावयवे तद्धूमाव्यवहितपूर्वकालावच्छेदेन तद्धूमध्वंसाभावस्य सत्त्वेऽपि तस्य प्रतियोगिव्यधिकरणत्वासम्भवात् तद्धूमावयवे तद्धूमध्वंसस्य सत्त्वादित्याशङ्कते- अथेति । समाधत्ते- नेति । 'तत्तदधिकरणे विशेषणतया वर्तमानस्य' इत्यत्र 'विशेषणतया' इत्यस्य 'देशानवच्छिन्नविशेषणतया' इत्येवंरूपतया विवक्षणे धूमाधिकरणे पर्वते शिखररूपदेशावच्छिन्नविशेषणतयैव वह्न्यभावो वर्तते, न देशानवच्छिन्नविशेषणतयेति न वह्न्यादावव्याप्तिरित्याह- न चेति- अस्य 'वर्तते' इत्यनेनान्वयः । ननु वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे यागादेः स्वर्गादिकं प्रति स्वजन्यापूर्ववत्त्वसम्बन्धेन कारणत्वं न स्यात् स्वजन्यापूर्ववत्त्वसम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वादित्यत

तानवच्छेदकत्वे तु तत्तत्कार्याव्यवहितपूर्वकालावच्छिन्नतत्तत्कारणतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वं निवेश्यम्, अतो न यागादेः स्वजन्यापूर्वसम्बन्धेन हेतुत्वं दुर्घटम्, नवा धूमध्वंसेऽतिव्याप्तिः, नवा प्रागुक्तरीत्यापि धूमसंयोगाभावेऽतिव्याप्त्यनिवृत्तिः, धूमावयवसंयोगाभावे त्वाद्यान्यथासिद्धेरिव नातिव्याप्तिरिति बोध्यम्।

आह– वृत्त्यनियामकसम्बन्धस्येति। तत्तत्कार्येति– एवं च कारणतानवच्छेदकीभूतसम्बन्धावच्छिन्नप्रतियोगिताककारणाभावस्य कार्याधिकरणे वर्तमानत्वेऽपि तत्तत्कार्याव्यवहितपूर्वकालावच्छिन्नतत्तत्कारणतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात् तस्य ग्रहणासम्भवेन तमादायाव्याप्त्यसम्भवादभावीयप्रतियोगितायां कारणतावच्छेदकतत्तत्सम्बन्धावच्छिन्नत्वस्यानिविष्टतया वृत्त्यनियामकेनापि स्वजन्यापूर्ववत्त्वसम्बन्धेन यागादेः स्वर्गादिकं प्रति कारणत्वमुपपद्यत इत्याह– अतो न यागादेरिति। धूमध्वंसाभावस्य धूमाधिकरणे धूमावयवे वर्तमानस्य निरुक्तप्रतियोगिव्यधिकरणत्वसम्भवेन तत्प्रतियोगितावच्छेदकधर्मवत्त्वादेवोक्तलक्षणाभावान्न धूमध्वंसे धूमकारणत्वापत्तिरपीत्याह– नवा धूमध्वंसेऽतिव्याप्तिरिति। देशानवच्छिन्नविशेषणतया वर्तमानत्वस्य निवेशपक्षे धूमसंयोगाभावाभावस्य धूमसंयोगरूपस्य देशानवच्छिन्नविशेषणतया वर्तमानत्वाभावात् तद्धारणासम्भवादन्याभावस्यैव ग्रहणेन तत्प्रतियोगितानवच्छेदकधर्मवत्त्वेन धूमसंयोगाभावस्य धूमं प्रति कारणत्वापत्तिरपीदानीं देशानवच्छिन्नविशेषणतया वर्तमानत्वस्यानिवेशेन तद्धूमाव्यवहितपूर्वसमयावच्छेदेनासत्त्वादेव निरुक्तप्रतियोगिवैयधिकरण्यवत्तया च धूमसंयोगाभावाभावस्य धारणसम्भवेन न सम्भवतीत्याह– नवा प्रागुक्तरीत्येति। धूमावयवसंयोगाभावलक्षणप्रतियोगिसमानाधिकरणत्वाद् धूमावयवसंयोगाभावाभावस्य निरुक्तप्रतियोगिव्यधिकरणाभावपदेन धारणासम्भवाद् धूमावयवसंयोगाभावेऽतिव्याप्तिः स्यादित्यत आह– धूमाव-

इत्थं च कालिकेन यत्र कारणत्वं तत्र तत्तत्कार्याव्यवहित-प्राक्कालत्वव्यापकतावच्छेदकरूपवत्त्वमेव तत् । यदि च द्विकपाल-

---

यवेति– धूमावयवसंयोगाभावे धूमं प्रति पूर्ववर्तित्वं धूमावयवसंयोगेन सहैव गृह्यत इति प्रथमान्यथासिद्धेः सद्भावादन्यथासिद्धिशून्यत्वस्याभावादेव न तद्घटितकारणत्वलक्षणातिव्याप्तिरित्यर्थः। लक्ष्यभेदेन लक्षणभेदाद् यत्र लघुभूतकारणत्वलक्षणादपि निर्वाहस्तत्र लघुभूतकारणत्वलक्षणमेव वाच्यमित्याह– इत्थं चेति– अन्त्यतन्तुसंयोगस्य कालिकेन सहस्रतन्तुकपटं प्रति कालिकेन कारणत्वम्, तत्र सहस्रतन्तुकपटलक्षणकार्याव्यवहितपूर्वकालत्वाधिकरणे तदन्त्यतन्तुसंयोग एव कालिकसम्बन्धेन वर्तत इति कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्तदभावो न तत्र वर्तते किन्तु या घटादिव्यक्तिस्तदानीं न समस्ति तदभाव एव, तत्प्रतियोगिताया अवच्छेदकं तद्घटादिव्यक्तित्वम्, अनवच्छेदकं तच्चरमतन्तुसंयोगव्यक्तित्वम्, तद्वत्त्वं तच्चरमतन्तुसंयोगव्यक्तौ समस्तीति लक्षणसमन्वयः। तत् कारणत्वम्। यत्र तु कार्यस्य देशतोऽपि कालतोऽपि च व्यापकं कारणं तत्र देशगर्भव्यापकत्वघटितं यथा कारणत्वं तथा कालगर्भव्यापकत्वघटितमपि कारणत्वं सम्भवति, तयोश्चैकमेव कारणत्वमिति विनिगन्तुमशक्यत्वेन कारणताद्वयमेव तत्र स्वीकर्तुमुचितम्, तत्र देशतो व्यापकत्वगर्भकारणत्ववतः कारणात् कार्यस्य देशनियमनम्, कालतो व्यापकत्वगर्भकारणत्ववतः कारणात् कार्यस्य कालनियमनम्, तत्रव देशतोव्यापकत्व-कालतोव्यापकत्वद्वयगर्भमेकमपि कारणत्वं सम्भवति, तादृशैककारणत्ववतोऽपि कारणात् कार्यस्य देश-कालोभयनियमनं सम्भवतीत्याह– 'यदि चेति। तत्संयोगस्य कपालद्वयसंयोगस्य, यस्मिन् देशे यस्मिन् काले च तादृशघटादिस्तस्मिन् देशे तस्मिन् काले च तादृशसंयोगोऽस्तीति तत्रकव्यापकतागर्भमपि कारणत्वं समस्ति व्यापकताद्वयगर्भमपि कारणत्वमिति।

घटादौ तत्संयोगस्य विनिगमनाविरहात् कालिकेन दैशिकेन च कारणत्वं तदा तत्रैकैकव्यापकतागर्भमेकैकमेव कारणत्वम्, तत्रैव व्यापकताद्वयगर्भमेकं कारणत्वम् ।

धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तदव्यवहितपूर्वकालावच्छेदेन तत्तदधिकरणे तत्तत्सम्बन्धेन सम्बन्धिवृत्तिरूपवत्त्वमेव वा तत्, यावत्साधनाश्रयाश्रितत्वस्य व्यापकतारूपत्वात् । कालिकेन कारण-

---

अत्यन्ताभावाद्यनिवेशेन लाघवात् कारणत्वस्य लक्षणान्तरमाह- धूमत्वाद्याश्रया यावन्त इति- 'धूमत्वादि' इत्यादिपदाद् घटत्वादीनां कार्यतावच्छेदकधर्माणामुपग्रहः, तत्र धूमत्वावच्छिन्नं प्रति वह्नित्वावच्छिन्नस्य कारणत्वे इत्थं लक्षणसंगमनम्- धूमत्वाश्रया यावन्तः पर्वतीयधूमादयः प्रत्येकं पर्वतीयतत्तद्धूमव्यक्तित्वादिरूपेण तत्तद्धूमाव्यवहितपूर्वकालावच्छेदेन, अस्य 'सम्बन्धि' इत्युत्तरेण सम्बन्धः, तत्तदधिकरणे पवतीयतत्तद्धूमादिव्यक्त्यधिकरणे तत्तत्पर्वतादौ तत्तत्सम्बन्धेन कारणतावच्छेदकसंयोगसम्बन्धेन सम्बन्धी यः पर्वतीयतत्तद्वह्न्यादिस्तद्वृत्तिरूपं तत्तद्वह्निव्यक्तित्वादिकं वह्नित्वसामान्यं च तद्वत्त्वं वह्नौ समस्तीति लक्षणसमन्वयः ।

अत्रापि कार्यव्यापकत्वं कारणस्यायातमेवेत्याह- यावत्साधनेति- अत्र साधनं कार्यमेव, तस्य कारणानुमापकत्वात् साधनत्वं बाध्यम् । ननु यत् कालिकसम्बन्धेन कारणं तत् कार्यस्याव्यवहितपूर्वकालावच्छेदेन पूर्वकाले वर्तते, पूर्वकालश्च न कार्याधिकरणम्, किन्तु यत्क्षणे कार्यमुत्पद्यते तत्क्षण-तदुत्तरक्षणयोरेव कार्याधिकरणत्वम्, तद्वृत्तौ चासमकालत्वात् कार्याव्यवहितपूर्वकालो नावच्छेदक इति तत्तदव्यवहितपूर्वकालावच्छेदेन तत्तत्कार्याधिकरणे काले कालिकसम्बन्धेन सम्बन्धि कारणं न भवतीति तद्वृत्तिरूपवत्त्वं न कारणे इत्युक्तलक्षणस्य तत्राव्याप्तिरित्यत आह- कालिकेन कारणमपीति- यो दिनमासादिलक्षणः स्थूलकालः कार्यस्य पूर्वकाले कार्यकाले च वर्तते

मपि प्राक्कालावच्छेदेन कार्याधिकरणस्थूलकालसम्बन्धि, यागादिकं च स्वजन्यापूर्वसम्बन्धेन तथा, तादृशसम्बन्धिवृत्तिधर्म स्वव्यापारा-

तद्रूपकार्याधिकरणकाले कार्याव्यवहित पूर्वकालावच्छेदेन कालिक-सम्बधेन सम्बन्धि कारणं भवति, पूर्वकालस्यापि स्थूलकालकालीनत्वेन तत्सम्बन्धि भवतीति तद्व्यावृत्तौ तस्यावच्छेदकत्वं निर्वहतीति। ननु यागो न स्वर्गरूपकार्याव्यवहित पूर्वकाले वर्तत इति न तद्गत-कार्याधिकरणसम्बन्धित्वेन तस्यावच्छेदकत्वमिति तत्रोक्तलक्षणस्याव्याप्तिरित्यत आह—यागादिकं चेति। तथा कार्याव्यवहित पूर्वकालावच्छेदेन स्वर्गादिरूपकार्याधिकरणसम्बन्धि, यागो यदि साक्षात्सम्बन्धेन कारणं स्याद्, न स्यात् तदा कार्याव्यवहित पूर्वकालावच्छेदेन कार्याधिकरणसम्बन्धी, न चैवम्, किन्तु स्वजन्यापूर्वसम्बधेन कारणम्, तेन सम्बन्धेन च कार्याव्यवहित पूर्वकालेऽपि स वर्तत इति कार्याव्यवहित-पूर्वकालावच्छेदेन कार्याधिकरणसम्बन्धी स भवत्येवेत्युक्तलक्षणस्य तत्र सम्पत्तिः।

यागादेः कारणत्वोपपत्तयेऽन्येषां मत मुपदर्शयति— तादृशसम्बन्धीति—धूमत्वाद्याश्रया यावन्तः प्रत्येकं तत्तद्व्यवहितपूर्वकालावच्छेदेन तत्तदधिकरणे यत् तत्तत्सम्बन्धेन सम्बन्धिवृत्तिरूपं यश्च स्वव्यापार-स्तदन्यतरवत्त्वं कारणत्वम्, यत्र कारणं साक्षात्सम्बधेन कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणे वर्तते तत्र तत्कारणगततद्व्यक्तित्वादिरूपमुपादाय लक्षणसमन्वयः, यत्र तु कारणं तदानीं न विद्यते किन्तु व्यापारस्तत्र व्यापारवत्त्वमादाय लक्षणसमन्वयः, यथा—यागस्य स्वर्गं प्रति कारणत्वे स्वर्गस्याव्यवहित पूर्वसमये सुखविशेषरूपस्वर्गाधिकरणे आत्मनि यागो न विद्यते, तस्य पूर्वमेव विनष्टत्वात्, किन्तु तद्व्यापारोऽदृष्टरूपः, तथा च सुखविशेषात्मकस्वर्गरूपकार्याधिकरणे विद्यमानं यत् स्वव्यापारतयाऽभिमतमदृष्टं जनकतासम्बन्धेन तद्वत्त्वं यागे समस्तीति निरुक्तान्यतरवत्त्वलक्षणं कारणत्वं तत्रोपपद्यत इति। ननु 'तत्तद्व्यवहितपूर्वकालावच्छेदेन' इति स्थाने 'तत्तत्पूर्वकालावच्छेदेन'

न्यतरवत्त्वं वाच्यमित्यन्ये । न चाव्यवहितत्वांशत्यागेन तत्तत्पूर्वसमयावच्छेदेनेत्येतावदेवोच्यताम् ? अव्यवहितपूर्वसमयावच्छेदेन कार्यवति यदभावो ज्ञायते तत्र कारणताबुद्ध्यनुदयेन तन्निवेशात् । अथेदृशकारणत्वग्रहेऽस्तु व्यतिरेकव्यभिचारज्ञानं विरोधि, अन्वयव्यभिचारज्ञानं तु कुत इति चेत् ? 'अवश्यकृप्त०' इत्याद्यन्यथा-

इत्येवोच्यताम्, तावतैव पूर्वकालावच्छेदेन सतो यागादेः कारणत्वं निर्वहतीति स्वव्यापारवत्त्वं न निवेशनीयमित्याशङ्क्य प्रतिक्षिपति- न चेति । निषेधे हेतुमाह- अव्यवहितेति । तत्र कार्याधिकरणेऽव्यवहितपूर्वसमयावच्छेदेन वर्तमानाभावप्रतियोगिनि। तन्निवेशात् स्वव्यापारवत्त्वस्य निवेशात्। ननु अन्वय-व्यतिरेकग्रहाभ्यां कारणत्वग्रहो भवति, तत्रान्वयः कारणसत्त्वे कार्यसत्त्वम्, व्यतिरेकः कारणाभावे कार्याभावः, कारणत्वज्ञाने अन्वयव्यभिचारज्ञानं व्यतिरेकव्यभिचारज्ञानं च प्रतिबन्धकम्, तत्रान्वयव्यभिचारः कारणसत्त्वे कार्याभावः, व्यतिरेकव्यभिचारस्तु कारणाभावे कार्यसत्त्वमिति वस्तुस्थितौ प्रकृते निरुक्तकारणत्वस्य कार्यव्यापकत्वघटितत्वात् कारणाभाववति कार्यसत्त्वनिश्चये कार्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वस्यैव कारणे ग्रहे तदभावरूपव्यापकत्वगर्भकारणत्वग्रहप्रतिबन्धाद् व्यतिरेकव्यभिचारज्ञानं भवतु निरुक्तकारणत्वग्रहप्रतिबन्धकम्, अन्वयव्यभिचारे सत्यपि कारणस्य कार्यव्यापकत्वमनपायामति कथमन्वयव्यभिचारज्ञानं निरुक्तकारणत्वग्रहविरोधीत्याशङ्कते- अथेति.। अन्यथासिद्धभिन्नत्वस्यापि कारणत्वलक्षणे प्रवेशाद् यस्यान्वयव्यभिचारस्तस्य 'अवश्यकलप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्व'लक्षणान्यथासिद्धत्वमेवेत्यन्वयव्यभिचारज्ञाने सति अन्यथासिद्धत्वज्ञानम्, ततश्चाऽन्यथासिद्धभिन्नत्वघटितकारणग्रहप्रतिबन्ध" इत्येवमन्वयव्यभिचारज्ञानस्यापि निरुक्तकारणत्वग्रहप्रतिबन्धकत्वमुपपद्यत इति समाधत्ते- अवश्येति- पञ्चम्यन्तानन्तरम्

सिद्धिज्ञानप्रयोजकत्वात् ।

समूहान्वय-व्यतिरेकाभ्यां समूहे कारणत्वग्रहे तदितरगृहीत-तत्कार्यकारणताकसमूहसत्त्वे तद्व्यतिरेकेऽवश्यं कार्यव्यतिरेकः, तावत्समूहसत्त्वे तत्सत्त्वे चावश्यं तत्कार्यसत्त्वमित्यन्वयव्यतिरेकयोर्ग्रहो विशिष्य तत्कारणत्वग्राहकः, तयोर्ग्रहे चान्वय-व्यतिरेकव्यभिचार-ज्ञानं विरोधीत्यप्याहुः ॥

अत्र 'येन सह०' इत्यादिकमयुक्तम् , 'येन–पृथगन्वयादिमता,

'अन्वयव्यभिचारज्ञानमीदृशकारणत्वग्रहे विरोधि' इत्यनुवर्तते ।

अन्वयव्यभिचारज्ञानस्य प्रकारान्तरेण कारणत्वग्रहविरोधित्व-मुपवर्णयतां मतमुपदर्शयति– समूहान्वय-व्यतिरेकाभ्यामिति– कारणसमूह-सत्त्वे कार्यसत्त्वं कारणसमूहाभावे कार्याभाव इत्येवमन्वयव्यतिरेका-भ्यामित्यर्थः । समूहे कारणसमूहे। एवं सति दण्डचक्रादिसमूह एव कारणत्वं सिध्येन्न प्रत्येकं दण्डादावित्यत आह– तदितरेति– दण्डेतरो गृहीतघटकारणताको यश्चक्रादिसमूहस्तस्य सत्त्वे दण्डव्यतिरेके-ऽवश्यं घटाभावः, दण्डातिरिक्तचक्रादिसमूहसत्त्वे दण्डसत्त्वेऽवश्यं घटसत्त्वमित्येवंस्वरूपान्वय-व्यतिरेकयोर्ग्रहो दण्डत्वेन दण्डस्य घट-कारणत्वग्राहकः, एवं चक्रादीनामपि विशिष्य कारणत्वग्राहक उक्त-दिशाऽन्वय-व्यतिरेकयोर्ग्रहोऽवसेयः । तयोर्ग्रहे उक्तदिशाऽन्वय-व्यति-रेकयोर्ग्रहे ।

इत्थं वैशेषिकाभिमतमनन्यथासिद्धत्वघटितकारणत्वस्वरूपमुप-पाद्य तत्खण्डनमारभते– अत्रेति । तत्र प्रथमान्यथासिद्धिनिर्वचन-मपाकरोति– येनेत्यादि । पृथगन्वयादिमता पृथगन्वय-व्यतिरेकवता । नियमादीति– 'येन सहैव०' इत्येवकारेण लब्धस्य लक्षणे नियम-प्रवेशस्य, वैफल्यात्– प्रयोजनाभावात्, तथा च नियमघटितस्य प्रथमान्यथासिद्धिलक्षणस्येतरभेदसाधने हेतुभूतस्य 'पर्वतो वह्निमान्

यस्य—तद्रहितस्य' इत्युक्तौ नियमादिप्रवेशवैफल्यात्, 'पृथगन्वयादिमता' इत्यादेरनुगतानतिप्रसक्तस्य दुर्वचत्वाच्च ।

'अन्यं प्रति०' इत्यादिकमप्ययुक्तम्, ईश्वरज्ञानादेः क्षित्या-

नीलधूमाद्' इत्यत्र नीलधूमस्येव व्यर्थविशेषणघटितत्वाद् व्याप्यत्वासिद्धत्वं स्यादित्यर्थः । भवतु नियमाद्यघटितमेवेत्यत आह— पृथगन्वयेत्यादि- किं तत् पृथगन्वयवत्त्वम् ? किं वा पृथग्व्यतिरेकवत्त्वम् ? दण्डसत्त्वे घटसत्त्वमन्वयः, दण्डाभावे घटाभावो व्यतिरेक इत्येवं निर्वचनं च दण्ड-घटादिकारण-कार्यभेदेनाननुगतमेव, कारणसत्त्वे कार्यसत्त्वमन्वयः, कारणाभावे कार्याभावो व्यतिरेक इत्येवं निर्वचनं त्वनुगतं तदा भवेद् यदि कारणत्वं कार्यत्वं चान्वय-व्यतिरेकावगमात् प्रागेव सुगृहीतं भवेत्, न चैवम्, अन्वय-व्यतिरेकज्ञानत एव कारणत्व-कार्यत्वज्ञानाभ्युपगमात्, अन्यथासिद्धिशून्यत्वघटितं च कारणत्वमन्यथासिद्धिशून्यत्वज्ञानाज्ज्ञायते, अन्यथासिद्धिशून्यत्वज्ञानं चान्यथासिद्धिज्ञानात्, अन्यथासिद्धिज्ञानं चान्यथासिद्धिस्वरूपसन्निविष्टपृथगन्वय-व्यतिरेकज्ञानात्, पृथगन्वय-व्यतिरेकज्ञानं च कारणत्वज्ञानादित्येवं चक्रकापत्त्याऽपि न कारणत्वादिनाऽन्वय-व्यतिरेकानुगमनं कर्तुं शक्यम्, तथा च दण्डत्वादिकमननुगतमिति तद्घटितान्वय-व्यतिरेकावप्यननुगतौ, प्रमेयत्वादिकं चातिप्रसक्तम्, तद्व्यतिरिक्तं च कारणमात्रेष्वेव वर्तमानं कारणत्वातिरिक्तं निर्वक्तुमशक्यमित्यन्वय-व्यतिरेकावेवानुगतौ निर्वक्तुमशक्यौ सुतरां पृथक्त्वघटितौ तावित्येवं 'पृथगन्वयादिमता' इत्यादेरनुगतानतिप्रसक्तस्य वक्तुमशक्यत्वाच्चेत्यर्थः।

द्वितीयान्यथासिद्धिनिर्वचनं प्रतिक्षिपति- अन्यमिति। अयुक्तत्वे हेतुमाह- ईश्वरज्ञानादेरित्यादि 'क्षितिः सकर्तृका कार्यत्वाद्' इत्याद्यनुमानेन क्षितिकारणतयेश्वरज्ञानं सिद्ध्यति, तत्र कार्यत्वावच्छिन्नं प्रत्युपादानगोचराऽपरोक्षज्ञानादिमत्त्वेन न कारणत्वं किन्तूपादानगोचराऽपरोक्षज्ञानत्वेनैव, कारणत्वं च नियतपूर्ववर्तित्वमेवेति तत्सिद्धौ

दिपूर्ववर्तित्वेन गृहीतस्यैव घटादिपूर्ववर्तित्वग्रहाद् घटादावन्यथासिद्ध्यापत्तेः। क्षित्यादिपूर्ववर्तित्वग्रहादेव कार्यमात्रे तद्धेतुत्वसिद्धिरिति चेत् ? तथापि शब्दसाक्षात्कारे गगनस्यान्यथासिद्ध्यापत्तिः। इन्द्रियत्वेन तत्र हेतुत्वग्रहाददोष इति चेत् ? न–तथापि श्रावणत्वावच्छिन्ने श्रोत्रत्वेनाहेतुत्वप्रसङ्गात्।

क्षित्यादिकं प्रति पूर्ववर्तिता सिद्धैव, ज्ञाने प्रतिनियतविषयत्वसिद्धिः स्वकारणबलादनुव्यवसायाद् वा, ईश्वरज्ञानस्य च नित्यत्वेन तत्कारणाभावान्न कारणनियम्या प्रतिनियतविषयता, अस्मदादिज्ञानेन च नानुभूयत ईश्वरज्ञानं प्रतिनियतविषयतया, स्वयं च स्वप्रकाशरूपत्वादेव नानुव्यवसायगम्यम्, अतो न तस्य प्रतिनियतविषयत्वम्, किन्त्वनुमानतः सिद्धयत् तत् सर्वविषयकमेव विनिगमकाभावात् सिद्धयति, ततश्च घटोपादानगोचराऽपरोक्षज्ञानरूपत्वाद् घटं प्रति तत् कारणम्, एवं पटादिकं प्रत्यपि, क्षित्यादिकं प्रत्यप्युपादानगोचरापरोक्षज्ञानत्वेनैव तस्य कारणता, सा च घटोपादानगोचराऽपरोक्षज्ञानत्वाद् घटं प्रत्यप्यविशिष्टा ज्ञेया, एवं सत्यप्यत्र द्वितीयान्यथासिद्धिलक्षणगमनादन्यथासिद्धेरापत्तिरित्यर्थः। घटादावीश्वरज्ञानादेरन्यथासिद्धिपरिहारमाशङ्कते– क्षित्यादिपूर्ववर्तित्वग्रहादेवेति। तद्धेतुत्वसिद्धिः ईश्वरज्ञानादिनिष्ठहेतुत्वसिद्धिः। प्रतिक्षिपति– तथाऽपीति– ईश्वरज्ञानादेर्घटादिकं प्रत्यन्यथासिद्धत्वाभावेऽपीत्यर्थः। शब्दसाक्षात्कार इति– शब्दं प्रति पूर्ववर्तित्वं गृहीत्वैवाकाशस्य शब्दसाक्षात्कारं प्रति पूर्ववर्तित्वं गृह्यत इति द्वितीयान्यथासिद्धिलक्षणगमनम्। प्रत्यक्षत्वावच्छिन्नं प्रतीन्द्रियत्वेन यत् कारणत्वं तदादायाकाशस्य शब्दसाक्षात्कारं प्रति कारणत्वं निर्वहतीत्याशङ्कते– इन्द्रियत्वेनेति। तत्र आकाशे। श्रावणत्वावच्छिन्नं प्रति श्रोत्रत्वेनाकाशस्य यत् कारणत्वं तस्य विलोपः स्यादेवेति समाधत्ते– नेति। तथापि सामान्यकार्यकारणभावमुपादायाकाशस्य शब्दसाक्षात्कारं प्रति कारणत्वेऽपि।

'अवश्यक्लृप्त०' इत्यादिकमप्यावश्यकत्वस्य दुर्वचत्वान्न युक्तम्। न च, अन्यथासिद्ध्यनिरूपकनियतपूर्ववर्तिताकरूपवत्त्वं हेतुत्वम्, तत्रान्यथासिद्ध्यनिरूपकत्वं च येन नियतपूर्ववर्तितावच्छेदकेन कारणत्वं न व्यवह्रियते तत्तद्भेदसमूहः. तावदन्यतमत्वावच्छिन्नप्रति-

---

तृतीयान्यथासिद्धिमपहस्तयति- अवश्यक्लृप्तेत्यादिकमिति- शरीर-संबन्धोपस्थितिकृतलाघवादावश्यकत्वं भवति, पूर्ववर्तित्वसाम्येऽपि यस्य यदपेक्षया लघु शरीरं लघुभूतः सम्बन्ध उपस्थितिर्वा शीघ्रं भवति तदावश्यकमिति गीयते, तथा च लाघवस्य निर्वचने सत्येवावश्यकत्वस्य निर्वचनं सम्भवति, लाघवं च सानिरूपकमिति निरूपकभेदेन भिन्नम्, न च सकललाघवानुगतं लाघवत्वं नाम किञ्चित् समस्ति, ततश्च लाघवस्यैवानुगतस्य निर्वक्तुमशक्यत्वात् तन्निबन्धनसिद्धिकमावश्यकत्वमपि निर्वक्तुमशक्यमिति भवति तस्य दुर्वचत्वम्। यादृशस्य कारणत्वस्याभ्युपगमे नाननुगमदोषो नवाऽन्यथासिद्धिनिरूपकेण कारणत्वस्य भ्रमानुपपत्तिस्तादृशं कारणत्वमाशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेनान्वयः, अन्यथासिद्ध्यनिरूपकं नियतपूर्ववर्तिताकं यद् रूपं तद्वत्त्वं कारणत्वम्, नियता पूर्ववर्तिता येन तद् नियतपूर्ववर्तिताकमिति विग्रहाश्रयणाद् 'नियतपूर्ववर्तिताकम्' इत्यस्य नियतपूर्ववर्तितावच्छेदकमित्यर्थः। दण्डत्वेन दण्डस्य घटं प्रति नान्यथासिद्धिरिति दण्डत्वमन्यथासिद्ध्यनिरूपकम्, दण्डे घटपूर्ववर्तिता दण्डत्वेनैव नियतेति नियतपूर्ववर्तितावच्छेदकमपि तत्, तद्वत्त्वं च दण्डे समस्तीति भवति तस्य घटकारणत्वम्। तत्र निरुक्तलक्षणे, घटकत्वं सप्तम्यर्थः।

येन द्रव्यत्व-सत्त्वादिना, घटपूर्ववर्तितावच्छेदकेन दण्डस्य घटं प्रति कारणत्वं न व्यवह्रियते 'द्रव्यत्वेन दण्डो घटस्य कारणम्' इत्येवं न व्यवह्रियते तत्तद्द्रव्यत्व-सत्त्वादिभेदसमूहोऽन्यथासिद्ध्यनिरूपकत्वं तद्दण्डत्वे समस्ति न द्रव्यत्वादौ। ननु समूहत्वमेकविशिष्टा-

योगिताक एक एव भेदो वा कारणतायां निविशत इति नाननुगमदोषो नवाऽन्यथासिद्धिनिरूपकेण कारणत्वभ्रमानुपपत्तिरिति वाच्यम् ; उक्तभेदसमूहे प्रतियोगिकोटावुदासीनप्रवेशाऽप्रवेशाभ्यां विनिगमपरत्वम्, तत्र विनिगमनाविरहाद् यस्य भेदस्य विशेष्यत्वं तस्य विशेषणत्वमपि स्यादित्यनेकरूपताऽन्यथासिद्ध्यनिरूपकत्वस्यापद्येतेत्यत आह- तावदन्यतमत्वेति- द्रव्यत्व-सत्त्वाद्यन्यतमत्वेत्यर्थः, अन्यतमत्वं चात्राऽखण्डोपाधिरेव न तु भेदकूटावच्छिन्नप्रतियोगिताकभेदरूपम्, तेन कूटत्वस्यैकविशिष्टापररूपत्वेन विशेष्यविशेषणभावे विनिगमनाविरहादनेकत्वापत्त्या तदवच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्यानेकत्वापत्तावपि न क्षतिः, यत उक्तलक्षणैकभेद एवान्यथासिद्ध्यनिरूपकत्वम्, तस्यैकत्वात्, तद्घटितस्य कारणत्वस्याप्येकत्वमिति नाननुगमदोषः, निरुक्तकारणत्वं चान्यथासिद्धिनिरूपकेण धर्मेण नास्तीति तद्रूपेण कारणत्वज्ञानं भ्रम एवेति न तादृशभ्रमानुपपत्तिरित्यर्थः। निषेधहेतुमुपदर्शयति- उक्तभेदसमूह इति- निरुक्तभेदसमूहे नियतपूर्ववर्तितावच्छेदकद्रव्यत्व-सत्त्वादिभेदानां यथा निवेशस्तथा नियतपूर्ववर्तितानवच्छेदकानां घटत्वादीनां भेदा अपि विनिगमनाविरहान्निविष्टा एव भविष्यन्ति, एवं केषाञ्चिद् घटत्वादीनां भेदास्तत्र सन्निविष्टा भवन्तु, केषाञ्चित् तथाभूतानामेव घटत्वादीनां भेदास्तत्र मा विशन्तु, एवं दिशा बहवो निरूपकभेदसमूहा अन्यथासिद्ध्यनिरूपकत्वरूपतामासाद्य कारणत्वस्वरूपसन्निविष्टाः स्युः, तेषां च नानुगमवार्ताऽपीत्यननुगमदोषः, अन्यतमत्वमपि भेदकूटावच्छिन्नप्रतियोगिताकभेदरूपमेव न त्वखण्डोपाधिः प्रमाणाभावादिति तदवच्छिन्नप्रतियोगिताकभेदोऽपि प्रतियोगिविशेषितरूपेणैव प्रतीतिकोटिमाटीकते, तथा च पूर्वोक्तदिशा तस्याप्यनेकत्वमासज्यत एव, प्रतियोगिविशेषितस्यापि तस्याखण्डभेदरूपतामुपगम्य तद्व्यक्तित्वेनैव भानाभ्युपगमे दण्ड-चक्र-कुलालादिभेदकूटावच्छिन्नप्रतियोगिताकभेदरूपाखण्डाभाववत एव घटं प्रति कारणत्व-

नाविरहात्, प्रतियोग्यविशेषिताऽखण्डभेदाभ्युपगमे च सर्वत्राखण्डाभावबत एवा खण्डाभावस्यैव वा हेतुत्वं स्यादिति बहु विप्लवेत। किञ्च, एवं विशेष्यभागोऽपि वैयर्थ्यमाप्नुयादकारणभेदस्यैवाखण्डस्य कारणतालक्षणत्वसम्भवात्। तस्मादिष्टसाधनत्वादिज्ञानकारणतावच्छेदकतयाऽतिरिक्तमेव कारणत्वम्, न चोक्तकारणताया विषयिताविशेषावच्छेद्यत्वसम्भवः ? विषयविशेषासिद्धौ विषयिताविशेषासिद्धेः,

---

मस्तु, तादृशाभावस्यैकस्यैव वा दण्डादिगतस्य हेतुत्वमिति दण्डत्वादिधर्मैर्दण्डादीनां कारणताऽपि विलीयेत, दण्ड-चक्राद्यन्यतमत्वेनाखण्डभेदस्वरूपेणकस्यव कारणत्वस्यापत्तेरित्यर्थः। दोषान्तरमाह- किञ्चेति।

विशेष्यभागो नियतपूर्ववर्तित्वम्। परोक्तस्य कारणत्वस्याऽसम्भवादतिरिक्तमेव कारणत्वमभ्युपेयमित्युपसंहरति- तस्मादिति- प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य, निवृत्तिं प्रति द्विष्टसाधनताज्ञानस्य च कारणतायां विषयविधयाऽवच्छेदकतयाऽतिरिक्तमेव कारणत्वमभ्युपेयमित्यर्थः। यद्यतिरिक्तकारणता न स्याद्, न स्यात् तस्या ज्ञानविषयत्वमिति विषयितासम्बन्धेनेष्टसाधनताज्ञाननिष्ठकारणतावच्छेदकत्वमपि तस्याः स्यादित्याह- न चेति। उक्तकारणताया इष्टसाधनताज्ञाननिष्ठकारणतायाः पराभिमतकारणत्वस्वरूपायाः, इष्टसाधनताज्ञानविषयीभूताया अपि कारणतायास्तथाविधायाः, एकत्र विषयितविशेषावच्छेद्यत्वं विषयितविशेषात्मकसम्बन्धावच्छिन्नत्वम्, अन्यत्र विषयितविशेषनिरूपकत्वं तद्बहुव्रीहिलभ्यम्। निषेधे हेतुमाह- विषयविशेषासिद्धाविति- कारणतालक्षणो विषयविशेषो यदि स्यात् तदा तन्निरूपिता विषयिताऽपि भवेत्, विषयविशेषस्यासिद्धौ तु किंनिरूपितो विषयितविशेषो भवेद्? अतोऽतिरिक्तं कारणत्वमभ्युपेयम्, तथा चातिरिक्तकारणत्वलक्षणविषयविशेषस्य सद्भावात् तन्निरूपित-

अन्यथा साकारवादप्रसङ्गात् । कारणत्वत्वेनानुगतं च तत् कारणपद-शक्यतावच्छेदकम्, ग्राहकं च तस्य क्वचिदन्वय-व्यतिरेकसहित-

विषयितविशेषस्यापि सद्भाव इति तदवच्छिन्नत्वं कारणत्वेऽतिरिक्ते सङ्गतिमङ्गतीति भावः। अन्यथा विषयाभावेऽपि विषयितविशेषाभ्युपगमे। साकारवादप्रसङ्गादिति- यथा विज्ञानवादी योगाचारो बौद्ध-विशेषो बाह्यघटपटादिलक्षणं विषयमस्वीकृत्यैव वासनाविशेषतो घटाकार-पटाकारादियोगिज्ञानमभ्युपगतवान् तन्मते घटाद्याकारत्वमेव ज्ञानस्य घटादिविषयकत्वम्, तथा भवन्मतेऽपि कारणत्वलक्षण-विषयाभावे कारणत्वविषयकज्ञानवद् घटादिलक्षणविषयाभावेऽपि घटादिविषयकं ज्ञानं घटाद्याकारज्ञानस्वरूपं भवेदिति बाह्यवाद-विलोपप्रसङ्ग इत्यर्थः।

ननु तत्तत्कार्यनिरूपितं तत्तत्कारणगतमतिरिक्तं कारणत्वं स्वाश्रयभेदेन भिन्नमननुगतत्वात् कारणपदप्रवृत्तिनिमित्तं न स्यादित्यत आह- कारणत्वत्वेनेति- कारणत्वस्यानेकत्वेऽपि तद्गतं कारणत्व-त्वमेकमेवेति तद्रूपेणानुगतं कारणत्वं कारणपदशक्यतावच्छेदकम्, यथा-चैत्रत्व-मैत्रत्वादीनामननुगतत्वेऽपि बुद्धिस्थत्वेनानुगतीकृतानां तेषां तत्पदशक्यतावच्छेदकत्वमिति। अतिरिक्तस्य कारणत्वस्य किं ग्राहकमित्यपेक्षायामाह-ग्राहकं चेति। तस्य अतिरिक्तकारणत्वस्य।

नन्वनन्यथासिद्धत्वव्यापकत्वगर्भकारणत्वस्य ग्रहेऽनन्यथासिद्धत्व-विरोध्यन्यथासिद्धत्वग्राहकत्वादन्वयव्यभिचारज्ञानस्य, व्यापकत्व-विरोधिविषयकत्वाद् व्यतिरेकव्यभिचारज्ञानस्य च प्रतिबन्धकत्वेना-न्वयव्यभिचारज्ञाने व्यतिरेकव्यभिचारज्ञाने वा सति न तादृश-कारणत्वग्रहसम्भवः, अतिरिक्तकारणत्वस्य त्वनन्यथासिद्धत्वाद्यघटि-तत्वान्नोक्तदिशाऽन्वय-व्यतिरेकव्यभिचारज्ञानं तज्ज्ञानविरोधीति अन्वय-व्यतिरेकव्यभिचारज्ञानेऽपि तज्ज्ञानप्रसङ्ग इत्याशङ्कां प्रति-क्षिपति- न चैवमिति। तद्ग्रहप्रसङ्गः अतिरिक्तकारणत्वग्रहप्रसङ्गः।

प्रत्यक्षागमादिकम् । न चैवं व्यभिचाराग्रहेऽपि तद्ग्रहप्रसङ्गः ? कारणत्वाद्यभावव्याप्यादितयैव व्यभिचाराग्रहस्य विरोधित्वात् तदग्रहे व्यभिचाराग्रहेऽपि कारणताग्रहेस्येष्टत्वात् । न चैवं कारणताप्रत्यक्षं प्रत्यन्वयव्यतिरेकग्रहस्य हेतुत्वे मानाभावः ? सत्यपि दण्डेन्द्रियसन्निकर्षे विनाऽन्वय-व्यतिरेकग्रहं कारणत्वप्रत्यक्षानुदयात् तद्धेतुत्वसिद्धेः । यदि च तत्रापि कारणत्वं गृह्यत एव, न तु निश्चीयते,

तद्वत्तावुद्धिं प्रति यथा तदभाववत्ताज्ञानं प्रतिबन्धकम्, यथा च तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकम्, तथा तदभाववत्तावुद्धिं प्रति तद्वत्ताज्ञानं तद्व्याप्यवत्ताज्ञानं च प्रतिबन्धकमिति वस्तुस्थितौ अन्वयव्यतिरेकव्यभिचारयोरतिरिक्तकारणत्वाभावरूपत्वाभावेऽपि तद्व्याप्यतया तज्ज्ञानस्य कारणत्वाभावव्याप्यवत्ताज्ञानत्वेन कारणत्ववत्ताज्ञानविरोधित्वान्नान्वय-व्यतिरेकव्यभिचारज्ञाने सत्यतिरिक्तकारणत्वग्रहसम्भव इति निषेधहेतुमुपदर्शयति- कारणत्वाद्यभावेति । तदग्रहे कारणत्वाभावव्याप्यत्वेन व्यभिचाराग्रहे । ननु भवतूक्तदिशा कारणत्वग्रहं प्रति व्यभिचारग्रहस्य प्रतिबन्धकत्वम्, किन्तूक्तकारणत्वप्रत्यक्षं प्रति प्रमाणाभावादन्वयव्यतिरेकज्ञानस्य न कारणत्वमित्याशङ्क्य प्रतिक्षिपति - न चैवमिति- अन्वय-व्यतिरेकग्रहे सत्येव कारणत्वप्रत्यक्षं भवति, तदभावे कारणरूपधर्मिणः प्रत्यक्षेऽपि तत्र भवतीत्यन्वय-व्यतिरेकाभ्यामेव कारणत्वप्रत्यक्षं प्रत्यन्वय-व्यतिरेकग्रहणस्य हेतुत्वमिति निषेधहेतुमाह- सत्यपि दण्डेन्द्रियसन्निकर्षे इति- एतदुक्तिश्च कारणत्वप्रत्यक्षकारणतदिन्द्रियसन्निकर्षाभावादेव न कारणत्वप्रत्यक्षमिति शङ्कोन्मूलनार्थम् । तद्धेतुत्वसिद्धेः कारणत्वप्रत्यक्षं प्रत्यन्वय-व्यतिरेकग्रहस्य हेतुत्वसिद्धेः । तत्रापि यत्र नान्वय-व्यतिरेकग्रहोऽथ च दण्डेन्द्रियसन्निकर्षस्तत्स्थलेऽपि । ननु कारणत्वनिश्चय एव कुतो न भवतीत्यत आह- संशयसामग्रीसत्त्वादिति- धर्मीन्द्रियसन्निकर्ष-कोटिद्वयस्मरण-विशेषाऽदर्शनादिघटितसामग्रीसत्त्वात् संशयसामग्र्याश्च निश्चयप्रतिबन्धकत्वा-

संशयसामग्रीसत्त्वादिति विभाव्यते, तदोक्तरीत्या प्रतिबन्धकस्य व्यभिचारग्रहस्य निवारकतया तदुपयोगः। एतेन 'अनन्यथासिद्ध०' इत्यादेर्व्यञ्जकतया ज्ञानस्यावश्यकत्वादतिरिक्तकारणत्वकल्पने गौरवमित्यपास्तम्, अनतिरिक्तत्वेऽप्यतिरिक्तत्वभ्रमे तत्रोक्तव्यञ्जकताकल्पनावश्यकत्वाद्, अतिरिक्तकारणताकल्पनकाले उक्तगौरवानुपस्थितेश्चेति दिग् ॥

दित्यभिसन्धिः। उक्तरीत्या कारणत्वाद्यभावव्याप्यवत्तानिश्चयविधया। तदुपयोगः अन्वय-व्यतिरेकग्रहोपयोगः, अन्वयव्यतिरेकग्रहे अन्वय-व्यतिरेकव्यभिचारज्ञानं कारणत्वग्रहप्रतिबन्धकं न भवति, प्रतिबन्धकाभावाच्च कारणत्वग्रह इत्येवंपरम्परया कारणत्वग्रहे प्रयोजकमन्वय-व्यतिरेकज्ञानमिति। 'एतेन' इत्यस्य 'अपास्तम्' इत्यनेनान्वयः, एतेन– अन्वय-व्यतिरेकसहितप्रत्यक्षाऽऽगमादेरेव कारणत्वग्राहकत्वाभ्युपगमेन वक्ष्यमाणहेतुना च, कारणत्वव्यञ्जकतयाऽभिमतानन्यथासिद्धत्वादिज्ञानत एव कारणत्वव्यवहारोपपत्तावतिरिक्तकारणत्वकल्पने गौरवमित्यर्थः। 'अपास्तम्' इत्यत्र हेत्वन्तरमाह– अनतिरिक्तत्वेऽपीति– कारणत्वस्यानन्यथासिद्धनियतपूर्ववर्तित्वात्मकत्वेऽपीत्यर्थः। अतिरिक्तत्वभ्रमे 'अनन्यथासिद्ध०' इत्यादितो भिन्नमेव कारणत्वमिति भ्रमे। तत्र कारणत्वे। उक्तेति– 'अनन्यथासिद्ध०' इत्यादिगतेत्यर्थः, तथा चातिरिक्तत्वभ्रमकाले उक्तव्यञ्जकताकल्पनस्याऽनतिरिक्तकारणतावादिनोऽप्यावश्यकतया न तन्निबन्धनगौरवमित्यर्थः। किञ्चातिरिक्तकारणताकल्पनोत्तरकालीनमुक्तगौरवं तादृशकल्पनाकालेऽनुपस्थितत्वादेव न बाधकम्, उक्तयुक्त्याऽतिरिक्तकारणत्वसिद्धौ कथं तद्ग्रह इत्यपेक्षयोत्तरकाले तद्ग्राहकतया 'अनन्यथासिद्ध०' इत्यादिकं कल्प्यत इत्यतिरिक्तस्य कारणत्वस्य पूर्वमेव सिद्धत्वादुक्तकल्पनानिबन्धनगौरवं तद्बाधकं न भवतीत्यर्थः।

यत् तु–"दण्डत्वादिकमेव कारणत्वम्, तस्यैव घटादिकार्य-सम्बन्धितया ग्रहे 'अनन्यथासिद्ध०' इत्यादेर्व्यञ्जकत्वम्' इति पक्षधर-मिश्रमतम्, तत् तुच्छम्–एवं हि दण्डत्वादेः स्वरूपतो निरवधित्वे कार्यापेक्षया च सावधित्वे शबलत्वस्वभ्युपगमप्रसङ्गात्। व्यवहारे साव-धित्वं स्वरूपतस्तु निरवधित्वमिति नायं दोष इति चेत्? न–व्यवहर्त-

---

कारणत्वाभ्युपगतौ प्रतिक्षेप्तुं पक्षधरमिश्रमतमुपन्यस्यति– यत् त्विति। दण्डत्वस्यैव कारणत्वरूपत्वे 'अयं दण्डः' इति ज्ञानादपि दण्डे घटकारणत्वव्यवहारापत्तिरित्यत आह– तस्यैवेति– दण्डत्वस्यैवेत्यर्थः, स्वरूपतो दण्डत्वग्रहो न घटकारणव्यवहारनियामकः, किन्तु घटनिरूपितकारणतात्वेन तद्ग्रहस्तथा, तत्र च 'अनन्यथासिद्ध०' इत्यादेर्व्यञ्जकत्वमिति 'अनन्यथासिद्ध०' इत्यादिज्ञानानन्तरमेव तथा तद्ग्रह इत्यर्थः। तत् तुच्छम् उक्तपक्षधरमिश्रमतमत्यल्पमसमीचीन-मिति यावत्। एवं हि उक्तदिशा कारणत्वस्य दण्डत्वादिस्वरूपत्वा-भ्युपगमे यतः। दण्डत्वादेरिति– दण्डत्वादेरखण्डजातिस्वरूपस्य स्वरूपतो न केनचिन्निरूपितत्वमिति निरवधित्वम्, कारणतात्व-रूपेण तु घटादितत्तत्कार्यनिरूपितत्वमिति सावधित्वम्, इत्थं चैकत्र दण्डत्वादावपेक्षाभेदेन सावधित्व-निरवधित्वलक्षणविरुद्धधर्माभ्युपगम-लक्षणाऽनेकान्तवादाभ्युपगमप्रसङ्गादित्यर्थः। परं उक्तदोषप्रसङ्ग-परिहारमाशङ्कते– व्यवहार इति। यदि द्रव्यत्वादिकं निरवधिरूपमेव तदेव तु कारणत्वव्यवहारविषयत्वाद् व्यवहर्तव्यं नान्यदिति कथं तद्व्यवहारः सावधितत्स्वरूपविषयो भवेदिति यद्रूपेण तद् व्यवहियते तद्रूपं तद् अभ्युपगमन्तव्यमेवेति कथं न वस्तुतः सावधित्वं तस्यै-त्युक्तदिशा स्याद्वादः प्रविशत्येवेति समाधत्ते–नेति। व्यवहर्तव्याऽविशेषे व्यवहर्तव्यस्य द्रव्यत्वस्य वस्तुतो निरवधित्वेन स्वरूपतस्तद्व्यवहारो यथा दण्डो द्रव्यमिति तथा 'दण्डः कारणम्' इत्येव स्यात्, न तु

व्याविशेषे व्यवहाराविशेषात्, अन्यथा केवलभूतलज्ञानादेव प्रतियोगिज्ञानादिनाऽभावव्यवहारसमर्थको मीमांसक एव विजयेत। किञ्च, एवं घटवद्दण्डत्ववान् दण्ड इति ज्ञानात् दण्डो घटकारणमिति व्यवहारापत्तिः, 'अनन्यथासिद्ध०' इत्यादिज्ञानजनिततादृशज्ञानत्वेन तादृशव्यवहारहेतुत्वे च गौरवम्, घटकारणतात्वेन तज्ज्ञानस्यो-

---

'दण्डो घटकारणम्' इति कारणत्वस्य दण्डत्वस्योभयत्र विषयत्वात्, तस्य चाऽविशेषाद्, अतो व्यवहारविशेषान्यथानुपपत्त्या व्यवहर्तव्यविशेषोऽवश्यमभ्युपगन्तव्य इति यद्यपि दण्डे घटकारणत्वं दण्डत्वमेवेति तत् तस्यैव प्रकृते व्यवहर्तव्यशब्देन ग्रहणमुचितम्, तथाऽप्युद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्ये शाब्दबोधो न भवतीत्यतोऽभेदसम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदस्य कारणत्वमुपेयते, एवं च दृष्टान्तविधया यथा- 'दण्डो दण्डः' इत्युपादातुं न शक्यते तस्य व्यवहारस्य शब्दरूपतया तज्जन्यशाब्दबोधे विरूपोपस्थितेर्हेतुत्वात्, ततो दण्डस्यापि समवायसम्बधेन कार्यं प्रति तादात्म्यसम्बन्धेन द्रव्यत्वेन द्रव्यं कारणमिति यत्कार्यकारणभावस्तत्कारणतावच्छेदकद्रव्यत्ववत्त्वात् कारणत्वम्, तत् कारणत्वं द्रव्यत्वमेवेति तदभिसंधानेन व्यवहर्तव्यपदेन द्रव्यत्वस्य ग्रहणम्, 'दण्डत्वादेः' इत्यादिपदेन द्रव्यत्वादेरपि ग्रहणस्यापि प्रस्तुतत्वमिति बोध्यम्।

अन्यथा व्यवहर्तव्याविशेषेऽपि व्यवहर्तव्यातिरिक्तकारणविशेषाद् व्यवहारविशेषाभ्युपगमे, 'इदं भूतलम्' इति ज्ञाने 'घटाभाववद् भूतलम्' इति ज्ञाने च केवलभूतलमेव विषयः, तद्रूपकारणतो भूतलमिति व्यवहारः, घटाभाववद् भूतलमिति व्यवहारश्च, तयोर्विशेषस्तु प्रतियोगिज्ञानविरह-प्रतियोगिज्ञानाभ्यां जायमानत्वादिति

क्तव्यवहारहेतुत्वे च कारणतात्वमधिकमभ्युपगन्तव्यं स्यात् । किञ्च, एवं दण्डत्वादिस्वरूपाया दण्डादिनिष्ठकारणताया अनुगतत्वोक्तावपि घटसमवेतनाशादिकार्यनिरूपितघटनाशादिकारणतायाः कथमनुगतत्वम् ? घटनाशत्वस्याऽनुगतस्याभावात्, तत्राप्यखण्डोपाधिनाऽनुगमस्वीकारे व्यक्तीनामेव कथञ्चिदनुगतत्वं स्वीक्रियताम्, एक-

---

मीमांसकमतसमर्थनस्यापि सम्भवादभावानभ्युपगन्ता मीमांसक एव विजयेतेत्यर्थः। दोषान्तरमप्याह- किञ्चैवमिति- 'घटवद्दण्डत्ववान् दण्डः' इति ज्ञानमपि घटनिरूपितत्वेन दण्डत्वं गृह्णातीति घटनिरूपितत्वेन दण्डत्वग्रहणरूपकारणसद्भावाद् 'दण्डो घटकारणम्' इति व्यवहारापत्तिरित्यर्थः, अनन्यथासिद्धत्वे सति नियतपूर्ववर्तित्वज्ञानजनितघटनिरूपितदण्डत्वग्रहणं 'घटकारणं दण्डः' इति व्यवहारजनकमिति न 'घटवद्दण्डत्ववान् दण्डः' इति ज्ञानान्निरुक्तव्यवहारापत्तिरित्युपगमे च गौरवमित्याह- अनन्यथेति। तादृशज्ञानत्वेन घटनिरूपितत्वेन दण्डत्वज्ञानत्वेन। तादृशव्यवहारहेतुत्वे दण्डो घटकारणमिति व्यवहारहेतुत्वे च। तज्ज्ञानस्य दण्डत्वज्ञानस्य। उक्तव्यवहारहेतुत्वे दण्डो घटकारणमिति व्यवहारहेतुत्वे। अधिकम् अतिरिक्तम्। दण्डमात्रेषु घटनिरूपितकारणत्वमेकमित्युपपत्तये कारणत्वस्य दण्डत्वस्वरूपत्वमुपेयते, एवमपि येषु न सामान्यं तेषु कथमनुगतं कारणत्वम् ? यदि च तत्राप्यखण्डोपाधिस्वरूपमेव कारणत्वमुपगम्याऽनुगतत्वं तत्राप्युपेयते तर्हि व्यक्तीनामेव कथञ्चिदनुगतव्यावृत्तस्वरूपतामभ्युपगम्याऽनुगतव्यावृत्तव्यवहारोपपादनमस्तु, अलमतिरिक्तसामान्याऽखण्डोपाध्यादिकल्पनया, ज्ञानभेदानुरोधाद् विषयभेदाभ्युपगमे तु कारण-कार्यबुद्धिभेदात् कारणत्व-कार्यत्वादिकमप्यतिरिक्तमभ्युपगम्यतामित्याह- किञ्चैवमिति। तत्रापि घटनाशेऽपि। कथञ्चिदनुगतत्वं व्यावृत्तत्वसंवलितम्, तत् कथमेकस्मिन् वस्तुनीत्याकाङ्क्षायामाह- एकस्यैवेति- अन्यता व्यावृत्तिबुद्धिजनकत्वाद् व्यावृत्तत्वम्, अनुगत-

स्यैव वस्तुनो व्यावृत्तिबुद्ध्यपेक्षया व्यावृत्तत्वस्यानुवृत्तिबुद्ध्यपेक्षया चानुगतत्वस्य सम्भवात्। विषयभेदं विना बुद्धिभेदो नोपपद्यत इति चेत् ? कारणत्व-कार्यत्वयोरपि तुल्यमेतत्, तस्मात् त्यज्यतां वाऽतिरिक्तसामान्य-विशेषवादः, स्वीक्रियतां वा कारणत्व-कार्यत्वादिकमप्यतिरिक्तमिति दुरुत्तरा प्रतिबन्दिनदी, तदिमदभिप्रेत्योक्तं प्रभुश्रीहेमसूरिभिः—

"स्वतोऽनुवृत्ति-व्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः।
परात्मतत्त्वादतथात्मतत्त्वाद्, द्वयं वदन्तोऽकुशलाः स्खलन्ति"॥
[अन्ययोगव्य० श्लो० ४] इति।

बुद्धिजनकत्वादनुगतत्वं चैकस्मिन् वस्तुन्यपि सम्भवतीत्यर्थः। ननु अनुगतबुद्धिव्यावृत्तिबुद्धिश्च परस्परं भिन्ना विषयभेदमन्तेरण न सम्भवतीत्याशङ्कते— विषयभेदं विनेति। दण्डबुद्धितः कारणबुद्धिर्घटबुद्धितः कार्यबुद्धिश्च विलक्षणाऽनुभूयत इत्यतो विषयभेदोऽत्राप्यावश्यक इति कारणबुद्धिविषयः कारणत्वं कार्यबुद्धिविषयः कार्यत्वमतिरिक्तमवश्यं स्वीकरणीयमिति प्रतिवन्द्योत्तरयति— कारणत्व-कार्यत्वयोरपि तुल्यमेतदिति। उपसंहरति— तस्मादिति।

उक्तार्थसंवादकतया श्रीहेमचन्द्रसूरिभगवद्वचनमुपदर्शयति— तदिदमभिप्रेत्योक्तमिति। 'स्वतोऽनुवृत्ति०' इत्यादि पद्यार्थविस्तरावगतिः स्याद्वादमञ्जरीतो विशेषजिज्ञासुभिः कार्या, संक्षेपतस्तु— 'स्वत एवाऽनुवृत्ति-व्यावृत्तिस्वभावा भावाः, न स्वव्यतिरिक्तसामान्यात्मकपदार्थविशेषात्मकपदार्थाभ्यामनुगत-व्यावृत्तिबुद्धिविषया भवन्ति। अनिपुणा नैयायिकादयस्तु स्वभिन्नसामान्याद् वस्तुतस्तथास्वरूपतामभजमानादनुगतबुद्धिम्, पवम्भूतादेव च विशेषाद् व्यावृत्तिबुद्धिं च वदन्तः सभायां निग्रहस्थानलक्षणां स्खलनामनुभवन्ति, न तु वस्तुतस्त्वं व्यवस्थापयन्तीत्यर्थः।

यत् तु–एवं कारणत्वादेरतिरिक्तत्वेऽनुगतव्याप्त्यादिव्यवहाराद् व्याप्त्यादिकमप्यतिरिच्यत इति परैरुद्घुष्यते तद् उक्तप्रतिबन्दीवादिनामस्माकं न दोषाय ।

यदपि– नियतपूर्ववर्तितावच्छेदकदण्डत्वादिकमेव कारणत्वम्, अन्यथासिद्धिनिरूपकतानवच्छेदकत्वं तु दण्डत्वादिपरिचायकमेवेति कैश्चिदभ्युपगम्यते, तदप्यसत्–नियमस्य नानाविधतया क्वचिदपि कारणताननुगमप्रसङ्गात्, निरुक्तान्यथासिद्धिनिरूपकतावच्छेदकत्वज्ञाने कारणत्वाव्यवहारात् तदनवच्छेदकत्वस्याप्यवश्यं

उक्तयुक्त्या कारणत्वादीनामतिरिक्तत्वे व्याप्त्यादीनामप्यतिरिक्तत्वं स्यादित्यापादनं त्विष्टापत्त्यैव न नः प्रतिकूलमित्याह– यद् त्विति। एवम् उक्तनीत्या। परैः नैयायिकैः। अस्माकं जनानाम्। 'उक्तप्रतिबन्दीवादिनाम्' इति विशेषणेनैतत् कथितं भवति– अनन्तधर्मात्मकवस्तुवादिभिः स्याद्वादिभिर्नैकान्तेन भिन्नाः सामान्य-विशेषादयोऽभ्युपगम्यन्ते, किन्त्वनन्तधर्मात्मकवस्तूनां स्वरूपान्तर्निविष्टा एवैते, अथापि यदि विभिन्नबुद्धि-व्यपदेशादितः परैः सर्वथा भिन्ना एवाभ्युपेयन्त एवं तर्हि कारणत्वादयोऽपि तथा किं न स्युरिति?।

कारणत्वाभ्युपगमे केषाञ्चित् प्रकारान्तरमुपन्यस्य प्रतिक्षिपति– यदपीति। 'नियतपूर्ववर्तिता०' इत्यत्र नियमस्य प्रविष्टतया तस्यानेकविधत्वेन तद्घटितकारणताया अप्यनेकत्वप्रसङ्गादित्याह– नियमस्येति। यथा च नियतपूर्ववर्तितावच्छेदकत्वाऽग्रहे न कारणताज्ञानमिति तत् तत्स्वरूपसन्निविष्टमेव न तु परिचायकतयोपलक्षणम्, तथा निरुक्तान्यथासिद्धिनिरूपकतावच्छेदकत्वज्ञाने तदनवच्छेदकत्वाज्ञानतो न कारणत्वव्यवहार इति निरुक्तान्यथासिद्धिनिरूपकतानवच्छेदकत्वमपि कारणत्वस्वरूपसन्निविष्टमेवेत्याह– निरुक्तान्यथासिद्धीति। तदनवच्छेदकत्वस्यापि निरुक्तान्यथासिद्धिनिरूपकतानवच्छेदकत्वस्यापि।

निवेश्यत्वाच्च । यदि च व्यापारादिव्यवहारवच्छब्दमात्रादेवानुगत-कारणतादिव्यवहारः, तदा न किञ्चिल्लक्षणमर्थतोऽनुगतं स्याद्, भेदनयचिन्तायां शब्दानुगम एव पर्यवसानात्, तस्मान्नामनिक्षेपे शब्दानुगमो भावनिक्षेपे त्वर्थानुगमोऽवश्यमाश्रयणीय इति दिग् ॥

तथा 'कुण्डे बदरम्' इत्यादौ सप्तमीप्रतिपाद्यमाधारत्वमप्यतिरिच्यते, संयोगमात्रस्य तदर्थत्वे 'बदरे कुण्डम्' इत्यस्यापि आपत्तेः'

निवेश्यत्वात् कारणतालक्षणे निवेश्यत्वात् । तज्जन्यत्वे सति तज्जन्यजनकत्वादिरूपव्यापारत्वादीनामननुगतत्वेऽपि व्यापारादेकशब्दमात्रानुगमतोऽनुगतव्यापारादिव्यवहारस्तथा कारणत्वादीनामननुगतत्वेऽपि शब्दानुगममात्रनिबन्धनः कारणतादिव्यवहार इति न किञ्चिदनुगतम्, किन्तु भिन्नमेवेति भेदनय आश्रीयते तदा सर्वत्र शब्दानुगम एव पर्यवसानं पर्यायार्थिकनयादित्याह- यदि चेति। तत् किं शब्दानुगम एव? क एवमाह, नामनिक्षेपाश्रयणे शब्दप्राधान्यात् तच्छब्दानुगमः, भावनिक्षेपाश्रयणेऽर्थप्राधान्यादर्थानुगम इति निगमयति -तस्मादिति ॥

प्रकृतमनुसरन्नाह- तथेति - वैशिष्ट्यादिकं वैशेषिकाभिमतद्रव्यादिषट्पदार्थेभ्यो व्यतिरिक्तमेवमित्यर्थः। आधारत्वमिति प्राचीनमतमाश्रित्य, तत्र प्रकृत्यर्थस्य कुण्डस्य आधेयत्वसम्बन्धेनान्वयः, प्रत्ययार्थस्याधारत्वस्योत्तरपदार्थे बदरे निरूपकत्वसम्बन्धेनान्वयः, वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे 'कुण्डे न बदरम्' इत्यत्र कुण्डनिष्ठाधारत्वस्य निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तद्वद् बदरमित्यस्य बोधयितुमशक्यतया आधेयत्वमेव सप्तम्यर्थ इति नवीनाः स्वीकुर्वन्तीति बोध्यम्। ननु 'कुण्डे बदरम्' इत्यत्र संयोग एव सप्तम्यर्थ इति नातिरिक्ताधारत्वकल्पनप्रयोजनमित्यत आह- संयोगमात्रस्येति- आधारत्वमात्रस्य सप्तम्यर्थत्वे

अथ तत्तदाधारादिस्वरूपैवाऽऽधारता, कुण्डादिस्वरूपमेव बदराद्याधारो न तु बदरादिकं कुण्डादेरित्यत्र प्रतीतिरेव मानम्; न च, एवं कुण्डे बदराधारत्वप्रतीतिर्न स्यात्, कुण्डस्वरूपस्याधारत्वस्य, कुण्डवृत्तित्वे 'कुण्डे कुण्डम्' इत्यपि स्यादिति वाच्यम्, आधारतात्वेन कुण्डस्यापि कुण्डवृत्तित्वात्, न तु कुण्डत्वेन, तथैव प्रतीते-

---

'कुण्डे बदरम्' इतिवत् 'कुण्डे वृक्षः' इत्यादिकमपि स्यात्, तथाहि- आधारतामात्रस्य तदर्थत्वे आधारतात्वेन संयोगसम्बन्धावच्छिन्नाधारताया यथा तदर्थत्वं तथा तेन रूपेण कालिकसम्बन्धावच्छिन्नाधारताया अपि तदर्थत्वम्, तथा च वृक्षस्यापि कालिकसम्बन्धेन कुण्डे सत्त्वेन वृक्षनिष्ठकालिकासम्बन्धावच्छिन्ननिरूपकतानिरूपिताधारतायाः कुण्डे भावात् 'कुण्डे वृक्षः' इत्यापादयितुं शक्यत इति, अत आधारतात्वेन संयोगसम्बन्धावच्छिन्नाधेयतानिरूपिताऽऽधारतैव तत्र प्रत्ययार्थतया भासत इति तद्घटकतया संयोगस्यापि तदर्थत्वमस्त्येवेत्यतो मात्रपदम्। तदर्थत्वे सप्तम्यर्थत्वे, कुण्डबदरसंयोगस्य कुण्ड इव बदरेऽपि सत्त्वेन 'कुण्डे बदरम्' इतिवद् 'बदरे कुण्डम्' इत्यपि प्रसज्यत इत्यर्थः। अस्तु आधारत्वं सप्तम्यर्थः, परं तदाधारस्वरूपमेवेति न तन्निबन्धनषट्पदार्थातिरिक्तपदार्थप्राप्तिरित्याशङ्कते- अथेति। ननु यथा कुण्डस्वरूपाऽऽधारता तथा बदरस्वरूपाऽपीति 'बदरे कुण्डम्' इत्यस्य प्रसङ्गो न वारितः स्यादित्यत आह- कुण्डादीति- अस्यायमाधार इत्यत्र प्रतीतिरेव शरणम्, भवति च 'कुण्डे बदरम्' इति प्रतीतिरतः कुण्डस्वरूपमेव बदराद्याधारः 'बदरे कुण्डम्' इति प्रतीतिस्तु न भवति, ततो न बदरस्वरूपं कुण्डाद्याधार इत्यर्थः। ननु स्वस्मिन् स्वस्य वृत्तिर्न भवति, नहि भवति घटे घट इति, तथा च कुण्डस्वरूपमाधारत्वं कुण्डे न वर्तत इति बदराधारत्वप्रतीतिरपि कुण्डे न स्यादित्याशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेन सम्बन्धः।

रिति चेत्? न-आधारतायाः कुण्डस्वरूपत्वे आधारतात्वस्यापि कुण्डत्वानतिरिक्तत्वात्, तदतिरिक्तत्वे च किमपराद्धमाधारतया, येन सापि नातिरिच्येत। किञ्च, एवं पाकरक्ततादशायामपि घटे 'इदानीं स श्यामः' इति बुद्धेः प्रमात्वप्रसङ्गः, घटरूपायाः श्यामाधारताया एतत्कालवृत्तित्वात्। 'इदानीं श्यामः' इति बुद्धावेतत्कालावच्छिन्नं

एवम् आधारत्वस्याधारस्वरूपत्वे। निषेधे हेतुमाह- आधारतात्वेनेति। 'कुण्डे कुण्डम्' इति प्रतीतिप्रसङ्गवारणायाह- न त्विति- कुण्डेत्वेन कुण्डस्य न कुण्डवृत्तित्वमित्यर्थः। ननु कुण्डेत्वेन कुण्डस्य न कुण्डवृत्तित्वं तस्यैव त्वाधारतात्वेन तत्र वृत्तित्वमित्यत्रैव किं प्रमाणमित्यत आह- तथैव प्रतीतेरिति- आधारतात्वेनैव कुण्डे कुण्डवृत्तित्वस्य प्रतीतेरित्यर्थः। आधारतायाः कुण्डस्वरूपत्वे आधारतात्वस्यापि कुण्डत्वस्वरूपतयैवाभ्युपगन्तव्यत्वेन आधारतात्वेन कुण्डस्य कुण्डवृत्तित्वे कुण्डत्वेनापि कुण्डस्य कुण्डवृत्तित्वं वज्रलेपायितमिति 'कुण्डे कुण्डम्' इति प्रतीतिः प्रसज्यत एवेति समाधत्ते- नेति। आधारतायाः कुण्डात्मकाधारस्वरूपत्वेऽप्याधारतात्वमतिरिक्तमेव न तु कुण्डत्वस्वरूपमिति नोक्तप्रतीतिप्रसङ्ग इत्यत आह- तदतिरिक्तत्वे चेति- आधारतात्वस्यातिरिक्तत्वे चेत्यर्थः। आधारतात्वस्यातिरिक्तत्वेऽपि षट्पदार्थवादो विशीर्यत एव भवत इति षट्पदार्थीवादापहतेरावश्यकत्वादाधारताया अतिरिक्तत्वेऽपि तदतिरिक्तदोषलक्षणापराधाभावात् किमित्यतिरिक्ताधारता न स्वीक्रियते भावता? 'अन्ते रण्डाविवाहः स्यादादावेव कुतो नहि' इत्यादि न्यायेनातिरिक्ताधारतास्वीकारोऽपि ज्यायानेवेत्याह- किमपराद्धमिति- न किमप्यपराद्धमित्यर्थः। येन अपराधेन। सापि आधारतापि।

आधारताया आधारस्वरूपत्वे दोषान्तरमप्याह- किञ्चेति। एवम् आधारताया आधारस्वरूपत्वे। एतत्कालवृत्तित्वात् रक्ततादशाकालवृत्तित्वात्। पाकरक्ततादशायाम् 'इदानीं श्यामः' इति बुद्धिर्नापाद-

यच्छ्यामत्वं तदाधारत्वविषयीकरणान्न प्रामाण्यमिति चेत्? न- तथापि तत्र 'इदानीं न रक्तः' इति धियः प्रमात्वप्रसङ्गस्य दुर्निवारत्वात्, एतत्कालावच्छिन्नरक्तत्वाभावाधारतायाः अप्येतद्घटस्वरूपत्वात्, अन्यथा श्यामतादशायाम् 'इह न रक्तत्वम्' इति प्रतीतेरनुपपत्तेः। न च तत्कालविशिष्टघटादेः श्यामत्वाद्याधारतारूपत्वानभ्युपगमान्न दोष इति वाच्यम्, विशिष्टस्यानतिरिक्तत्वात्, अन्यथा क्षणभेदप्रसङ्गात्। एतेन 'बदरादिप्रतियोगित्वविशिष्टसंयोगादिरेव बदराद्याधारता, रूपाद्याधारता तु तत्तत्समवाय एव, तन्नानात्व-

---

यितुं शक्यते, तादृशबुद्धिविषयस्यैतत्कालावच्छिन्नश्यामत्वाधारत्वलक्षणविषयस्याभावात्, एतत्कालावच्छिन्नत्वस्य रक्ततायामेव भावान्न श्यामतायामिति शङ्कते- इदानीं श्याम इतीति। श्यामतायाः रक्ततादशायां नष्टत्वात् तत्कालावच्छिन्नत्वं मा भवतु श्यामतायां तथापि रक्तत्वात्यन्ताभावस्य नित्यत्वेन रक्ततादशायामपि सत्त्वया तत्र तत्कालावच्छिन्नत्वस्य सम्भवेन तदाधारत्वस्य घटस्वरूपस्यापि तदानीं भावेन पाकरक्ततादशायामपि 'घटे इदानीं न रक्तः' इति बुद्धेः प्रमात्वं स्याद् विषयाबाधादिति समाधत्ते- नेति। तथापि पाकरक्ततादशायां तत्कालावच्छिन्नत्वस्य श्यामत्वेऽभावाद् 'इदानीं स श्यामः' इति, बुद्धेः प्रमात्वापादनासम्भवेऽपि। तत्र पाकरक्तघटे। अन्यथा रक्तत्वाभावाधारतायाः एतद्घटस्वरूपत्वाभावे। 'न च' इत्यस्य 'वाच्यम्' इत्यनेन सम्बन्धः। तत्कालविशिष्टघटादेः रक्ततात्कालविशिष्टघटादेः। निषेधहेतुमाह- विशिष्टस्यानतिरिक्तत्वादिति- रक्ततात्कालविशिष्टघटस्य शुद्धघटाभिन्नत्वात्, एवं च घटादेः श्यामतात्वाधारतास्वरूपत्वे विशिष्टघटादेरपि श्यामतात्वाधारतास्वरूपत्वाद् रक्ततादशायामपि 'इदानीं श्यामः' इति बुद्धेः 'इदानीं न रक्तः' इति बुद्धेश्च प्रमात्वप्रसङ्गादित्यर्थः। अन्यथा विशिष्टस्य शुद्धादतिरिक्तत्वे क्षणभेदप्रसङ्गात् एतत्क्षणविशिष्टघटस्वरूपादपरक्षणविशिष्टघटस्वरूपस्य एवं तत्तत्क्षणविशिष्टघटस्वरूपस्य भिन्नत्वप्रसङ्गात्, बौद्ध एव, विजये-

कल्पनाया एवातिरिक्ताधारत्वकल्पनातो लघुत्वात्, अत एव चक्षुः-संयुक्तघटादिसमवायान्न पटत्वादेः प्रत्यक्षता' इति कल्पनमप्यपास्तम्, विशिष्टसंयोगादेरनतिरेकात्। किञ्च, एवं कुण्डादिप्रतियोगिकसंयोग-मात्रेण बदरादौ कुण्डादिप्रकारकबुद्धौ सत्यां बदरादौ 'कुण्डादिकं न'

तेत्याशयः। 'एतेन' इत्यस्य 'अपास्तम्' इत्यनेन योगः। तत्तत्समवाय एव रूपादिप्रतियोगिकत्वविशिष्टसमवाय एव, तथा च बदरादिप्रतियोगिकत्वविशिष्टसंयोगः कुण्ड एव, न तु बदरे इति 'बदरे बदरम्' इति बुद्धेर्न प्रसङ्गः, कुण्डानुयोगिकत्वविशिष्टसंयोगस्य नानुयोगिकत्वं बदरे, न च तद् आधारत्वप्रतीतिनियामकं किन्तु कुण्डप्रतियोगिकत्वविशिष्टसंयोग एव कुण्डाधारत्वम्, तच्च न बदरे इति 'बदरे कुण्डम्' इति प्रतीतेरपि न प्रसङ्गः, एव समवायस्य वायौ सत्त्वेऽपि रूपप्रतियोगिकत्वविशिष्टसमवायो न वायाविति 'वायौ रूपम्' इति प्रतीतेरपि न प्रसङ्गः। ननु रूपप्रतियोगिकत्वविशिष्टसमवायादन्य एव स्पर्शप्रतियोगिकत्वविशिष्टसमवाय इति समवायनानात्वं प्रसज्यत इत्यत आह– तन्नानात्वेति- समवायनानात्वेत्यर्थः। अत एव समवायनानात्वादेव। 'एतेन' इत्यतिदिष्टमेव हेतुमुपदर्शयति- विशिष्टेति।

अतिरिक्ताधारताभ्युपगमे युक्त्यन्तरमाह– किञ्चेति। एवम् सप्तम्यर्थतया अतिरिक्ताया आधारताया अनभ्युपगमे। कुण्डादीति- बदरविशेष्यककुण्डप्रतियोगिकसंयोगसम्बन्धेन कुण्डप्रकारकबुद्धेस्तेन सम्बन्धेन तत्प्रकारकतद्विशेष्यकनिश्चयविधया 'बदरे कुण्डं न' इत्याकारिकायां तादृशेष्यककुण्डाभावप्रकारकबुद्धौ प्रतिबन्धकत्वेन 'बदरं कुण्डप्रतियोगिकसंयोगसम्बन्धेन कुण्डवद्' इति बुद्धिसत्त्वे 'बदरे कुण्डं न' इति धीर्जायमानाऽपि न जायेत प्रतिबन्धकसमवधानदशायां प्रतिबध्योत्पत्तेरसम्भवात्, अतिरिक्ताधारताभ्युपगमे तु आधारतासंसर्गेण कुण्डप्रकारकबदरावशेष्यकबुद्धेरेव 'बदरे कुण्डं

इति धीर्जायमाना नोपपद्येत, अतिरिक्ताधारतापक्षे तूक्तप्रतीतेराधारत्वा-संसर्गकत्वादेव न विपरीतधीविरोधित्वमिति न दोषः। तत्र तत्सम्बन्ध-वत्त्वे कथमाधारतया तदभाव इति चेत्? तत्र तद्वृत्तितानियामक-सम्बन्धस्यैव तत्र तद्वत्तानियामकत्वादिति संक्षेपः॥

प्रतियोगित्वमप्यतिरिच्यते, दण्डाऽभावादेः प्रतियोगित्वस्य दण्डादिस्वरूपत्वे गौरवात्, संयोगसम्बन्धावच्छिन्नघटाभावादिप्रयो-

---

न' इति बुद्धि प्रति प्रतिबन्धकत्वम्, कुण्डप्रतियोगिकसंयोगसम्ब-न्धेन कुण्डप्रकारबुद्धेश्च नाधारतासंसर्गेण कुण्डप्रकारकत्वम्, अत-स्तस्या अप्रतिबन्धकत्वाद् 'बदरे न कुण्डम्' इति बुद्धिस्तत्काले जायमानोपपद्यतेतरामित्यर्थः।

उक्तप्रतीतेः कुण्डादिप्रतियोगिकसंयोगेन बदरादौ कुण्डप्रकारक-बुद्धेः। तत्र बदरे। तत्सम्बन्धवत्त्वे कुण्डसम्बन्धकुण्डसंयोगवत्त्वे। तदभावः कुण्डाभावः। कुण्डसम्बन्धो यः संयोगलक्षणो बदरे स न कुण्डवृत्तितानियामकः, तत्र तद्वृत्तितानियामकसम्बन्ध एव तत्र तद्वत्तानियामक इति वृत्तिनियामकसम्बन्धाभावादेव न बदरे कुण्ड-वत्तेत्याह- तत्रेति॥

प्रतियोगित्वस्याऽप्यतिरिक्तस्य सद्भावात् षट्पदार्थीवादो वैशेषिकाणां न युक्त इत्याह- प्रतियोगित्वमप्यतिरिच्यत इति। ननु प्रति-योगिता कल्पप्रतियोगिस्वरूपैव, तस्या अतिरिक्तत्वे मानाऽभावादि-त्यत आह- दण्डाऽभावादेरिति- बहूनां दण्डादीनां प्रतियोगिनां प्रति-योगितास्वरूपत्वकल्पनापेक्षया तस्या अतिरिक्तत्वे लाघवादित्याशयः। किञ्च, संयोगसम्बन्धावच्छिन्नघटाभावप्रतियोगिता घटस्वरूपा, समवायसम्बन्धावच्छिन्नघटाभावप्रतियोगिताऽपि घटस्वरूपेति 'तद-भिन्नाऽभिन्नस्य तदभिन्नत्वम्' इति नियमेन तयोः प्रतियोगित्वयो-रैक्ये समवायसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्य संयोगसम्ब-

गित्वस्य घटादिरूपत्वे समवायसम्बन्धावच्छिन्नघटाभावादावप्युक्त-प्रतियोगिताकत्वप्रसङ्गाच्च ।

यत् तु–'स्वाऽभावाऽभावत्वं स्वस्य प्रतियोगित्वम् , भवति हि घटाऽभावस्याऽभावत्वं घट इति घटस्य घटाऽभावप्रतियोगित्वम्' इति, तन्न–गगनादेर्गगनाऽभावाऽभावत्वे मानाभावाद् गगनादेः प्रतियोगित्वानापत्तेः ' स्वस्याऽभाव० ' इत्यत्र षष्ठ्यर्थप्रतियोगित्वा-ऽनिरूपणाच्च ॥

न्धावच्छिन्नप्रतियोगिताकत्वेन तमुपादाय संयोगेन घटवत्यपि भूतले संयोगेन घटो नास्तीति बुद्धिप्रसङ्गः, एवं संयोगसम्बन्धावच्छिन्नप्रति-योगिताकघटाभावस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकत्वेन तमुपादाय समवायेन घटवत्यपि कपाले समवायेन घटो नास्तीति बुद्धिप्रसङ्गः स्यादित्याह– संयोगसम्बन्धावच्छिन्नेति ।

" व्यावर्त्याऽभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता " ॥
[न्यायकुसुमाञ्जलिस्त० का०]

इति उदयनाचार्यवचनात् घटाऽभावप्रतियोगित्वं घटाऽभावाऽ-भावत्वमेव, तथा पटाऽभावादिप्रतियोगित्वमपीति मतं प्रतिक्षेप्तु-मुपन्यस्यति– यत् त्विति । लक्षणं सङ्गमयति– भवति हीति– घटवत्त्व-ग्रहे ' घटाभावोऽस्ति ' इत्यप्रतीतेः ' घटाभावो नास्ति ' इति प्रतीतेश्च घटे घटाऽभावस्याऽभावत्वं भवति यतस्ततस्तदेव घटस्य घटाभावप्रतियोगित्वमित्यर्थः । गगनाभावस्य केवलान्वयित्वेन क्वचि-दपि 'गगनाभावो नास्ति' इत्यप्रतीतेर्गगनस्य गगनाऽभावाऽ-भावत्वाऽसम्भवात् गगनाऽभावप्रतियोगित्वं न स्यादिति प्रति-क्षिपति– तत्रेति । यत् तु गगनाभावः संयोगेन समवायेन वा नास्तीति प्रतीत्या गगनाभावस्याप्यभावोऽस्त्येवेति, तन्मन्दम्–

विषयताप्यतिरिच्यते, तथाहि-न विषयरूपा सा, 'ज्ञानेनाऽतीतो घट इदानीं गृह्यतेऽतीतो घट इदानीं स्फुरति' इत्यादिप्रत्ययाऽप्रामाण्यापत्तेः, विषयरूपाया विषयताया एतत्कालाऽवृत्तित्वात्। अत

तथाविधाभावस्य व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्य केवलान्वयित्वेनाऽवृत्तिमतो गगनादेः स्वरूपत्वाऽसम्भवात्, प्रतियोगिमत्येव प्रतीयमानस्य व्यवह्रियमाणस्य चाभावाभावस्य प्रतियोगिस्वरूपत्वस्य पराभ्युपगतेरिति बोध्यम्। 'स्वाभावाभावत्वम्' इत्यत्र स्वस्याभावः स्वाभावः, स्वाभावस्याभावः स्वाभावाभावः, तत्त्वं स्वाभावाभावत्वमित्येव निर्वचनं भवेत्, तत्र च षष्ठ्यर्थप्रतियोगित्वस्य निरूपयितुमशक्यत्वेन तद्रूपतया प्रतियोगित्वस्योपदर्शनाऽसम्भवाच्चेत्याह- स्वस्य भावेत्यत्रेति- स्वाभावाभावत्वं स्वस्य प्रतियोगित्वमिति प्रतियोगित्वस्य निरूपणम्, तत्र स्वस्याभावः स्वाभावः, स्वाभावस्याभावः स्वाभावाभावः, तस्य भावस्तत्त्वमित्येवं निर्वक्तव्यम्, एवं च स्वस्याभाव इत्यत्र षष्ठ्यर्थः सम्बन्धः प्रतियोगित्वम्, तदेव निरूपितुमारब्धमिति यावत् तन्निरूपितं न भवति तावत् षष्ठ्यर्थतया तन्नोपदर्शयितुं शक्यमिति प्रतियोगित्वनिरूपणे प्रतियोगित्वस्यापेक्षणादात्माश्रयापत्त्येत्थं प्रतियोगित्वनिरूपणं कर्तुमशक्यमिति भावः।

एवं विषयत्वस्यार्थातिरिक्ततयैवावश्यं स्वीकरणीयत्वाद् वैशेषिकपदार्थविभागोऽयुक्त इत्याह- विषयताऽप्यतिरिच्यत इति। विषयताया अतिरिक्तत्वं भावयति- तथाहीत्यादिना। तत्र तावद् विषयस्वरूपा विषयता न भवतीत्याह- न विषयरूपा सेति। सा विषयता। निषेधे हेतुमाह- ज्ञानेनेति- अस्य 'गृह्यते' इत्यनेनान्वयः 'इदानीं गृह्यते, इदानीं स्फुरति' इत्यनयोरेतत्कालवृत्तिविषयतावानित्यर्थः, स च विषयताया विषयस्वरूपत्वे विषयस्य घटस्यातीतत्वेन तद्रूपविषयताया अप्यतीततयैतत्कालवृत्तित्वाभावेन न सम्भवतीति तादृशप्रत्ययस्याऽ-

एव न विषय-ज्ञानोभयरूपा, नापि ज्ञानमात्ररूपा, 'घटपटौ' इत्यादि-ज्ञानस्य भ्रमत्वापत्तेः, तज्ज्ञानरूपाया विषयताया घटत्वाद्यभाववत्पटादिनिष्ठत्वात्, 'कपाल समवायेन घटवद् भूतलं संयोगेन

च्छिन्नघटानिष्ठप्रकारतानिरूपितत्वात्, भूतलानिष्ठविशेष्यताया अपि समवायसम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपितत्वादित्याह- कपालं समवायेन घटवदिति। अपि च ज्ञानस्य विषयेण सह विषयैव सम्बन्धः, सा च ज्ञानस्वरूपेवेति स्वरूपेण सम्बद्धमेव ज्ञानं घटादि-प्रामाण्यं स्यादित्याह- विषयस्वरूपाया इति। उक्तदोषादेव न विषय-ज्ञानोभयस्वरूपाऽपि विषयतेत्याह- अत एवेति। ज्ञानमात्रस्वरूपत्व-मपि तस्या न युक्तिसहामित्याह- नापीति। 'घट-पटौ' इति समू-हालम्बनज्ञानस्य घटांशे घटत्वप्रकारकत्वेन पटांशे पटत्वप्रकारकत्वेन प्रमात्वमिष्टम्, विषयताया ज्ञानरूपत्वेतु घटत्वनिष्ठप्रकारतानिरू-पिता या घटनिष्ठविशेष्यता, या च पटत्वानिष्ठप्रकारतानिरूपिता पटानिष्ठविशेष्यता, तयोरेकसमूहालम्बनज्ञानस्वरूपत्वेनैकतया पट-निष्ठावशेष्यताऽपि घटत्वनिष्ठप्रकारतानिरूपिता स्यादिति घटत्वनिष्ठ-प्रकारतानिरूपितघटत्वाभाववत्पटनिष्ठावशेष्यताकत्वेनाक्तज्ञानस्य भ्रम-त्वमपि प्रसज्येतेत्याह- 'घट-पटौ' इत्यादिज्ञानस्येति। 'घटत्वादि०' इत्यादिपदात् पटत्वादेः परिग्रहः 'पटादि' इत्यादिपदाद् घटादेः परिग्रहः, तेन 'घट-पटौ' इति समूहालम्बनज्ञानस्य घटत्वभ्रमत्व-वत् पटत्वभ्रमत्वमपि पटत्वानिष्ठप्रकारतानिरूपितपटत्वाभाववद्घट-निष्ठविशेष्यताकत्वेनापादितमिति। 'कपालं समवायेन घटवद्, भवद्भूतलं संयोगेन घटवद् इति समूहालम्बनं ज्ञानं कपाले न संयोगेन घटानिर्णयरूपम्, नापि भूतले समवायेन घटनिर्णयरूपम्, विषय-ताया ज्ञानरूपत्वे त्वेवमपि स्यात् कपालनिष्ठविशेष्यतानिरूपिता या समवायसम्बन्धावच्छिन्नघटनिष्ठप्रकारता, या च भूतलनिष्ठविशेष्यता-निरूपिता संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रकारता, तयाश्चैकज्ञान-स्वरूपत्वेनैकतया कपालनिष्ठविशेष्यताया अपि संयोगसम्बन्धाव-

घटवद्' इति ज्ञानस्यापि कपालादौ संयोगादिना घटादिनिर्णयत्वायत्तेश्च। किञ्च, यदि ज्ञानं स्वरूपेण घटादिसम्बद्धमिति घटादिव्यवहारमाधत्ते, तदा स्वाधिकरणकालादिव्यवहारमप्यादध्यात् कालादिनापि सह स्वरूपेण सम्बद्धत्वात्। कालाद्यतिरिक्तेन सह सम्बद्धमेव तत्तद्व्यवहाराधायकम्, तथास्वाभाव्यादिति चेत्? तर्ह्ययमस्य स्वभावः कालाद्यतिरिक्तत्वाऽग्रहे दुर्ग्रह इति न कदापि नियतविषयव्यवहारमादध्यात्॥

एवमन्येऽपि धर्मा यथा यथा भेददृशा विचार्यन्ते तथा तथा भिद्यन्ते, अभेददृशा तु विचार्यमाणा न भेदमनुभवन्तीति भिन्नाभिन्नानन्तधर्मात्मकं वस्त्वभ्युपगन्तव्यम्, अन्यथा वस्तुसत्तानुपपत्तेः, नहि घटादिरैकान्तिकस्वरूपः कश्चिदनुभूयते, किन्त्वनुवृत्ति-व्यावृत्तिद्वाराऽनन्तस्वपरपर्यायक्रोडीकृत इति, तदिदमुक्तं प्रभुश्रीहेमसूरिभिः—

विषयव्यवहारं करोतीति प्राप्तम्, एवं सति तज्ज्ञानं यथा स्वरूपेण घटादिना सम्बद्धं तथा कालादिनाऽप्यस्य स्वरूपमेव सम्बन्ध इति कालादिनापि स्वरूपेण सम्बद्धमिति कालादिव्यवहारमपि विदध्यादित्याह- किञ्चेति। उक्तदोषपरिहारं परः शङ्कते- कालाद्यतिरिक्तेनेति। तथास्वाभाव्यात् कालाद्यतिरिक्तेन सह स्वरूपेण सम्बद्धस्य तत्तद्व्यवहाराधायकत्वस्वाभाव्यात्। समाधत्ते- तर्हीति। अस्य ज्ञानस्य।

एवं प्रतियोगित्व-विषयत्वादिवत्। अन्येऽपि धर्माः अनुयोगित्व-विषयत्वादयो धर्माः। भेददृशा पर्यायाथकनयाश्रयणेन। अभेददृशा द्रव्यर्थिकनयाश्रयणेन। अन्यथा भिन्नाऽभिन्नानन्तधर्मात्मकवस्त्वनभ्युपगमे। कथमनन्तधर्मात्मकत्वानभ्युपगमे वस्तुसत्त्वानुपपत्तिरित्यपेक्षायामाह- नहीति- अस्य 'अनुभूयते' इत्यनेन सम्बन्धः। उक्तमर्थं प्रामाणिकीकर्तुं श्रीहेमचन्द्रसूरिभगवद्वचनसंवादमुपदर्शयति-

" अनन्तधर्मात्मकमेव तत्त्वमतोऽन्यथा सत्त्वमसूपपादम् ।
इति प्रमाणान्यपि ते कुवादिकुरङ्गसन्त्रासनसिंहनादाः " ॥
[अन्ययोगव्यव० श्लो० २२] इति ।

ततः षडेव पदार्था इत्यन्ययोगव्यवच्छेदोऽनुपपन्नः । अयोगव्यवच्छेदोऽपि यथाऽत्रानुपपन्नस्तथा " दोहिं वि णएहिं णीयं " [काण्ड० ३, गाथा–४९] इत्यादिगाथाव्याख्यानावसरे सम्मतिवृत्तावेव

तदिदमुक्तमिति । " अनन्तधर्मात्मकमेव तत्त्वम्० " इति पद्यार्थावगमाय स्याद्वादमञ्जरी विशेषजिज्ञासुभिरवलोकनीया । उपसंहरति– तत इति । ' पार्थ एव धनुर्धरः, पृथिव्येव गन्धवती ' इत्यादौ विशेष्यवाचकपदसमभिव्याहृतैवकारस्य पार्थान्ययोगव्यवच्छेदरूपार्थो धनुर्धरत्वे घटते, एवं पृथिव्यन्ययोगव्यवच्छेदो गन्धवत्त्वे घटते, तथा प्रकृते द्रव्यादिषडन्ययोगव्यवच्छेदः पदार्थत्वे न घटते, द्रव्यादिषड्भिन्ने वैशिष्ट्यादौ योगस्यैव पदार्थत्वे सत्त्वादित्याह– षडेवेति । ' शङ्खः पाण्डुर एव ' इत्यादौ विशेषणसङ्गतैवकारस्य शङ्खे पाण्डुरत्वायोगव्यवच्छेदोऽर्थः शङ्खत्वसमानाधिकरणात्यन्ताभावाप्रतियोगि पाण्डुरत्वमित्येवंस्वरूपो यथा सम्भवति यथा प्रकृते 'द्रव्यादय षट् पदार्था एव' इति समभिव्याहारकल्पनया द्रव्यादिषट्त्वसमानाधिकरणात्यन्ताभावाप्रतियोगि पदार्थत्वमित्येवंरूपोऽयोगव्यवच्छेदोऽर्थो भविष्यतीत्यत आह– अयोगव्यवच्छेदोऽपीति । ' दोहिं वि णएहिं णीयं० " इत्यादीति– आदिपदात् ' सत्थमुलूएण तह वि मिच्छत्तं । जं सविसयपहाणत्तणेण अन्नोन्ननिरविक्खा ' इत्यस्य ग्रहणम्, " द्वाभ्यामपि नयाभ्यामुक्तं शास्त्रमुलूकेन तथापि मिथ्यात्वम् । यस्मात् स्वविषयप्रधानत्वेनान्योन्यनिरपेक्षौ " इति संस्कृतम् । एतद्गाथासमानार्थकं पद्यं नयोपदेशे यथा–

प्रतिपादितमिति तत एव विशेषोऽवधारणीयः। इत्थं च वैशेषिकदर्शननिर्लोठने नैयायिकदर्शनमपि निर्लोठितं द्रष्टव्यम्, प्रायः समानत्वाद् द्वयोरिति किमतिविस्तरेण ? ॥

"द्वाभ्यां नयाभ्यामुन्नीतमपि शास्त्रं कणाशिना।
अन्योऽन्यनिरपेक्षत्वन्मिथ्यात्वं स्वमताग्रहात्॥ [११८] इति —

व्याख्यानमस्य चेत्थम्- 'द्वाभ्यां-सामान्य-विशेषग्राहिभ्यां सङ्ग्रहव्यवराभ्यां नयाभ्याम्, उन्नीतं- पृथग्व्यवस्थापितमपि, कणाशिना-कणादमुनिना, शास्त्रम्, अन्योन्यनिरपेक्षत्वात्- परस्परविविक्तद्रव्यपर्यायोभयावगाहित्वात्, स्वमताग्रहात्- स्वकल्पनाभिनिवेशात्, मिथ्यात्वम्, नहि नयद्वयावलम्बनमेव शास्त्रस्यसम्यक्प्रयोजकम्, किन्तु यथास्थानं विनियोगः, स च स्वप्रयुक्तभङ्गद्वयेतरव्यावृत्तज्ञानां स्याद्वादलाञ्छितानां परस्परसाकाङ्क्षाणां तात्पर्यविषयतया सम्पद्यते, एकतरस्याप्यतात्पर्ये सिद्धान्तविराधनाया अपरिहारात्, तदाह—

जे वयणिज्जविसया संजुज्जन्तेसु होन्ति णयेसु।
सा ससमयपन्नवणा सिद्धन्तविराहणा अण्णा॥
[तित्थयरासायणा अण्णा] [ ]

तदिह सामान्य-विशेषयोगः कुतस्तरामन्येषां भङ्गानामिति स्फुटमेव मिथ्यात्वम्, अतिरिक्तसामान्यविशेषापेक्षां विना महासामान्याऽन्त्यविशेषयोरिव वस्तुमात्रस्य स्वत एव सामान्य-विशेषात्मकत्वमित्यर्थस्यैव यथावन्नयद्वयविनियोगरूपत्वात्, अन्यथानवस्थानात्, तदिदमुक्तम्—

"स्वतोऽनुवृत्ति-व्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः।
परात्मतत्त्वादतथात्मतत्त्वाद् द्वयं वदन्तोऽकुशलाः स्खलन्ति॥
[अन्ययोगव्य० श्लो० ४]

एतेन नैयायिकदर्शनमपि व्याख्यातम्, पदार्थ-प्रमाणादिभेदं विना प्रायस्तस्य वैशेषिकदर्शनसमानविषयत्वादिति दिक्, इति।

दर्शितेयं यथाशास्त्रं नैगमस्य नयस्य दिक्।
कणाददृष्टिहेतुः श्रीयशोविजयवाचकैः ॥ १ ॥

सङ्ग्रहणं सामान्यरूपतया सर्ववस्तूनामाक्रोडनं सङ्ग्रहः। सङ्गृह्णाति सामान्यरूपतया सर्वमिति वा सङ्ग्रहः। 'सङ्गृहीतपिण्डार्थ

तत एव सम्मतिवृत्तित एव। द्वयोः वैशेषिक-नैयायिकदर्शनयोः। नैयायिकदर्शने प्रत्यक्षानुमानोपमानागमाख्यानि चत्वारि प्रमाणानि, 'प्रमाणप्रमेय०' इत्यादिषोडशपदार्थविभजनम्, कणाददर्शने प्रत्यक्षानुमाने द्वे एव प्रमाणे, द्रव्यादयः सप्त पदार्था इति पदार्थविभजनमित्यनयोरस्ति विशेष इत्यवबोधनाय प्राय इति। नैगमनयनिरूपणमुपसंहरन्नाह- दर्शितेयमिति- श्रीयशोविजयवाचकैः कणाददृष्टिहेतुर्नैगमस्य नयस्येयं दिक् यथाशास्त्रं दर्शितेति सम्बन्धः॥

यद् यद् भावितमत्र गूढविषये श्रीमद्यशोवाचकैः,
श्रीलावण्यवचोविलासघटना तत्सर्वतत्त्वोदिता।
विज्ञानां मुदमादधातु सुचिरं न्यायोक्तिसङ्गुम्फिता,
स्पष्टार्था प्रतिभाषिता प्रतिपदं युक्त्युद्भटा नीतिगा ॥१॥
आद्यो नैगमनामधेय इह यः संदर्शितोऽयं नयो,
नीतीनां प्रवरोऽपि वस्तु न मिताऽनेकान्तमालम्बते।
एकान्तोक्तिकदर्थितोऽस्य विषयो नो सत्स्वभावाञ्चितो,
वस्त्वंशो विषयोऽस्य चेन्ननु तदा सन्नीतिरेषो मतः ॥२॥
इति नैगमनयनिरूपणम्।

अथ सङ्ग्रहनयनिरूपणम्—

नैगमनयानन्तरमुद्दिष्टं सङ्ग्रहं निरूपयति- सङ्ग्रहणमिति- 'सङ्ग्रहणं सङ्ग्रहः' इति व्युत्पत्तिः, 'सङ्ग्रहणम्' इत्यस्य 'आक्रोडनम्' इत्यर्थः, केन रूपेण? इत्यपेक्षायां 'सामान्यरूपतया' इति, केषाम्? इत्यपेक्षायां 'सर्ववस्तूनाम्' इति, 'सर्वं वस्तु सदाद्यात्मकम्' इति यद्

सङ्ग्रहवचनम्,' इत्यागमः, अस्यार्थः-सङ्गृहीतः-सामान्याभिमुख्येन गृहीतः, पिण्डितः-एकजातिमानीतः, यद्वा सङ्गृहीतः अनुगमविषयीकृतः, पिण्डितः-निराकृतपराभिमतव्यतिरेकः यद्वा सङ्गृहीतः-सत्ताख्यमहामामान्यभावमापन्नः, पिण्डितश्च परापरसामान्यभावमापन्नोऽर्थो यस्य तत्तथा, सङ्ग्रहवचनम्, अन्तःक्रोडीकृतसर्वविशेषस्य सामान्यस्यैव तेनाभ्युपगमात्, 'सद्' इत्येवं भणिते सर्वत्र भुवनत्रयान्तर्गते वस्तुनि बुद्धेरनुधावनात्, अध्यक्षस्यापि विध्यंश एव

वचनं ज्ञानं वा स सङ्ग्रह इत्यर्थः। प्रकारान्तरेणाह- सङ्गृह्णातीति- 'सङ्गृह्णातीति सङ्ग्रहः' इति व्युत्पत्तिः, सर्वं वस्तु सामान्यरूपतयाऽवगाहते यज्ज्ञानं स सङ्ग्रह इत्यर्थः। आगमोक्तं सङ्ग्रहस्वरूपमुपदर्शयति- सङ्गृहीतेति- "संगहिय-पिंडियत्थं संगहवयणं समासओ बिंति" [विशेषावश्यकगा-२१८३] इत्यागमवचनमाश्रित्येदमवगन्तव्यम्। अस्य अनन्तरोपदर्शितस्यागमस्य। 'सम्' इत्यस्य 'सामान्याभिमुख्येन' इति, 'पिण्डितः' इत्यस्य 'एकजातिमानीतः' इत्यर्थकथनम्। कल्पान्तरमाह- यद्वेति। अनुगमेति- अनेकेषामेकरूपतयाऽभिलापो बोधो वाऽनुगमः, तद्विषयीकृत इत्यर्थः। 'पिण्डितः' इत्यस्य 'निराकृतपराभिमतव्यतिरेकः' इत्यर्थकथनम्, परेषाम्- नैयायिकादीनाम्, अभिमतो यः व्यतिरेकः- वस्तूनां परस्परं भेदो विशेषः स पराभिमतव्यतिरेकः, निराकृतो दूरीकृतः पराभिमतव्यतिरेको यत्र स निराकृतपराभिमतव्यतिरेकः, तथा च विशेषविनिर्मुक्तस्याऽनुगतसामान्यरूपार्थस्य वचनं सङ्ग्रहवचनमित्यर्थः। पुनः कल्पान्तरमाह- यद्वेति। पराऽपरसामान्येति- द्रव्यत्ववादीत्यर्थः। सङ्ग्रहनयाभिप्रेतमुपदर्शयति- अन्तःक्रोडीकृतेति। तेन सङ्ग्रहेण। अनुधावनम्- अवगाहनम्। प्रत्यक्षादिप्रमाणमपि सद्रूपविधिविषयकमेव, न तु परस्परभेदात्मकनिषेधविषयकम्, तादृशनिषेधस्वरूपश्च विकल्पित एवेत्याह- अध्यक्षस्यापीति। 'विध्यंशे'

प्रवृत्तेर्निषेधस्य तदुत्तरकालं कल्पनाविषयत्वात्, सन्मात्रस्यैव शब्दस्याध्यक्षस्य वा विषयत्वेन तात्त्विकत्वाद् भेदप्रतिभासस्तु भेदप्रतिपादकागमोपहितान्तःकरणानां तिमिरोपप्लुतदृशामेकशशलाञ्छनमण्डलस्यानेकत्वावभासवदसत्य एव। घट-पटादीनां हि भावान्यत्वे खरविषाणप्रख्यत्वम्, तदनन्यत्वे च सामान्यैकपरिशेष एव न्याय्य

इत्युक्तिः स्याद्वाद्यभ्युपेतसामान्य-विशेषोभयात्मकवस्त्वेकदेशविधिमताश्रयेण, स्वपक्षे तु अध्यक्षस्यापि विधावेव प्रवृत्तेरित्येव युक्तम्। निषेधस्य अन्यतो भेदस्य। तदुत्तरकालं विध्यवगाहिप्रत्यक्षोत्तरकालम्, कल्पनाविषयत्वात्, तथा च काल्पनिकत्वेन न निषेधस्य वस्तुत्वम्। शब्दस्य शब्दप्रमाणस्य।

नन्वेवं सन्मात्रस्य तात्त्विकत्वे भेदप्रतिभासस्य का गतिरित्यत आह– भेदप्रतिभासस्त्विति– अस्य 'असत्य एव' इत्यनेनान्वयः। असत्यप्रतिभासस्यान्यत्र दोषजन्यत्वस्य क्लृप्तत्वादत्रापि कश्चिद् दोष आवश्यक इत्याह– भेदेति– वस्तूनामन्योन्यभेदप्रतिपादको यो द्वैतवादिन आगमः, तेनोपहितं तज्जन्यबोधजन्यभेदविषयकभावनालक्षणदोषसहितमन्तःकरणं येषां ते भेदप्रतिपादकागमोपहितान्तःकरणास्तेषामित्यर्थः, तथा च भेदविषयकवासनालक्षणदोषजन्यत्वाद् भेदप्रतिभासस्याऽसत्यत्वमित्यभिसन्धिः। दोषविशेषत एकस्मिन्नपि शशधरे द्वित्वप्रतिभासलक्षणभेदप्रतिभासोऽसत्यो भवतीति तद्वदन्यत्रापि भेदप्रतिभासोऽसत्यः स्वीकारार्ह इत्याह– तिमिरोपप्लुतेति– तिमिररोगेणोपप्लुते व्याप्ते दृशौ येषां ते तिमिरोपप्लुतदृशस्तेषामित्यर्थः। एकशशलाञ्छनमण्डलस्य– अद्वितीयचन्द्रमण्डलस्य। अनेकत्वावभासवत् द्वित्वप्रतिभासवत्। घट-पटादीनां सर्वेषां यदि महासामान्यसत्तालक्षणभावैकरूपत्वं युक्तितः सिद्धं भवेत् तदा तेषां 'तदभिन्नाऽभिन्नानां तदभिन्नत्वम्' इति न्यायत एकत्वसिद्धौ भेदप्रतिभासस्यासत्यत्वं सम्भावयितुं शक्यमित्यत आह– घट-पटादीनामिति। हि यतः। भावान्यत्वे

इति । यन्महाभाष्यकृत्–'

"कुंभो भावाऽणन्नो, जइ तो भावो अहन्नहाऽभावो ।
एवं पडादओ वि हु, भावाणन्न त्ति तम्मत्तं ॥

भावः सत्ता, ततो भिन्नत्वे । खरविषाणप्रख्यत्वं खरविषाणतुल्यत्वम्, तथा च 'घट-पटादयोऽसत्याः सत्ताभिन्नत्वात् खरविषाणवद्' इति प्रसङ्गानुमानमत्र, सत्ता सद्रूपधर्मिभिन्ना नाऽभिमता, धर्म-धर्मिणोर्भेदकल्पनापेक्षयाऽभेदकल्पनस्यैव न्याय्यत्वात् 'सन् घटः, सन् पटः' इत्यादिप्रतीतौ सद्रूपस्यैवैकस्य तादात्म्येन घट-पटादौ प्रकारतयाऽवभासनादिति सदेव सत्त्वं भाव इति गूढाभिसन्धिः । असत्यत्वापत्तिभयाद् यदि घट-पटादीनां सत्तालक्षणभावाऽभिन्नत्वमभ्युपेयते तदोक्तन्यायादेकत्वमयत्नोपनतमेव, सत्ता च महासामान्यमेवेति सामान्यमेव वस्तु न विशेष इत्याह- तदनन्यत्वे चेति- भावाभिन्नत्वे चेत्यर्थः ।

सङ्ग्रहनये सामान्यैकरूपमेव वस्त्वित्यत्र महाभाष्यसंवादमुपदर्शयति- यन्महाभाष्यकृदिति । "कुंभो०" त्ति- कुम्भो भावाऽनन्यो यदि ततो भावः, अथाऽन्यथाऽभावः । एवं पटादयोऽपि खलु भावानन्ये इति तन्मात्रम् ॥ चूतो वनस्पतिरेव मूलादिगुण इति तत्समूह इव। गुल्मादयोऽपि एवं सर्वे न वनस्पतिविशिष्टाः ॥ इति संस्कृतम्, अत्र विशेषावश्यकवृत्तिकारविवरणमदः- सत्तामात्रत्वमेव सर्वभावानां भावयन्नाह- कुंभो त्ति । कुम्भः- घटः, स भावात्- सत्तातः, अन्यः ? अनन्यो वा ?, यदि अनन्यः- अभिन्नः, तर्हि भावः सत्तामात्रमेवासौ। अहन्नह त्ति- अथाऽन्यथा- भावाद् भिन्नोऽभ्युपगम्यत इत्यर्थः, तर्हि अभावः- असन्नेवासौ, भावाद् अन्यत्वात्, खरविषाणवदिति। एवं पटादयोऽपि प्रत्येकं वाच्याः। ततस्तेऽपि द्वितीयपक्षेऽसत्त्वप्रसङ्गाद् भावादनन्येऽभ्युपगन्तव्याः, इति सर्वमेव घट-पटादिकं वस्तु, तन्मात्रम्-सत्तामात्रमेवेति ॥२२०८॥ प्रकारान्तरेणापि विशेषाणां सामान्यरूपतां

चूओ वणस्सइ च्चिय, मूलाइगुणो त्ति तस्समूहो व्व ।
गुम्मादओ वि एवं, सव्वे न वणस्सइविसिट्ठा" ॥

[विशेषावश्यकभाष्यगाथे—२२०८, २२१०]

अत एव 'यत्र विशेषक्रिया न श्रूयते तत्रास्ति-भवतीत्यादिका प्रयुज्यते' इति शाब्दिकाः. सत्तायाः सर्वपदार्थाव्यभिचारात्, यदेव च सर्वाव्यभिचारिरूपं तदेव पारमार्थिकम्, यच्च व्यभिचारि तत्प्रबुद्धवासनाविशेषनान्तरीयकोपस्थितिकमप्यपारमार्थिकम्,

साधयितुमाह - चूओ त्ति। चूतः, वनस्पतिः— सामान्यरूप एव, मूलादिगुणत्वात् तत्समूहवत्— चूतादिवृक्षसमूहवत। गुल्मः— लतासमूहः, तदादयोऽपि सर्वे वृक्षेविशेषा वनस्पतेरविशिष्टा एव, इति सामान्यमेवास्ति, न विशेषा इति ॥२२१०॥ प्रथमगाथया सर्वस्य महासामान्यरूपता द्वितीयगाथया अवान्तरसामान्यरूपता, एतेन परसङ्ग्रहोऽपरसङ्ग्रहश्चावेदितः। यत एव सर्वस्य वस्तुनः सत्तारूपत्वं तत एव अश्रूयमाणक्रियान्तरवाक्ये भावाभिधाय्यस्त्यादिक्रियाऽध्याहार एव शाब्दिकानामभिमत इत्याह— अत एवेति। विशेषक्रिया गमन-पचन-पठनादिक्रियार्थकधातुः, अत्र "यत्रान्यत् क्रियावाचिपदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते" इति वचनमनुसन्धेयम्। सत्तायाः सर्वपदार्थगतत्वेन पारमार्थिकत्वं घटत्व-पटत्वादिविशेषधर्मस्याऽसर्वगतत्वेन व्यभिचरितस्य काल्पनिकतयाऽपारमार्थिकत्वमित्याह— सत्ताया इति— 'सन् घटः, सन् पटः' इत्येवं सर्वपदार्थाभिन्नतया प्रतीयमानायाः सत्तायाः सर्वपदार्थव्यापकत्वादित्यर्थः। यच्च व्यभिचारि यद् घटत्व-पटत्वादिकं न सर्वपदार्थनियतम। तत् घटत्व-पटत्वादिकम्। प्रबुद्धेति— प्रबुद्धो यो वासनाविशेषो भेदप्रतिपादकागमार्थविशेषविषयकभावनाविशेषः, तन्नान्तरीयका तज्जन्यत्वात् तन्नियता उपस्थितिर्यस्य तादृशमपीत्यर्थः।

तदाहुरेतन्नयानुयायिनः–

"अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवताशब्दैः, समं प्राहुर्गवादिषु ॥
घटादीनां न चाकारान्, प्रत्याययति वाचकः ।
वस्तुमात्रनिवेशित्वात्, तद्गतिर्नान्तरीयकैः" ॥ इति ।

[वाक्यपदीयकाण्ड० २; १२१, १२५]

एतन्नयमाश्रित्य चिदानन्दैकरससदद्वैतप्रतिपादकं वेदान्तदर्शन-

उक्तार्थे हरिवाक्यं संवादकतयोपदर्शयति– तदाहुरिति। एतन्नयानुयायिनः सङ्ग्रहनयानुसारिणः। सर्वशब्दानां गो-घट-पटाद्यखिलशब्दानाम्। प्रत्याय्यलक्षणं प्रतीतियोग्यस्वरूपम् । अस्त्यर्थः अस्तीतिक्रियाप्रतिपाद्यः सत्तात्मकार्थः। अपूर्वदेवताशब्दैः अस्मदादीन्द्रियजन्यप्रत्यक्षाऽविषयाऽदृष्टदेवतादिप्रतिपादकशब्दैः। समं सह। गवादिषु अस्मदादिप्रत्यक्षविषयगवाद्यर्थकतया सम्मतेषु गो-घटादिशब्देषु। प्राहुः प्रकृष्टतया वदन्ति ॥

कथमस्त्यर्थ एव सर्वशब्दानां प्रत्याय्यस्वरूपमित्यपेक्षायामाह— घटादीनामिति। वाचको घटादिशब्दः, घटादीनाम्, आकारान् प्रतिनियतपृथुबुध्नोदराद्याकारान् न प्रत्याययति। कथं न ज्ञापयतीत्यपेक्षायामाह– वस्तुमात्रनिवेशित्वादिति– घटादिशब्दं श्रुत्वा अस्ति कश्चिदर्थ इत्येवमेव प्रतीयते वस्तुमात्रम्, ततो वस्तुमात्रनिवेशिन एवैते शब्दाः, यदि वस्तुमात्रनिवेशित्वेन अस्त्यर्थ एव सर्वशब्दानां प्रतीयमानत्वात् प्रत्याय्यस्वरूपं तर्हि 'गामानय' इत्यादिशब्दं श्रुतवतो विशिष्याकारविशेषशालिपदार्थानयनादिक्रिया तथाभूताकारज्ञानमन्तरेण न भवेदेवेत्यत आह– तद्गतिर्नान्तरीयकैरिति– सर्वव्यभिचारिसत्सामान्यरूपार्थक्रोडीकृतत्वेन नान्तरीयकैरवान्तरसत्ताविशेषलक्षणैर्घटत्व-पटत्वादिभिराकारविशेषावगतिः, ततश्च प्रतिनियतव्यवहारोपपत्तिरित्यर्थः ॥

मुज्जृतम्, तन्मते हि सच्चिदानन्दाऽद्वयं ब्रह्मैव वस्तु, अज्ञानादिसकल-जडसमूहोऽवस्तु। अज्ञानं तु सदसद्भ्यादनिर्वचनीयं त्रिगुणात्मकं

सङ्ग्रहनयतो ब्रह्माऽद्वैतवादिवेदान्तदर्शनं प्रवृत्तमित्यावेदयति- एतन्नयमाश्रित्येति- सङ्ग्रहनयमवलम्ब्येत्यर्थः। चिदानन्दैकरसेति- ज्ञान-सुखैकरूपेत्यर्थः, 'सत्यं ज्ञानमनन्तं ब्रह्म०' [तैत्तिरोपनिषद्, २, १, १,] इत्यनेन ब्रह्मणः सच्चित्स्वरूपत्वम् 'आनन्दं ब्रह्म०' [बृहदारण्यकोपनिषद्, ३, ९, २८] इत्यनेनानन्दस्वरूपत्वम्, आनन्दशब्दस्य नित्यपुंलिङ्गत्वेऽपि छान्दसत्वान्नपुंसकलिङ्गत्वं सुखस्वरूपत्वेऽपि न विरुद्धम्, 'एकमेवाऽद्वितीयं ब्रह्म नेह नानाऽस्ति किञ्चन' [अध्यात्मोपनिषद्, ६३] इत्यादिश्रुत्या चाऽद्वैतस्वरूपत्वं ब्रह्मणः सिद्धम्, यथा च 'सन् घटः, सन् पटः' इत्यादिप्रतीत्या सद्रूपत्वं विश्वस्य तथा 'इष्टो घटः, इष्ट पटः' इत्यादिप्रतीत्येष्टस्यानन्दस्य स्वरूपत्वम्, तथा 'ज्ञातो घटः, ज्ञातः पटः' इत्यादिप्रतीत्या ज्ञानस्वरूपत्वम्, सच्चिदानन्दानां चाद्वितीयब्रह्मस्वरूपत्वं तदैव भवेद् यदि तेषामप्यैक्यमेव स्यात्, असद्भिन्नत्वं सत्त्वम्, अज्ञानभिन्नत्वं ज्ञानत्वम्, अनानन्दभिन्नत्वमानन्दत्वमित्येवं ब्रह्मणि सत्त्वादयस्त्रयोऽपि धर्मा अभावरूपा एव, अभावश्चाधिकरणस्वरूप एवेति नोक्तधर्मत्रयमादाय द्वैतापत्तिरपीति। वेदान्तसिद्धान्तमुद्घाटयति- तन्मते हीति। हि यतः। तन्मते वेदान्तमते। 'ब्रह्मैव' इत्येवकारेण ब्रह्ममात्रस्य वस्तुत्वेऽवधृते तद्व्यतिरिक्तस्याऽशेषस्यावस्तुत्वमर्थात् प्राप्तमपि स्पष्टप्रतिपत्तये आह— अज्ञानादीति। अज्ञानमत्र न ज्ञानाभावः, किन्तु ज्ञानविरोधिभावस्वरूपमेव तदित्याह- अज्ञानं त्विति। अज्ञानं यदि पारमार्थिकसद्रूपं स्यात् तदा कालत्रयेऽपि बाधितं न स्यात्; इदं त्वखण्डाकारब्रह्मस्वरूपसाक्षात्कारात्मकनिर्विकल्पकज्ञानेन 'तत् त्वमसि' [छान्दोग्योपनिषद्, ६, ८, ७] इत्यादिमहावाक्यजनितेनोत्तरकालं बाध्यत इति न पार-

ज्ञानविरोधिभावात्मकम् 'अहमज्ञः' इत्यनुभवात् "वेदात्मशक्ति

मार्थिकसद्रूपम्, 'अहमज्ञः, सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इत्यादिप्रतीत्या प्रतीयमानमिदं कदाचिदपि यन्न प्रतीयते तदसदित्येवं सर्वदाप्रतीयमानत्ववैकल्यलक्षणासत्त्वराहित्यान्नासद्रूपमपीत्येवं सदसद्भ्यां वक्तुमशक्यत्वादानिर्वचनीयमित्याह- सदसद्भ्यामनिर्वचनीयमिति। त्रिगुणात्मकमिति- सत्त्व-रजस्तमोगुणात्मकमित्यर्थः। यथा हि आलोकविरोधिनस्तमसो भावरूपत्वमेव, न त्वालोकाभावस्तमः, तथा ज्ञानविरोधिनोऽज्ञानस्य भावरूपत्वमेव न तु ज्ञानाभावोऽज्ञानमित्याह- ज्ञानविरोधिभावात्मकमिति- अभावस्याधिकरणस्वरूपभिन्नस्य तुच्छत्वेन कस्यचिद् विरोधित्वासम्भवाज्ज्ञानविरोधित्वान्यथानुपपत्त्याऽज्ञानस्य भावरूपत्वमेवाभ्युपेयमित्याशयः। भावरूपत्वेऽज्ञानेऽनुभवं श्रुतिं च प्रमाणतयोपदर्शयति- अहमज्ञ इत्यनुभवादिति। अत्र 'अज्ञः' इत्यस्य ज्ञानाभाववानित्यर्थो न सम्भवति, 'अहमज्ञः' इत्यस्यापि ज्ञानत्वेन तद्रूपप्रतियोगिनः सत्त्वे ज्ञानसामान्याभावस्यासत्तया ज्ञानाभाववानहमित्यनुभवस्यासम्भवात्, एवमभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वेन ज्ञानरूपप्रतियोगिना ज्ञाने सत्येव ज्ञानाभावज्ञानमित्यस्याभ्युपगन्तव्यत्वेन तद्रूपप्रतिबन्धकसद्भावादपि ज्ञानाभावज्ञानासम्भवात्, एतेन 'यत्किञ्चिज्ज्ञानस्याभाव एव ज्ञानाभावतया विवक्षितः' इत्युक्तिरपि निरस्ता, तस्यापि यत्किञ्चिज्ज्ञानं प्रतियोगि, तज्ज्ञानस्यावश्यकतया तस्यैवात्मरूपधर्मिविषयकस्य तद्वत्ताज्ञानविधया प्रतिबन्धकस्य सद्भावतो यत्किञ्चिज्ज्ञानाभावविषयकज्ञानस्याप्यसम्भवात्, अपि च सर्वविषयकज्ञानवतः केवलिनोऽपि मतिज्ञानादिलक्षणयत्किञ्चिज्ज्ञानं नास्तीतितदभावमादाय 'अहमज्ञः' इति ज्ञानं तस्यापि स्यात्, एवं सुषुप्तिकालेऽनुभूतस्याज्ञानस्य सुषुप्त्यनन्तरं स्मृतिरुपजायते- 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति, न च सुषुप्त्यवस्थायां प्रतियोगिज्ञानाभावतो ज्ञानाभावानुभवसम्भवः, न चानुभवमन्तरेण स्मृतिरुत्पत्तुमीष्टे इति तदानीं भावरूपस्यैवाज्ञानस्य साक्षिवेद्यस्यानुभव

स्वगुणैर्निगूढां [श्वेताश्वतरोपनिषद्– १, ३]" इत्यादिश्रुतेश्च सिद्धम्। इदमज्ञानं समष्टि-व्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्रियते, तथाहि- वृक्षेषु 'वनम्' इतिवत्, जलेषु 'जलाशयः' इतिवच्च समष्ट्यभिप्रायेण नानात्वेन भासमानानामपि जीवगतानामज्ञानानामैक्यव्यपदेशः "अजामेकाम् [श्वेताश्वतरोपनिषद्– ४, ५]" इत्यादिश्रुतेः।

इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना, तदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकदम्बकमव्यक्तं सद-

---

इति, ततश्च 'अहमज्ञः' इत्यनुभवाद् भावरूपज्ञानं सिद्धम्। श्रुतिश्चात्मशक्तितयाऽज्ञानं प्रतिपादयति, न चाभावस्य शक्तिरूपतेत्यतोऽपि भावस्वरूपमज्ञानं स्वीकर्तव्यमित्याह– वेदेति- अत्र स्वगुणैः- सत्त्वरजस्तमोऽभिधानैस्त्रिभिः, निगूढां–व्याप्ताम्, आत्मनः–ब्रह्मणः, शक्तिमायाम्, यो वेद–जानातीत्यर्थः। अज्ञानं च द्विविधं समष्टिरूपं व्यष्टिरूपं च, तत्र समष्टिरूपतया तस्यैक्यं व्यष्टिरूपतया चानेकत्वमित्युपदर्शयति- इदमज्ञानमिति- समष्ट्यभिप्रायेण 'एकम्' इति व्यवह्रियते, व्यष्ट्यभिप्रायेण 'अनेकम्' इति व्यवह्रियते, इत्यन्वयः। अनेकस्यापि समष्ट्यभिप्रायेणैकत्वं दृष्टान्तावष्टम्भतो भावयति- तथाहीति। मायारूपाज्ञानस्यैकत्वे श्रुतिं प्रमाणयति- अजामेकामिति 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' [श्वेताश्वतरोपनिषद् ४, ५] इत्येवंरूपाऽत्र श्रुतिः। समष्टिरूपाज्ञानस्य प्रयोजनमुपदर्शयति- इयं समष्टिरिति। उत्कृष्टोपाधितया जगद्व्यापकत्वेनोत्कृष्टोपाधिरूपतया, ब्रह्मविवर्तीभूतजगद्व्यापिकापि माया ब्रह्मणोऽपरिच्छिन्नस्यैकदेशसमाश्रिततैवेति तत्परिच्छेदकत्वाद् भवत्युपाधिः। विशुद्धसत्त्वप्रधानेति- विशुद्धं रजस्तमोभ्यामुद्भूताभ्यामविमिश्रं यत् सत्त्वं तत्प्रधानेयं समष्टिरूपा मायेत्यर्थः। तदुपहितं समष्टिरूपमायोपहितम्, चैतन्यं

न्तर्यामि जगत्कारणमीश्वर इति च व्यपदिश्यते, सकलाऽज्ञानावभासकत्वात् "यः सर्वज्ञः स सर्वविद्" इति श्रुतेः, अस्येयं समष्टिः सकलकारणत्वात् कारणशरीरम्, आनन्दप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानन्दमयकोशः, सर्वोपरमलक्षणत्वात् सुषुप्तिः, अत एव स्थूल-सूक्ष्मप्रपञ्चलयस्थानमित्यप्युच्यते ।

यथा च वनस्य व्यष्ट्यभिप्रायेण 'वृक्षाः' इति जलाशयस्य वा 'जलानि' इति इति अनेकत्वेन व्यपदेशस्तथाऽज्ञानस्यापि व्यष्ट्यभिप्रायेणानेकत्वव्यपदेशः "इन्द्रो मायाभिः पुरुरूप ईयते" [बृहदारण्य-

---

ब्रह्मणो रूपम्, सर्वोपाधिविकलस्य चैतन्यस्य ब्रह्मस्वरूपस्य विशुद्धसत्त्वप्रधानमायोपहितत्वे सर्वज्ञत्वाद्यन्तर्यामित्वेश्वरत्वादिधर्मयोगित्वमित्यभिसन्धिः । कथमस्य सर्वज्ञत्वमित्यपेक्षायामाह- सकलाज्ञानावभासकत्वादिति- स्वकार्याशेषजगत्समन्वितत्वमेवाज्ञाने साकल्यम् । निरुक्तोपाध्युपहितस्य चैतन्यस्य सर्वज्ञत्वे श्रुतिं प्रमाणयति - यः सर्वज्ञ इति । अस्य सर्वज्ञस्येश्वरस्य । इयम् अनन्तरोपवर्णिता विशुद्धसत्त्वप्रधाना माया । अस्या ईश्वरकारणशरीरत्वे हेतुः - सकलकारणत्वादिति । इयं समष्टिर्यथेश्वरस्य कारणशरीरं तथाऽऽनन्दमयकोशोऽपि, तत्रानन्दमयत्वे हेतुः - आनन्दप्रचुरत्वादिति । कोशत्वे हेतुः - कोशवदाच्छादकत्वादिति- कोशो भण्डारः कपाटादिसङ्घटितदृढतमगृहविशेषः, स यथा रत्नसुवर्ण रजतप्रभृतीनि धनान्याच्छादयति तथा समष्टिरूपा मायाऽपि सच्चिदानन्दस्वरूपस्य ब्रह्मण आनन्दाद्यात्मस्वरूपात्मकं धनमावृणोतीति भवति कोशकार्यकारित्वात् कोशः । सर्वोपरमेति- सर्वं हि मायिकं स्थूल सूक्ष्मप्रपञ्चजातं तदानीमुपादानरूपायां मायायामनुद्भूतस्वस्वव्यापारं सद् विलीनं भवतीति सर्वोपरमस्वरूपत्वात् सुषुप्तिरियमित्यर्थः । अत एव सर्वोपरमलक्षणत्वादेव ।

अज्ञानस्य व्यष्ट्यभिप्रायेणाऽनेकत्वव्यपदेशमुपपादयति- यथा चेति । ननु 'अजामेकाम्' इत्यादिश्रुतिप्रमाणादेकत्वस्य तत्र सिद्धा-

कोपनिषद् , २, ५, १९] इत्यादिश्रुतेः । अत्र व्यस्त-समस्तव्यापित्वेन व्यष्टि-समष्टिताव्यपदेशः । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना, तदुपहितं चैतन्यमल्पज्ञत्वाऽनीश्वरत्वादिगुणकम् 'अज्ञः' इत्युच्यते, एकाज्ञानावभासकत्वाद्, अस्पष्टोपाधितयाऽनतिप्रकाशत्वादस्य प्राज्ञत्वम् , अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरम् , आनन्दप्रचुरत्वादेव हेतोरानन्दमयकोशः, सर्वोपरमात् सुषुप्तिः, स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते । अनयोर्व्यष्टिसमष्ट्योर्वन-वृक्षयोरिव जलाशयजलयोरिव वाऽभेदः, एतदुपहितयोरीश्वर-प्राज्ञयोरपि वन-वृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव

वपि निष्प्रमाणकमनेकत्वं तत्र कथं श्रद्धेयमित्यतस्तत्रापि श्रुतिः प्रमाणमित्याशयेनाह- इन्द्र इति- इन्द्रः- आत्मा, मायाभिः- व्यष्टिरूपतयाऽनेकस्वरूपतामुपगताभिर्मायाभिः, पुरुरूपः- बहुरूपः, ईयते- भवतीत्यर्थः, अत्र मायाभिरिति बहुवचनेन मायाया अनेकत्वं सुस्पष्टमवभासते । अत्र मायायाम् । व्यस्तेति- व्यस्तव्यापित्वेन व्यष्टिताव्यपदेशः, समस्तव्यापित्वेन समष्टिताव्यपदेशः । व्यष्टिरूपमायायाः स्वरूपं तत्प्रयोजनं चोपदर्शयति- इयं व्यष्टिरिति- निकृष्टत्वं चास्या व्यस्तव्यापित्वमेव । तदुपहितं मलिनसत्त्वप्रधानाऽविद्योपहितम् । अस्य अज्ञशब्दव्यपदेश्यत्वे हेतुः- एकाज्ञानावभासकत्वादिति । प्रकर्षेणाऽज्ञः प्राऽज्ञ इति, तत्त्वे हेतुः- अस्पष्टोपाधितयाऽनतिप्रकाशत्वादिति । अस्यापि प्राज्ञस्यापि, अपिना यथा ईश्वरस्य समष्टिव्यपदेश्या माया सकलकारणत्वात् कारणशरीरमानन्दप्रचुरत्वादानन्दमयकोश इत्यादिस्तथेत्यर्थस्य सूचनम् । व्यष्टि-समष्टिरूपाऽज्ञानलक्षणोपाध्योर्दृष्टान्तावष्टम्भनतोऽभेदोपपादनद्वारा तदुपहितचैतन्यरूपयोरीश्वर-प्राज्ञयोरभेदमुपदर्शयति- अनयोर्व्यष्टि-समष्ट्योरिति । एतदुपहितयोरिति- समष्ट्युपहितचैतन्यरूपस्येश्वरस्य व्यष्ट्युपहितचैतन्यरूपस्य प्राज्ञस्येत्यर्थः । वनेति- वनावच्छि-

काऽभेदः "एष सर्वेश्वरः" [बृहदारण्यकोपनिषद् ४, ४, २२] इति श्रुतेः, वन-तदवच्छिन्नाकाशयोर्जलाशय-तद्गतप्रतिबिम्बाकाशयोर्वाऽऽधाराऽनुपहिताकाशवदनयोरज्ञान-तदुपहितचैतन्ययोराधारभूतं यद् अनुपहितचैतन्यं तत् तुरीयमित्युच्यते "शिवमद्वैतं चातुर्थं मन्यन्ते" इति श्रुतेः। इदमेव तुरीयं शुद्धं चैतन्यमज्ञानादि-तदुपहितचैतन्याभ्यामविविक्तं सत् 'सर्वं ब्रह्मैव' [तेजोबिन्दूपनिषद्] इत्यादेः "तत् त्वमसि" [छान्दोग्योपनिषद् ६, ८, ७] इत्यादेर्वा महावाक्यस्य वाच्यम्, विविक्तं सल्लक्ष्यमिति चोच्यते।

काकाश वृक्षावच्छिन्नाकाशयोरभेदो यथा तथेत्यर्थः। जलाशयेति—जलाशयप्रतिबिम्बिताकाश-जलप्रतिबिम्बिताकाशयोरभेदो यथा तथेत्यर्थः। प्राऽङ्नस्येश्वराभेदे श्रुतिं प्रमाणयति- एष सर्वेश्वर इति श्रुतेरिति। दृष्टान्तावष्टम्भेनोपहिता-ऽनुपहितचैतन्ययोराधाराधेयभावमुपपाद्यानुपहितचैतन्यस्वरूपस्य ब्रह्मणस्तुरीयव्यपदेश्यत्वमुपदर्शयति- वन-तदवच्छिन्नेति। आधारानुपहिताकाशवदिति- आधारभूतं यद् अनुपहितं शुद्धस्वरूपमाकाशं तद्वदित्यर्थः। शुद्धचैतन्यस्वरूपस्य ब्रह्मणस्तुरीयपदव्यपदेश्यत्वे श्रुतिं प्रमाणयति- शिवमद्वैतमिति। तुरीयचैतन्यव्यपदेश्यस्य ब्रह्मणो महावाक्यार्थत्वमावेदयति- इदमेवेति। 'सर्वं ब्रह्मैव' इत्यादौ सर्वस्य मायिकस्य ब्रह्माऽभिन्नत्वं ब्रह्मणि कल्पितत्वेनैव भवेत्, यतः कल्पितस्य वस्तुनोऽधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावादधिष्ठानसत्तैव कल्पितस्य सत्ता, सा तदोपपद्येत यदि तत्तद्वस्तु स्वावच्छिन्नचैतन्याभिन्नं स्यात्, एवं च ब्रह्मणो मायादितस्तदुपहितचैतन्यतश्चाविविक्तस्य सतः "ब्रह्मैव" इत्यादिमहावाक्यस्य 'तत् त्वमसि' इत्यादिमहावाक्यस्य च वाच्यत्वम्, यदा च पारमार्थिकस्य तुरीयचैतन्यस्य न परमार्थतः कल्पितान्मायादितस्तदुपहितचैतन्यादितोऽभेदः सम्भवतीति विचार्यते तदा विविक्तस्य तस्य कल्पितमायाद्यभेदरूपवाच्यार्थबाधात् सम्पूर्णस्योक्तमहावाक्यस्य शुद्धब्रह्मण्येव लक्षणेत्यत

अस्याज्ञानस्यावरण-विक्षेपनामकमस्ति शक्तिद्वयम्, तत्रावरण-शक्तेरल्पस्यापि मेघस्यानेकयोजनायतादित्यमण्डलस्यालोकयितु-र्नयनपिधायकतयेव परिच्छिन्नस्याप्यज्ञानस्यापरिच्छिन्नासंसार्या-

---

उक्तमहावाक्यस्य लक्ष्यत्वं तस्येत्यविविक्तं सद् वाच्यम्, विविक्तं सल्लक्ष्यमिति चोच्यत इत्यर्थः।

मायाऽविद्याद्यभिधानस्याऽज्ञानस्यैकस्यापि सत आवरणकार्य-कारित्वं सर्जनकार्यकारित्वं च शक्तिभेदमन्तरेण न सम्भवतीति तस्यावरणशक्तिर्विक्षेपशक्तिश्चेत्येवं शक्तिद्वयं समस्तीत्याह- अस्याऽ-ज्ञानस्यति। क्रमेण शक्तिद्वयकार्ये प्रतिपाद्यितव्ये प्रथमत आवरण-शक्तिकार्यमुपदर्शयति- तत्रेति- निरुक्तशक्त्योर्मध्य इत्यर्थः, आवरण-शक्तेराच्छादने सामर्थ्यमित्यन्वयः। अपरिच्छिन्नस्य ब्रह्मण आच्छादने परिच्छिन्नस्याज्ञानस्य कथं सामर्थ्यं सम्भावयितुं शक्यमित्यपेक्षायां यथाऽल्पपरिमाणस्यापि मेघस्य स्वापेक्षयाऽत्यधिकपरिमाणस्यादित्य-मण्डलस्याऽऽच्छादने सामर्थ्यमवलोक्यते तथेदमपि सम्भवतीत्याह- अल्पस्यापीति- आदित्यमण्डलपरिमाणापेक्षया न्यूनतमपरिमाणस्या-पीत्यर्थः। आवारकमेघपरिमाणापेक्षयाऽऽद्रियमाणादित्यमण्डलपरि-माणस्यात्युत्कृष्टत्वप्रतिपत्त्यर्थम् 'अनेकयोजनायत' इति विशेषणम्, आदित्यमण्डलाच्छादकत्वं मेघस्यादित्यमण्डलविषयकचाक्षुषप्रत्यक्ष-प्रतिबन्धकत्वमेव, तत्कथम्भावाकाङ्क्षोपशमनार्थमुक्तम् 'आलोकयितु-र्नयनपिधायकतया' इति, संसार्यात्मनः परिच्छिन्नान्तःकरणावच्छिन्नस्य परिच्छिन्नत्वमेवेत्यतः 'असंसार्यात्मनः' इत्युक्तम्, अज्ञानेनावरणं शुद्ध-चैतन्यस्वरूपस्य ब्रह्मण एव, तस्य देशपरिच्छेदाभावादपरिच्छिन्नत्वम्, अविद्यालक्षणाज्ञानस्याश्रयत्वम् विषयत्वं च शुद्धस्यैव चैतन्यस्य, यत उक्तम्-

"आश्रयत्व-विषयत्वभागिनी, निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो, नाश्रयो भवति नापि गोचरः॥ १॥

त्मनोऽवलोकयितृबुद्धिपिधायकतयाऽऽच्छादने सामर्थ्यम्, तदुक्तम्– 'घनदृष्टिः' इति, अनयाऽऽवृतस्यात्मनः कर्तृत्व-भोक्तृत्व-सुखित्वादि सम्भाव्येत स्वाज्ञानेनावृताया रज्जोरिव सर्पत्वम्। विक्षेपशक्तिस्तु रज्ज्वज्ञानं यथा स्वावृतरज्जौ सर्पादिकमुत्पादयति एवमज्ञानमपि स्वावृतात्मनि गगनादिप्रपञ्चमुत्पादयति येन तादृशसामर्थ्यम्। तदुक्तम्– "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्॥ [सरस्वतीरहस्योपनिषद्. १८] इति।

"बहु निगद्य किमत्र वदाम्यहं, शृणुत सङ्ग्रहमद्वयशासने।
सकलवाङ्मनसातिगता चितिः, सकलवाङ्मनसव्यवहारभाक्" ॥२॥
[संक्षेपशारीरके १, ३१९, ३३१] इति।

तदाच्छादनकथम्भावाकाङ्क्षानिवृत्त्यर्थमुक्तम्– अवलोकयितृबुद्धिपिधायकतयेति– अवलोकयितुर्जीवस्य या ब्रह्मविषया बुद्धिस्तत्प्रतिबन्धकतयेत्यर्थः, ब्रह्मविषयकबुद्धिप्रतिबन्धनमेव ब्रह्मण आच्छादनं बोध्यम्। न्यूनपरिमाणस्य मेघस्य सवितृमण्डलावारकत्वदृष्टान्तेनाज्ञानस्य ब्रह्मावारकत्वसमर्थने सम्मतिमुपदर्शयति– तदुक्तं घनदृष्टिरितीति। सौसादृश्यदोषतो रज्जुत्वेन रज्जोरज्ञानतः सर्पत्वं कल्पितं यथा तथैवाविद्ययाऽऽवृतस्यात्मनः कर्तृत्वादिकं कल्पितं सम्भावनापथमुपगच्छतीत्याह– अनयेति– आवरणशक्तियुक्तयाऽविद्ययेत्यर्थः। स्वाऽज्ञानेन रज्जुत्वेन रज्जुस्वरूपाज्ञानेन। विक्षेपशक्तिकल्पनप्रयोजनं दर्शयति– विक्षेपशक्तिस्त्विति। अज्ञानस्य वियदादिप्रपञ्चोत्पादनसामर्थ्यं विक्षेपशक्तिस्तां दृष्टान्तावष्टम्भेन साधयति– रज्ज्वज्ञानमित्यादिना। स्वावृतरज्जौ रज्ज्वज्ञानावृतरज्जौ। स्वावृतात्मनि अज्ञानावृतात्मनि। येन सामर्थ्यविशेषेण। तादृशसामर्थ्यम् अज्ञानस्य स्वावृतात्मनि गगनादिप्रपञ्चोत्पादनसामर्थ्यम्। विक्षेपशक्तिबलादज्ञानस्य जगदुत्पादकत्वे प्राचां सम्मतिमाह– तदुक्तमिति। 'लिङ्गादि०' इत्यत्र लिङ्गपदेन सूक्ष्मशरीरम्, तच्च—

शक्तिद्वयवदज्ञानोपहितचैतन्यं स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया चोपादानम्। ततस्तमःप्रधानशक्तिमदज्ञानोपहितचैतन्यादाकाशम्, आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी चोत्पद्यते, "एतस्मादात्मन आकाशः सम्भूतः" [तैत्तिरीयोपनिषद्, २, १, १] इत्यादिश्रुतेः। एतेषु जाड्याधिक्यदर्शना-

---

"ततः सत्यव्रतः कायात्, पाशबद्धं वशं गतम्।
अङ्गुष्ठमात्रं पुरुषं, निश्चकर्ष यमो बलात्" ॥ १ ॥

इत्यादिवचनात् परलोकयात्रानिर्वहणसमर्थमवगन्तव्यम्, 'अङ्गुष्ठमात्रं पुरुषम्' इत्यनेन सूक्ष्मशरीरमेव तत्रावेदितम्, ज्ञानेन्द्रियपञ्चक-कर्मेन्द्रियपञ्चक-बुद्धि-मनः-प्राणादिवायुपञ्चकैः सङ्घटितं तत् सप्तदशावयवकं गीयते। आवरण-विक्षेपशक्तिद्वयवदज्ञानोपहितस्यात्मनो जगतो निमित्तत्वमुपादानत्वं च लूतादृष्टान्तेन समर्थयति- शक्तिद्वयेति- अज्ञानोपहितचैतन्यरूपे यदा चैतन्यं प्रधानतयाऽऽद्रियते तदा चैतन्यस्य सतस्तस्य जडात्मकजगदुपादानत्वं न सम्भवतीति जगन्निमित्तत्वं तस्येत्याह- स्वप्रधानतयेति। यदा तु तत्रोपाधिभूतस्याज्ञानस्यैव प्राधान्यमाद्रियते तदा जडात्मकमज्ञानं जडात्मकस्य जगत उपादानं सम्भवत्येवेति जगदुपादानत्वमप्यज्ञानोपहितात्मन इत्याह- स्वोपाधिप्रधानतयेति। यथेत्यादिना लूतादृष्टान्तं स्पष्टतया भावितमेवेति। शक्तिद्वयवदज्ञानोपहितचैतन्यस्य जगदुपादानत्वनिमित्तत्वे व्यवस्थिते आकाशादिप्रपञ्चे यस्य यथाभूताऽज्ञानोपहितचैतन्यत उत्पत्तिस्तत्प्रकारकमेदं विशिष्योपदर्शयति- तत इति- निरुक्तचैतन्यस्य जगत्कारणत्वत इत्यर्थः। 'आकाशम्' इत्यस्य 'उत्पद्यते' इत्यनेनान्वयः, एवं 'वायुः' इत्यादेरप्युत्पद्यत इत्यनेन सम्बन्धः, आकाशं प्रति साक्षादुक्तोपहितचैतन्यस्य कारणत्वं वाय्वादिकं प्रति तु परम्परयेति विशेषः। आकाशादिक्रमेण जगदुत्पत्तौ श्रुतिं प्रमाणयति- एतस्मादिति- तमःप्रधानशक्तिमदज्ञानो-

देतत्कारणस्य तमःप्राधान्यम्, सत्त्व-रजस्तमांस्यपि कारणगुणक्रमेण तेष्वाकाशादिषूत्पद्यन्ते, एतान्येव पञ्च भूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते, एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते, सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि, अवयवा ज्ञानेन्द्रियपञ्चकं बुद्धि-मनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति। ज्ञानेन्द्रि-

---

पहितादित्यर्थः। नन्वज्ञानस्य सत्त्व-रजस्तमोगुणत्रययुक्तत्वे कथं प्रधानीभूततमोगुणयुक्ताज्ञानोपहितात्मन एवाकाशाद्युपादानत्वमित्यत आह- एतेष्विति- आकाशादिष्वित्यर्थः। एतत्कारणस्य आकाशादिकारणाऽज्ञानस्य, कार्यं हि कारणानुरूपमेव भवति, यदि कारणमज्ञानं तमःप्रधानं न भवेत् तर्हि तत्कार्यमाकाशादिकमपि तमःप्रधानं न स्यात्, तमःप्राधान्यं च तेषु जाड्यलक्षणतमःकार्याधिक्यदर्शनतोऽवसितमतस्तत्कारणेऽज्ञाने तमःप्राधान्यमित्यर्थः। सत्त्वकार्यसुखस्य रजःकार्यदुःखस्य तमःकार्यमोहस्योत्पादकत्वेनाकाशादिषु सत्त्व-रजस्तमांसि सन्तीति निर्विवादम्, कार्येषु गुणाः कारणगतगुणेभ्य एवोत्पद्यन्त इति कारणीभूतेऽज्ञानेऽपि सत्त्व-रज-स्तमांसि सन्तीत्याह- सत्त्व-रजस्तमांस्यपीति। एतान्येव आकाशादीन्येव। तन्मात्राणीति- शब्दतन्मात्रमाकाशम्, स्पर्शतन्मात्रो वायुः, रूपतन्मात्रं तेजः, रसतन्मात्रं जलम्, गन्धतन्मात्रा पृथिवीत्यर्थः। अपञ्चीकृतानीति- 'पञ्चीकरणं त्वाकाशादिपञ्चकमेकैकं द्विधा विभज्य०' इत्यादिना पञ्चीकृतानि स्थूलभूतान्यग्रे दर्शयिष्यन्ति, न पञ्चीकृतानि अपञ्चीकृतानीत्यर्थः। एतेभ्यः अपञ्चीकृततन्मात्रव्यपदेश्याकाशादिपञ्चभूतेभ्यः। पुरुषभेदेन सूक्ष्मशरीरं भिन्नमित्यावेदयितुं सूक्ष्मशरीराणीति बहुवचनम्। कानि सूक्ष्मशरीराणीत्यपेक्षायामाह- सूक्ष्मशरीराणीति। 'सप्तदशावयवानि' इति यदुक्तं तदेवावयवानामुपदर्शनेन निर्धारयति- अवयवा इति। 'ज्ञानेन्द्रियपञ्चकम्' इति यदुक्तं तदेव विशिष्य परिगणय्य दर्शयति- ज्ञानेन्द्रियाणीति। आकाशस्य सात्त्विकांशतः श्रोत्रेन्द्रियमुप-

याणि श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणानि, एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथगुत्पद्यन्ते। बुद्धिर्निश्चयात्मिकाऽन्तःकरणवृत्तिः, सङ्कल्प-विकल्पात्मिका सा मनः, एतयोरेव चित्ताऽहङ्कारयोरन्तर्भावः, एते च गगनादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यते, एषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम्। इयं

जायते, तत आकाशगुणस्य शब्दस्य ग्राहकं तत्, वायोः सात्त्विकांशात् त्वगिन्द्रियं जायत इति वायुगुणस्य स्पर्शस्य ग्राहकं तत्, तेजसः सात्त्विकांशाच्चक्षुरिन्द्रियं भवतीति तेजोगुणस्य रूपस्य ग्राहकं तत्, अपां सात्त्विकांशाद्रसनं जायत इति तद्गुणस्य रसस्य ग्राहकं तत्, पृथिव्याः सात्त्विकांशाद् घ्राणेन्द्रियमुद्भवतीति पृथिवीगुणस्य गन्धस्य ग्राहकं घ्राणेन्द्रियमित्याह- एतानीति- श्रोत्र-त्वक्-चक्षु-र्जिह्वा-घ्राणानीत्यर्थः, 'उत्पद्यन्त' इत्यनेन सम्बन्धः। लिङ्गशरीरावयवतया 'बुद्धि-मनसी' इति यदुक्तं तत्र का बुद्धिः? किं च मनः? इत्याकाङ्क्षायामाह- बुद्धिरिति। सा अन्तःकरणवृत्तिः। ननु चिता-ऽहङ्कारयोरप्यन्तःकरणतया प्रसिद्धिरस्तीति तयोरपि लिङ्गशरीरावयवतयाऽभिधानं कुतो न कृतमित्यत आह- एतयोरेवेति- बुद्धि-मनसोरेवेत्यर्थः, एतेन-

"मनो बुद्धिरहङ्कारश्चितं, करणमान्तरम्।
संशयो निश्चयो गर्वः, संकल्पो विषया अमी"॥

इत्यनेन विरोधो निरस्तो वेदितव्यः। चित्तस्य बुद्धावन्तर्भावे तत्कार्यं बुद्धिकार्यमेव, अहङ्कारस्य मनस्यन्तर्भावे तत्कार्यमपि मनःकार्यमेवेति बुद्धिमनसोर्गगनादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पत्तिरित्याह- एते चेति- बुद्धि-मनसी चेत्यर्थः, 'उत्पद्येते' इत्यनेन सम्बन्धः। ज्ञानेन्द्रियपञ्चकस्य बुद्धि-मनसोश्चाकाशादिसात्त्विकांशकार्यत्वे हेतुमावेदयति- एषामिति- ज्ञानेन्द्रियादीनामित्यर्थः। वेदान्तमते 'अन्नमयकोशः, प्राणमयकोशः, मनोमयकोशः, विज्ञानमयकोशः,

बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति, अयं कर्तृत्व-भोक्तृत्वाभिमानित्वेन लोकद्वयगामी व्यावहारिको जीव इत्युच्यते। मनस्तु कर्मेन्द्रियैः सह मनोमयकोशः। कर्मेन्द्रियाणि वाक्-पाणि-पाद-पायूपस्थानि, एतान्याकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथगुत्पद्यन्ते। वायवः प्राणा-ऽपानोदान-समान-व्यानाः,

---

आनन्दमयकोशः' इत्येवं पञ्च कोशा अभिमताः, तत्र 'स्थूलशरीर-मन्नविकारत्वादिहेतोरन्नमयकोशः' इत्यग्रे व्यक्तीभविष्यति, विशुद्ध-सत्त्वप्रधाना समष्टिव्यपदेश्या माया आनन्दप्रचुरत्वात् कोशवदाच्छाद-कत्वादानन्दमयकोशः, एवं मलिनसत्त्वप्रधाना व्यष्टिव्यपदेश्या माया 'आनन्दप्रचुरत्वादेव हेतोरानन्दमयकोशः' इत्यनेन आनन्दमय-कोशः प्रागभिहितः। इदानीं प्रसङ्गाद् विज्ञानमयकोशादित्रिकं क्रमेण दर्शयति- इयं बुद्धिरिति। अयं विज्ञानमयकोशः, लोके यो लोकद्वयम् इहलोकपरलोकोभयमनुगच्छति, स कर्तृत्व-भोक्तृत्वाद्यभिमानी जीव इति व्यवहियते, विज्ञानमयकोशश्च तथेति स एव व्यावहारिको जीव इत्यर्थः। मनोमयकोशमुपदर्शयति- मनस्त्विति। सूक्ष्मशरीरा-वयवतया कर्मेन्द्रियपञ्चकं यदुक्तम्, यच्च कर्मेन्द्रियैः सह' इत्युक्तं तत्स्पष्टप्रतिपत्तये कर्मेन्द्रियाणि नामग्राहं दर्शयति- कर्मेन्द्रियाणीति। आकाशस्य रजोंऽशाद् वागिन्द्रियम्, वायो रजोंऽशात् पाणीन्द्रियम्, तेजसो रजोंऽशात् पादेन्द्रियम्, जलस्य रजोंऽशात् पायुः, पृथिव्या रजोंऽशादुपस्थेन्द्रियमित्येवं पञ्चापि कर्मेन्द्रियाणि जायन्त इत्याह- एतानीति- वागादीनि कर्मेन्द्रियाणीत्यर्थः, 'उत्पद्यन्ते' इत्यनेनास्य सम्बन्धः। 'वायुपञ्चकं च' इति यदुक्तं तत्स्पष्टप्रतिपत्त्यर्थमाह- वायव इति- एतेषां स्वरूपम्-

"हृदि प्राणो गुदेऽपानः, समानो नाभिसंस्थितः।
उदानः कण्ठदेशे स्याद्, व्यानः सर्वशरीरगः"॥

एते चाकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यन्ते । इदं प्राणादिपञ्चकं कर्मेन्द्रियसहितं प्राणमयकोश उच्यते, अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम् । एषु कोशेषु विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः, मनोमय इच्छाशक्तिमान् करणरूपः, प्राणमयः क्रियाशक्तिमान् कार्यरूप इत्येवमेतेषां योग्यत्वेनायं विभागः, एतत् कोशत्रयं मिलितं सूक्ष्मशरीरमुच्यते, अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद् वा समष्टिः, अनेकबुद्धिविषयतया वृक्षवज्जलवद् वा व्यष्टिरित्युच्यते, यतः समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चोच्यते, सर्वत्रानुस्यूतत्वात् ज्ञानक्रिया-

इति वचनप्रतिपाद्यस्वस्वस्थानतोऽवसेयम् । एते च प्राणादयो वायवः पुनः, अस्य ' उत्पद्यन्ते ' इत्यनेन सम्बन्धः । प्राणमयकोशस्वरूपमुपदर्शयति- इदमिति । प्राणमयकोशस्याकाशादिरजोंऽशकार्यत्वे हेतुमाह- अस्येति- प्राणमयकोशस्येत्यर्थः । एतेषां विज्ञानमय-मनोमय-प्राणमयकोशानां विविच्य स्वरूपोपदर्शनतो विभागसाफल्यमावेदयति- एषु कोशेष्विति- अनन्तरोपदिष्टेषु त्रिषु कोशेषु मध्य इत्यर्थः । एतेषां निरुक्तकोशत्रयाणाम् । अयं कर्तृ-करण-कार्यरूपात्मकः । निरुक्तकोशत्रयमेव मिलितं सत् सूक्ष्मशरीरमुच्यते, न तु कोशत्रयादन्यत् सूक्ष्मशरीरमित्याह- एतत् कोशत्रयमिति । यथा च विशुद्धसत्त्वप्रधानमज्ञानमानन्दमयकोशः समष्टिः, मलिनसत्त्वप्रधानमज्ञानमानन्दमयकोशो व्यष्टिरित्येवमानन्दमयकोशस्य समष्टि-व्यष्टिभेदेन द्वैविध्यम्, तथोक्तकोशत्रयात्मकसूक्ष्मशरीरेऽपि समष्टि-व्यष्टिभेदेन द्वैविध्यमित्याह- अत्रापीति- सूक्ष्मशरीरेऽपीत्यर्थः, यथा च समष्टिस्वरूपानन्दमयकोशात्मकजगत्कारणाज्ञानोपहितचैतन्यमीश्वरः, व्यष्टिस्वरूपानन्दमयकोशात्मकाहङ्कारादिकारणाज्ञानोपहितचैतन्यं प्राज्ञ इत्येवं समष्टि-व्यष्टिभेदप्रयोजनम्, तथाऽत्रापि समष्टि-व्यष्टिभेदप्रयोजनं

शक्तिमदुपहितत्वाच्च, अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः, अत एव स्थूलप्रपञ्चलयस्थानमित्युच्यते । एतद्व्यष्ट्युपहितं चैतन्यं तैजस उच्यते, तेजोमयान्तःकरणोपहितत्वात्, अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिहेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः स्थूलशरीरलयस्थानमिति । एतौ सूत्रात्म-तैजसाविदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः "प्रविविक्तभुक् तैजसः" इति श्रुतेः । अत्रापि व्यष्टि-

---

समस्तीत्याह-यत इति । अस्य हिरण्यगर्भस्य । एषा एकबुद्धिविषयत्वेन सूक्ष्मशरीरात्मकैकस्वरूपा, इतोऽपि सूक्ष्ममानन्दमयकोशात्मकजगत्कारणाज्ञानस्वरूपं शरीरं समस्तीत्यत आह-स्थूलप्रपञ्चापेक्षयेति । सूक्ष्मशरीररूपस्य निरुक्तकोशत्रयस्य सहेतुकं स्वप्नस्वरूपत्वमुपदर्शयति-जाग्रद्वासनामयत्वात् स्वप्न इति । अत एव स्वप्नस्वरूपत्वादेव । समष्टिव्यपदेश्यकोशत्रयरूपसूक्ष्मशरीरोपहितचैतन्यस्य सूत्रात्मकहिरण्यगर्भरूपतामुपदर्श्य व्यष्टिव्यपदेश्यकोशत्रयरूपसूक्ष्मशरीरोपहितचैतन्यस्य तैजसरूपत्वमावेदयति-एतद्व्यष्ट्युपहितमिति । तस्य तैजसपदव्यपदेश्यत्वे हेतुमाह-तेजोमयेति । अस्यापि तैजसस्यापि, अपिना यथा हिरण्यगर्भस्य समष्टिः सूक्ष्मशरीरं सूप्तः स्थूलप्रपञ्चलयस्थानं च तथेत्यर्थस्यावेदनम् । सूत्रात्मनो हिरण्यगर्भस्य तैजसस्य च मनोवृत्तिद्वारा सूक्ष्मविषयानुभावकत्वं दर्शयति-एताविति । मनोवृत्तिद्वारा तैजसस्य सूक्ष्मविषयानुभावकत्वे श्रुतिं प्रमाणयति-प्रविविक्तेति । यथा च विशुद्धसत्त्वप्रधानाऽज्ञानरूपसमष्टि-मलिनसत्त्वप्रधानाऽज्ञानरूपव्यष्ट्योस्तदुपहितचैतन्ययोश्चेश्वर-प्राऽज्ञयोरभेदो वनवृक्षाभेद-जलाशयजलाभेदवनवृक्षावच्छिन्नाकाशाभेद-जलाशयजलगतप्रतिबिम्बाकाशाभेददृष्टान्तेनोपपादितस्तथा प्रकृतव्यष्टि-समष्टिरूपयोः सूक्ष्मशरीरयोस्तदु-

समष्ट्योस्तदुपहितसूत्रात्म-तैजसयोर्वन-वृक्षवत् तदवच्छिन्नाकाशवच्च जलाशय-जलवत् तत्प्रतिबिम्बिताकाशवच्चाभेदः । एवं सूक्ष्मशरीरोत्पत्तिः, स्थूलभूतानि च पञ्चीकृतानि, पञ्चीकरणं तु-आकाशादिपञ्चकमेकैकं द्विधा विभज्य समं तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागान्तरेषु संयोजनम्,

---

पहितचैतन्ययोः सूत्रात्म-तैजसयोश्चाभेद उक्तदृष्टान्तबलादेवेत्याह–अत्रापीति । अपञ्चीकृतभूतेभ्यः सूक्ष्मशरीरोत्पत्तिं स्थूलभूतोत्पत्तिं चोपपादितां निगमयति–एवमिति । पञ्चीकृतानि स्थूलभूतानीति चोक्ते भवति जिज्ञासा कथं भूतानां पञ्चीकरणं ? तन्निवृत्तये पञ्चीकरणप्रकारमावेदयति–पञ्चीकरणं त्विति । 'द्विधा विभज्य समम्' इत्यत्र द्विधा समं विभज्येत्यन्वयः । आकाशादीनां तन्मात्राणां पञ्चानां द्विधा विभक्तत्वे दश भागा जायन्त इत्याशयेनाह– तेषु दशसु भागेष्विति– तेषु दशसु आकाशादीनामेके भागा न विभज्यन्ते, द्वितीयभागानां तु पञ्चानां प्रत्येकं समं चतुर्धा विभजनम्, एवं चाकाशादीनामविभक्तोऽखण्ड एको भागः, यश्च द्वितीयभागस्तस्य चतुर्धा विभजनात् प्रत्येकं चत्वारो भागाः, ते चाष्टमभागस्वरूपपर्यवसिता एव, तथा चाकाशस्याविभक्तार्द्धभागे वाय्वादीनां चतुर्णामष्टमभागानां सम्मेलने पञ्चीकृतं स्थूलमाकाशमुपजायते, वायोरविभक्तखण्डार्धभागे आकाशादीनां चतुर्णामष्टमभागानां सम्मेलने पञ्चीकृतः स्थूलवायुरुपजायते, एवं स्थूलतेजो-जल-पृथिवीनां समुत्पत्तिरवसेयेत्याशयः । स्वकीयाष्टमभागस्य स्वीयाखण्डार्धभागे न सम्मिश्रणमित्यावेदनायाह–स्वस्वद्वितीयभागपरित्यागेनेति ।

ननु "तेषामेकैकं त्रिवृत्तं त्रिवृत्तं करवाणि" इति श्रुतौ त्रिवृत्करणमेव श्रूयत इति पञ्चीकरणमप्रमाणकमेवेत्यत आह–त्रिवृत्क-

त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् नास्याप्रामाण्यम्, पञ्चानां पञ्चात्मकत्वे तुल्येऽपि स्वार्धभागेतराष्टमभागाभ्यां वैशिष्ट्यात् तद्व्यपदेश इत्याकाशादीनां नियतव्यपदेशव्यवस्था। तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्द-स्पर्शौ, अग्नौ शब्द-स्पर्श-रूपाणि, अप्सु शब्द-स्पर्श-रूप-रसाः, पृथिव्यां शब्द-स्पर्श-रूप-रस-गन्धाः, एतेभ्यः पञ्चीकृतेभ्यः चतुर्दशानां लोकानां तदन्तर्गतानां स्थूलशरीराणां चोत्पत्तिः। शरीराणि मनुष्य-पक्षि-यूका-वृक्षादीनां जरायुजा-ऽण्डज-स्वेदजोद्भिज्जाख्यानि। अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद् वा

रणश्रुतेरिति। अस्य पञ्चीकरणप्रतिपादकग्रन्थस्य। नन्वेवं पञ्चीकरणे आकाशादीनां पञ्चानामपि स्थूलभूतानां पञ्चतन्मात्रभागसमुत्थत्वाविशेषादेकस्याकाश इति व्यपदेशः, तदन्यस्य च कस्यचिद् वायुरिति व्यपदेशः, कस्यचित् तु तेज इति व्यपदेशः, एवं जलव्यपदेशः पृथिवीव्यपदेशश्चेति नियतव्यपदेशव्यवस्था निर्निबन्धना स्यादित्यत आह—पञ्चानामिति। 'अष्टभागाभ्याम्' इत्यत्र 'अष्टमभागाभ्याम्' इति पाठो युक्तः। तदानीं पञ्चीकरणतः स्थूलोत्पत्तिदशायाम्। आकाशे स्थूलाकाशे, आकाशे वाय्वाद्यष्टमभागानां सन्निविष्टत्वेऽपि आकाशाद् वायुः सम्भूत इति श्रूयते, न तु वाय्वादित आकाशसम्भूतिश्रुतिः, एवं वायोस्तेजः, तेजसो जलम्, जलात् पृथिवीत्येवं श्रूयते, न तु तेजसो वायुसम्भूतिश्रुतिरिति। कारणगुणाः कार्ये सजातीयगुणानारभन्त इति आकाशस्य स्थूलस्य स्थूलभूतवायुकारणत्वात् तद्गुणाच्छब्दाद् वायौ स्थूले शब्दस्य स्पर्शतन्मात्रार्धभागतो जायमानत्वात् स्पर्शगुणस्य चोद्भव इति वायौ शब्द-स्पर्शौ, एवमग्नौ शब्द-स्पर्श-रूपाणीत्यादिकं भावनीयम्। पञ्चीकृतेभ्यः पञ्चमहाभूतेभ्यश्चतुर्दशलोकोत्पत्तिस्तदन्तर्गतस्थूलशरीरोत्पत्तिश्चेत्याह—एतेभ्य इति।

समष्टिः, वृक्षवज्जलवद् वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं सर्वनराभिमानित्वाद् विविधं राजमानत्वाच्च वैश्वानर इति विराडिति चोच्यते । अस्यैषा स्थूलशरीरमन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाज्जागरश्च व्यपदिश्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरप्रविष्टत्वात् । अस्याप्येषा स्थूलशरीरमन्नविकारत्वादिहेतोरन्नमयकोशो जाग्रदि-

---

तदन्तर्गतानां चतुर्दशलोकान्तर्गतानाम् । जरायुजादिभेदेन स्थूलशरीरस्य चतुर्विधत्वं दर्शयति– शरीराणीति । स्थूलशरीरस्यापि समष्टि-व्यष्टिभेदेन द्वैविध्यं दर्शयति– अत्रापीति– स्थूलशरीरेऽपीत्यर्थः । चतुर्विधेति– अनन्तराभिहितजरायुजादिभेदेन चतुर्विधेत्यर्थः, एकबुद्धिविषयत्वेन समष्टित्वम्, अनेकबुद्धिविषयत्वेन व्यष्टित्वं बोध्यम् । स्थूलशरीरस्वरूपसमष्ट्युपहितचैतन्यस्य वैश्वानरपदव्यपदेश्यत्वं विराट्पदव्यपदेश्यत्वं च सहेतुकमुपदिशति– एतत्समष्ट्युपहितमिति– स्थूलशरीरात्मकसमष्ट्युपहितमित्यर्थः । विश्वनरसम्बन्धी वैश्वानर इति, अभिमानलक्षणश्चात्रसम्बन्धः, तेन 'सर्वनराभिमानित्वाद्' इति वैश्वानरव्यपदेशे हेतुः । 'विराड्' इत्यत्र विरुपसर्गो विविधार्थकः, राजत इति राट्, तेन 'विविधं राजमानत्वाद्' इति विराड्व्यपदेशे हेतुः । अस्य वैश्वानरव्यपदेश्यस्य विराड्व्यपदेश्यस्य च । एषा समष्टिः । अस्य शरीरस्यान्नमयकोशपदवाच्यत्वे 'अन्नविकारत्वाद्' इति हेतुः । स्पष्टवैषयिकसुख-दुःखानुभवलक्षण उपभोगः स्थूलशरीरे भवतीति स्थूलभोगायतनमेतच्छरीरम्, तत्त्वाच्च जागरव्यपदेश्यं तदित्याह– स्थूलभोगायतनत्वाज्जागरश्चेति । स्थूलशरीरलक्षणव्यष्ट्युपहितचैतन्यस्य विश्वपदव्यपदेश्यतेत्याह– एतद्व्यष्ट्युपहितमिति । तत्र हेतुः– सूक्ष्मेति । विश्वस्यापि व्यष्ट्यात्मकस्थूलशरीरमन्नमयकोशो जाग्रच्चेत्याह– अस्यापीति– विश्वस्यापीत्यर्थः । एषा व्यष्टिः, अन्नविकारत्वमन्नमयकोशत्वे हेतुः, आदि-

त्युच्यते। तदेतौ विश्व-वैश्वानरौ दिग्-वाता-ऽर्क वरुणा-ऽश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्द-स्पर्श-रूप-रस-गन्धान्, अग्नीन्द्रोपेन्द्र-यम-प्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद् वचना-ऽऽदान-गमन-विसर्गा-ऽऽनन्दान् चन्द्रा-ऽच्युत-चतुर्मुख-शङ्करैः क्रमान्नियन्त्रितेन मनो-बुद्ध्यहङ्कार-चित्ता-ख्येनाऽऽन्तरिन्द्रियचतुष्केण क्रमात् सङ्कल्प-निश्चया-ऽहङ्कार्य-चित्ताश्च

पदग्राह्यं स्थूलभोगायतनत्वं च जाग्रद्रूपत्वे हेतुः, अत्र यच्चैतन्यं समष्ट्यज्ञान-समष्टिसूक्ष्मशरीर-समष्टिस्थूलशरीरोपहितमीश्वर-सूत्रात्मवैश्वानरव्यपदेश्यं त्रिसङ्ख्यकं तद्व्यापकत्वादीश्वरकोटिः, यत् पुनर्व्यष्ट्यज्ञान-व्यष्टिसूक्ष्मशरीर व्यष्टिस्थूलशरीरोपहितं चैतन्यं प्राऽज्ञ-विश्वव्यपदेश्यं त्रिसङ्ख्यकं तद् अव्यापकत्वाज्जीवकोटिरिति। अत्र विश्व-वैश्वानरयोर्जाग्रदवस्थयोः शब्दादिविषयानुभावकत्व-वचनाद्यनुभावकत्व-स्थूलविषयानुभावकत्वान्युपसंहरन्नुपदर्शयति- तदेताविति- श्रोत्रेन्द्रियं दिग्दैवतम्, दिगाख्यदेवतानियन्त्रितेन श्रोत्रेन्द्रियेण विश्व-वैश्वानरौ शब्दमनुभवतः, त्वगिन्द्रियं वायुदैवतम्, तेन वायुनियन्त्रितेन त्वगिन्द्रियेण विश्वा-वैश्वानरौ स्पर्शमनुभवतः, चक्षुरिन्द्रियं सूर्यदैवतम्, तेन सूर्यनियन्त्रितेन नयनेन्द्रियेण विश्व-वैश्वानरौ रूपमनुभवतः, रसनेन्द्रियं वरुणदैवतम्, तेन वरुणनियन्त्रितेन रसनेन्द्रियेण विश्व-वैश्वानरौ रसमनुभवतः, घ्राणेन्द्रियमश्विनीकुमारदैवतम्, तेन तन्नियन्त्रितेन घ्राणेन्द्रियेण विश्व-वैश्वानरौ गन्धमनुभवतः, एवं वागिन्द्रियमग्निदैवतम्, तेनाग्निनियन्त्रितेन वागाख्याकर्मेन्द्रियेण वचनं विश्व-वैश्वानरावनुभवतः, पाणीन्द्रियमिन्द्रदैवतम्, तेनेन्द्रनियन्त्रितेन पाणीन्द्रियेणादानं विश्व-वैश्वानरावनुभवतः, पादाख्यकर्मेन्द्रियमुपेन्द्रदैवतम्, तेनोपेन्द्रनियन्त्रितेन पादेन्द्रियेण विश्व-वैश्वानरौ गमनमनुभवतः, पायिन्द्रियं यमदैवतम्, तेन यमनियन्त्रितेन पायिन्द्रि-

स्थूलविषयाननुभवतः, "जागरितस्थानो बहिः प्राज्ञः"
[माण्डूक्योपनिषद्, ३] इत्यादिश्रुतेः।

अत्राप्यनयोः स्थूलव्यष्टि-समष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वन-वृक्षवत् तदवच्छिन्नाकाशाकाशवच्च जलाशय-जलवत् तद्गतप्रतिबिम्बाऽऽकाशाकाशवच्च पूर्ववदभेदः। एवं पञ्चीकृतेभ्यो भूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः।

एषां स्थूल-सूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भवति, यथा-अवान्तरवनानामपि समष्टिरेकं महद् वनम्, यथा वा-अवान्तरजलाशयानामेको महान् जलाशयः समष्टिः। एतदु-

न्द्रियेण विश्व-वैश्वानरौ विसर्गमनुभवतः, उपस्थेन्द्रियं प्रजापतिदैवतम्, तेन प्रजापतिनियन्त्रितेनोपस्थेन्द्रियेण विश्व-वैश्वानरावानन्दमनुभवतः, मनोरूपान्तःकरणं चन्द्रदैवतम्, तेन चन्द्रनियन्त्रितेन मनोरूपान्तःकरणेन सङ्कल्पं तावनुभवतः; बुद्धिरूपान्तःकरणमच्युतदैवतम्, तेनाच्युतनियन्त्रितेन बुद्धिरूपान्तःकरणेन निश्चयं तावनुभवतः; अहङ्कारेन्द्रियं चतुर्मुखदैवतम्, तेन चतुर्मुखनियन्त्रितेनाहङ्कारेणाहङ्कार्यं तावनुभवतः; चित्ताख्यमिन्द्रियं शङ्करदैवतम्, तेन शङ्करनियन्त्रितेन चित्तेन्द्रियेण चैत्यान् तावनुभवत इत्यर्थः। उक्तार्थं श्रुतिं प्रमाणयति- जागरितेति- प्राज्ञो जागरितस्थानो विश्वरूपो बहिः स्थूलविषयान् अनुभवतीत्यर्थः। यथा पूर्वं व्यष्टि-समष्टिरूपोपाध्योस्तदुपहितचैतन्ययोश्चाऽभेदो यथा भूतदृष्टान्तावष्टम्भेनोपपादितस्तथा प्रकृतेऽपि व्यष्टि-समष्ट्योस्तदुपहितचैतन्ययोर्विश्व-वैश्वानरयोस्तद्दृष्टान्तेनाभेदो ज्ञेय इत्याह- अत्रापीति- स्थूलशरीरेऽपीत्यर्थः। तदुपहितयोः स्थूलव्यष्टि-समष्टिरूपशरीरोपहितयोः, उपसंहरति- एवमिति। महद् वनमिव महान् प्रपञ्चोऽपि समष्टिरूपोऽवसेय इत्याह- एषामिति। यथेत्यादिना दृष्टान्तप्ररूपणा स्पष्टैव। एतदुपहितं महाप्रपञ्चा-

पहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयप्रतिबिम्बाकाशवच्चैकमेव। अयमर्थाध्यारोपः। एवं प्रत्यगात्मनि चार्वाकाद्यभिमतः स्थूलशरीराद्यध्यारोपोऽपि द्रष्टव्यः।

अथाऽपवादो नाम रज्जुविवर्तसर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्यावस्तुनोऽज्ञदेःना प्रपञ्चस्य वस्तुमात्रत्वम्, तथाहि– भोगायतनचतुर्विधशरीरभोग्यरूपान्नादि–तदाश्रयचतुर्दशभुवन-तदाश्रयब्रह्माण्डादि सर्वं कारणीभूतपञ्चीकृतभूतमात्रं भवति, शब्दादिविषयसहितानि पञ्चीकृतभूतजातानि सूक्ष्मशरीरजातं चेत्येतत् सर्वं

त्मकसमष्ट्युपहितम्। अयमर्थाध्यारोप इति– समष्टि-व्यष्टीनां तदुपहितचैतन्यानां स्थूलसूक्ष्मकारणप्रपञ्चमहाप्रपञ्चयोस्तदुपहितचैतन्यस्य च योऽयमभेदारोपो दर्शितः सोऽर्थाध्यारोप इत्यर्थः। चार्वाको हि स्थूलशरीरादिकमेवात्मनमभिमन्यते, सोऽपि शरीराद्यभिन्नतयाऽऽत्मज्ञानमर्थाध्यारोप इत्याह– एवमिति।

अध्यारोपा-ऽपवादाभ्यां 'तत्-त्वं'पदार्थशोधनं भवति, तत्रैतावताऽध्यारोपो भावितः, अथाऽपवादस्वरूपं भावयति– अथाऽपवादो नामेति। वस्तुविवर्तस्येति– त्रिकालाबाध्यत्वेन पारमार्थिकसद्रूपं ब्रह्मैव वस्तु, तद्विवर्तस्येत्यर्थः। कारणसमसत्ताकं कार्यं परिणामः, यथा– अविद्याया व्यावहारिकसद्रूपाया व्यावहारिकसद्रूपं जगत्कार्यं परिणामः, कारणविषमसत्ताकं कार्यं विवर्तः, यथा-ब्रह्मरूपनिमित्तकारणस्य सत्ता पारमार्थिकी, तन्न्यून[illegible]रेकसत्ताकं जगल्लक्षणकार्यं तस्य विवर्त इति, स्थूलरूपस्य लये सूक्ष्मावस्थानम्, तस्यापि क्रमशो लये परब्रह्मण एवावस्थानम्, परब्रह्मैवाज्ञानरूपशक्तिबलात् सूक्ष्मस्थूलात्मकजगद्रूपेणाऽवभासत इत्यज्ञानात्मकशक्तिविलये तत्कार्यस्य सर्वस्यापि विलयतः शुद्धं ब्रह्मावतिष्ठत इत्यतः सर्वस्याप्यवस्तुनो वस्तुमात्रत्वमिति भावयति– तथाहीत्यादिना– कार्य-

कारणरूपाऽपञ्चीकृतभूतमात्रं भवति, एतानि सत्त्वादिगुणसहितानि अपञ्चीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताऽज्ञानोपहितचैतन्यमात्रं भवति, एतदज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यतुरीयब्रह्मसमापन्नं भवति। आभ्यामध्यारोपाऽपवादाभ्यां 'तत् त्वं' पदार्थावपि शोधितौ स्तः, अज्ञानादिसमष्टि-तदुपहितसर्वज्ञत्वादिविशिष्टचैतन्य-तदनुपहितचैतन्यलक्षणत्रयस्य तप्तायःपिण्डवदेकत्वेनावभासमानस्य 'तत्'पदवाच्यार्थत्वात्, अज्ञानादिव्यष्टि-तदुपहिताऽसर्वज्ञत्वादिविशिष्टचैतन्य-तदनुपहितचैतन्यलक्षणत्रयस्य च

कारणयोस्तादात्म्यात् कार्यस्य सत्ता कारणसत्तैवेति यद् यस्य कार्यं तत् तन्मात्रमेवेति भोगायतनादि ब्रह्माण्डादि सर्वं पञ्चीकृतभूतकार्यमिति पञ्चीकृतभूतमात्रं तत्, एवं शब्दादिविषयसहितपञ्चीकृतभूतजात-सूक्ष्मशरीरजातादिकमपञ्चीकृतभूतकार्यमिति तत् सर्वमपञ्चीकृतभूतमात्रम्, सत्त्वादिगुणसहितान्यपञ्चीकृतभूतान्यप्यज्ञानोपहितचैतन्यकार्यत्वादज्ञानोपहितचैतन्यमात्रम्, एतदपि तुरीयचैतन्यात्मकाधारभूतब्रह्माभिन्नमेवेति सर्वस्यावस्तुनो वस्तुभूतब्रह्ममात्रत्वमिति। 'तत् त्वं' पदार्थशोधनमध्यारोपा-ऽपवादकार्यमुपदर्शयति-आभ्यामिति। 'तत् त्वं' पदशक्य-लक्ष्यार्थनिष्टङ्कनमेव 'तत् त्वं' पदार्थशोधनमिति-तदुपदर्शयति- अज्ञानादीति। तदुपहितेति- अज्ञानाद्युपहितेत्यर्थः। तदनुपहितेति- अज्ञानाद्यनुपहितेत्यर्थः। समष्टिरूपाऽज्ञानोपहितचैतन्यस्वरूपेश्वर-समष्टिरूपसूक्ष्मशरीररोपहितचैतन्यस्वरूपसूत्रात्महिरण्यगर्भ-समष्टिरूपस्थूलशरीरोपहितचैतन्यस्वरूपवैश्वानराणां त्रित्वात् तदभिन्नानुपहितचैतन्यस्यापि त्रित्वमित्यभिसन्धाय चैतन्यलक्षणत्रयस्येत्युक्तम्। तप्तायःपिण्डेऽग्निना सहायःपिण्डस्यैकत्वेनावसाय इति तप्तायःपिण्डवदिति दृष्टान्तसङ्गतिः। तदुपहितेति- अज्ञानादिव्यष्ट्युपहितेत्यर्थः। तदनुपहितेति- अज्ञानादिव्यष्ट्यनुपहितेत्यर्थः, अत्रापि 'चैतन्य-

प्राग्वदेकीभूतस्य 'त्वं'पदवाच्यार्थत्वात्, एतदुपहिताधारानुपहित-प्रत्यगानन्दतुरीयचैतन्यस्य च 'तत्-त्वं' पदलक्ष्यार्थत्वात् ॥

अत्र 'तत् त्वमसि' इति वाक्यं सम्बन्धत्रयेणाऽखण्डार्थं बोधयति। सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यम्, पदार्थयोर्विशेषण-विशेष्यभावः, प्रत्यगाऽऽत्मलक्षणयोर्लक्ष्य-लक्षणभावश्चेति। तदुक्तम्—

लक्षणत्रयस्य' इत्युक्तिः व्यष्टिस्वरूपाज्ञानोपहितचैतन्यस्वरूपप्राऽज्ञ-व्यष्टिरूपसूक्ष्मशरीरोपहितचैतन्यरूपतैजस-व्यष्टिरूपस्थूलशरीरोप-हितचैतन्यरूपविश्वानां त्रित्वात् तदभिन्नाज्ञानादिव्यष्ट्यनुपहितचैत-न्यस्यापि त्रित्वमित्यभिसन्धानेन। उपहिता-ऽनुपहितयोरेकत्वं 'वन-वृक्षावच्छिन्नाकाशा-ऽऽकाशवद्' इत्यादिदृष्टान्तावष्टम्भेन प्रागुपपा-दितमेव, तत्स्मरणार्थमाह- प्राग्वदिति। 'तत्'पदवाच्यस्येश्वरादि-त्रिकस्य 'त्वं'पदवाच्यस्य प्राज्ञादित्रिकस्य चाभेदाऽसम्भवाद् वाच्या-र्थोपपत्तिर्न सम्भवतीति 'तत् त्वं' पदलक्ष्यार्थमावेदयति- एतदुपहितेति- उपहितरूपं यदेतत् त्रिकद्वयं तदाधारभूतं यदनुपहितं प्रत्यगानन्द-तुरीयचैतन्यं तस्य 'तत् त्वं' पदलक्ष्यार्थत्वादित्यर्थः।

अत्र वेदान्तमते सम्बन्धत्रयमुपदर्शयति-सम्बधत्रयं नामेति 'प्रत्य-गात्मलक्षणयोः' इति स्थाने 'पदार्थप्रत्यगात्मलक्षणयोः' इति पाठः समुचितः। अखण्डार्थबोधोपपादकोक्तसम्बन्धत्रये प्राचां सम्मति-मुपदर्शयति-तदुक्तमिति। पदद्वयस्यैकार्थे तात्पर्यलक्षणसम्बन्धः सामा-नाधिकारण्यम्, तद् दृष्टान्तावष्टम्भेन प्रकृतवाक्ये दर्शयति-सामा-नाधिकारण्यसम्बन्धस्तावद् यथेत्यादिना। पिण्डे देवदत्तव्यक्तिस्वरूपे। एकस्मिन्नर्थे शुद्धचैतन्यस्वरूपे विशेष्यमन्यतो व्यावर्त्यम्, विशेषणमन्यस्माद् व्यावर्तकमित्येवं व्यावर्त्यव्यावर्तकभावो विशेष्य-विशेषणभावः, स च दृष्टान्तावष्टम्भेन प्रकृते परस्परमुदर्शयति विशेषण-विशेष्यभावस्त्वित्यादिना। तत्र वाक्ये 'सोऽयं देवदत्तः' इति वाक्ये। अत्रापि वाक्ये 'तत्त्वमसि'

"सामानाधिकरण्यं च, विशेषण-विशेष्यता ।
लक्ष्य-लक्षणसम्बन्धः, पदार्थ-प्रत्यगात्मनाम्" ॥१॥ इति ।

तत्र सामानाधिकरण्यसम्बन्धस्तावद् यथा 'सोऽयं देवदत्तः' इति वाक्ये तत्कालविशिष्टदेवदत्तवाचक'स'शब्दस्यैतत्कालविशिष्ट-वाचका'ऽयं'शब्दस्य चैकस्मिन् पिण्डे तात्पर्यसम्बन्धः, तथा 'तत् त्वमसि' इति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचक' तत् 'पदस्या-परोक्षत्वादिविशिष्टचैतन्यवाचक' त्वं 'पदस्य चैकस्मिन्नर्थे तात्पर्य-सम्बन्धः । विशेषण-विशेष्यभावस्तु यथा तत्र वाक्ये 'स'शब्दार्थ-तत्कालविशिष्टदेवदत्तस्या' ऽयं 'पदार्थैतत्कालविशिष्टदेवदत्तस्य चा-न्योऽन्यभेदव्यावर्तकतया, तथाऽत्राऽपि वाक्ये 'तत् 'पदार्थपरोक्ष-त्वादिविशिष्टचैतन्यस्य 'त्वं 'पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योऽन्यभेदव्यावर्तकतया द्रष्टव्यः । लक्ष्य-लक्षणसम्बन्धस्तु यथा तत्र 'स' शब्दा'ऽयं'शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्ट-

---

इति वाक्येऽपि । द्रष्टव्य इति– विशेषण-विशेष्यभावो द्रष्टव्य इति सम्बन्धः। लक्ष्य-लक्षणसम्बन्धं भावयति- लक्ष्य-लक्षणसम्बन्धस्त्विति । तत्र 'सोऽयं देवदत्तः' इति वाक्ये । शुद्धदेवदत्तस्वरूपं लक्ष्यम्, तात्पर्यवृत्त्या तज्ज्ञापकत्वात् तत्कालवैशिष्ट्यैतत्कालवैशिष्ट्यपरित्यागेन केवलदेव-दत्तस्वरूपावबोधकत्वात् 'तत्' पदम् 'इदम्' च लक्षणमिति तयो-र्लक्ष्य-लक्षणभावसम्बन्ध इत्यभिप्रायेण 'सशब्दा-ऽयंशब्दयोः' इत्युक्तम् । तच्छब्दार्थस्तत्कालवृत्तित्वविशिष्टः, इदंशब्दार्थ एतत्कालवृत्तित्व-विशिष्टः, तदुभयत्र विशेष्यदेवदत्तस्वरूपमेकमेव, तदेव च लक्ष्यम्, तस्य चाभिन्नमेव विशेषणांशपरित्यागतस्तदुभयमित्यभेदेन तज्ज्ञाप-कत्वाल्लक्षणं भवतीति तदर्थयोस्तेन सह लक्ष्य-लक्षणभावसम्बन्ध

त्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्य-लक्षणभावः, तथाऽत्राऽपि 'तत् तत्त्वं'पदयोस्तदर्थयोर्वा परोक्षत्वाऽपरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्य-लक्षणभावः, इयमेव भागलक्षणेत्युच्यते। अस्मिन् वाक्ये 'नीलमुत्पलम्' इति वाक्य इव वाक्यार्थो न सङ्गच्छते, तत्र गुण-द्रव्यवाचिनोर्नीलोत्पलपदयोः शुक्ल-पटादिव्यावर्तकतयाऽन्यो-

---

इत्याह- तदर्थयोर्वेति-तदिंदंपदार्थयोर्वेत्यर्थः। अत्रापि 'तत् त्वमसि' इति वाक्येऽपि। स्ववाच्यस्य विशिष्टरूपार्थस्य विशेषणं परित्यज्य विशेष्ये विशेष्यं परित्यज्य विशेषणे वा या लक्षणा सा भागलक्षणेति गीयते, प्रकृतेऽपि परोक्षत्वाऽपरोक्षत्वादिविशेषणं परित्यज्य शुद्धचैतन्यस्वरूपे लक्षणेति भागलक्षणैवेयमित्याह- इयमेवेति। तथा च वेदान्तनये लक्षणा त्रिविधा-जहत्स्वार्था अजहत्स्वार्था जहदजहत्स्वार्था चेति, तत्र 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य तीरे लक्षणा जहत्स्वार्था, 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकपदस्य दध्युपघातके लक्षणा अजहत्स्वार्था, 'सोऽयं देवदत्तः' इत्यत्र 'तत् त्वमसि' इत्यादौ च विशेषणं परित्यज्य विशेष्ये लक्षणा जहदजहत्स्वार्थेति। 'तत् त्वमसि' इत्यादौ भागलक्षणाया आवश्यकत्वं दर्शयति- अस्मिन् वाक्य इति- 'तत् त्वमसि' इति वाक्ये इत्यर्थः। 'नीलमुत्पलम्' इति वाक्ये वाक्यार्थो घटते, 'तत् त्वमसि' इति वाक्ये वाक्यार्थो न घटते इत्येवं 'नीलमुत्पलम्' इति। वाक्य इवेतिव्यतिरेकिदृष्टान्तोऽयम्, एतदेव भावयति- तत्रेति-नीलमुत्पलमिति वाक्य इत्यर्थः। उत्पलमपि शुक्लमपि सम्भाव्येतेत्यतस्तद्व्यावर्तकं नीलमिति, नीलः पटोऽपि भवतीति तद्व्यावर्तकमुत्पलमित्याशयेनाह- शुक्ल-पटादिव्यावर्तकतयेति। यदा शुक्लादित उत्पलस्य व्यावर्तकत्वान्नीलमुत्पलस्य विशेषणं तदानीमुत्पलं विशेष्यम्, यदा पटादितो नीलस्य व्यावर्तकत्वादुत्पलं नीलस्य विशेषणं तदानीं नीलं विशेष्यमित्येवमन्योऽन्यविशेषण-विशेष्यभाव-

ऽन्यविशेषण-विशेष्यभावसंसर्गस्यान्यतरविशिष्टान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वोपपत्तावप्यत्र तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्य-त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्ययोरन्योऽन्यव्यावर्तकतया विशे-षणविशेष्यभावसंसर्गस्य विशिष्टैक्यस्य वा प्रत्यक्षादिप्रमाणविरोधेन वाक्यार्थत्वानुपपत्तेः, तदिह लक्षणाऽऽवश्यकी, सा च 'गङ्गायां घोषः' इत्यत्रेव न जहती, तत्र गङ्गा-घोषयोराधारा-ऽऽधेयभावानुपपत्त्या वाक्यार्थबाधात् तं परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वेऽप्यत्र परोक्षाऽपरोक्षचैतन्यैकत्वस्य वाक्यार्थस्य भागमात्रे विरोधादविरुद्ध-भागपरित्यागेनान्यलक्षणाया अयुक्तत्वात्। न च गङ्गापदं स्वार्थ-

---

संसर्गस्य वाक्यार्थत्वोपपत्तिः, तथा तादात्म्यसम्बधेन नीलविशिष्ट-मुत्पलं भवति, उत्पलविशिष्टं च नीलं भवतीति नीलविशिष्टोत्प-लस्योत्पलविशिष्टनीलस्येत्येवमन्यतरविशिष्टान्यतरस्य वाक्यार्थ-त्वोपपत्तिः, एवं नीलोत्पलयोस्तादात्म्यलक्षणस्यैक्यस्यास्त्येव सम्भव इति तदैक्यस्य वाक्यार्थत्वं सङ्गच्छतेतरामिति सुष्ठूक्तम्- वाक्यार्थ-त्वोपपत्तावपि' इति। प्रकृते उक्तदिशा वाक्यार्थत्वोपपत्तिर्न सम्भवतीत्याह- अत्रेति 'तत् त्वमसि' इति वक्य इत्यर्थः। विशिष्टैक्यस्येति- परोक्षत्वादि-विशिष्टचैतन्या-ऽपरोक्षत्वादिविशिष्टचैतन्ययोरैक्यस्येत्यर्थः। उपसंह-रति-तदिति। इह 'तत् त्वमसि' इति वाक्ये। लक्षणाया आवश्यकत्वेऽपि न तस्या जहल्लक्षणात्वमित्याह- सेति- लक्षणेत्यर्थः, तत्र 'गङ्गायां घोषः' इत्यत्रा तं गङ्गाप्रवाहरूपार्थम्। तत्सम्बन्धीति-गङ्गासम्बन्धीत्यर्थः। अत्र 'तत् त्वमसि' इत्यत्र। भागमात्रे परोक्षत्वापरोक्षत्वांशे। अविरुद्ध-भागपरित्यागेन चैतन्यमात्रस्योभयत्राऽविरुद्धस्य भागस्य परित्यागेन। अन्यलक्षणायाः चैतन्यव्यतिरिक्तयत्किञ्चित्पदार्थे लक्षणायाः। अयुक्तत्वात् चैतन्यरूपस्य केवलस्य वाक्यार्थत्वं यदि नोपपद्येत तदा तदन्यस्मिन् लक्षणा युक्ता स्यात्, चैतन्यरूपाबाधितार्थमादाय वाक्यार्थोपपत्तौ

परित्यागेन तीरपदार्थमिव प्रकृते तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयतीति कुतो न जहल्लक्षणेति वाच्यम्, तत्र तीरपदाऽश्रवणेन तदर्थाऽप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि प्रकृते 'तत् त्वं' पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाऽभावात्। नाऽपि 'शोणो धावति' इतिवदजहल्लक्षणाऽप्यत्र सम्भवति, तत्र शोणगुणगमनलक्षणस्य

च तस्या अयुक्तत्वात् 'न च' इत्यस्य 'वाच्यम्' इत्यनेनान्वयः। प्रकृते 'तत् त्वमसि' इति वाक्ये, तत्पदं स्वार्थपरित्यागेन त्वंपदार्थं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं वा लक्षयतीत्यन्वयः, एवमुपगमेऽपि य एव तत्पदार्थः स एव त्वंपदार्थ इति तस्य वाक्यार्थत्वं सम्भवतीति भागलक्षणा न सम्भवतीति शङ्कितुरभिप्रायः, निषेधे हेतुमाह–तत्रेति–'गङ्गायां घोषः' इति वाक्य इत्यर्थः। 'गङ्गातीरे घोषः' इत्येवं वाक्यं यदि स्यात् तदा शक्त्यैव तीररूपार्थप्रतीतिसम्भवान्न लक्षणाश्रयणप्रयोजनं किञ्चित्, घोषान्वयार्थोपपत्तये तीरप्रतीत्यपेक्षा, घोषान्वयार्थोपपत्तिश्च शक्त्या तीरोपस्थितित एव, यदा तु 'गङ्गायां घोषः' इत्येव वाक्यं श्रूयते न तत्र तीरशक्तितीरपदश्रवणम्, न च गङ्गायां घोषान्वयसम्भवः किन्तु गङ्गातीरे घोषान्वय इति तदर्थं तीरप्रतीतेरपेक्षायां सा जहल्लक्षणां विना न सम्भवतीति लक्षणया तत्प्रतीत्यपेक्षायामपीत्यर्थः। प्रकृते 'तत् त्वमसि' इति वाक्ये। तदर्थप्रतीतौ शक्त्यैव तत्पदात् तत्पदार्थस्य त्वंपदात् त्वंपदार्थस्य प्रतीतौ सत्याम्। अन्यतरपदेनेति– त्वंपदेन तत्पदार्थप्रतीत्यपेक्षायास्तत्पदेन त्वंपदार्थप्रतीत्यपेक्षायाश्चाभावादित्यर्थः। 'तत् त्वमसि' इत्यत्र जहल्लक्षणामपाकृत्याऽजहल्लक्षणां निरस्यति– नापीति– 'सम्भवति' इत्यनेनान्वयः। अत्र 'तत् त्वमसि' इति वाक्ये। तत्र 'शोणो धावति' इति वाक्ये। विरुद्धत्वात् गमनादिक्रिया द्रव्याश्रितैव न गुणाश्रितेति सिद्धान्तात्

वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तदाश्रयाश्वादिलक्षणया विरोधपरिहारसम्भवेऽप्यत्र परोक्षत्वा-परोक्षत्वविशिष्टचैतन्यैकत्वस्य विरुद्धत्वात् तदपरित्यागेन तत्सम्बन्धियत्किञ्चिदर्थलक्षणायामपि विरोधापरिहारात्। न च तत्पदं त्वंपदं वा स्ववाच्यार्थविरुद्धांशं परित्यज्यांऽशान्तरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयतु, कुतः शोणगुणे गमनस्याऽभावात्। तदपरित्यागेन शोणलक्षणशक्यार्थाऽपरित्यागेन। तदाश्रयेति शोणगुणाश्रयेत्यर्थः। शोणपदस्य शोणगुणविशिष्टाश्वे लक्षणायां ततः शोणगुणविशिष्टाश्वरूपार्थप्रतीतौ शोणगुणवानश्वो धावतीत्येवंरूपवाक्यार्थबोधस्य सम्भवेन विरोधः परिहृतो भवतीत्याह–विरोधपरिहारसम्भवेऽपीति। अत्र 'तत् त्वमसि' इति वाक्ये। तदपरित्यागेन परोक्षत्वविशिष्टचैतन्यरूपतत्पदशक्यार्थस्य अपरोक्षत्वविशिष्टचैतन्यरूपत्वंपदशक्यार्थस्य चाऽपरित्यागेन। यदा च 'तत्-त्व' पदशक्यार्थैकत्वं न सम्भवति तदा तत्पदार्थसम्बन्धि-त्वंपदार्थसम्बन्धिनोरप्येकत्वं न सम्भवत्येवेति तथाभूतार्थलक्षणायामपि वाक्यार्थो बाधित एवेति न तत्राजहल्लक्षणया विरोधः परिहृतो भवतीत्याह–विरोधाऽपरिहारादिति। 'न च' इत्यस्य 'वाच्यम्' इत्यनेन योगः। तत्पदार्थं त्वंपदार्थं वा' इति स्थाने 'त्वंपदार्थं तत्पदार्थं वा' इत्येवं क्रमो युक्तः, तथा च तत्पदं स्ववाच्यो यः परोक्षत्वादिविशिष्टचैतन्यरूपोऽर्थस्तत्र यो विरुद्धोंऽशः परोक्षत्वादिवैशिष्ट्यलक्षणस्तं परित्यज्यांशान्तरं यच्चैतन्यं तत्सहितं त्वंपदार्थमपरोक्षत्वादिविशिष्टचैतन्यं लक्षयतु, वा अथवा, त्वंपदं स्ववाच्योऽर्थोऽपरोक्षत्वादिविशिष्टचैतन्यरूपस्तत्र यो विरुद्धोंऽशोऽपरोक्षत्वादिवैशिष्ट्यलक्षणस्तं परित्यज्यांशान्तरं यच्चैतन्यं तत्सहितं तत्पदार्थं परोक्षत्वादिविशिष्टचैतन्यं लक्षयतु, एवं च तत्पदस्य चैतन्यविशिष्टापरोक्षत्वादिविशिष्टचैतन्ये लक्षणा, त्वंपदस्य चैतन्यविशिष्टपरोक्षत्वादिविशिष्टचैतन्ये वा लक्षणा, एतावतैव निर्वाहे न भागलक्षणारूपलक्षणाप्रकारान्तराभ्युपगमप्रयोजनमिति शङ्कार्थः।

प्रकारान्तरेण भागलक्षणाङ्गीकारः ? इति वाच्यम्, एकेन पदेन स्वार्थान्तरोभयलक्षणाया असम्भवात्, पदान्तरेण तदर्थप्रतीतेर्लक्षणया पुनः प्रतीत्यपेक्षाया अभावाच्च । तस्माद् यथा 'सोऽयं देवदत्तः' इति तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याऽविरुद्धदेवदत्तांशमात्रं लक्षयति, तथा 'तत् त्वमसि' इति वाक्यं तदर्थो वा परोक्षत्वाऽपरोक्षत्वविशिष्टचैतन्यैक्यलक्षणस्य वाक्यार्थस्यांशे विरुद्धत्वाद् विरुद्धं परोक्षत्वाऽपरोक्षत्वांशं परित्यज्याऽविरुद्धं चिदंशमात्रं लक्षयतीत्यभ्युपेयम् । एवं 'तत् त्वमसि' इति वाक्यार्थे बोधिते 'अहं ब्रह्माऽस्मि' [तेजोबिन्दूपनिषद्, ३, २६] इति वाक्यादधिकारिणः 'अहं नित्यशुद्ध-बुद्ध मुक्त-सत्य-स्वभावपरमानन्दा-ऽद्वयं ब्रह्माऽस्मि' इत्यखण्डा-

---

प्रतिक्षेपहेतुमुपन्यस्यति– एकेनेति । 'स्वार्थान्तरोभय' इति स्थाने 'स्वार्थाऽर्थान्तरोभय' इति पाठो युक्त, तत्पदस्य स्वार्थैकभागत्वाच्चैतन्यं स्वार्थः, अर्थान्तरमपरोक्षत्वादिविशिष्टचैतन्यम्, एवं त्वंपदस्य स्वार्थैकभागत्वाच्चैतन्यं स्वार्थः, परोक्षत्वादिविशिष्टचैतन्यमर्थान्तरम्, एतदुभयलक्षणाया असम्भवादित्यर्थः । पदान्तरेणेति– तत्पदस्य लक्षणा चैतन्यसहिताऽपरोक्षत्वादिविशिष्टचैतन्ये स्वीक्रियतेऽपरोक्षत्वादिविशिष्टचैतन्यप्रतिपत्त्यर्थमेव,पदान्तरेण त्वंपदेनाऽपरोक्षत्वादिविशिष्टचैतन्यप्रतीतेश्च पुनरपरोक्षत्वादिविशिष्टचैतन्यप्रतीत्यपेक्षाया अभावान्निष्प्रयोजनत्वात् सा नाभ्युपेयेति भावः । भागलक्षणां स्वाभिप्रेतां दृष्टान्तावष्टम्भेनोपसंहरति– तस्मादिति । 'सोऽयं देवदत्त इति' इत्यत्र 'इति' पदं वाक्यस्वरूपपरम्, तस्य 'लक्षयति' इत्यनेनान्वयः, 'तदर्थो वा' इत्यस्यापि 'लक्षयति' इत्यनेनान्वयः, अन्यत् स्पष्टम् । 'तत् त्वमसि' इति महावाक्यार्थबोधदिशा 'अहं ब्रह्माऽस्मि' इति-

काराकारिता चित्तवृत्तिरुदेति, सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते, तदा

महावाक्यार्थबोधोऽवसातव्यः, तत्र 'तत् त्वमसि' इति वाक्यतः शुद्धचैतन्यरूपतयाऽवगतस्य स्वात्मनः 'अहं ब्रह्माऽस्मि' इति वाक्यतो यथा चित्तवृत्तिरुदेति तथोपदर्शयति- एवमिति। 'अहं ब्रह्माऽस्मीति वाक्याद्' इत्यस्य 'चित्तवृत्तिरुदेति' इत्यनेनान्वयः। न सर्वस्य ततोऽखण्डाकारचित्तवृत्तेरुदयः, किन्तु शम-दम-तितिक्षोपरम-समाधान-श्रद्धादिगुणसम्पन्नस्यैव कस्यचिदित्याह- अधिकारिण इति। नित्येति- नित्यत्वं कालपरिच्छेदराहित्यम्, शुद्धत्वं निर्लेपत्वं विशेषण-विशेष्यभावादिरहितत्वं वा; बुद्धत्वं चैतन्यस्वरूपत्वम्, मुक्तत्वं सत्त्वादि-त्रिगुणमायाबन्धरहितत्वम्, सत्यत्वं त्रिकालाबाध्यत्वम्, स्वभाव-परमानन्दत्वं विषयादिनिमित्तानपेक्षानन्दस्वरूपत्वम्, अद्वयत्वं सजातीय-विजातीयद्वितीयमात्ररहितत्वम्, निरुक्तधर्माणां सर्वेषामप्याधारभूतब्रह्माभिन्नत्वमेवेति तदास्पदस्य ब्रह्मणो न सद्वितीयत्वम्, एवम्भूतं यद् ब्रह्म सर्वव्यापकं तदहमस्मीत्येवमखण्डाकारैकस्वभावा चित्तवृत्तिः 'अहं ब्रह्मास्मि' इति वाक्यादधिकारिणः पुरुषस्योद्भवतीत्यर्थः। सा तु निरुक्ताखण्डाकारा चित्तवृत्तिः, निर्मलसत्त्वप्रधानायां तस्यां निर्मलदर्पणे यथा मुखं प्रतिबिम्बते तथा चैतन्यं प्रतिबिम्बत इति चित्प्रतिबिम्बसहिता सती, शरीरादितः प्रतीपमञ्चतीति प्रत्यग् आत्मा, तदभिन्नं यद् अज्ञातमज्ञानविषयीभूतं परब्रह्म शुद्धचैतन्यम्, तद् विषयीकृत्य, तद्गताज्ञानमेव शुद्धचैतन्यगताज्ञानमेव, बाधते निवर्तयति, ब्रह्मविषयकस्य ब्रह्मगतस्य चाऽविद्यालक्षणाऽज्ञानस्य ब्रह्मविषयक-विद्यारूपयोक्ताखण्डाकारचित्प्रतिबिम्बोपेतवृत्त्यैव निवर्तनं युक्तमित्यर्थः। भवतूक्तवृत्त्या ब्रह्मगताऽज्ञाननिवृत्तिः, ब्रह्मगताज्ञानजनितं च जगद्रूपं ब्रह्मणि पूर्ववदनुवर्ततेवेत्यत आह- तदेति- ब्रह्मगताज्ञानबाध-काल इत्यर्थः। उपादानकारणनिवृत्तावुपादेयं निवर्तत एव, यथा

पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते तत्कार्यस्याखिलस्य बाधितत्वात् तदन्तर्भूताऽखण्डाकारकारिता चित्तवृत्तिरपि बाधिता भवति। तत्प्रतिबिम्बितं चैतन्यमप्यादित्यप्रभया तदवभासनासमर्थदीपप्रभावत् स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद् दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नं परब्रह्ममात्रं भवति, एवं सति "मनसैवानुद्रष्टव्यम्०" [बृहदारण्यकोपनिषद् ४, ४, १९]

पटोपादानकारणीभूततन्तुदाहे पटस्य तदुपादेयस्य दाहो भवत्येव, तथाऽखिलप्रपञ्चोपादानकारणीभूतमायालक्षणाज्ञानस्योक्तवृत्त्या बाधे मायाकार्यस्याखिलस्य जगतोऽपि बाध एव, निरुक्तवृत्तिरपि जगदन्तर्गता स्वेनैव तदानीं बाधिता भवतीत्याह- पटकारणेति। तत्कार्यस्य ब्रह्मगताज्ञानकार्यस्य। तदन्तर्भूता अज्ञानकार्याखिलप्रपञ्चान्तर्गता। निरुक्ताखण्डाकारवृत्तिविनिवृत्तौ तत्प्रतिबिम्बितं चैतन्यमपि विनिवर्तते. दर्पणाभावे मुखप्रतिबिम्बनिवृत्तिवत्, यथा च दर्पण-मुखप्रतिबिम्बयोर्निवृत्तौ मुखमात्रमवतिष्ठते तथा निरुक्तवृत्ति-तत्प्रतिबिम्बितचैतन्ययोर्निवृत्तौ केवलचैतन्यस्यावस्थानमित्युपदर्शयति-तत्प्रतिबिम्बितमिति-निरुक्तवृत्तिप्रतिबिम्बितमित्यर्थः। तदवभासनासमर्थेति-आदित्यप्रभावभासनासमर्थेत्यर्थः। तेनाभिभूतं सत् प्रत्यगभिन्नपरब्रह्मणाऽभिभूतं सत्, अत्र 'तत्प्रतिबिम्बितं चैतन्यमपि' इत्यन्वयि। स्वोपाधिभूतेति-वृत्तिप्रतिबिम्बितचैतन्योपाधिभूतेत्यर्थः। भवतीति-तत्प्रतिबिम्बितं चैतन्यं तेनाऽभिभूतं सत् प्रत्यगभिन्नं परब्रह्ममात्रं भवतीति सम्बन्धः। एवं सति अखण्डाकारवृत्तिप्रतिबिम्बितचैतन्यस्य ब्रह्ममात्रत्वे सति, अखण्डाकारचित्तवृत्तेरुपगमाद् "मनसैवाऽनुद्रष्टव्यम्" इत्युपपद्यते, अन्यस्य स्वाकारवृत्तिप्रतिबिम्बितचैतन्यतादात्म्यादवभासः, ब्रह्मणस्तु स्वयमेवावभासमानत्वम्, न तु वृत्तिप्रति-

"यन्मनसा न मनुते०" [केनोपनिषद्, १, ५] इत्यनयोरविरोधः, वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधात्, तदुक्तम्—

"फलव्याप्यत्वमेवास्य, शास्त्रकृद्भिर्निवारितम्" ॥

[पञ्चदशीतृप्तिदी० ९३]

बिम्बितचैतन्यतादात्म्यत इति "यन्मनसा न मनुते" इत्यप्युपपद्यत इति 'मनसैवाऽनुद्रष्टव्यम्' इत्यनेन वृत्तिव्याप्यत्वं ब्रह्मणोऽङ्गीक्रियते, "यन्मनसा न मनुते" इत्यनेन च वृत्तिप्रतिबिम्बितचैतन्यतादात्म्याध्यासतोऽवभासनलक्षणं फलव्याप्यत्वमस्य प्रतिषिध्यत इति नाऽनयोर्विरोध इत्याह—वृत्तिव्याप्यत्वेति। ब्रह्मणो वृत्तिव्याप्यत्वं समस्ति, फलव्याप्यत्वं च नास्तीत्यत्र पञ्चदशीतृप्तिदीपप्रकरणवचनसंवादमाह-तदुक्तमिति। अत्र त्रीणि पद्यानि एव पठितानि सन्ति-

'स्वप्रकाशोऽपि साक्ष्येव, धीवृत्त्या व्याप्येतान्यवत्।
फलव्याप्यत्वमेवास्य, शास्त्रकृद्भिर्निवारितम् ॥ ९० ॥
बुद्धि-तत्स्थचिदाभासौ, द्वावपि व्याप्नुतो घटम्।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ९१ ॥
ब्रह्मण्यज्ञाननाशाय, वृत्तिव्याप्तिरपेक्षिता।
स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते" ॥ ९२ ॥ इति।

एतेषां पद्यानामित्थं व्याख्यानम्-ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्, बुद्धिवृत्तिविषयत्वं न घटत इत्याशङ्क्याह— स्वप्रकाश इति। अन्यवद् घटादिवदित्यर्थः। स्वप्रकाशोऽहमित्येवंबुद्धिवृत्तिसम्भवादिति भावः, तर्हि अपसिद्धान्तापात इत्याशङ्क्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्याङ्गीकृतत्वान्नायमपसिद्धान्त इति परिहरति-फलव्याप्यत्वमिति— फलं वृत्तिप्रतिबिम्बितचिदाभासः, तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरणरूपत्वादिति भावः ॥१॥

आत्मनि फलव्याप्यभावं दर्शयितुमनात्मनो वृत्त्या फलेन च

"ब्रह्मण्यज्ञाननाशाय, वृत्तिव्याप्तिरपेक्षिता" ॥ इति,
"स्वयं प्रकाशमानत्वान्नाऽऽभास उपपद्यते" ॥ इति च ।
[पञ्चदशीतृप्तिदी० ९०]

व्याप्यत्वं दर्शयति-बुद्धि-तदिति । उभयव्याप्तेः प्रयोजनमाह-तत्रेति । तत्र तयोर्बुद्धि-चिदाभासयोर्मध्ये, धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति, ज्ञानाऽज्ञानयोर्विरोधात्, आभासेन चिदाभासेन, घटः स्फुरेत्, जडत्वेन स्वतः स्फुरणाऽयोगादिति भावः ॥२॥

इदानीमात्मनि ततो वैलक्षण्यं दर्शयति-ब्रह्मणीति-प्रत्यगू-ब्रह्मणोरेकत्वस्याज्ञानेनावृतत्वात् तस्याज्ञानस्य निवृत्तये वाक्यजन्यया 'अहं ब्रह्माऽस्मि' इत्येवमाकारया धीवृत्त्या व्याप्तिरपेक्ष्यते, स्वस्यैव स्फुरणरूपत्वात् तत्स्फुरणाय चिदाभासो नापेक्ष्यते, अतो युज्यमानोऽपि चिदाभासो नोपयुज्यत इत्यर्थः ॥३॥ ११८ ॥
प्रकृतार्थोपपादकमेतदनन्तरपद्यत्रयं यथा-

"चक्षुर्दीपावपेक्ष्येते, घटादेर्दर्शने यथा ।
न दीपदर्शने किन्तु, चक्षुरेकमपेक्ष्यते" ॥९३॥

व्याख्या—उक्तमर्थं दृष्टान्तप्रदर्शनेन विशदयति-चक्षुर्दी अन्धकारावृतघटादिदर्शने चक्षुर्दीपावुभावपि अपेक्ष्येते, दीपदर्शने तु तथा न, किन्तु एकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशायेति पूर्वेण सम्बन्धः ॥९३॥

"स्थितोऽप्यसौ चिदाभासो, ब्रह्मण्येकीभवेत् परम् ।
न तु ब्रह्मण्यतिशयं, फलं कुर्याद् घटादिवत् ॥९४॥

व्याख्या—ननु बुद्धि-तद्वृत्तीनां चिदाभासवैशिष्ट्यस्वाभाव्याद् घटादिष्विव ब्रह्मण्यपि फलव्याप्तिर्बलाद् भवेदित्याशङ्क्याह-स्थितोऽपीति- यद्यपि घटाद्याकारवृत्तिवद् ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति, तथापि नासौ ब्रह्मणो भेदेन भासते, किन्तु प्रचण्डातपमध्य-

घटादिजडपदार्थाकाराकारितचित्तवृत्तिस्तदज्ञातघटादिविषयीकरणेन तदज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटादिकमपि भासयति, दीपप्रभामण्डलमिव तमःस्थं घटादिकं विषयीकृत्य तद्गततमोनिरसनपूर्वं स्वप्रभया घटादिकमित्यस्ति विशेषः। एतदखण्ड-

---

वर्तिदीप ...वत् तेनैकीभूत इव भवति, अतः स्फुरणलक्षणातिशयजनको न ब्रह्मणीत्यर्थः ॥९४॥

"अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितम् ।
मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता" ॥९५॥

व्याख्या—ननु ब्रह्मणि फलव्याप्तिर्नास्ति, वृत्तिव्याप्तिस्तु विद्यत इत्युक्तम्, तत्र किं प्रमाणमित्याशङ्क्य आगमः प्रमाणमित्याह—अप्रमेयमिति—

"निर्विकल्पमनन्तं च, हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनादिं यज्ज्ञात्वा तन्मुच्यते बुधः" ॥

[त्रिपुरातापिन्युपनिषद्, ५, ९]

इत्यत्रास्मिन् मन्त्रे श्रुत्याऽमृतबिन्दूपनिषदा अप्रमेयशब्देन इदं फलव्याप्तिराहित्यमुक्तम्,

"मनसैवेदमाप्तव्यं नेह नानाऽस्ति किञ्चन"।
[मृत्योः स मृत्युं गच्छति, य इह नानैव पश्यति ॥]

इति कठवल्ल्यां [४. ११]

धीव्याप्यता श्रुता, वृत्तिव्याप्यत्वं श्रुतमित्यर्थः, इति॥ 'चक्षुर्दीपावपेक्ष्येते' इत्यादिपद्याभिप्रेतमेवार्थमुपदर्शयति—

घटादीति। तदज्ञातघटादिविषयीकरणेन घटत्वादिना पूर्वमज्ञातं यद् घटादि तद्विषयीकरणेन। तदज्ञाननिरसनपुरस्सरं घटत्वादिना घटादेर्यदज्ञानं तदपनयनपूर्वकम्। स्वगतचिदाभासेन घटादिजडपदार्थाकाराकारितचित्तवृत्तिगतचिदाभासेन। तद्गतेति— घटादिगतेत्यर्थः। स्वप्रभया दीपप्रभामण्डल-

चिदेकाकारवृत्तेः शमादिगुणानां चाभ्यासादेव स्वरूपविश्रान्तिर्भवति न तु सकृज्ज्ञानमात्रात्, तदुक्तं वसिष्ठेन–

"न यावत् सममभ्यस्तौ, ज्ञान-सत्पुरुषक्रमौ।
एकोऽपि नैतयोस्तावत्, पुरुषस्येह सिद्ध्यति" ॥ १ ॥ इति,

'यावद् यावदन्तर्मुखः सन्नाऽऽत्मतत्त्वं पश्यति, तावत् तावच्छमादिमान्न भवति, यावद् यावदन्तर्मुखः सन् शमादिमान् भवति तावत् तावदात्मतत्त्वमीक्षते' इत्यनुभवसिद्धत्वान्निर्विकल्पचिदेकाकारान्तःकरणवृत्त्या वृत्तिलक्षणज्ञानाभ्यासेन सहैव सत्पुरुषक्रमसंज्ञितं शमाद्युपेतात्मविचारमावर्तयेदित्येतदर्थः।

शमादयः–शम-दमोपरति-तितिक्षा-समाधान-श्रद्धाः, तत्र शमः श्रवणादिव्यतिरिक्तविषयेभ्यो मनोविनिग्रहः १, दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् २, उपरतिः–विहितानां कर्मणां समाधिव्याक्षेपकत्वे विधिना परित्यागः ३, तितिक्षा शीतोष्णादि-

---

प्रभया। विशेषः अखण्डब्रह्माकारवृत्तितो घटादिजडपदार्थाकारवृत्तेर्वैलक्षण्यम्। 'परब्रह्ममात्रं भवति' इति यदुक्तं तदुक्ताखण्डाकारवृत्त्यभ्यास-शमादिगुणाभ्यासादेव, न तु सकृदुक्तवृत्तिमात्रत इत्याह– एतदखण्डचिदेकाकारवृत्तेरिति– अस्य 'अभ्यासादेव' इत्यनेनान्वयः। 'शमादि' इत्यादिपदात् दमोपरति-तितिक्षा-समाधान-श्रद्धानामुपग्रहः। उक्तार्थे वासिष्ठवचनसंवादमाह– तदुक्तं वसिष्ठेनेति। 'न यावद्' इत्यादि-वसिष्ठवचनार्थमुपदर्शयति– यावद् यावदित्यादिना। शमादयः के? इत्यपेक्षायामाह– शमादय इति। तत्र शमादिषुषट्सु मध्ये। 'श्रवणादि' इत्यादिपदान्मननादेरुपग्रहः, श्रवणादिपदं च श्रवणादिविषयपरम्। तद्व्यतिरिक्तेति– श्रवणादिलक्षणमनोविषयव्यतिरिक्तेत्यर्थः। 'विधिना'

द्वन्द्वसहिष्णुता ४, निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् ५, गुरु-वेदादिवाक्येषु विश्वासः-श्रद्धा ६ ।

अथ क आत्मविचारः ?, उच्यते-श्रवण-मनन-निदिध्यासन-

इत्युपादानादविधिना परित्यागो नाधिकारित्वसम्पादक इत्यावेदितम्। तदनुगुणेति- श्रवणाद्यनुगुणेत्यर्थः। समाधानमैकाग्र्यम्। 'शमाद्युपेतात्मविचारमाचर्तयेद्' इत्युक्तम्, तत्र क आत्मविचारः ? इति पृच्छति- अथेति। उत्तरयति- उच्यत इति। श्रोत्रेन्द्रिये तज्जन्यज्ञाने च श्रवणपदस्य रूढत्वात् तदनुष्ठानस्यात्मविचारत्वासम्भवादत आह- श्रवणं नामेति। अशेषवेदान्तानामिति- श्रवणाचरणस्यात्मविचारे आवश्यकत्वमशेषवेदान्तानामद्वितीयब्रह्मवस्तुनि तात्पर्यावधारणस्य श्रवणत्वं चोपदर्शितं पञ्चदशीयतृप्तिदीपप्रकरणे—

"अहं ब्रह्मेति वाक्यार्थबोधो यावद् दृढीभवेत्।
शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥ ९८ ॥
बाढं सन्ति ह्यदार्ढ्यस्य, हेतवः श्रुत्यनेकता।
असम्भाव्यत्वमर्थस्य, विपरीता च भावना ॥ ९९ ॥
शाखाभेदात् कामभेदाच्छ्रुतं कर्माऽन्यथाऽन्यथा।
एवमत्रापि मा शङ्कीत्यतः श्रवणमाचरेत् ॥ १०० ॥
वेदान्तानामशेषाणामादिमध्यावसानतः।
ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् ॥ १०१ ॥

एतेषां पद्यानां व्याख्यानमित्थम्- आचार्यैः केन वाक्येनाभिहितमित्याशङ्क्य तद्वाक्यं पठति- अहं ब्रह्मेति ॥ ९८ ॥

ननु वाक्यप्रमाणजनितज्ञानस्यादाढ्यं कुतः ? इत्याशङ्क्याह- बाढमिति ? हि यस्मात् कारणात्। श्रुत्यनेकता श्रुतीनां नानात्वमेको हेतुः, अर्थस्याप्यखण्डैकरसस्याऽद्वितीयब्रह्मरूपस्यालौकिकत्वेनासम्भावितत्वमपरः, विपरीतभावना च पुनः कर्तृत्वाभिमानरूपस्तृतीय इत्येवं

समाध्यनुष्ठानानि। श्रवणं नाम षड्भिर्लिङ्गैरशेषवेदान्तानामद्वितीयवस्तुनि तात्पर्यावधारणम्। लिङ्गानि तु उपक्रमोपसंहारा ऽभ्यासा ऽपूर्वता फला ऽर्थवादोपपत्त्याख्यानि। प्रकरणप्रतिपाद्यस्य तदाद्यन्त-

---

विधा अदार्ढ्यस्य हेतवो बाढं सन्ति सर्वथा विद्यन्ते, अतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकमावर्तनीयमिति भावः ॥ ९९ ॥

एवं त्रिविधानदार्ढ्यहेतूनुपन्यस्य श्रुतिनानात्वप्रयुक्तादार्ढ्यनिवृत्तये श्रवणावृत्तिः कार्येत्याह- शाखेति- यथा शाखाभेदात् कर्मभेदः श्रूयते- "यद्वैव होत्रं क्रियते, यजुषाध्वर्जवं साम्नोद्गीथम्" इति, यथा वा कामभेदात्- "कारीर्या वृष्टिकामो यजेत, शतकृष्णलमायुष्कामः" इत्यादिकर्मभेदः श्रुतः, एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशङ्कायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः ॥ १०० ॥

किं तच्छ्रवणमित्याकाङ्क्षायां तल्लक्षणमाह- वेदान्तानामिति- सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यमिदं पारम्पर्येण पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः ॥ १०१ ॥ इति।

तात्पर्यावधारणहेतुभूतानि षडपि लिङ्गानि दर्शयति- लिङ्गानि त्विति। उपक्रमोपसंहारद्वयरूपप्रथमलिङ्गस्वरूपं लक्षयति- प्रकरणप्रतिपाद्यस्येति- अस्य 'उपपादनम्' इत्यनेन सम्बन्धः। तदाद्यन्तयोः प्रकरणस्यादौ प्रकरणस्यान्ते च, प्रकरणस्यादौ प्रकरणप्रतिपाद्यस्योपपादनमुपक्रमः, प्रकरणप्रतिपाद्यस्य प्रकरणान्ते उपपादनमुपसंहार इत्यर्थः। अद्वितीयब्रह्मवस्तुनि उपक्रमोपसंहारौ सङ्गमयति- यथेति। प्रतिपाद्यस्य प्रकरणप्रतिपाद्यस्य, आदौ 'एकमेवाऽद्वितीयम्' इत्यनेन, अन्ते च 'एतदात्म्यम्' इत्यनेनाऽद्वितीयवस्तुनः प्रतिपादनमित्युपक्रमोपसंहारावत्र स्त इत्यर्थः। अभ्यासाख्यं द्वितीयं तात्पर्यलिङ्गं लक्षयति- प्रकरणेति। तन्मध्ये प्रकरणमध्ये। प्रकरणप्रतिपाद्यस्य प्रकरणमध्ये पौनः-

योरुपपादनम्-उपक्रमोपसंहारौ, यथा छान्दोग्ये षष्ठे प्रकरणे प्रतिपाद्यस्याऽद्वितीयवस्तुनः-" एकमेवाऽद्वितीयम् " [छान्दोग्योपनिषद्, ६, २, १,] इत्यादौ, " एतदात्म्यम् " [छान्दोग्योपनिषद्, ६।१६, ३] इत्यन्ते च प्रतिपादनम् " १, प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनम्-अभ्यासः, यथा-तत्रैवाद्वितीयवस्तुनः-" तत् त्वमसि " [छान्दोग्योपनिषद्, ६, ८-१६ प्रान्ते] इति नवकृत्वः प्रतिपादनम् २, प्रकरणप्रतिपाद्यस्य प्रमाणान्तराविषयीकरणम्-अपूर्वत्वम्, यथा-तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् ३। फलं तु-प्रकरणप्रतिपाद्यार्थज्ञानस्य तदनुष्ठानस्य वा तत्र श्रूयमाणं प्रयोजनम्, यथा तत्र-" आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्षे(क्ष्ये), अथ च सम्पत्स्ये " [छान्दोग्योपनिषद्, ६, १४, २] इति, अद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते ४। प्रकरणप्रतिपाद्यस्य प्रशंसनम्-अर्थवादः, यथा तत्र-" येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं

पुन्येन प्रतिपादनरूपमभ्यासमद्वितीयवस्तुनि दर्शयति- यथेति। तत्रैव छान्दोग्ये षष्ठे प्रकरण एव, एवमग्रेऽपि। नवकृत्वः नववारम्। अपूर्वत्वाख्यं तृतीयं तात्पर्यलिङ्गं लक्षयति- प्रकरणेति। अद्वितीयवस्तुन आगमप्रमाणातिरिक्तप्रमाणाऽविषयत्वादपूर्वत्वं समस्तीत्याह- यथेति। फलाख्यं चतुर्थं तात्पर्यलिङ्गं लक्षयति- फलं त्विति। तदनुष्ठानस्य प्रकरणप्रतिपाद्यार्थानुष्ठानस्य। तत्र प्रकरणे, एवमग्रेऽपि। उक्तप्रयोजनमद्वितीयवस्तुज्ञानस्य दर्शयति- यथेति। वेद ब्रह्मतत्त्वं जानाति। तस्य ब्रह्मतत्त्वज्ञानवतः पुरुषस्य। यावन्न विमोक्ष्य इति- अस्य जीवन्मुक्तस्यापि सतो यावन्न प्रारब्धाशेषकर्मभोगतोऽशेषकार्यसहिताऽविद्या मुच्यते तावदेव विलम्बः। अथ अशेषप्रारब्धकर्मणामप्युपभोगानन्तरम्।

विज्ञातम्" [छान्दोग्योपनिषद्, ६, १, ३] इत्यद्वितीयवस्तुप्रशंसनम् ५। प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिः-उपपत्तिः, यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [छान्दोग्योपनिषद्, ६, १, ४] इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वं युक्तिः श्रूयते ६ ॥

मननं तु-श्रुतस्याऽद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्। विजातीयदेहादिप्रत्ययतिरस्कारेणाऽद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः-निदिध्यासनम्। समाधिर्द्विविधः-सविकल्पको

सम्पत्स्ये सम्पत्स्यते कैवल्येन, अद्वितीयब्रह्ममात्रं स पुरुषो भवतीति यावत्। एतावता यदद्वितीयवस्तुज्ञानस्य प्रयोजनं श्रुतं भवति तदाह- अद्वितीयेति। तत्प्राप्तिः अद्वितीयवस्तुस्वरूपावाप्तिः। अर्थवादाख्यं पञ्चमं तात्पर्यलिङ्गं लक्षयति- प्रकरणेति- स्पष्टम्। उपपत्त्याख्यं षष्ठं तात्पर्यलिङ्गं लक्षयति- प्रकरणेति। तत्र प्रकरणे। अद्वितीयवस्तुनि साधकयुक्तिमुद्भावयति- यथेति। एतावता श्रवणं षड्लिङ्गोपेतमुपदर्शितम्।

अथ मननं लक्षयति- मननं त्विति- स्पष्टम्। निदिध्यासनं लक्षयति- विजातीयेति- परमार्थसतोऽद्वितीयवस्तुनो व्यावहारिकत्वाद् विजातीयो यो देहादिः, तत्प्रत्ययतिरस्कारेण-तत्प्रत्ययतोऽनन्तरितत्वेन, अथवा अद्वितीयवस्तुप्रत्ययस्य विजातीयो यो द्वितीयवस्तुविषयकत्वाद् देहादिप्रत्ययः, तत्तिरस्कारेण तत्प्रयुक्तव्यवधानरहितत्वेन। अद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः अद्वितीयवस्तुविषयकप्रत्ययस्य समानजातीयप्रवाहः, स निदिध्यासनम्, विजातीयज्ञानाऽनन्तरिताऽद्वितीयवस्तुज्ञानधाराऽद्वितीयवस्तुनो निदिध्यासनमित्यर्थः। समाधि

निर्विकल्पकश्च, आद्यो ज्ञातृ-ज्ञानादिविकल्पलयानपेक्षतयाऽद्वितीये तद्वाकारकारिताया वृत्तेरवस्थानम्, मृन्मयगजादिभानेऽपि मृज्ज्ञानवद् द्वैतभानेऽप्यद्वैतवस्तुभानाभ्युपगमः, तदुक्तमभिनीय–

"दृशिस्वरूपं गगनोपमं वरं, सत् तद् विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं, तदेव चाहं सततं विमुक्तः" ॥१॥

इति [मुक्तिकोपनिषद्, २, ७३]

विभज्य दर्शयति– समाधिरिति। सविकल्पकसमाधिं लक्षयति– आद्य इति– अद्वितीये वस्तुनि अद्वितीयवस्त्वाकारितवृत्तेरवस्थानं यदा भवति तदानीं ध्यातुः प्रमातुर्ज्ञानादेश्च विकल्पोऽपि भवति, न तु तस्य तदानीं लयः, एतादृशं यद् ध्येयाद्वितीयवस्त्वाकारकारितवृत्त्यवस्थानं स सविकल्पकसमाधिरभिधीयत इत्यर्थः। कथमद्वितीयवस्तुभानसमये द्वितीयवस्तुभानं? येनैतादृशसविकल्पकसमाधिस्वरूपमभ्युपगमपथमागच्छेदित्यत आह–मृन्मयेति। ज्ञातृ-ज्ञानादिविकल्पोपेताऽद्वितीयब्रह्माकारवृत्त्यवस्थानरूपसविकल्पकसमाधौ प्राचां संवादमुपदर्शयति– तदुक्तमिति। 'दृशः स्वरूपम्' इति वक्तव्ये 'दृशि स्वरूपम्' इति व्यस्तम्, दृशिशब्दो वा चैतन्यवाचीति विचारणीयम्, कीदृशं चित्स्वरूपम्? गगनोपमं गगनवद् व्यापकम्। वरं सर्वापेक्षयोत्कृष्टम्, न तदपेक्षया किञ्चिदुत्कृष्टं समस्ति। सत् परमार्थसत्स्वरूपम्। तद् विभातं तु, प्रकाशमानं तद् रूपं तु, अजं नित्यम्, एकमद्वितीयम्, अक्षरमविनाशि, अलेपकं कामक्रोधादिलेपरहितम्, सर्वगतं सर्वत्रापि 'सत् सत्' इति प्रतिपत्तेः सर्वव्यापकं सर्वान्तर्यामि वा, एवम्भूतं यद् अद्वयमद्वितीयं ब्रह्म, तदेव च तदात्मकमेव च, अहं प्रत्यगात्मा, सततं सर्वदा, विमुक्तः मायालक्षणबन्धरहितः, एतादृक्प्रत्यवस्थानं यद् भवति तत्र द्वितीयस्य ज्ञात्रादेरपि विकल्पसद्भावात् सविकल्पसमाधिरसाविति॥

अन्त्यस्तु ज्ञातृ-ज्ञानादिविकल्पलयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारिताया वृत्तेरतितरामेकीभावेनावस्थानम्, तदा जलाकाराकारितलवणानवभासे जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेऽद्वितीयवस्तुमात्रमवभासते, ततश्चास्य सुषुप्तेर्नाभेदः, उभयत्र वृत्त्यभाने समानेऽपि तद्वृत्तिसद्भावा-ऽसद्भावमात्रेण तयोर्भेदोपपत्तेः।

अस्याङ्गानि–"यम-नियमा-ऽऽसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः"["यम-नियमा-ऽऽसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि" पातञ्जलयोगदर्शनद्वितीयपादे सू० २९ ॥]। तत्र–

निर्विकल्पकसमाधिं लक्षयति– अन्त्यस्त्विति– निर्विकल्पकसमाधिः पुनरित्यर्थः। तदाकाराकारितायाः अद्वितीयवस्त्वाकाराकारितायाः। तदा निर्विकल्पकसमाध्यवस्थायाम्। जलाकारेति– जले प्रक्षिप्तं लवणं जलाकारमेवोपजायत इति न तदानीं लवणपिण्डावभासः, किन्तु जलमात्रावाभास एव, तद्वन्निर्विकल्पकसमाधिकाले अद्वितीयवस्त्वाकाराकारितचित्तवृत्तिर्भवति, परं सा नावभासते, किन्तु अद्वितीयवस्तुमात्रमेवावभासत इत्यर्थः। ततश्च तदानीमनवभासमानाऽद्वितीयवस्त्वाकारवृत्तिसध्रीचीनाऽद्वितीयवस्तुमात्रावभासतश्च। अस्य निर्विकल्पकसमाधेः। 'ततश्च' इत्यनेनोक्तमेव तयोरभेदाभावहेतुं स्पष्टयति– उभयत्रेति– निर्विकल्पकसमाधि-सुषुप्त्योरित्यर्थः। तद्वृत्तीति–अद्वितीयवस्त्वाकारवृत्तीत्यर्थः। तयोः निर्विकल्पकसमाधि-सुषुप्त्योः, निर्विकल्पकसमाधौ अद्वितीयवस्त्वाकारवृत्तिसद्भावः, तदसद्भावश्च सुषुप्ताविति्येवं विरुद्धधर्माध्यासात् तयोर्भेदोपपत्तेरित्यर्थः।

येभ्यो निर्विकल्पकसमाधिरात्मानमासादयति तान्यङ्गानि दर्शयति– अस्येति– निर्विकल्पकसमाधेरित्यर्थः। अष्टानां समाध्यङ्गानां यमादीनां स्वरूपं क्रमेणोपदर्शयति– तत्रेति– यम-नियमादिष्वष्टसु

"अहिंसा-सत्या-ऽस्तेय-ब्रह्मचर्या-ऽपरिग्रहा यमाः" १ [पातञ्जलयोग० पाद-२ सू० ३०] १। "शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः" २। [पातञ्जलयोग० पाद-२ सू० ३२] पद्मक-स्वस्तिकादीन्यासनानि ३। रेचक-कुम्भक-पूरकाः प्राणायामाः ४। इन्द्रियाणां स्वविषयेभ्यो निवर्तनं प्रत्याहारः ५। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा ६। तत्रैव विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ७। समाधिस्तु सविकल्प एव, अस्य निर्विकल्पकस्याङ्गिनो लय-विक्षेप-कषाय-रसास्वादलक्षणाश्चत्वारो विघ्ना भवन्ति, लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा, तदवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः, लय-विक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्ववलम्बनं कषायः, समाध्यारम्भसमये

मध्य इत्यर्थः। एतेषां विशेषतोऽवधारणं पातञ्जलयोगशास्त्रादितः कर्तव्यं ग्रन्थगौरवभयान्नेह तद्विचारो वितन्यते। इन्द्रियाणां चक्षुरादीन्द्रियाणाम्। स्वविषयेभ्यो रूप-रस-गन्ध स्पर्श-शब्देभ्यः। अन्तरिन्द्रियेति-मनोरूपेन्द्रियेत्यर्थः। तत्रैव अद्वितीयवस्तुन्येव। निर्विकल्पकसमाधिरपि समाधिः, स कथं स्वस्यैवाङ्गिनोऽङ्गं स्यादत आह- समाधिस्त्विति-निर्विकल्पकसमाध्यङ्गतया दर्शितसमाधिः पुनः सविकल्पकसमाधिरेव, तदनन्तरं निर्विकल्पकसमाधिभावादित्यर्थः। यमाद्यष्टाङ्गभावेऽपि लयादिविघ्नभावे निर्विकल्पकसमाधिर्न भवतीति तदभावोऽपि प्रतिबन्धकाभावविधया निर्विकल्पकसमाधौ कारणं भवतीति तदधिगतये लयादिविघ्नान् दर्शयति- अस्येति- एतद्विवरणम्- निर्विकल्पस्याङ्गिन इति। लयादीनां क्रमेण स्वरूपमुपदर्शयति- लयस्तावदिति। तदवलम्बनेन अखण्डवस्त्ववलम्बनेन। लय विक्षेपाभ्यां वैलक्षण्येन कषायस्वरूपमावेदयति- लय-विक्षेपाभावेऽपीति- अखण्डवस्त्ववलम्बनं निर्विकल्पकसमाधावपि

व्युत्थाने वा सविकल्पकानन्दास्वादनं रसास्वादः, एतद्विघ्नचतुष्टय-रहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रं यदाऽवतिष्ठते तदा निर्विकल्पसमाधिरित्युच्यते ८ ॥ तदुक्तम्–

"लये सम्बोधयेच्चित्तं, विक्षेपं शमयेत् पुनः।
सकषायं विजानीयात्, समाध्याप्तं न चालयेत्" ॥ [अद्वैतप्र० ४]
नास्वादयेद् रसं तत्र, निःसङ्गः प्रज्ञया भवेत्।" इति [अद्वैतप्र० ४५]
"यथा दीपो निवातस्थो, नेङ्गते सोपमा स्मृता" ॥
[गीता ६, १९] इति च।

वर्तते, परं रागादिवासनया स्तब्धीभावो नास्तीति ततो विशेषः कषाये इति। व्युत्थाने समाधितो व्युत्थाने, समाध्यपगमनानन्तरमिति यावत्। एतद्विघ्नेति– अनन्तरोपदर्शितलयादिविघ्नेत्यर्थः।

लयादिविघ्नाभावत एव निर्विकल्पकसमाधिरित्यत्र प्राचां संवादमाह– तदुक्तमिति। लये अखण्डवस्त्वनवलम्बने समुपस्थिते, सम्बोधयेच्चित्तं यथाऽखण्डवस्त्ववलम्बना तस्य वृत्तिर्भवति तथैकाग्रीभावलक्षण-सम्बोधनं चित्तस्य विदध्यात्, विक्षेपं यदखण्डवस्त्ववलम्बनेऽपि अन्यवस्त्ववलम्बनं वृत्तेस्तम्, शमयेत् यथाऽन्यालम्बना चित्तवृत्तिर्न भवति तथा यत्नमातिष्ठेत. सकषायमिति– तदानीं रागादिवासनया स्तब्धीभावे सकषायं समाधिं जानीयात्, तज्ज्ञात्वा च समाध्याप्तं समाधिप्राप्तमात्मानम्, न चालयेत् न रागादिवासनया कुण्ठीभूतं विदध्यात् ॥ १ ॥ नास्वादयेद् रसं तत्र समाधेरादावन्ते च सविकल्पकानन्दास्वादनं न कुर्यात्, किन्तु निःसङ्गः प्रज्ञया भवेत् यथा रागादिरहित-चिन्मात्रं सम्पद्येत तथैव कुर्यादित्यर्थः।

गीतासंवादमप्याह– यथेति– अस्य "योगिनो यतचित्तस्य युञ्जतो योगमात्मनः" ॥ इत्युत्तरार्द्धम्। अस्य मधुसूदनकृता व्याख्या– "समाधौ निर्वृत्तिकस्य चित्तस्यापमानमाह–दीपचलनहेतुना वातेन।

उक्तस्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा तत्कार्यसञ्चित-कर्म संशय-विपर्ययादीनामपि बाधितत्वादखिलसम्बन्धरहितो व्युत्थानसमये मांस-शोणित-मूत्र-पुरीषादिभाजनेन शरीरेण, आध्यादि-भाजनेनेन्द्रियेण, आशनीया-पिपासा शोक-मोहभाजनेनान्तःकरणेन पूर्वपूर्ववासनया क्रियमाणानि भुञ्जानोऽपि च ज्ञानाविरुद्धारब्धफलानि

रहिते देशे स्थितो दीपो यथा चलनहेत्वभावान्नेङ्गते - न चलति, सोपमा स्मृता - स दृष्टान्तश्चिन्तितो योगज्ञैः। कस्य? योगिनः, एकाग्रभूमौ सम्प्रज्ञातसमाधिमतोऽभ्यासपाटवाद् यतचित्तस्य - निरुद्धसर्वचित्तवृत्तेः, असम्प्रज्ञातसमाधिरूपं योगम्, निरोधभूमौ युञ्जतः-अनुतिष्ठतः, य आत्माऽन्तःकरणं तस्य निश्चलतया सत्त्वोद्रेकेण प्रकाशकतया च निश्चलो दीपो दृष्टान्त इत्यर्थः, आत्मनो योगं युञ्जत इति व्याख्याने दार्ष्टान्तिकात्मनः सर्वावस्थस्यापि चित्तस्य सर्वदा-त्माकारतयाऽऽत्मपदवैयर्थ्यं च, नहि योगेनात्माकारता चित्तस्य सम्पाद्यते किन्तु स्वत एवात्माकारस्य सतो नात्माकारता निवर्त्यत इति, तस्माद् दार्ष्टान्तिकलाभप्रतिपादनार्थमेवात्मपदम्. यतचित्तस्येति भावपरो निर्देशः, कर्मधारयो वा, यतस्य चित्तस्येत्यर्थः" इति।

'तत् त्वमसि' 'अहं ब्रह्माऽस्मि' इति महावाक्यजन्याखण्ड-ब्रह्माकारकारितवृत्तिप्रतिबिम्बितचैतन्यलक्षणज्ञानतो निर्विकल्पक-समाधिप्राप्तः पुरुषो जीवन्मुक्तो भवतीत्याह- उक्तस्वस्वरूपेति। तदज्ञान-बाधनद्वारा अखण्डब्रह्मस्वरूपाज्ञानलक्षणाविद्याबाधनद्वारा। तत्कार्येति-ब्रह्माज्ञानकार्येत्यर्थः। अखिलसम्बन्धरहित इति-स्वयमसङ्गो ह्ययं पुरुषः केवलमविद्या-तत्कार्यलक्षणोपाधिविगमे च भवत्यखिलसम्बन्धरहित इत्यर्थः। नन्वेवं निर्विकल्पकसमाध्युत्थितस्य शरीरादिकं यदुपलभ्यते तस्य का वार्तेत्यत आह- व्युत्थानसमय इति। 'भुञ्जानोऽपि' इत्यत्र 'पश्यन्नपि' इत्यत्र च 'अखिलसम्बन्धरहितः' अन्वेति। 'पश्यन्नपि

पश्यन्नपि न पश्यतीन्द्रजालवत्, "सचक्षुरचक्षुरिव सकर्णोऽकर्णः" इत्यादिश्रुतेः। ईदृशश्च ब्रह्मणो जीवन्मुक्त इत्युच्यते, अस्य ज्ञानात् पूर्वं विद्यमानानामाहार-विहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति, शुभा-ऽशुभयोरौदास्यं वा, तदुक्तम्–

"बुद्धाद्वैतस्वतत्त्वस्य, यथेष्टाचरणं यदि।
शुनां तत्त्वदृशां चैव, को भेदोऽशुचिभक्षणे" ॥ १ ॥

इति[पञ्चदशीद्वैतवि० ५५]

न पश्यति' इत्यत्र श्रुतिं प्रमाणयति- सचक्षुरिति। 'ब्रह्मणः' इत्यनन्तरं 'रूपम्' इति शेषः। अयं च जीवन्मुक्तः पूर्ववदेव शुचिभक्षणादिकं कुरुते, अशुचिभक्षणादितो निवर्तते, केवलं पूर्वावस्थायां शुभाऽशुभवासनयोरप्यनुवृत्तिः, तदानीं च शुभवासनानामेवानुवृत्तिः, शुभाऽशुभयोरौदास्यं वा भवतीत्याह- अस्येति- जीवन्मुक्तस्येत्यर्थः। जीवन्मुक्तस्य पूर्ववदेवाहार-विहाराद्यनुवृत्तिः, न तु 'यथेष्टाचरणमित्यत्र पञ्चदशीद्वैतप्रकरणवचनसंवादमाह- तदुक्तमिति। बुद्धाद्वैतेति- अत्रैतानि

पद्यानि प्रकृतानुगुणानि, यथा—

"तत्त्वं बुद्धवाऽपि कामादीन्, निःशेषं न जहासि चेत्॥
यथेष्टाचरणं ते स्यात्, कर्मशास्त्रातिलङ्घिनः ॥ ५४ ॥

बुद्धाद्वैतस्वतत्त्वस्य, यथेष्टाचरणं यदि।
शुनां तत्त्वदृशां चैव, को भेदोऽशुचिभक्षणे ॥ ५५ ॥

बोधात् पुरा मनोदोषमात्रात् क्लिश्नास्यथाऽधुना।
अशेषलोकनिन्दा चेत्यहो ते बोधवैभवम् ॥ ५६ ॥

विड्वराहादितुल्यत्वं, मा काङ्क्षीस्तत्त्ववित् भवान्।
सर्वधीदोषसंत्यागाल्लोकैः पूज्यस्व देववत्' ॥ ५७ ॥ इति।

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्तन्ते, तदुक्तम्—

"उत्पन्नात्मावबोधस्य, अद्वेष्टृत्वादयो गुणाः।
अशेषतो भवन्त्यस्य, न तु साधनरूपिणः" ॥ १ ॥ इति।

किं बहुना? अयं देहमात्रामत्रार्थी सुखदुःखलक्षणान्यारब्धफलान्यनुभवन् अन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीनेऽज्ञान-तत्कार्यसंस्काराणामपि विनाशात् परं कैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते, "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" [नृसिंहोपनिषद्, ५] "विमुक्तश्च विमुच्यते" [कठोपनिषद्, १] इति श्रुतेरिति॥

तदिदमखिलमिन्द्रजालम्—इत्थं ब्रह्माद्वैताभ्युपगमे बन्ध-मोक्ष-

तदानीं जीवन्मुक्तावस्थायाम्। ज्ञानस्य सम्पूर्णस्य वृत्तत्वादलङ्करणमात्रं तदानीं ज्ञानसाधनानीत्यत्र प्राचां संवादमाह- तदुक्तमिति। अयं जीवन्मुक्तोऽवसाने ब्रह्ममात्रं परममुक्तिस्वरूपमासादयतीति दर्शयति- किं बहुनेत्यादिना। अयं जीवन्मुक्तः। देहमत्रामात्रार्थी देहमात्रं यद् अमत्रमुपभोगसाधनापात्रं तदर्थी, देहाभावे प्रारब्धकर्मफलसुखदुःखोपभोगासम्भवादनिच्छतोऽपि तदर्थित्वमावश्यकम्, 'अनुभवन्, अवभासकः सन्, अवतिष्ठते' इति सर्वत्र 'अयम्' इत्यन्वेति। तदवसाने अन्तःकरणाभासादीनां निवृत्तौ। प्राणा जीवन्मुक्तस्य मरणसमये नान्यत्र गच्छन्ति, परब्रह्मण्येव विलीयन्ते, जीवन्मुक्तोऽप्यखण्डब्रह्मस्वरूपावाप्त्या पुनर्मुक्तो भवतीत्यत्र श्रुतिं प्रमाणयति- न तस्येति। तस्य जीवन्मुक्तस्य। अत्रैव परब्रह्मण्येव॥

इत्थं सङ्ग्रहनयोत्थं वेदान्तमतमुपदर्श्य एकान्ताऽऽग्रहग्रहिलत्वेन युक्तिनिकुरम्बापेतमिति मन्यमानो ग्रन्थकारः प्रतिक्षिपति- तदिदमिति-

व्यवस्थाया एवानुपपत्तेः, बुद्धिप्रतिबिम्बितं चैतन्यं जीव इति प्रतिबिम्बवादे बुद्धिप्रतिबिम्बस्य बन्धपदार्थस्य, बुद्धिनिवृत्तौ दर्पणाभावे मुखस्येव शुद्धस्य चैतन्यस्य मोक्षपदार्थस्य च वक्तुमशक्यत्वात्, एकदर्पणाभावेऽपि दर्पणान्तरसन्निधौ मुख इवैकबुद्ध्यभावेऽपि बुद्ध्यन्तरसन्निधौ यावत्प्रतिबिम्बाभावलक्षणायाः शुद्धेश्चैतन्येऽसम्भवात्, यत्किञ्चित्प्रतिबिम्बाभावस्य चातिप्रसञ्जकत्वात्, तद्बुद्धिप्रतिबिम्ब-

---

अनन्तरमुपवर्णितमिदमद्वैतवादिमतमखिलमिन्द्रजालम्, यथेन्द्रजालमापाततोऽवभासत एव केवलम्, न तु सत्, तथाऽद्वैतवादिमतमपीत्यर्थः। इत्थम् अनन्तराभिहितप्रकारेण। अद्वैतवादे बन्ध-मोक्षव्यवस्थाया अनुपपत्तिं दर्शयितुं तदीयां बन्धमोक्षव्यवस्थां तावदाह- बुद्धिप्रतिबिम्बितमिति- तथा च बुद्धिप्रतिबिम्बो बन्धः, तन्निवृत्तौ शुद्धं चैतन्यं मोक्ष इति बन्ध-मोक्षव्यवस्था तन्मते आयातेति, 'बन्धपदार्थस्य वक्तुमशक्यत्वान्मोक्षपदार्थस्य वक्तुमशक्यत्वाद्' इत्यनेन च तस्या अनुपपत्तिरावेदिता, ग्रन्थलाघवार्थमेकवाक्येनैवोभयाभिधानम्। यन्निवृत्तिर्मुक्तिर्भवेत् तस्यैव बन्धपदार्थत्वं युक्तम्, यदैकबुद्धिप्रतिबिम्बनिवृत्तेर्मुक्तिपदार्थत्वं वक्तुमशक्यं तदैकस्य बुद्धिप्रतिबिम्बस्य बन्धपदार्थत्वमपि वक्तुमशक्यमित्याशयेनाह-एकदर्पणभावेऽपीति। मुख इवेति- दर्पणान्तरसन्निधौ दर्पणान्तरे मुखस्य प्रतिबिम्बसम्भवाद् यावत्प्रतिबिम्बाभावलक्षणायाः शुद्धेर्यथा मुखे न सम्भवस्तथेत्यर्थः। ननु यत्किञ्चिद्बुद्धिप्रतिबिम्बाभावलक्षणैव शुद्धिरिति तस्या यत्किञ्चिद्बुद्धिप्रतिबिम्बाभावेऽप्यस्त्येव ब्रह्मणि सम्भव इति तामुपादाय शुद्धं ब्रह्म मोक्षो भविष्यतीत्यत आह- यत्किञ्चिदिति। अतिप्रसञ्जकत्वादिति यदा चैत्रात्मनि स्वान्तःकरणलक्षणबुद्धिप्रतिबिम्बो वर्तते तदानीमपि मैत्रान्तःकरणलक्षणबुद्धिप्रतिबिम्बाभावसत्त्वात् तद्रूपशुद्धिमुपादाय बद्धोऽपि चैत्रात्मा मुक्तो भवेदित्येवमतिप्रसञ्जकत्वात्, एवं तत्तद्विषयाकारकारिताभेदेन तद्बुद्धिप्रतिबिम्बोऽपि नानाविध इति तदेक-

सामान्याभावस्य चैतन्ये तज्जीवमुक्ततोपगमेऽपि तत्रांशिकबन्ध-मोक्षोभयलक्षणप्रसङ्गेन निरंशत्वव्याघातात् । ऐतेन 'बुद्ध्युपहितस्तत्तादात्म्यापन्नस्वचिदाभासाविवेकादात्मैव जीवः' इत्याभासवादेऽपि केवलचैतन्यस्यैवाभासद्वाराऽबद्धत्वं तन्निवृत्तौ च मुक्तत्वम्, 'अज्ञानाश्रयभूतं चैतन्यं जीवः' इत्यवच्छेदवादे चाज्ञानमेव भिन्नभिन्नं बन्धस्तन्निवृत्तिरेव च मोक्ष इत्यप्यपाकृतं द्रष्टव्यम्, एकचिदाभासा-ऽज्ञान-

---

विषयाकारकारितापगमतो यत्किञ्चित्तद्बुद्धिप्रतिबिम्बाभावसम्भवात् तल्लक्षणबुद्धिमुपादायापि मोक्षः प्रसज्येतेत्येवमतिप्रसञ्जकत्वादित्यर्थः । चैत्रस्य यदन्तःकरणं तल्लक्षणबुद्धिप्रतिबिम्बसामान्याभावलक्षणैव शुद्धिरित्यत आह– तद्बुद्धिप्रतिबिम्बेत्यादीति । तज्जीवेति– यज्जीवान्तःकरणलक्षणबुद्धिप्रतिबिम्बसमान्याभावश्चैतन्ये तज्जीवन्मुक्तेत्येवमुपगमेऽपीत्यर्थः, एवं सति तज्जीवापेक्षया मुक्तत्वमन्यजीवापेक्षया बद्धत्वं चैतन्ये इत्यनेकांशता चैतन्ये स्यादेकेनांशेन मुक्तमेकेनांशेन बद्धमिति कृत्वा तथा च ब्रह्मणो निरंशत्वाभ्युपगमो व्याहन्येतेत्यर्थः । प्रतिबिम्बवादे बन्ध-मोक्षव्यवस्थानुपपत्तिवदुक्तयुक्त्या आभासवादे अवच्छेदकवादे च बन्ध-मोक्षव्यवस्थानुपपत्तिरित्याह– एतेनेति– अस्य 'अपाकृतं द्रष्टव्यम्' इत्यनेनान्वयः, बुद्ध्युपहित आत्मैव जीव इत्यन्वयः। नहि बुद्ध्युपहितत्वमात्रेण जीवत्वं किन्तु तत्तदात्म्यापन्नस्वचिदाभास विवेकादिति–बुद्धितादात्म्यापन्नो य आत्मस्वरूपस्य चित आभासस्तस्याविविवेकाद् भेदाग्रहादित्यर्थः । तन्निवृत्तौ चिदाभासनिवृत्तौ। आभासवादे बन्ध-मोक्षव्यवस्थां पराभिमतामुपदर्श्याऽवच्छेदवादे तामुपदर्शयति– अज्ञानाश्रयभूतमिति– अत्रानेकजीववादाभ्युपगमरक्षार्थमज्ञानस्य नानात्वमप्युपेयत इत्याशयेन 'अज्ञानमेव भिन्नभिन्नम्' इत्युक्तम्। तन्निवृत्तिरेव अज्ञानरूपबन्धनिवृत्तिरेव। 'एतेन' इत्यनेनाऽतिदिष्टमेव हेतुमुपन्यस्यति– एकेति– आभासवादे एकचिदाभास-

निवृत्तावप्यन्यतत्सत्त्वेन ब्रह्मण्यांशिकबन्ध-मोक्षोभयापत्तेरनुद्धारात्। 'अज्ञानप्रतिबिम्बितं तदुपहितं वा चैतन्यं जीवः' इत्येकजीववादाख्यः प्राचां दृष्टिसृष्टिवादस्तु सर्वमुक्तिं विनैकमुक्त्यसिद्धेस्तदर्थमुमुक्षुप्रवृत्त्युच्छेदादेव दूरापास्तः। अथ व्यावहारिकमांशिकबद्धमुक्तोभयस्वरूपं

निवृत्तावप्यन्यचिदाभाससत्त्वाच्चिदाभाससामान्यनिवृत्त्यभावेन मुक्तत्वं न स्यात्, यदि तद्बुद्धितादात्म्यापन्नचिदाभाससामान्याभावस्यैव तज्जीवमुक्तत्वमुपेयते तदा तज्जीवापेक्षया चैतन्ये मुक्तत्वम्, अन्यबुद्धितादात्म्यापन्नचिदाभाससत्त्वेनान्यजीवापेक्षया तत्रैव बद्धत्वमित्यंशभेदस्यावश्यकत्वेन निरंशत्वस्य व्याघातात्, एवमवच्छेदवादे एकजीवाज्ञाननाशेऽपि तदन्यजीवाज्ञानस्य सद्भावादज्ञानसामान्यनिवृत्त्यभावेन न तल्लक्षणा मुक्तिर्भवेदतस्तत्रापि तज्जीवाज्ञानसामान्याभावस्यैव चैतन्ये तज्जीवमुक्ततोपगमेन तदन्यजीवाज्ञानसद्भावात् तदपेक्षया बद्धत्वमपीत्यंशभेदावश्यम्भावे चिति निरंशत्वाभ्युपगमो व्याहन्येतेत्यर्थः। प्राचीनवेदान्तिनां दृष्टिसृष्टिवादस्त्वतितुच्छत्वादुपेक्ष्य एव परीक्षाविदग्धैरित्याह- अज्ञानप्रतिबिम्बितमिति- अज्ञानस्यैकत्वात् तत्प्रतिबिम्बितचैतन्यरूपो जीवोऽप्येक एव, तदुपहितम् अज्ञानोपहितम्, एकस्याज्ञानस्यैकैव निवृत्तिः, तद्भाव एव मुक्तिः तदनन्तरं नास्त्येव प्रपञ्च इति नाऽनादौ संसारे पूर्वं कस्यापि मुक्तिरभवदिति नामदेवादीनां मुक्तिप्रतिपादिका श्रुतिरर्थवादमात्रमेवैतन्मते, एकधैव चैकमुक्त्या सर्वमुक्तिरिति। अयं दृष्टिसृष्टिवादोऽद्वैतसिद्धौ विस्तरतः प्रतिपादितो मधुसूदनेन। 'दृष्टिसृष्टिवादस्तु' इत्यस्य 'दूरापास्तः' इत्यनेनान्वयः, तत्र हेतुमाह- सर्वमुक्तिं विनेति। तदर्थेति- मुक्त्यर्थेत्यर्थः, अमुकस्य मुक्त्या सर्वमुक्तिर्भविष्यतीति न कस्यापि निश्चय इति यस्य मुक्त्या सर्वमुक्तिः स चेन्नाऽहं तर्हि तदर्थं यत्नो मम वृथैव, अकृतेऽपि प्रयत्ने यस्य मुक्त्या सर्वमुक्तिस्तत्प्रयत्नादेव ममापि मुक्तिर्भवि-

पारमार्थिकं सहजमुक्तनिरंशब्रह्मस्वरूपं न विरुणद्धीति चेत् ? किं नाम पारमार्थिकं सहजमुक्तत्वम् ?, प्रपञ्चसम्बन्धाभाव इति चेत् ? सोऽयमभाव आत्मनो भिन्नोऽभिन्नो वा ?, आद्ये द्वैतापत्तेर्ब्रह्मणोऽसिद्धिप्रसङ्गः, तदुक्तं वार्त्तिके—

"अव्यावृत्ताऽननुगतं, वस्तु ब्रह्मेति भण्यते।
ब्रह्मार्थो दुर्लभोऽत्र स्याद्, द्वितीये सति वस्तुनि" ॥ १ ॥ इति।

व्यतीत्येवं विचारणायाः सर्वस्यापि प्रत्येकं सद्भावान्न कोऽपि मुक्त्यर्थं यत्नमातिष्ठेदिति दृष्टिसृष्टिवादो न युक्त इत्यर्थः। आंशिकबन्ध-मोक्षोभयप्रसङ्गस्य प्रतिबिम्बादिवादे पूर्वमापादितस्य परिहारमाशङ्कते— अथेति— शुद्धचैतन्यस्य व्यावहारिकमांशिकबद्ध-मुक्तोभयस्वरूपमप्यस्तु, पारमार्थिकं सहजमुक्तनिरंशस्वरूपमप्यस्तु, समसत्ताकयोरेव सांशत्व-निरंशत्वयोर्विरोधो न तु विषमसत्ताकयोरित्यर्थः। पारमार्थिकं सहजमुक्तत्वमेव निरुच्य दर्शयितुं न शक्यत इत्युक्तसमाधानमाशङ्क्य निं शक्यमित्याशयेन पृच्छति— किं नामेति। परः आह— प्रपञ्चेति— चैतन्ये प्रपञ्चसम्बन्धाभाव एव सहजमुक्तत्वं पारमार्थिकमित्यर्थः। विकल्प्य प्रतिक्षिपति— सोऽयमभाव इति— अनन्तरमुपदर्शितप्रपञ्चसम्बन्धाभाव इत्यर्थः। आद्ये प्रपञ्चसम्बन्धाभाव आत्मनो भिन्न इति पक्षे। द्वैतापत्तेरिति—उक्ताभ्युपगमे प्रपञ्चसम्बन्धाभावस्य ब्रह्मभिन्नस्य द्वितीयस्य सद्भावाद् 'अद्वितीयं ब्रह्म' इत्यस्यासिद्धिप्रसङ्ग इत्यर्थः।

उक्तार्थं वार्तिकसंवादमुपदर्शयति— तदुक्तमिति— द्वितीयस्य कस्यचिद् वस्तुनोऽभावान्न ततो व्यावृत्तम्, तत एव च नानुगतमिति सामान्य-विशेषोभयानात्मकमेवंभूतं वस्तु वेदान्तिना ब्रह्मेति शब्देन गीयते, परमात्मनो भिन्नस्य प्रपञ्चसम्बन्धाभावस्योररीकारे प्रपञ्चसम्बन्धाभावात्मकद्वितीयवस्तुनि सति अव्यावृत्ताऽननुगतरूपब्रह्मशब्दार्थो दुर्लभ एव स्यादित्युक्तवार्तिकपद्यार्थः।

अन्त्ये च भावाऽभावशबलैकरूपं ब्रह्म स्यात्, ब्रह्मभाव एव प्रपञ्चाभावस्तदभाव एव च ब्रह्मभाव इत्येकतरस्य विनिगन्तुमशक्यत्वात्, श्रुतेरप्यनुवृत्त्यंश इव व्यावृत्त्यंशेऽप्युपलम्भादिति स्याद्वादकक्षाप्रवेशः।

अन्त्ये च प्रपञ्चसम्बन्धाभाव आत्मनोऽभिन्नः सहजमुक्तत्वमिति द्वितीयपक्षे पुनः। भावेति– चैतन्येन रूपेण भावरूपत्वम्, प्रपञ्चसम्बन्धाभावत्वेन रूपेणाभावरूपत्वमित्येवं भावा-ऽभावोभयात्मकं ब्रह्मेति कक्षीकृतं स्यात्, भावा-ऽभावोभयात्मकवस्त्वभ्युपगमश्च स्याद्वादिन एवेति वेदान्तिनोऽपि तथाभ्युपगमे स्याद्वादितैव प्रसज्यत इत्यर्थः। ननु यदेव ब्रह्म तदेव प्रपञ्चाभाव इत्येकरूपमेव ब्रह्म न भावा-ऽभावोभयरूपमित्यत आह– ब्रह्मभाव एवेति। ब्रह्म-प्रपञ्चसम्बन्धाऽभावयोरैक्यमुभयथापि सम्भवति–यदेव ब्रह्म तदेव प्रपञ्चसम्बन्धाभाव इति य एव प्रपञ्चसम्बन्धाभावः स एव ब्रह्मेति, तत्र प्रपञ्चसम्बन्धाभावस्य ब्रह्मात्मकभावरूपसन्निवेशमाश्रित्य भावरूपमेव ब्रह्मेति यदि गीयते तर्हि ब्रह्मणः प्रपञ्चसम्बन्धाभावात्मकाभावरूपसन्निवेशमवलम्ब्याभावरूपमेव ब्रह्मेति कुतो न गीयते? न चात्र विनिगमकं किञ्चित्, श्रुतिश्च यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इतिविधिरूपतया ब्रह्मप्रतिपादिका, तथा 'अस्थूलमनण्वह्रस्वम्' बृहदारण्यकोपनिषद्, [३, ३, ८] इत्यादिनिषेधरूपतया ब्रह्मप्रतिपादिकाऽपि जागर्त्येवेत्यनुवृत्त-व्यावृत्तोभयरूपमेव ब्रह्मेति वेदान्तिनः स्याद्वादकक्षाप्रवेश आवश्यक इत्यर्थः।

इतोऽपि सहजमुक्तत्वं ब्रह्मणोऽयुक्तम्–यतस्तथाऽभ्युपगमे मुमुक्षुमुद्दिश्य य उपदेशो वेदान्तिनां स्वग्रन्थेषु तस्यानर्थक्यम्, मुमुक्षुर्यदि ब्रह्माभिन्नस्तदा जड एव भवेत्, तस्य च घटादिवन्नोपदेशार्हत्वम्, नाऽपि वेदान्तिमते ब्रह्माभिन्नस्य कस्यचित् सत्त्वमित्यसत्त्वादपि न

किञ्च, सहजमुक्तत्वे ब्रह्मणो मुमुक्षूपदेशानर्थक्यम्, अब्रह्मणो हि नोपदेशो जडत्वादसत्त्वाच्च, ब्रह्मणस्तु मुक्तत्वं स्वतः सिद्धम्, जीवस्याविद्यानिवृत्तिरपि भेदाऽभेदविकल्पाऽसहत्वान्न फलमिति कस्य कः किमुपदिशेत्?। अथ परमार्थतो नास्त्येवोपदेशफलम्—

"न निरोधो न चोत्पत्तिर्न बाधो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" ॥ १ ॥ इति श्रुतेः।

तं प्रत्युपदेशसम्भवः, यदि च मुमुक्षुर्ब्रह्माभिन्नस्तदा तस्य स्वतः सिद्धं मुक्तत्वमिति न तत्रोपदेशस्य साफल्यम्, एवमविद्यानिवृत्तिरपि फलतयाऽभ्युपगता ब्रह्माभिन्ना चेत्? तदाऽसत्यायास्तस्या न फलत्वम्, ब्रह्माऽभिन्ना च सर्वदाऽस्तित्वादेव न फलम्, एवं वेदान्तिमते न ब्रह्मभिन्न उपदेश उपदेशको वेति यथा यथा विचार्यते तथा तथा विशीर्यत एव ब्रह्माद्वैतवाद इत्याह- किञ्चेति। मुमुक्षूपदेशानर्थक्यमेवोपपादयति- अब्रह्मणो हीत्यादिना। उपदेष्टव्यपुरुषाभावमभिप्रेत्याह- कस्येति। उपदेशकपुरुषाभावमभिप्रेत्याह- क इति। अविद्यानिवृत्तिलक्षणमुक्त्यभावमभिप्रेत्याह- किमिति। दुर्दुरूटो वेदान्ती स्वसिद्धान्तावेशादाह- अथेति। परमार्थत उपदेशफलाऽभावे श्रुतिं प्रमाणयति- न निरोध इति- अविद्यैव परमार्थतो नास्तीति न तस्या निरोध इत्यर्थः। अविद्या यदि काचिद् भवेत् तदा तत्त्वज्ञानतस्तस्या निवृत्तिरुत्पद्येत, एवं प्रपञ्चोपि यदि सन् स्यात् तदा तस्योत्पत्तिरविद्यातो भवेत् असतस्तु तस्य नास्त्येवोत्पत्तिरित्याह- न चोत्पत्तिरिति। एवं तत्त्वज्ञानेन नाऽविद्या-तत्कार्ययोरसतोर्बाध इत्याह- न बाध इति। जीवमात्रस्य ब्रह्मरूपत्वाद् ब्रह्माभिन्नस्य कस्यचिदभावात् साधकमुमुक्षु-मुक्तानामप्यभाव इत्याह- न च साधकः। न मुमुक्षुर्न वै मुक्त इति। एषा इयं प्ररूपणा। 'न बाधः' इति स्थाने 'न बद्धः' इति पाठः पञ्चदशीसम्मतः, यत उक्तश्रुतिः पद्यद्वयाभ्यामित्थमवतारिता चित्रदीपप्रकरणे—

प्रतीतितस्तु फलमस्त्येव, अविद्यानिवृत्तिरात्माऽनात्मा वेत्यादि-

---

"बन्ध-मोक्षव्यवस्थार्थमात्मनानात्वमिष्यताम् ।
इति चेन्न यतो माया, व्यवस्थापयितुं क्षमा ॥ २३३ ॥
दुर्घटं घटयामीति, विरुद्धं किं न पश्यसि ? ।
वास्तवौ बन्ध-मोक्षौ तु, श्रुतिर्न सहतेतराम् ॥ २३४ ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" ॥ २३५ ॥

त्रयाणां व्याख्यानं चेत्थम्-

अद्वैताभ्युपगमे बन्ध-मोक्षव्यवस्थानुपपत्तेरात्मभेदोऽङ्गीकर्तव्य इति चोदयति- बन्धमोक्षेति । एकस्याप्यात्मनो मायया बन्ध-मोक्षव्यवस्थोपपत्तेर्नैवमिति परिहरति- न यत इति ॥

मायाऽपि कथं व्यवस्थापयेदित्याशङ्क्य तस्य दुर्घटकारित्वस्वाभाव्यादित्याह- दुर्घटमिति । बन्धस्याविद्यकत्वेऽपि मोक्षो वास्तवोऽभ्युपेतव्य इत्याशङ्क्य श्रुतिविरोधान्नैवमित्याह- वास्तवाविति । न सहतेतराम् अतितरां नैव सहत इत्यर्थः, बन्धमिव मोक्षमपि वास्तवं न सहत इति भावः ॥

मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति- न निरोध इति-निरोधो नाशः, उत्पत्तिर्देहसम्बन्धः, बद्धः सुखदुःखादिधर्मवान्, साधकः श्रवणाद्यनुष्ठाता, मुमुक्षुः साधनचतुष्टयसम्पन्नः, मुक्तो निवृत्ताविद्यः, इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः" इति ॥

परमार्थतो निरोधादेरभावादुपदेशफलमपि परमार्थतो नास्ति, एवमपि प्रतीतित उपदेशफलमस्त्येवेति नाद्वैतवादेऽपि मुमुक्षूपदेशानर्थक्यमित्याह- प्रतीतितस्त्विति, अविद्यानिवृत्तिरात्माऽनात्मेति विकल्पेन यथाऽविद्यानिवृत्तिर्वक्तुं न शक्यते तथैवान्योऽप्यर्थ उक्तविकल्पेनाख्यातुं न शक्य इत्येवं सर्वस्याऽपारमार्थिकस्याऽनिर्वचनीयत्वेऽपि मुमुक्षूपदेशस्य "तत् त्वमसि, अहं

विकल्पेन कस्याप्यर्थस्याख्यातुमशक्यत्वेऽप्युपदेशफलस्य निर्विकल्पस्वरूपबोधस्याऽसम्प्रज्ञातसमाधिसिद्धस्य प्रत्याख्यातुमशक्यत्वाद् इति तदपेक्षया नोपदेशवैफल्यमिति चेत्? न- अविशिष्टप्रतीतेः स्वतः पुरुषार्थत्वाभावे तद्विषयब्रह्मणश्चाजन्यत्वेनोपदेशवैफल्यानुद्धारात्। किञ्च, निर्विकल्पचिदेकाकारवृत्तिविषयत्वमपि ब्रह्मणो विषयतायाभिन्नाभिन्नत्वविचारे दुर्घटम्। ब्रह्माकारत्वमेव ब्रह्मविषयत्वमिति

ब्रह्माऽस्मि" इत्येवंरूपस्य यत् फलं निर्विकल्पस्वरूपबोधः स चासम्प्रज्ञातसमाधौ जायत इत्यसम्प्रज्ञातसमाधिसिद्धस्य तस्य निषेद्धुमशक्यत्वादित्यर्थः। तदपेक्षया प्रतीत्यपेक्षया। अन्येच्छानधीनेच्छाविषयस्यैव पुरुषार्थत्वं भवति, विषयविनाकृतं च निर्विकल्पकज्ञानमात्रं न कस्यचिदिच्छाविषय इति तन्मात्रस्य पुरुषार्थत्वाभावान्न फलत्वम्, जन्यस्यैव च फलत्वम्, निर्विकल्पकज्ञानविषयस्तु ब्रह्म नित्यत्वान्न जन्यमिति तदपि न फलमित्युपदेशानर्थक्यमेवमपि स्यादेवेति प्रतिक्षिपति- नेति। अविशिष्टप्रतीतेः विषयविनिर्मुक्तज्ञानमात्रस्य। तद्विषयेति- प्रतीतिविषयेत्यर्थः। ननु केवलस्य ज्ञानस्य तद्विषयस्य च ब्रह्मणः फलत्वाभावेऽपि ब्रह्मविषयकनिर्विकल्पकावबोधस्य फलत्वं भविष्यतीत्यत आह- किञ्चेति- निर्विकल्पचिदेकाकारवृत्तिविषयत्वं ब्रह्मणो भिन्नमभिन्नं वा?, द्वैतापत्तिभिया ब्रह्मणो भिन्नं तन्नाभ्युपगन्तुं शक्यमिति नाद्यपक्षः सम्भवी, अभिन्नत्वे च ब्रह्मणो नित्यत्वेन तस्यापि नित्यत्वान्नोपदेशफलत्वं तस्येत्युपदेशवैफल्यं दुष्परिहरमिति भावः। वृत्तौ ब्रह्माकारत्वमेव ब्रह्मविषयत्वमिति तदुपहितवृत्तेरुपदेशफलत्वं स्यादिति शङ्कते- ब्रह्माकारत्वमेवेति। वृत्तेर्यो ब्रह्माकारः स वृत्त्याऽभिन्नो ब्रह्मणा वा?, आद्ये वृत्तितादात्म्यमेव तस्येति वृत्तिसम्बन्धस्तस्य समस्ति, न ब्रह्मसम्बन्धः, द्वितीये ब्रह्मतादात्म्यमेव तस्यापि ब्रह्मसम्बन्ध एव तस्य, न वृत्तिसम्बन्ध इति

चेत् ? तस्याकारस्य वृत्तितादात्म्ये ब्रह्मणि कः सम्बन्धः ?, ब्रह्मतादात्म्ये च वृत्तौ कः सम्बन्धः ? इति विचार्यताम् । विचारासहे निर्विकल्पकसम्बन्धे को विचार इति चेत् ? अविचारितरमणीयस्वेच्छामात्रशरणानां मुग्धानामयं पक्षः, न तु परीक्षाक्षमाणाम् । अथ तत्त्वतो ब्रह्माऽसम्बन्धेऽपि निर्विकल्पकवृत्तेरज्ञाननिवर्तकत्वादेव ब्रह्मणि प्रामाण्यमिति चेत् ? न—प्रामाण्ये सत्यऽज्ञाननिवर्तकत्वमज्ञाननिवर्त-

---

ब्रह्मवृत्त्युभयाऽसम्बन्धिन आकारस्य ब्रह्माकारत्वे तद्वत्तया वृत्तेर्वृत्तिसम्बन्धित्वे ब्रह्माकारतया च व्यपदेशासम्भवाद् ब्रह्माकारत्वमपि ब्रह्मविषयत्वं न सम्भवतीति समाधत्ते– तस्याकारस्येति। निर्विकल्पकचिदाकारवृत्तेर्ब्रह्मणा सम्बन्धो विचारासह एवास्माभिरुपेयते, तत्र प्रयोजनाभावाद् विचारो नाद्रियत एवेति पर आह– विचारासह इति। परीक्षका यत् किमपि स्वीकुर्वन्ति तत् परीक्षातो व्यवस्थितमेव, यच्च परीक्षां न क्षमते तन्न स्वीकारक्षेत्रमिति तदभ्युपगमो मुग्धानामेव शोभते, न तु परीक्षाविदग्धानामिति समाधत्ते– अविचारितरमणीयेति। परमार्थतो निर्विकल्पकवृत्तेब्रह्मणा समं सम्बन्धो नास्त्येव, अथापि ब्रह्मगताज्ञाननिवर्तकत्वाद् ब्रह्मणि प्रामाण्यं तस्याः, तत एव मुमुक्षूपदेशः फलवानिति पर आरेकते– अथेति। तत्त्वतः परमार्थतः। ब्रह्मगताज्ञाननिवर्तकत्वान्निर्विकल्पकवृत्तेः प्रामाण्यम्, प्रामाण्याच्चोक्ताज्ञाननिवर्तकत्वमित्येवमन्योऽन्याश्रयान्नोक्तोपगमः श्रेयानिति समाधत्तेनेति। अपि च निर्विकल्पकवृत्तेर्ब्रह्मणा सह विषयविषयिभावलक्षणसम्बन्धो यदि परमार्थतो नास्ति तर्हि 'निर्विकल्पकवृत्तिविषयस्य ब्रह्मणोऽबाधितत्वादबाधितब्रह्मविषयत्वेन प्रामाण्यं तस्याः परमार्थतः, अन्यज्ञानस्य तु बाधितविषयत्वान्न वस्तुतः प्रामाण्यम्, किन्तु व्यवहारकालाबाध्यवस्तुविषयत्वाद् व्यवहारतस्तस्य प्रामाण्याभिमानेऽपि न वस्तुतः प्रामाण्यम् इति सिद्धान्तोऽपि वेदान्तिनो दूराद-

कत्वे च सति प्रामाण्यमित्यन्योऽन्याश्रयात्, स्वविषयप्रमात्वेनैवाविद्यानिवर्तकत्वान्निर्विकल्पस्य ['तत् त्वमसि' इति] महावाक्यार्थज्ञानस्यैवाबाधितविषयतया प्रमात्वेन तथात्वम्, प्रत्यक्षादीनां तु बाधितविषयतया भ्रमत्वाद् व्यवहारसामर्थ्येन प्रामाण्याभिमानेऽपि न तथात्वमिति वेदान्तसिद्धान्तान्निर्विकल्पवृत्ति-ब्रह्मणोः सत्यसम्बन्धाभावे सर्वमेव विलूनशीर्णं स्यादिति मन्तव्यम्। अथाऽस्तु महावाक्यजनिर्विकल्पके ब्रह्मण औपरागिक एव सम्बन्धः, प्रामाण्यं च द्वैतानवगाहित्वेनैव, अत एव घटादिद्वैतेज्ञानस्याप्यज्ञाते सन्मात्रांशेऽद्वैतेऽज्ञातज्ञापकतया प्रामाण्याभ्युपगमेऽपि द्वैतावगाहितयाऽप्रामाण्यादेव नाज्ञाननिवर्तकत्वमिति चेत्? तत् किं द्वैतानवगाह्यद्वैतज्ञानत्वेनाज्ञान-

---

पगत एव वृत्ति-ब्रह्मणोर्वास्तविकसम्बन्धानभ्युपगम इत्याह– स्वविषयप्रमात्वेनैवेति। तथात्वम् अविद्यानिवर्तकत्वम्, एवमग्रेऽपि। पुनर्वेदान्ती शङ्कते–अथेति। ननु ब्रह्मणि निर्विकल्पकसम्बन्धस्यौपरागिकत्वे वास्तविकसम्बन्धस्याभावात् कथं प्रामाण्यं तस्येत्यत आह– प्रामाण्यं चेति। अत एव द्वैतानवगाहित्वेन प्रामाण्यस्य स्वीकारादेव, अद्वैतावगाहित्वेन प्रामाण्यं यदाऽनुमतं भवेत् तदा 'सन् घटः' इत्यादिज्ञानानामपि सदंशस्याऽज्ञातस्याऽद्वैतरूपस्य ज्ञापकत्वेनाऽद्वैतावगाहित्वतः प्रामाण्यं भवेत्, प्रामाण्याच्च तज्ज्ञानानामज्ञाननिवर्तकत्वमापद्येत, यदा च द्वैतानवगाहित्वेनैव प्रामाण्यमभिमतं तदा 'सन् घटः' इत्यादिज्ञानानां घटादिद्वैतावगाहित्वेन द्वैतानवगाहित्वाभावान्न प्रामाण्यम्, किन्तु द्वैतावगाहित्वादप्रामाण्यमेवेति न तेषामज्ञाननिवर्तकत्वमित्यर्थः। सिद्धान्ती पृच्छति– तत् किमिति। पर उत्तरयति– ओमिति चेदिति– द्वैतानवगाह्यद्वैतज्ञानत्वेनाऽज्ञाननिवर्तकत्वं स्वीक्रियत एवास्माभिरित्यर्थः। एवं सति सुषुप्तावानन्दस्वरूपं ब्रह्मैवाज्ञातं

निवर्तकत्वम्?, ओमिति चेत्? सुषुप्तावतिप्रसङ्गः। महावाक्यजन्य-तादृशज्ञानत्वेनाज्ञाननिवर्तकत्वमिति चेत्? न-स्ववासनामात्रशरण-त्वात्, महावाक्यजन्यत्वनिवेशे द्वैतानवगाहित्वविशेषणवैयर्थ्यात्, विनापि विचारमापाततः सकृदाकर्णितमहावाक्यार्थज्ञानादज्ञाननिवृ-त्तिप्रसङ्गाच्च। वेदान्तजन्यनिर्विकल्पात्मकसाक्षात्कारस्य स्वतः प्रामाण्येऽपि वादिविप्रतिपत्तिजसंशयप्रतिबन्धेनाऽज्ञाननिवर्तकत्वा-सामर्थ्यात् विचारोऽप्यपेक्ष्यत इति चेत्?, तत् किं महावाक्यार्थ-ज्ञानस्याज्ञाननिवर्तकतावच्छेदककोटौ वादिविप्रतिपत्तिजसंशयाभाव-

---

भासते, न तु घटादिद्वैतमिति तज्ज्ञानादप्यज्ञाननिवृत्तिः स्यादिति सिद्धान्ती आह- सुषुप्तावतिप्रसङ्ग इति। 'तत् त्वमसि' इत्यादिमहा-वाक्यजन्यद्वैतानवगाह्यद्वैतज्ञानत्वेनाज्ञाननिवर्तकत्वमित्युपगमे न सुषु-प्तावतिप्रसङ्ग इति पर आशङ्कते- महावाक्यजन्येति। यदि द्वैतानवगाह्य-द्वैतज्ञानस्याऽज्ञाननिवर्तने सामर्थ्यं तर्हि महावाक्यजन्यं तद् भवतु कारणान्तरजन्यं वा तद् भवतु अज्ञानं निवर्तयदेव, तत्र महावाक्य-जन्यस्यैव तस्य निवर्तकत्वमित्युपगमे स्ववासनैव प्रमाणं स्यादित्य-नुपगन्तव्यमेव प्रामाणिकैरिति समाधत्ते- नेति। किञ्च, महावाक्य-जन्यज्ञानं नियमेन द्वैतानवगाह्येव भवतीति महावाक्यजन्याद्वैतावगाहि-ज्ञानत्वेनाऽज्ञाननिवर्तकत्वमित्युक्तावपि 'सन् घटः' इत्यादिज्ञानानां वारणसम्भवाद् द्वैतानवगाहित्वविशेषणस्य वैयर्थ्यमपीत्याह- महा-वाक्येति। दोषान्तरमप्याह- विनापीति। परस्तत्र विचारस्यावश्यकत्व-माशङ्कते- वेदान्तजन्येति। 'अज्ञाननिवर्तकत्वासामर्थ्यात्' इति स्थाने 'अज्ञाननिवर्तनासामर्थ्यात्' इति पाठो युक्तः। सिद्धान्ती वेदान्तिनं पृच्छति- तत् किमिति- वादिविप्रतिपत्तिजन्यसंशयाभावकूटविशिष्ट-महावाक्यार्थज्ञानत्वेनाज्ञाननिवर्तकत्वं विचारपूर्वकमहावाक्यार्थज्ञान-

कूटो निवेशनीयः ?, उत विचारपूर्वकत्वम् ?, आद्ये विप्रतिपत्त्यनुपस्थितावादित एवाज्ञाननिवृत्तिप्रसङ्गः, द्वितीये च विचाराणामननुगतत्वादननुगमः । अथ द्वैतज्ञानोपमर्दकयुक्तित्वेन विचाराणामनुगमः, अत एव "फलवत्सन्निधावफलं तदङ्गम्" इति न्यायाद् भ्रमसिद्धा अपि भिन्नभिन्ना जीवेश्वरविभागादिप्रक्रियाः शास्त्रेणानूद्यन्ते, तदनुवादपूर्वं द्वैतोपमर्दकयुक्त्यवतारेण प्रधानीभूतात्मतत्त्वसिद्धिसम्भवादिति चेत् ? न-तथापि द्वैतज्ञानोपमर्दकयुक्त्युपबृंहितत्वं सामानाधि-

---

त्वेनाज्ञाननिवर्तकत्वं वेत्यर्थः । आद्ये विप्रतिपत्तिजन्यसंशयाभावकूटस्याऽज्ञाननिवर्तकतावच्छेदककोटौ निवेश इति पक्षे। विप्रतिपत्त्यनुपस्थितौ वादिविप्रतिपत्तेरभावे। आदित एव प्रथमत एव। द्वितीये विचारपूर्वकत्वस्याज्ञाननिवर्तकतावच्छेदककोटौ निवेश इति पक्षे। विचाराणामननुगतत्वात् अनेकत्वात्, तथा चैकविचारपूर्वकत्वस्य निवेशे तद्विचारस्याभावेऽन्यविचारपूर्वकमहावाक्यार्थज्ञानतोऽप्यज्ञानाऽनिवृत्तिप्रसङ्ग इत्यर्थः। द्वैतज्ञानोपमर्दकयुक्तिपूर्वकमहावाक्यार्थज्ञानत्वेनाऽज्ञाननिवर्तकत्वाभ्युपगमे या या युक्तयो द्वैतज्ञानोपमर्दिन्यस्तासां सर्वासामपि द्वैतज्ञानोपमर्दकत्वेन सङ्कटात् तदन्यतमयुक्तिपूर्वकमहावाक्यार्थज्ञानतोऽज्ञाननिवृत्तेः सम्भव इत्याशङ्कते– अथेति। अत एव द्वैतोपमर्दकयुक्तित्वेन विचारानुगमस्य तत्पूर्वकत्वस्याऽज्ञाननिवर्तकतावच्छेदककोटौ निवेशादेव। जीवेश्वरविभागादिप्रक्रियाणामनुवादस्य प्रयोजनमुपदर्शयति– तदनुवादपूर्वमिति– जीवेश्वरविभागादिप्रक्रियानुवादपूर्वकमित्यर्थः, अत्र 'फलवत्सन्निधौ०' इतिन्यायसङ्गमना चेत्थम्– प्रधानीभूतात्मतत्त्वसिद्धिफलकत्वाद् द्वैतोपमर्दकयुक्त्यात्मकविचारः फलवान्, तदवतारार्थं तत्सन्निधौ श्रूयमाणा या भ्रमसिद्धा भिन्नभिन्ना अपि जीवेश्वरविभागादिप्रक्रियास्ताः प्रधानीभूत फलाजनकत्वादफलमपि फलवदुक्तविचाराङ्गमिति। प्रतिक्षिपति– नेति।

करण्यविशिष्टविशेष्यतासम्बन्धेन द्वैताभावव्याप्यधर्मवत्ताज्ञानवैशिष्ट्यरूपं वाच्यम्, अन्यथाऽतिप्रसङ्गात्, तच्च निर्धर्मके ब्रह्मणि न सम्भवतीत्यनुपपत्तेः, द्वैतज्ञानोपमर्दकयुक्त्युपबृंहितमहावाक्यार्थज्ञानत्वेन महावाक्यार्थज्ञानोपबृंहकतादृशयुक्तित्वेन वाऽज्ञाननिवर्तकत्वमितिविनिगमनाविरहाच्च। "तस्याभिध्यानाद् योजनात् तत्त्वभावाद्

द्वैताभावेति- सदात्मकत्व-ज्ञानात्मकत्वा-ऽऽनन्दस्वरूपत्वादयो धर्मा ब्रह्मण्येव, तत्र द्वैताभावोऽस्तीति द्वैताभावव्याप्यास्त एव धर्मास्तद्वत्ताज्ञानस्य वैशिष्ट्यं सामानाधिकरण्यविशिष्टविशेष्यतासम्बन्धेन; अत्रोक्तज्ञानात्मकविचारोऽन्यपुरुषे, तदन्यपुरुषे च महावाक्यार्थज्ञानम्, तदपि विशेष्यतासम्बन्धेनोक्तज्ञानविशिष्टं स्याद् विशेष्यतापदेन समानविशेष्यता ग्राह्या, तथा चान्यपुरुषीययुक्तयात्मकज्ञाने यदेव ब्रह्मरूपं विशेष्यं तदेव महावाक्यार्थज्ञानस्यापि तदन्यपुरुषगतस्य विशेष्यम्, यद्यपि निर्विकल्पकं तत् तथापि निर्विकल्पकज्ञानीयविषयताया अपि विशेष्यतारूपतया स्वीकारात्, अन्यथा प्रकारताविशेष्यता-संसर्गताभिन्नायास्तस्यास्तुरीयत्वापत्तेः, अतः सामानाधिकरण्यनिवेशः, सामानाधिकरण्यं चात्रैककालावच्छिन्नैकाधिकरणवृत्तित्वरूपम्, तेन नैकपुरुषीयविभिन्नकालीनविचारवैशिष्ट्यमादायातिप्रसङ्गः, ब्रह्माविशेष्यकनिरुक्तज्ञानात्मकविचारमादायातिप्रसङ्गवारणाय विशेष्यत्वस्य निवेशः। तच्च द्वैताभावव्याप्यधर्मवत्ताज्ञानवैशिष्ट्यरूपं द्वैतज्ञानोपमर्दकयुक्त्युपबृंहितत्वं च। निर्धर्मक इति-ब्रह्मणो निर्धर्मकत्वाद् द्वैताभावधर्म एव तत्र नास्तीति न तद्विशेष्यकनिरुक्तधर्मवत्ताज्ञानसंभव इति कुतस्तद्वैशिष्ट्यसम्भव इत्यर्थः। विनिगमनाविरहादपि न विचारपूर्वकमहावाक्यार्थज्ञानत्वेनाऽज्ञाननिवर्तकत्वमित्याह- द्वैतज्ञानोपमर्देकेति। तादृशयुक्तित्वेन द्वैतज्ञानोपमर्दकयुक्तित्वेन। श्रुतेर्विनिगमकप्रमाणतया वेदान्ती आशङ्कते- तस्येति- ब्रह्मण इत्यर्थः। अभिध्यानात्

भूयश्चान्ते विश्व-मायानिवृत्तिः" इति श्रुतिरेव विचारपूर्वकमहावाक्यार्थ-जात्मसाक्षात्कारस्य साक्षादज्ञाननिवर्तकत्वं विनिगमयतीति चेत्? तर्हि तामेव परिपृच्छ-कथं मायां मिथ्यात्वेन निवृत्तामपि ज्ञानेन निवर्तयसि? कथं वा प्रपञ्चवैचित्र्ये प्रवर्तयसि? कथं वा 'न जानामि' इति साक्षिप्रतीतिसिद्धाऽज्ञानशब्दवाच्यां तां ज्ञानस्य नित्यतया तदभावानुपपत्तेर्धर्मि-प्रतियोगिज्ञाना-ऽज्ञानाभ्यां च व्याघातापत्तेर्भाव-

---

श्रवण-मननादिपूर्वकनिदिध्यासनात्। योजनात् द्वैतज्ञानोपमर्दकयुक्तित उपबृंहणात्। तत्त्वभावात् परमार्थतोऽबाधितत्वात्। 'भूयश्च' इत्य-स्याभिध्यानादावन्वयः। अन्ते तत्त्वसाक्षात्कारे सति। विश्व मायानिवृत्तिः विश्वस्य प्रपञ्चस्याविद्यकस्य मायायाश्च प्रपञ्चोपादानभूताऽविद्यायाश्च निवृत्तिः। समाधत्ते- तर्हीति। तामेव श्रुतिमेव। प्रष्टव्यस्वरूप-मेवोपदर्शयति- कथमिति - अस्य 'निवर्तयसि' इत्यनेनान्वयः। निवृत्ता-मपि नित्यनिवृत्तामपि, या कदाचिदपि न विद्यते तस्या मायाया निवर्तनमशक्यमेवेत्याशयः। कथं वेति- मायाऽप्यसती प्रपञ्चवैचि-त्र्यमप्यसदित्यसती मायाऽसत्प्रपञ्चवैचित्र्यं कर्तुमसमर्थैवेत्येवं वस्तु-स्थितावपि तां प्रपञ्चवैचित्र्ये हे श्रुते! कथं त्वं प्रवर्तयसीत्यर्थः। कथं वेति-'न जानामि' इत्याकारकसाक्षिप्रतीत्या सिद्धा याऽज्ञानशब्द-वाच्या माया तां कथं वाऽपह्नोषीत्यन्वयः। ननु 'न जानामि' इति प्रतीतेर्ज्ञानाभाव एव विषयो न तु भावरूपा मायेत्यत आह- ज्ञानस्येति। तदभावेति-ज्ञानाभावेत्यर्थः। ननु नात्र ज्ञानाभावो ज्ञानध्वंसो ज्ञान-प्रागभावो वा विवक्षितो येन नित्यस्य ज्ञानस्य तदनुपपत्तिर्भवेत्, किन्तु ज्ञानात्यन्ताभाव एव 'न जानामि' इति प्रतीतिविषयः, अत्यन्ताभावश्च नित्यस्यापि प्रतियोग्यनधिकरणवृत्तिर्भवतीत्यत आह- धर्मीति- विशिष्टबुद्ध्यात्मकाभावज्ञाने धर्मिज्ञानं प्रतियोगिज्ञानं च कारणमिति 'न जानामि' इति ज्ञानं धर्मिण आत्मनः प्रतियोगिनो

रूपामप्यनिर्वाच्यशब्देनाऽपह्नोषि ?। ज्ञानविरोधित्वेन भावत्वात्, तात्त्विकरूपापेक्षया चाभावत्वादनिर्वाच्यत्वं न्यायायातमिति चेत् ? न-एवं ह्युभयरूपताया एव न्यायायातत्वात्, विरोधस्य समष्टि-व्यष्टय-

---

ज्ञानस्य च ज्ञाने सत्येव स्यात्, धर्मिज्ञान-प्रतियोगिज्ञानयोः सत्त्वे च तयोरपि ज्ञानसामान्याभावप्रतियोगित्वात् तत्सत्त्वे च तदभावस्याभावादेव न तज्ज्ञानसम्भवः, एवं ज्ञानज्ञानमप्यात्मरूपधर्मिण्येव भवेदिति प्रतियोगिमत्ताज्ञानस्याभावज्ञानप्रतिबन्धकत्वादपि न तत्सत्त्वे ज्ञानाभावज्ञानसम्भवः, अथ धर्मि-प्रतियोगिनोर्ज्ञानं नास्ति तदा तदुपकारणाभावादेव न ज्ञानसामान्याभावज्ञानसम्भव इत्यतो भावरूपाज्ञानमेव 'न जानामि' इति प्रतीतिविषय इति युक्तया सिद्धां भावरूपामपि तामनिर्वाच्यशब्देनाऽपह्नोषीत्यर्थः। वेदान्ती शङ्कते-ज्ञानविरोधित्वेनेति- ज्ञानस्य भावरूपस्य विरोधी भाव एव भवति, यथा-आलोकस्य भावस्य विरोधि भावभूतं तम इति ज्ञानविरोधित्वेनाऽज्ञानस्य भावत्वादित्यर्थः। तत्त्वतो भावरूपत्वे तस्य बाधो न भवेद्, भवति च बाधस्तस्येत्यतः, तात्त्विकरूपापेक्षया तस्य अभावत्वमिति भावत्वमभावत्वं च विरुद्धं नैकत्र सम्भवतीत्यतः, अनिर्वाच्यत्वं न्यायायातमिति। एकरूपापेक्षयैव भावत्वमभावत्वं विरुद्धत्वान्नैकत्र सम्भवति, भिन्नरूपापेक्षया च भावत्वाऽभावत्वे न विरुद्धे इति ताभ्यां निर्वचनीयत्वं तस्य सम्भवतीति नाऽनीर्वचनीयत्वं तस्येति समाधत्ते- नेति। हि यतः। एवं ज्ञानविरोधित्व-तात्त्विकत्वरूपभेदेन। उभयरूपताया एव भावाऽभावोभयरूपताया एव। ननु विरोधान्न भावा-ऽभावोभयरूपत्वस्यैकत्र सम्भव इत्यत आह- विरोधस्येति- 'परिहाराद्' इत्यनेनान्वयः। समष्टीति- यथाऽज्ञानस्य समष्टिरूपत्वेनैकत्वं व्यष्टिरूपेणाऽनेकत्वमित्येवमपेक्षाभेदेनैकत्वा-ऽनेकत्वयोरेकत्राऽज्ञाने सम्भवान्न विरोधस्तथैव भावा-ऽभावरूपत्वयोरप्युक्तदिशाऽपेक्षाभेदेनैकत्राऽज्ञाने सम्भवान्न विरोध इत्येवं विरोधस्य परिहारादित्यर्थः। किञ्च, समष्टिरूपेणाज्ञान-

भिप्रायेणैकत्रैकत्वा-ऽनेकत्वयोरिवापेक्षाभेदेनैव परिहारात्, व्यावहारिकाऽतिरिक्तसमष्टिस्वीकारे च चरमत्वाभिमततत्तत्समष्ट्यन्तर्भावेन क्लृप्तेषु यावत्सु समष्ट्यन्तरस्वीकारापत्तावनवस्थादौस्थ्याद्

स्यैकत्वं यदभ्युपेयते परेण तदनवस्थादोषदूषितमेव, यतस्त्रिविधा व्यष्टयस्त्रिविधाश्च समष्टयः पूर्वमुपदर्शिताः, तत्र चरमत्वेनाभिमतसमष्टि-तत्पूर्वाभिमतसकलसमष्टितत्समस्तस्वरूपैकसमष्टेरपराया अपि सम्भवेन तत्स्वीकारस्याप्यावश्यकतया पुनस्तत्समष्टि-तत्पूर्वाभिमतसकलसमष्टिस्वरूपैकापरसमष्टिस्वीकारस्याप्येवं सम्भवे तद्दिशा पूर्वपूर्वाभ्युपगतसकलसमष्टिस्वीकारपरम्परापत्तितोऽनवस्थातो व्यवहारस्यैवोच्छेदान्नाऽतिरिक्तव्यावहारिकसमष्टिस्वीकारो ज्यायानित्याह- व्यावहारिकेति। अज्ञानस्य रूपभेदापेक्षया भावा-ऽभावोभयरूपस्याऽविरुद्धस्य सिद्धौ युगपदुभयरूपस्य प्राधान्यविवक्षायामेकशब्दस्य युगपत्प्रधानीभूतभावा-ऽभावोभयरूपाऽज्ञानप्रतिपादकस्य समासरूपस्य वाक्यरूपस्य वा कस्यचिदभावात् कथञ्चिदनिर्वचनीयत्वमप्यज्ञानस्य स्याद्वादप्रमाणराजमवलम्ब्य सङ्गच्छत इत्याह- इत्थं चेति- विभिन्नरूपापेक्षयाऽज्ञानस्य भावा-ऽभावोभयरूपत्वसिद्धौ चेत्यर्थः। इभयधर्मेति- भावत्वा-ऽभावत्वोभयधर्मेत्यर्थः, सप्तभङ्गीमहावाक्यस्यानिर्वाच्यत्वमपि सङ्गच्छत इत्यन्वयः, प्रकृते सप्तभङ्गीमहावाक्यम्- 'स्याद् भाव एवाऽज्ञानम्' १, 'स्यादभाव एवाज्ञानम्' २, 'स्याद् भाव एव स्यादभाव एव चाज्ञानम्' ३, 'स्यादनिर्वचनीयमेवाज्ञानम्' 'स्याद् भाव एव स्यादनिर्वचनीयमेवाज्ञानम्' ५, 'स्यादभाव एव स्यादनिर्वचनीयमेवचाज्ञानम्' ६, 'स्याद् भाव एव स्यादभाव एव स्यादनिर्वचनीयमेव चाज्ञानम्' ७ इति, एतत्सप्तभङ्गीमहावाक्यषटकतुरीयभङ्गप्रतिपाद्यत्वादनिर्वचनीयत्वस्य सप्तभङ्गीमहावाक्यस्थत्वम्, स्वप्रतिपादकभङ्गघटितत्वसम्बन्धेनाऽनिर्वचनीयत्वं सप्तभङ्गीमहावाक्ये तिष्ठतीति कृत्वा। नन्वेवं कथञ्चिदनिर्वचनीयत्वमज्ञानस्यो-

व्यवहारस्यैवोच्छेदप्रसङ्गात्, इत्थं चैकशब्देनोभयधर्मोपरक्तविवक्षायामनिर्वाच्यत्वमपि सप्तभङ्गीमहावाक्यस्थं सङ्गच्छते, सर्वथाऽनिर्वाच्यत्वे तु शशविषाणप्रख्यत्वमिति किं न विचारयसि ?। तदिदमुक्तं प्रभुश्रीहेमसूरिभिः—

"माया सती चेद् द्वयतत्त्वसिद्धिरथाऽसती हन्त ! कुतः प्रपञ्चः ?।
मायैव चेदर्थसहा च तत् किं, माता च वन्ध्या च भवेत् परेषाम्।।"

[अन्ययोगव्य० १३] इति।

पपादितं स्यात्, तच्च नास्माकमनुमत किन्तु सर्वथाऽनिर्वचनीयत्वमेव, तच्च न सप्तभङ्गीमहावाक्यस्थमिति न स्याद्वादिकक्षाप्रवेशो वेदान्तिन इत्यत आह— सर्वथाऽनिर्वाच्यत्वे त्विति— यदि सर्वथाऽनिर्वचनीयत्वमेवाज्ञानस्य तदा शशविषाणतुल्यत्वमेवास्य, एवं च यथा शशविषाणादसतः किमपि कार्यं नोपजायते तथाऽसतोऽज्ञानादपि प्रपञ्चो न भवेदिति ततो जगत्सृष्टिप्रतिपादनं भवतोऽसङ्गतमेव स्यादिति किं न विचारयसीत्यर्थः।

उक्तार्थं श्रीहेमचन्द्रसूरिभगवद्वचनं संवादकतयोपदर्शयति— तदिदमुक्तमिति। मायेति— सती मायाऽभ्युपेयते चेत् तर्हि—एका माया द्वितीयं च ब्रह्मेति द्वयतत्त्वसिद्धिरिति अद्वैतवादो वेदान्तिनोऽपहस्तितः स्यात्, अथासती मायाऽभ्युपेयते, हन्तेति खेदे, एवं सति असतः शशविषाणस्य यथा नार्थक्रियाकारित्वं, तथाऽसत्याया मायाया अपि नार्थक्रियाकारित्वम्, कुतः प्रपञ्चः ? प्रपञ्चो न भवेदेव कारणाभावात्, मायैव चेदर्थसहा च असत्येव माया अर्थक्रियाकारिणी चेति तत् तर्हि, परेषां वेदान्तिनाम्, माता च अपत्यजननी च वन्ध्या च अनपत्या जननी च, किं भवेत् अर्थाद् विरोधान्न भवत्येव, तथा व्याघातान्माया चार्थसहा चेति न सम्भवतीत्यर्थः, 'भवत्परेषाम्' इति पाठे तु जिनमतबाह्यानामित्यर्थः॥

कथं च ज्ञानस्य निर्धर्मकत्व–नित्यत्वाद्यभिप्रैषि ?, भेदेनाऽभेदेन वा धर्म-धर्मिभावानुपपत्तेः, ज्ञानाऽनित्यत्वपक्षे तद्व्यक्तिभेद-ध्वंस-प्रागभाव-समवाय-ज्ञानत्वजात्याद्यभ्युपगमे गौरवाद्

ज्ञानस्वरूपस्य ब्रह्मणो निर्धर्मकत्व-नित्यत्वैकत्वाभ्युपगमोऽपि वेदान्तिनो न युक्तिसह इत्याशयेन वेदान्तिनं पृच्छति– कथं चेति। 'नित्यत्वादि' इत्यादिपदादेकत्वपरिग्रहः। वेदान्ती निर्धर्मकत्वाद्युपपादकयुक्तिजालमाशङ्कते– भेदेनेति– ब्रह्मणि यः कश्चिद् धर्मोऽभ्युपगतः स्यात् स ब्रह्मणो भिन्नो वा ? अभिन्नो वा भवेत् ? आद्ये भिन्नत्वाऽविशेषाद् धर्मान्तराणामपि ब्रह्मधर्मत्वं स्यात्, यथा वा धर्मान्तराणां न ब्रह्मधर्मत्वं तथा ब्रह्मधर्मत्वेनाभ्युपगतस्यापि ब्रह्मधर्मत्वं न भवेदेव, द्वितीये यथा घटो न घटधर्मस्तथा ब्रह्मस्वरूपमेव ब्रह्मधर्मो न सम्भवतीत्येवं भेदेनाऽभेदेन वा धर्म-धर्मिभावानुपपत्तेर्निर्धर्मकत्वं ब्रह्मण इत्यर्थः। ज्ञानानित्यत्वपक्ष इति– ज्ञानस्याऽनित्यत्वं तदैव भवेद् यदि ज्ञानमुत्पद्येत, एवं चैकं ज्ञानमुत्पद्यते, अपरं च विनश्यति, तदन्यद्विनष्टम्, किञ्चिच्चोत्तरकाले अविष्यतीत्येवमनेकानि ज्ञानानि स्युरिति तेषां परस्परं भेदाः प्रतियोगिभेदादनेकेऽभ्युपगन्तव्याः, एवं यावन्ति ज्ञानानि तावन्तस्तत्प्रतियोगिका ध्वंसाः प्रागभावाश्चाभ्युपगन्तव्याः, एवं यानि ज्ञानानि नैकात्मस्वरूपाणि सम्भवन्तीति तेषां भिन्नानामात्मनि समवायोऽपि स्वीकर्तव्यः, एवं भिन्नेषु तेषु ज्ञानं ज्ञानमित्यनुगतप्रतीतिर्नैकज्ञानत्वजात्यभ्युपगममन्तरेणेति ज्ञानत्वजातिरभ्युपेया, तत्समवायोऽपि तेष्वभ्युपगन्तव्य इत्येवं ज्ञानानित्यत्वपक्षे गौरवात्, ज्ञानस्य नित्यत्वाभ्युपगमे तु तदेकमेवेत्येकत्वाभ्युपगम आयात एव, तत्र च भेदाद्यनभ्युपगमेनातिलाघवादित्यर्थः। यथा च 'घटः पटाद् भिन्नः' इत्येवंस्वरूपैव घट-पटादीनां भेदः प्रतीयत इति तेषां स्वरूपतो भेदः, नैवं ज्ञानस्य स्वरूपतो भेदप्रतीतिरस्ति यद्बलात् स्वरूपभेदं ज्ञानस्याभ्युपेमहि, किन्तु विषयविशेषं विशेषण-

एकत्वाभ्युपगमे चातिलाघवात् 'घटज्ञानं पटज्ञानम्' इत्युपाधिभेदपुरस्कारेणैव ज्ञानभेदप्रतीतेः, वस्तुतस्तु 'ज्ञानं ज्ञानम्' इत्येकरूपावगमात् तदुत्पत्तिविनाशप्रतीत्योश्चावश्यकल्प्यविषयसम्बन्धविषयतयाऽप्युपपत्तेः, उपाधिपरामर्शमन्तरेण स्वत एव घटान्तराद् घटान्तरस्य भेदप्रतीतेस्तत्प्रतिबन्दिग्रहासम्भवाद्, अन्यथाऽऽकाश-काल-दिशामपि नानात्वापत्तिरित्यादियुक्तेरिति

तयोपादायैव तद्भेदप्रतीतिरित्युपाधिभेदमेवावलम्बते तद्भेदप्रतीतिरित्याह– घटज्ञानमिति। यदा चोपाधिभेदतो भेदप्रतीतिव्यवस्था तदैकव्यक्तित्वान्न तत्र ज्ञानत्वजातिः, किन्तु ज्ञानस्यैकत्वादेव तत्रानुगतप्रतीतिरित्यनुगतप्रतीतिबलाज्ज्ञानस्यैकत्वमेव सिद्ध्यतीत्याह– वस्तुतस्त्विति– परमार्थतस्त्वित्यर्थः। नन्वेवं ज्ञानस्य नित्यत्वे एकत्वे च 'घटज्ञानमुत्पद्यते, पटज्ञानं विनश्यति' इत्येवमुत्पाद-विनाशप्रतीत्योः का गतिरित्यत आह– तदुत्पत्तीति– 'घटज्ञानमुत्पद्यते' इत्यस्य ज्ञाने घटसम्बन्ध उत्पद्यत इति, 'पटज्ञानं विनश्यति' इत्यस्य ज्ञाने पटसम्बन्धो विनश्यतीत्येवं विषयसम्बन्धोत्पाद-विषयसम्बन्धविनाशविषयकत्वादेव ज्ञानोत्पत्तिविनाशप्रतीत्योरुपपत्तेः, विषयसम्बन्धश्चाभ्युपेयत एवेत्यर्थः। यथा च घटस्यैकस्याऽपरघटाद् भेदप्रतीतिरुपाधिपरामर्शमन्तरेणैव भवतीति स्वरूपतो घटादीनां भेदः, एवं यद्येकस्य ज्ञानस्य ज्ञानान्तरादुपाधिपरामर्शमन्तरेणैव भेदप्रतीतिरुपजायेत तदा तत्प्रतिबन्द्या ज्ञानस्यापि ज्ञानान्तरात् स्वरूपतो भेदः स्वीक्रियेत, न चैवमित्याह– उपाधिपरामर्शमन्तरेणेति। अन्यथा उपाधिपुरस्कारेणापि भेदप्रतीतेः स्वरूपतो भेदविषयकत्वाभ्युपगमे। आकाशेति– घटाकाशः पटाकाशाद् भिन्नः, अयं दिवस एतस्माद् दिवसादन्यः, प्राची दिक् प्रतीचीतो भिन्नेत्याद्युपाधिपुरस्कारेणाऽऽकाशादीनामपि भेदप्रतीतेस्तेषामपि स्वरूपतो नानात्वापत्तेरित्यर्थः। प्रति-

चेत् ? न-एकैकविलक्षणजात्यन्तरात्मकभेदाऽभेदसम्बन्धेन धर्म-धर्मिभावोपपत्तेः, तद्व्यक्तिभेदादिकल्पनापेक्षया तदभावकल्पनपुरःसरमेकत्वाभ्युपगम एव विपरीतगौरवात्, सप्रतियोगिकपदार्थस्योपाधिभेदपुरस्कारेणैव वास्तवभेदतिरोधानेऽभावादेरपि एकत्वापत्तेः,

---

क्षिपति- नेति। एकैकेति- न भेदरूपो भेदाभेदोभयात्मकसम्बन्धः, येन "प्रत्येकं यो भवेद् दोषो द्वयोर्भावे कथ न सः ?"। इति वचनात् प्रत्येकपक्षभाविदोष उभयात्मकसम्बन्धेऽपि भवेत्, किन्तु प्रत्येकविलक्षणत्वेन जात्यन्तरात्मक एव भेदाभेदसम्बन्धः, तेन सम्बन्धेन ज्ञानधर्मतयाऽभिमतस्य ज्ञानेन सह धर्म-धर्मिभावोपपत्तेर्न निर्धर्मकत्वं ज्ञानस्येत्यर्थः। यच्च ज्ञानानित्यत्वपक्षे तद्व्यक्तिभेदादिकल्पने गौरवमभिहितं तत्राह- तद्व्यक्तिभेदेति- ज्ञानस्यैकत्वं तदा भवेद् यदि तद्व्यक्तिभेदो न भवेदिति तद्व्यक्तिभेदाऽभावकल्पनपुरस्सरं तदेकत्वकल्पनमिति तद्व्यक्तिभेदकल्पनापेक्षया तदेकत्वकल्पनायामेव गौरवम्, एवं प्रागभावाऽप्रतियोगित्वे सति ध्वंसाऽप्रतियोगित्वं नित्यत्वम्, तत्कल्पनं तदा स्याद् यदि प्रागभावप्रतियोगित्वाभावकल्पना ध्वंसप्रतियोगित्वाभावकल्पना च पूर्वं भवेदिति तत्कल्पनापूर्वकनित्यत्वकल्पनायामेव प्रागभावादिप्रतियोगित्वकल्पनापेक्षया गौरवम्, भेदाऽभेद एव स्वसम्बन्धो गुण-गुणिनोरस्माभिरुपेयत इति समवायकल्पनैव नास्तीति न तन्निबन्धनगौरवचर्चाऽपि, वस्त्वेवानुगत-व्यावृत्तस्वरूपमुपेयत इत्यनुगतत्वादनुगतप्रतीतिविषयत्वं व्यावृत्तत्वाच्च व्यावृत्तप्रतीतिविषयत्वमित्यनेकत्वेऽपि ज्ञानस्य नातिरिक्तज्ञानत्वजातिकल्पना समस्तीति न तन्निबन्धनस्यापि गौरवस्यावकाश इति। यच्चोपाधिपरामर्शमन्तरेण भेदप्रतीतेरेव स्वरूपतो भेदविषयत्वं तत्राह- सप्रतियोगिकेति- विषयनिरूप्यं हि ज्ञानमिति तत्स्वरूपं सप्रतियोगिकमेव, तस्य भेदप्रतीतिर्नियमत उपाधिपुरस्कारेणैव, एवमपि तस्याः प्रतीतेः स्वरूपतो भेद एव विषयः, उपाधिपरामर्शेन प्रतीतितो यदि वास्तव-

सम्बन्धिविनिर्मोकेण 'ज्ञानं ज्ञानम्' इत्यनुगतप्रतीत्यादिना तदैक्ये 'रूपं रूपम्' इत्याद्यनुगतप्रतीत्यादिना रूपादेरप्यैक्यसिद्धिप्रसङ्गात् तद्भेदस्यापि 'घटरूपं पटरूपम्' इत्याद्युपाधिपुरस्कारेणैव प्रतीयमानत्वात्। किञ्च, एवं 'सत् सत्' इत्यनुगतप्रतीत्या सदद्वैतं सिद्ध्यतु, न तु ज्ञानाद्वैतम्। अथ "सच्चिदानन्दरूपं ब्रह्म" [अद्वयतारकोपनिषद्, ६] इति श्रुत्या सदद्वैतं चिदानन्दब्रह्मैकरसमेव सिध्यतीति चेत्? तर्हि सत्त्व-चित्त्वा-ऽऽनन्दत्व-ब्रह्मत्वरूपधर्मचतुष्टययोगान्निर्धर्म-

---

भेदावभासो नाङ्गीक्रियते तदा घटाभावादेः पटाभावादितो भेदप्रतीतेरपि प्रतियोगिरूपोपाधिपुरस्कारेण जायमानत्वादभावस्यापि वास्तवभेदासिद्ध्या एकत्वं स्यात् एवं संयोग-विभाग-ह्रस्वत्व-दीर्घत्वादीनामप्युपाधिपरामर्शमन्तरेण भेदप्रतीतेरभावादैक्यमापद्येतेति, यथा च विषयविनिर्मोकेण ज्ञानं ज्ञानमित्यनुगतप्रतीतिस्तथा घटादिसम्बन्धविनिर्मोकेण रूपं रूपमित्यनुगतप्रतीतिरस्त्येव, तथा चोक्तप्रतीतिबलाद् यदि ज्ञानस्यैक्यं रूपस्याप्युक्तप्रतीतिबलादैक्यं किं न स्यादित्याह—सम्बन्धिविनिर्मोकेणेति। तदैक्ये ज्ञानैक्ये। तद्भेदस्यापि रूपभेदस्यापि। वस्तुमात्रे यथा 'सत् सत्' इत्यनुगतप्रतीतिर्भवति—'सन् घटः, सन् पटः' इत्येवंरूपा तथा न तत्र ज्ञानस्य 'ज्ञानं घटो ज्ञानं पटः' इत्येवमनुगतप्रतीतिर्भवतीत्यनुगतप्रतीतिबलात् सदद्वैतमेव सिद्ध्येत्, न ज्ञानाऽद्वैतमित्याह—किञ्चेति। एवम् अनुगतप्रतीतिबलादद्वैताभ्युपगमे। सदद्वैतसिद्धावपि सद् ज्ञानानन्दस्वरूपमेवेति ज्ञानाद्वैतं तावताऽपि सिद्ध्यत्येवेति पर आशङ्कते—अथेति। एव सति सत्त्वरूपधर्मयोगात् सद्रूपम् चित्त्वरूपधर्मयोगाच्चिद्रूपम्, आनन्दत्वरूपधर्मयोगादानन्दरूपम्, ब्रह्मत्वरूपधर्मयोगाद् ब्रह्मेति सधर्मत्वमेव ब्रह्मण इति तस्य निर्धर्मत्वाभ्युपगमो व्याहन्येतेति समाधत्ते—नहीति। भवतु सदाद्यात्मकं ब्रह्म, परन्तु 'तत् त्वमसि' इत्यादिवाक्यप्रभवं निर्विकल्पकं ब्रह्मस्वरूपमात्रमवगाहत इति ब्रह्मा-

कत्वव्याघातः। सदाद्यात्मकमपि निर्विकल्पकदृष्टयैकमेव स्यादिति चेत्? सर्वात्मकमपि तदेकरूपं किं न स्यात्? एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानादतीता-ऽनागतानामपि द्रव्यार्थतया ध्रौव्याऽविगानात्। इत्थं हि "जे एगं जाण०" [आचाराङ्ग—श्रु० १, अ० ३, उ० ४, सू० ११२] इति पारमेश्वरवचनानुसारितापि सङ्गच्छत इति तत्त्वदृष्ट्या विचारणीयम्॥

यदपि सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टैतत्काल-

द्वैतसिद्धिरित्याशङ्कते- सदाद्यात्मकमपीति। यदि सदादिचतुष्टयस्वरूपमपि निर्विकल्पकदृष्टयैकमेव तर्हि सर्वात्मकमपि भवतु तद् एकमपि भवतु, एवं चकाऽनेकरूप ब्रह्म वस्त्विति सर्वस्य वस्तुन एका-ऽनेकस्वरूपत्वं यत् स्याद्वादिनोऽभिमतम्, साक्षात् परम्परयैकस्यापि घटादेः सर्वसम्बन्धित्वेन कथञ्चिद्भेदाऽभेदस्य सम्बन्धमात्रव्यापकत्वेन सर्वाभेदस्यापि प्रतिनियतस्यैकस्य वस्तुनः सम्भवेन सर्वथैकज्ञानस्यापि सववस्त्ववगाहित्वे सत्येव सम्भवेनाऽतीता-ऽनागतानामपि द्रव्यरूपतया ध्रौव्यस्याऽवश्यम्भावेन स्याद्वाद एव कक्षीकृतो भवेदित्याह- एकविज्ञानेनेति। एकविज्ञानेन सर्वविज्ञानाभ्युपगतौ सत्यां "जे एगं जाणइ से सव्वं जाणइ" इति पारमेश्वरवचनानुसारित्वमपि सङ्गच्छत इत्याह- इत्थं हीति। 'जे एगं' इत्यादि वचनमूलकमेव च-

"एको भावः सर्वथा येन दृष्टः, सर्वे भावास्तत्त्वतस्तेन दृष्टाः।
सर्वे भावास्तत्त्वतो येन दृष्टाः, एको भावः सर्वथा तेन दृष्टः"॥१॥
इति वचनमिति॥

'तत् त्वमसि' इति वाक्यस्याखण्डब्रह्मणि जहदजहल्लक्षणा 'सोऽयं देवदत्तः' इति वाक्यस्य शुद्धदेवदत्तव्यक्तौ जहदजहल्लक्षणादृष्टान्तेन वेदान्तिना समर्थिता, तत्समर्थनस्यापदर्शनपुरस्सरमस-

विशिष्टयोरभेदस्य विरोधाद् विशेषण-विशेष्यभावानुपपत्तेः शुद्धदेवदत्तव्यक्तौ लक्षणा स्वीकर्तव्येत्येतद्दृष्टान्तबलेन "तत् त्वमसि" इतिवाक्येऽपि परोक्षत्वविशिष्टचैतन्यरूपतत्पदार्थस्य प्रत्यक्षत्वविशिष्टचैतन्यरूपत्वंपदार्थेन सहाभेदविरोधादखण्डब्रह्मणि जहदजहल्लक्षणा स्वीक्रियते' इति निरूपितम्, तदपि तुच्छम्–'सोऽयं देवदत्तः' इति वाक्ये लक्षणाभ्युपगमे बीजाभावात्, तत्तेदन्ताविशिष्टयोर्भेदाभेदस्य सार्वजनीनत्वेन विरोधाभावात्, नहि प्रत्यक्षसिद्धेऽर्थे विरोधो नाम, अन्यथा चित्ररूप-चित्रज्ञानादावपि नानारूपसमावेशबाधेनाखण्डांश-

---

मीचीनत्वं भावयति– यदपीति। उक्तसमर्थनस्य तुच्छत्वे हेतुमाह– 'सोऽयम्' इत्यादिना तत्तेदन्ताविशिष्टयोः सर्वथाऽभेदसम्बन्धेन विशेष्यविशेषणभावो यदि 'सोऽयं देवदत्तः' इति वाक्यतः प्रतीयेत तदा विरोधः स्यात्, यदा तु कथञ्चिद्भेदाऽभेदसम्बन्धेनैव तयोर्विशेष्यविशेषणभाव उक्तवाक्यप्रतिपाद्यस्तदा विरोध एव नास्तीति लक्षणाबीजस्याऽन्वयानुपपत्तेस्तत्राभावाल्लक्षणैव तत्र नास्तीति दृष्टान्तस्यैवानुपपन्नतेत्यर्थः। ननु तत्ताविशिष्टेदन्ताविशिष्टयोर्भेदे सति कथममेद इति भेदाऽभेदस्य विरोधादेव न सम्भव इति न भेदाभेदसम्बन्धेन तत्ताविशिष्टस्येदन्ताविशिष्टेऽन्वयसम्भव इत्यत आह– तत्ताविशिष्टेदन्ताविशिष्टयोरिति। ययोरेकत्र प्रतीतिस्तयोर्न विरोधः, ययोश्च विरोधस्तयोर्नैकत्र प्रतीतिरिति नियमेन यदि भेदाऽभेदौ विरुद्धौ स्यातां न सर्वजनानुभवविषयावेकत्र तौ भवेताम्, भवतश्च तौ तथेति न तयोर्विरोध इत्यावेदनायोक्तम्– सार्वजनीनत्वेनेति– सर्वजनानुभवसिद्धत्वेनेत्यर्थः। यदि सर्वजनानुभवसिद्धतायामपि विरोधं कश्चिदभिदध्यात् तत्राह– नहीति। अन्यथा प्रत्यक्षसिद्धेऽप्यर्थे विरोधाभ्युपगमे। चित्ररूपेति– एकत्र पटे नानारूपलक्षणचित्रप्रतीतिः प्रत्यक्षात्मिकोपजायत इति ततः 'चित्ररूपवान् पटः' इति वाक्यप्रयोगो

लक्षणास्वीकारापत्तेः। प्रतीतिबलात् तत्राप्यखण्डांशे लक्षणा स्वीक्रियत एवेति चेत्? तर्हि द्रव्यनयदृष्ट्याऽखण्डप्रतिभासवत् पर्यायनयदृष्ट्या सखण्डप्रतिभासोऽपि सार्वजनीनः, नह्यवयवव्यतिरिक्तोऽवयवी कश्चिदनुभूयत इत्यखण्डवाचकपदस्य सखण्डांश एव किं न लक्षणा स्वीक्रियते ?, नह्येका प्रतीतिः स्वगृहकुटुम्बिनीति, अन्या च परगृह-

---

भवति, तत्रापि नानारूपाणां विरोधादेकत्र न सम्भव इत्युक्तवाक्यस्याखण्डपटव्यक्तौ लक्षणास्वीकारः स्यात्, एवं 'नीलपीते इमे' इत्यादिस्वरूपं चित्रज्ञानं स्वसंवेदनप्रत्यक्षसिद्धमनुभूयते, ततस्तथा वाक्यप्रयोगोऽपि भवति, तत्राऽप्येकस्य ज्ञानस्य नानाकारत्वं विरोधान्न संभवतीत्यखण्डज्ञानव्यक्तावुक्तवाक्यस्याखण्डज्ञानव्यक्तौ लक्षणास्वीकारः स्यादिति तद्भयाद् यथा न नानारूपाणां विरोधो नवा नानाकाराणां तथैव 'सोऽयं देवदत्तः' इतिप्रत्यभिज्ञाप्रमाणतः सिद्धे तत्ताविशिष्टेदन्ताविशिष्टयोर्भेदाभेदे न विरोध इति तत्प्रभवे तथाविधवाक्येऽपि तथान्वितार्थताकत्वस्य सम्भवेन न लक्षणेत्यर्थः। परः शङ्कते– प्रतीतिबलादिति– अखण्डार्थप्रतीतिबलादित्यर्थः। तत्रापि चित्ररूपप्रतिपादकवाक्ये चित्राकारज्ञानप्रतिपादकेऽपि च। विशिष्टार्थप्रतिपादकतयाऽनुभूयमानत्वात् सखण्डवाक्यस्याप्यखण्डार्थलक्षणा द्रव्यनयदृष्ट्या यथाऽखण्डप्रतिभासमवलम्ब्योररीक्रियते तथाऽखण्डार्थप्रतिपादकतयाऽनुभूयमानत्वादखण्डवाचकपदस्यापि सखण्डप्रतिभासं सार्वजनीनमवलम्ब्य सखण्डांशे लक्षणां स्वीक्रियताम्, वस्तुनः सखण्डाखण्डोभयरूपत्वेनाऽखण्डांशस्येव सखण्डांशस्यापि सम्भवादिति– समाधत्ते– तर्हीति। पर्यायनयदृष्ट्या सखण्डप्रतिभासोऽपि सार्वजनीन इति यदुक्तं तदुपपादनायाह– नहीति– अस्य 'अनुभूयते' इत्यनेनान्वयः। अवयवव्यतिरिक्तोऽवयवी कश्चिन्नानुभूयत इति ऋजुसूत्रशब्द-समभिरूढैवम्भूतचतुष्टयस्वरूपस्य पर्यायनयस्य प्रधानीभूतर्जुसूत्रनयमवलम्बतः सौगतस्य मतम्, तन्मते 'अयं घटः,

कुटुम्बिनीति त्वदिच्छामात्र प्रामाणिकैरनुरोत्स्यते, उभयप्रतीत्यनुरोधे चोभयात्मकमेव वस्तु जिनेश्वरशिष्यीभूय विभाव्यताम्। तदिदमभिप्रेत्योक्तं भगवता सम्मतिकृता—

"सवियप्पणिवियप्पं, इय पुरिसं जो भणेज्ज अवियप्पं।
सवियप्पमेव वा णि-च्छयणएण ण स णिच्छिओ समए॥"
[का०१, गा० ३५]

अयं पटः' इत्यादिप्रतीतौ परमाणुपुञ्जविशेष एव विषयः, एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्, यथैकस्य केशस्य दूरस्थितस्याऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्, अवयवव्यतिरिक्तोऽवयवी नास्तीत्युक्त्या कथमिदं लभ्यत इति चेत्? शृणु—यथा कपाललक्षणावयवव्यतिरिक्तो घटो नास्ति, तथा कपालिकाव्यतिरिक्तः कपालोऽपि नास्ति, कपालिकाऽपि तदवयवत्वेन सम्मतार्थव्यतिरिक्ता न समस्तीत्येवंदिशा सर्वेषामप्यवयविनां परमाणुपुञ्जस्वरूप एव पर्यवसानम्, यदा चावयवव्यतिरिक्तो नास्त्येवावयवी तदा तद्वाचकतयाऽभिमतस्य पदस्य वाच्यार्थासम्भवाल्लक्षणाऽवश्यकीत्याह— इत्यखण्डवाचकपदस्येति— घट-पटाद्यखण्डावयविस्वरूपवाचकपदस्येत्यर्थः। सखण्डांश एव अवयवसमूह एव अनुभूयमानत्वाऽविशेषेऽप्यखण्डप्रतिभासस्याभ्युपगमः सखण्डप्रतिभासस्य चापलापः परेण क्रियते चेत् तत्राह— नहीति— अस्य 'अरोत्स्यते' इत्यनेनान्वयः। एका अखण्डप्रतिभासवती। अन्या सखण्डप्रतिभासवती। उभयप्रतीत्यनुरोधे सखण्डाऽखण्डोभयप्रतीत्यनुरोधे। उभयात्मकमेव द्रव्य-पर्यायोभयात्मकमेव।

सखण्डाखण्डोभयस्वरूपमेव वस्त्वित्यत्र सम्मतिकृत्सम्मतिमुपदर्शयति— तदिदमाभिप्रेत्योक्तमिति। "सवियप्प०" इति— सविकल्प-निर्विकल्पकमिति पुरुषं यो भणेद् अविकल्पम्। सविकल्पकमेव वा निश्चयनयेन न स निश्चितः समये॥' इति संस्कृतम्। पुरुषे सवि-

सखण्डाकारप्रतीतिविषयत्वं सविकल्पत्वम्, अखण्डकारप्रतीतिविषयत्वं च निर्विकल्पत्वम्, ततः प्रमाणमार्गेण सखण्डाखण्डोभयरूपत्वमेव वस्तुनो व्यवस्थितम्, इत्थं चाखण्डैकरूपं ब्रह्म प्रतिपादयन् वेदो निश्चयनयमेवालम्बत इति विचारणीयम्। किञ्च, शुद्धब्रह्मणि शक्यसम्बन्धरूपा बोध्यसम्बन्धरूपा वा लक्षणापि न सङ्गच्छते, तात्त्विकेऽर्थेऽनिर्वचनीयसंसर्गस्य युक्त्यसहत्वात्, न च देवदत्त-

---

कल्पत्व-निर्विकल्पत्वे के? इत्यपेक्षायां क्रमेण तदुभयं निर्वक्ति- सखण्डेति- पुरुषस्येव सर्वस्यापि वस्तुनः सखण्डा-ऽखण्डोभयाकार-प्रतीतिविषयत्वात् सविकल्पत्व-निर्विकल्पत्वे बोध्ये। उपसंहरति -तत इति-द्रव्यनयादेशादखण्डत्वं पर्यायनयादेशात् सखण्डत्वमित्यत इत्यर्थः। प्रमाणमार्गेण द्रव्य-पर्यायोभयनयावलम्बिप्रमाणप्रभवविचारेण। यदा च नयद्वयावलम्बनेन सर्वस्य वस्तुनः सखण्डा-ऽखण्डोभयस्वरूपत्वव्यवस्थितौ ब्रह्मणोऽपि सखण्डा-ऽखण्डोभयरूपत्वमेव युक्तम्, एवमप्यखण्डैकरूपत्वं ब्रह्मणः प्रतिपादयन् वेदः केवलनिश्चयनयावलम्ब्येवेत्याह- इत्थं चेति- वस्तुमात्रस्योक्तदिशोभयरूपत्वव्यवस्थितौ चेत्यर्थः। शुद्धब्रह्मणि लक्षणायाः सम्भवे सति तया महावाक्याच्छुद्धब्रह्मविषयकनिर्विकल्पकज्ञानं सम्भवेदपि, सैव तु तत्र न सम्भवतीत्याह- किञ्चेति। लक्षणाऽसम्भवे हेतुमुपदर्शयति- तात्त्विकेऽर्थ इति- शुद्धे ब्रह्मणीत्यर्थः, वाक्यघटकैकपदस्य लक्षणा पदान्तरं तात्पर्यग्राहकमिति स्वीकृत्य वाक्येऽपि शक्तिरिति मतमवलम्ब्य वा शक्यसम्बन्धरूपा लक्षणा भवेत् तत्र शक्यस्य परोक्षत्वादिविशिष्टचैतन्यस्य प्रत्यक्षत्वादिविशिष्टचैतन्यस्य वा शुद्धब्रह्मभिन्नतत्वादनिर्वचनीयस्य सम्बन्धोऽप्यनिर्वचनीय इति तस्य शुद्धे ब्रह्मणि युक्त्यसहत्वात् सदसतोः संसर्गासम्भवाद्, असतः संसर्गस्य सत्यसम्भवाच्च, एवं तात्पर्यग्राहकत्वमगतिकगति-

व्यक्ताविवाऽखण्डब्रह्मणि तात्पर्यसम्बन्धोऽपि पदानां सङ्गच्छते, तथाऽनधिगतेऽर्थे तात्पर्यानुपपत्तेः, तात्पर्यात्तथाधिगमे चान्योऽन्याश्रयः, प्रत्यक्षादखण्डानुभवस्त्वनुभवकलहग्रस्त इति न किञ्चिदेतत्, तस्मात् 'तत् त्वमसि' इतिवाक्यं केवलज्ञानादिपरिणतिविशिष्टपरमात्मरूपतत्पदार्थेन सह सम्यग्दर्शनादिपरिणतिविशिष्टान्तरात्म-

---

त्वाद् वैयर्थ्यकल्पमेवेति नैकस्य पदस्य लक्षणा, वाक्यस्य तु पदशक्त्यैवोपस्थितयोः पदार्थयोराकाङ्क्षाबलादन्वयबोधोपपत्तेः शक्तिर्नाभ्युपगम्यत इति शक्याऽप्रसिद्धया वाक्यस्य शक्यसम्बन्धरूपा लक्षणा न सम्भवतीति बोध्यसम्बन्धरूपैव लक्षणेति द्वितीयपक्षे बोध्यस्यानिर्वचनीयार्थस्य संसर्गोऽनिर्वचनीय इति तस्य शुद्धब्रह्मणि युक्त्यसहत्वादित्यर्थः। देवदत्तव्यक्तेरनिर्वचनीयत्वे पदानामनिर्वचनीयानां तात्पर्यलक्षणसम्बन्धोऽप्यनिर्वचनीय इति तद्बलात् 'सोऽयं देवदत्तः' इति वाक्यादखण्डदेवदत्तव्यक्तिबोधस्य सम्भवेऽपि अखण्डब्रह्मणि पदानां तात्पर्यसम्बन्धोऽनिर्वचनीयो न सम्भवतीति न तद्बलादखण्डब्रह्मबोधः सम्भवतीत्याह- न चेति- अस्य 'सङ्गच्छते' इत्यनेनान्वयः। 'तत् त्वमसि' इति वाक्यस्याऽखण्डब्रह्मणि तात्पर्यम्, 'तत् त्वमसि' इति वाक्यमखण्डब्रह्मबोधेच्छयोच्चरितमित्याकारकं तात्पर्यज्ञानमप्यनधिगतब्रह्मणि न सम्भवति, तात्पर्यतश्च ब्रह्माधिगमः, अधिगते च ब्रह्मणि तात्पर्यमित्युपगमश्चान्योऽन्याश्रयादेवोपगन्तुमशक्य इत्याह- तथेति। निर्विकल्पकप्रत्यक्षस्वरूपमेव ब्रह्मज्ञानम्, तद्विषये च ब्रह्मणि पदानां तात्पर्यतो ब्रह्मज्ञानमित्युपगमस्तु यदि वादिप्रतिवादिनां सर्वेषां ब्रह्मनिर्विकल्पकप्रत्यक्षमनुभवसिद्धं भवेत् तदोपपद्येताऽपि, तदेव तु विवादग्रस्तम्, तत्राऽविप्रतिपत्तौ च तत एव सिद्धं ब्रह्मेति किं तदर्थं महावाक्योपन्यासेनेत्याह- प्रत्यक्षादिति। स्वमते 'तत् त्वमसि' इति वाक्यार्थसङ्गमनप्रकारमुपदर्शयति-

रूपत्वंपदार्थस्य भेदाऽभेदतात्पर्येण समाधेयं सम्यग्दृष्टिभिः, इत्थमेवजीवात्मपरमात्मसमापत्तिसम्भवात्।

"पुरुष एवेदं सर्वम्" [नृसिंहपूर्वतापिन्युनिषद्, ५, १] इत्यादीनि च वेदान्तवाक्यानि पुरुषस्तुतिपराणि, जात्यादिमदत्यागहेतोरद्वैतभावनाफलानि द्रष्टव्यानि, अन्यथा "द्वे ब्रह्मणी वेदितव्ये [त्रिपुरा-

---

तस्मादिति। इत्थमेव केवलज्ञानादिपरिणतिविशिष्टपरमात्मरूपतत्पदार्थसम्यग्दर्शनादिपरिणतिविशिष्टत्वंपदार्थयोर्भेदाऽभेदसंसर्गेण वैशिष्ट्याऽवगमत एव। जीवात्मेति- जीवात्मनः परमात्मनि भिन्नाऽभिन्नतयाऽवस्थानलक्षणजीवात्म परमात्मसमापत्तिसम्भवादित्यर्थः, यद्यपि जीवात्मैव केवलज्ञानावासितः परमात्मा भवति, न तु जीवात्मतः परमात्माऽन्यमत इव सिद्धान्ते स्वरूपत एव भिन्नः, तथाप्युक्तसमापत्तित उत्तरकाले तद्रूपता, पूर्वं तु तदात्मना भावनया तथावस्थानमेवेति बोध्यम्॥

ननु यदि न परमार्थतो ब्रह्माऽद्वैतं 'तत् त्वमसि' इत्यादिवाक्याभिप्रेतं तर्हि "पुरुष एवेदं सर्वम्०" इत्यादीनां सर्वस्य वस्तुनः पुरुषाऽभेदप्रतिपादकानां वाक्यानां का गतिरित्यत आह- "पुरुष एवेदं सर्वम्०" इत्यादीनीति। पुरुषस्तुत्या किं प्रयोजनं सेत्स्यतीत्यपेक्षायामाह- जात्यादीति- अद्वैतभावनया जात्यादिमदत्यागो भवतीत्येतदर्थं पुरुषः सर्वात्मत्वेन रूपेण स्तूयत इत्यर्थः। यद्युक्तवाक्यानां न पुरुषस्तुतिपरत्वं किन्तु पुरुषाऽद्वैतरूपमुख्यार्थत्वमेव, तर्हि पुरुषाद्वैतप्रतिपादकश्रुतिसहस्रविरोधः प्रसज्यत इत्याह- अन्यथेति- "पुरुष एवेदं सर्वम्०" इत्यादिवाक्यानां पुरुषस्तुतिपरत्वाभावे इत्यर्थः, तथा च द्वैतप्रतिपादकश्रुतिसहस्रविरोधापत्तिभिया कतिपयाऽद्वैतप्रतिपादकवाक्यानां मुख्यार्थत्यागेन पुरुषस्तुतिपरत्वमेव

तापिन्युपनिषद्, ४, १७] परं चापरं च" इत्यादिद्वैतप्रतिपादकश्रुति-सहस्रविरोधप्रसङ्गात्। वेदवाक्यानि हि कानिचिद् विधिपराणि, कानिचिदर्थवादपराणि, कानिचित् त्वनुवादपराणि। तत्र "अत्राग्निहोत्रं जुहुयात् स्वर्गकामः" [मैत्रायण्युपनिषद्, ६, ३६] इत्यादीनि विधि-पराणि, अर्थवादस्तु स्तुति-निन्दाभेदाद् द्विधा, तत्र "एकया पूर्णा-हुत्या सर्वान् कामानवाप्नोति" इत्यादिः स्तुत्यर्थवादः, विधित्वे शेषाग्निहोत्राद्यनुष्ठानवैयर्थ्यापत्तेः। "एष वः प्रथमो यज्ञो योऽग्निष्टोमः,

---

युक्तमिति भावः। उक्तवाक्यानां स्तुतिपरत्वोपपादनाय वेदवाक्या-नामनेकप्रकारत्वमुपदर्शयति- वेदवाक्यानि हीति। हि यतः। तत्र विध्य-र्थवादा ऽनुवादपरेषु मध्ये। विधिपरवाक्यानि दर्शयति- अत्राग्निहोत्र-मिति- "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येव विधिवाक्यम्, अथवाऽन्यत्रापि विधिपराणि वाक्यानि भवन्तीति वेदे विधिवाक्यो-पदर्शनं क्रियत इत्यवगतये विधिवाक्यबहिर्भूतमेव 'अत्र' इति, वेदे इत्यर्थः, प्रमाणान्तराऽप्रतिपादितोऽर्थो विधिः, तत्पराणि तदर्थकानि, तदुक्तम्—

"विधिरत्यन्तमप्राप्तौ, नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ, परिसंख्येति गीयते" ॥ १ ॥

एतेन अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिरित्येवं विधि-स्त्रिधेति, एवमुत्पत्तिविध्यधिकारविध्यादिभेदा विधेर्मीमांसातोऽव-सेयाः। अर्थवादवाक्यं विभज्योपदर्शयति- अर्थवादस्त्विति। तत्र स्तुति-निन्दाभेदेन द्विविधयोरर्थवादयोर्मध्ये। "एकया०" इत्यादेर्विधि-परत्वमेवाङ्गीक्रियतां किमिति स्तुत्यर्थवादत्वमुररीक्रियते? इत्यपेक्षा-यामाह- विधित्व इति- एकपूर्णाहुतिरूपक्रियात एव सर्वकामाप्तौ अग्नि-होत्राद्यनुष्ठानं विफलमेव प्रसज्येत, तत्फलरूपस्याप्येकाहुतिक्रियात एव निष्पत्तेरित्यर्थः। निन्दार्थवादमुदाहरति- :"एष वः०" इति-

योऽनेनानिष्ट्वाऽन्येन यजते स गर्तमभ्यपतेत्" एष पशुमेधादीनां प्रथमकरणनिन्दार्थवादः। "द्वादश मासा संवत्सरः" [सहवा० उ० १२] अग्निरुष्णः, "अग्निर्हिमस्य भेषजम्" [तैत्तिरीयसंहिता, ७, ४, १८] इत्यादीनि वाक्यान्यनुवादप्रधानानि, लोकप्रसिद्धस्यैवार्थस्य तेष्वनुवादादिति, तस्माद्द्वैतपराणि वेदवचनानि स्तुत्यर्थवादप्रधानानि द्रष्टव्यानीति महाभाष्यवृत्तौ व्यवस्थितम्।

अत एव विधिशेषत्वाद् वेदान्तानां स्वार्थे न प्रामाण्यमिति मीमांसका अपि सङ्गिरन्ते। न च विधिशेषत्वमेषामसिद्धम्? अर्थवादाधिकरणन्यायेन तत्सिद्धेः। न च स्वतः प्रयोजनवदर्थाप्रतिपाद-

---

योऽग्निष्टोमाख्यो यज्ञ एष, वः युष्माकम्, यज्ञेषु मध्ये प्रथमो यज्ञः, यो याजकः पुरुषः, अनेनाग्निष्टोमेन, अनिष्ट्वा अग्निष्टोममकृत्वेति यावत्, अन्येन अग्निष्टोमातिरिक्तेन यजते, स याजकः, गर्तं नरकम्, अभ्यपतेत् व्रजेदित्यर्थः। एष "एष वः०" इत्यादिरनन्तरोक्तो वेदः। अनुवादपरवेदवाक्यमुदाहरति– द्वादश मासा इति। कथमनुवादप्रधानत्वमित्यपेक्षायामाह– लोकप्रसिद्धस्यैवेति। तेषु "द्वादशमासा०" इत्यादिवाक्येषु। यदर्थमयं वेदवाक्यविभाग उक्तस्तदुपसंहरणेन दर्शयति– तस्मादिति। तमिममर्थं प्रमाणीकर्तुमाह– महाभाष्यवृत्ताविति। अत एव अद्वैतपरवेदवाक्यानां स्तुत्यर्थवादप्रधानत्वादेव। विधिशेषत्वात् 'फलवत्सन्निधौ श्रूयमाणमफलं तदङ्गं भवति' इति न्यायेन फलवदुपासनादिविध्यङ्गत्वात्। ननु विधिशेषत्वमेव वेदान्तानामसिद्धमित्याशङ्का प्रतिक्षिपति– न चेति। एषां वेदान्तानाम्। निषेधे हेतुमाह– अर्थवादेति– अर्थवादस्वरूपावबोधकं प्रकरणमर्थवादाधिकरणं तत्रोपदर्शिता युक्तिरर्थवादाधिकरणन्यायः, तेनेत्यर्थः। तत्सिद्धेः वेदान्तानां विधिशेषत्वसिद्धेः।

कानां "वायुर्वै क्षेपिष्ठा०" [तैत्तिरीयसंहिता, २, १, १] इत्येवमादीनां स्वाध्यायविधिग्रहणान्यथानुपपत्त्या प्रयोजनवदर्थपरत्वे कल्पनीये शब्दभावनेतिकर्तव्यतांशसाकाङ्क्षस्य विधेः सम्प्रदानभूतदेवतास्तुतिद्वारेण तदंशपूरकत्वात्, नष्टाऽश्व दग्धरथन्यायेन तदुभयैकवाक्यतेति तत्र निर्णीतत्वात्, वेदान्तवाक्यानां च परमानन्दप्राप्तिरूपप्रयोजनवद्ब्रह्मार्थप्रतिपादकानां निराकाङ्क्षतया वैषम्येन न शेषत्वसम्भावनेति वाच्यम्; कर्मविधीनां वेदान्तानां च विषयविप्रतिषेधेनान्यतरशेषत्वध्रौव्ये प्रत्यक्षादिबाधितविषयतया वेदान्तानामेव शेषत्वौचित्यात्।

'न च' इत्यस्य 'वाच्यम्' इति परेण योगः, "वायुर्वै क्षेपिष्ठा देवता" इत्यादीनि वायुदेवताप्रशंसापराणि, न चःवायुदेवताप्रशंसा स्वतः प्रयोजनं सुख-दुःखभावान्यतररूपत्वाभावादिति, "स्वाध्यायोऽध्येतव्यः" इति विधिश्चाविशेषेण सम्पूर्णवेदरूपस्वाध्यायाध्ययनस्य कर्तव्यत्वमनुशास्ति, तथा च स्वतः प्रयोजनवदर्थाप्रतिपादकानां तेषां यदि प्रयोजनवदर्थपरत्वं न भवेन्न भवेदेव "स्वाध्यायोऽध्येतव्यः" इति विधिना ग्रहणम्, अतस्तेषां प्रयोजनवदर्थपरत्वे कल्पनीये सति "वायव्यं श्वेतं छागमालभेत पशुकामः" इति श्रुत्या बोधितस्य वायुदेवताकश्वेतच्छागालम्भनलक्षणयागेन पशुं भावयेदित्यस्योक्तयागप्रयत्नलक्षणार्थीभावनायाः कर्म-करण-कर्तव्यताकाङ्क्षात्रयं 'किं भावयेत्? केन भावयेत्? कथं भावयेद्?' इत्येवंरूपं यत् समस्ति, तत्र किं भावयेत्? इत्याकाङ्क्षा 'पशुं भावयेत्' इत्यनेन शाम्यति, केन भावयेत्? इत्याकाङ्क्षा 'उक्तयागेन भावयेत्' इत्यनेन शाम्यति, कथं भावयेत्? इत्येवमितिकर्तव्यताकाङ्क्षा 'याभिः क्रियाभिरुक्तयागस्वरूपनिष्पत्तिस्ताभिरुपकृत्य भावयेद्' इत्यनेन शाम्यति; शाब्दीभावना तु प्रेरणारूपा लौकिकविधिवाक्यस्थले प्रयोज्यपुरुष-

"तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिश्रुतेः कर्मविधीनामेवान्तःकरणशुद्धिद्वारा विविदिषार्थतया शेषत्वमिति

प्रयत्नविषयिणी प्रयोजकपुरुषगताऽपि अपौरुषेयतयाऽभ्युपगते वेदे तत्कर्तृभावाच्छब्दगतैवेत्यत एव सा शाब्दीभावनेति व्यपदिश्यते, तस्याः किं भावयेत्? इति कर्माकाङ्क्षा 'उक्तयोगविधेयकयत्नं भावयेद्' इत्यनेनोपशाम्यति, केन यत्नं भावयेद्? इति करणाकाङ्क्षा विधिज्ञानत एव यत्ननिष्पत्तिरिति 'विधिज्ञानेन यत्नं भावयेद्' इत्यनेन शाम्यति, कथमुक्तयागविधेयकयत्नं भावयेत्? इति कथम्भावाकाङ्क्षा तु सम्प्रदानीभूतवायुदेवतास्तुतितो वायुदेवो यतः प्रशस्तस्ततो वायुदेवतोद्देश्यकोक्तयागविधेयकयत्नो मया कर्तव्य इत्येवंप्राशस्त्यज्ञानतः प्ररोचितो यत्नमातिष्ठतीति प्राशस्त्यज्ञानेनोपशाम्यतीति भवति शब्दभावनेतिकर्तव्यतांशसाकाङ्क्षस्य विधेः सम्प्रदानभूतवायुदेवतास्तुतिद्वारेणेतिकतव्यताकाङ्क्षानिवर्तकत्वेनेति कर्तव्यतांशपूरकत्वात्, यथैकस्याश्वो नष्टो रथो विद्यते, अपरस्याश्वः समस्ति रथो दग्धः, यस्य रथो दग्धः स रथमिच्छति, यस्याश्वो नष्टः सोऽश्वमिच्छतीत्युभयाकाङ्क्षा परस्परं रथाऽश्वसंयोजनादश्वसंयुक्तरथेन ग्रामगमनादिलक्षणं फलमुभावप्याप्नुत इत्युभयाकाङ्क्षया फलावाप्तिर्नष्टाश्वदग्धरथन्यायः, तेन प्रकृतेऽपि "पशुकामो वायव्यं श्वेतं छागमालभेत" इत्यत्र फलसङ्गावादितिकर्तव्यताकाङ्क्षा, "वायुर्वै क्षेपिष्ठा देवता" इत्यत्र फलाऽश्रवणात् फलाकाङ्क्षा, इत्युभयाकाङ्क्षारूपप्रकरणतस्तदुभयस्यैकवाक्यतेत्यर्थवादाधिकरणे निर्णीतत्वाद् भवतु 'वायुर्वै क्षेपिष्ठा देवता' इत्यादयर्थवादानां 'पशुकामो वायव्यं श्वेतं छागमालभेत' इति विधिवाक्यशेषत्वम्, "तत् त्वमसि" इत्यादिवेदान्तवाक्यानां च परमानन्दप्राप्तिरूपमोक्षलक्षणफलब्रह्मार्थप्रतिपादकानां स्वतः प्रयोजनवदर्थप्रतिपादकत्वेन फलाकाङ्क्षारहितत्वेनान्यार्थवादतो विलक्षणत्वेन न विध्यङ्गत्वसम्भावनेत्यर्थः। प्रतिक्षेपहेतु-

कश्चित्, तत्र-तत्र यज्ञपदेन " यज्ञानां जपयज्ञोऽहम् " [गीता, १०, २५] इति वचनाद् गायत्रीजपादेरेव निरवद्यस्य ग्रहणात्, हिंसात्मकयागेषु मुमुक्षोरनधिकारात्, प्रतिपादोक्तफलत्यागेन विविदिषार्थतया सावद्यकर्मणोऽप्यधिकाराभ्युपगमे मुमुक्षोः " श्येनेनाऽभिचरन् यजेत " इत्यादिश्रुतेः श्येनयागादावप्यधिकारप्रसङ्गादित्यादि सांख्याचार्यैरेव निर्णीतमिति किमिति प्रसक्तानुप्रसक्त्या ?।

मुपन्यस्यति–कर्मविधीनामिति। विषयविप्रतिषेधेनेति–कर्मविधीनां स्वर्गादिफल-तत्साधनयागादि-फलकामपुरुषादिकं द्वैतं विषयः, वेदान्तानां चाद्वैतं ब्रह्म विषय इत्येवं विरुद्धविषयत्वेनेत्यर्थः। द्वैतमद्वैतं च वस्तु न सम्भवति, ततो यदि द्वैतं नास्त्यद्वैतम्, यदि तन्नास्ति द्वैतमित्येकस्य मुख्यार्थो बाधित इत्यन्यार्थे तात्पर्यस्यावश्यकत्वेन मुख्यार्थबाधितार्थकस्यान्यस्य प्राधान्येन तदङ्गत्वमेवान्यार्थपरस्येति वेदान्तानामेव द्वैतावगाहिप्रत्यक्षादिप्रमाणबाधितमुख्यार्थकत्वेनान्यार्थपराणां कर्मविधिशेषत्वस्य न्याय्यत्वादित्याह– अन्यतरशेषभ्रौव्य इति। वेदान्त्येकदेशिनो मतमाशङ्क्य प्रतिक्षिपति– तमेवमिति। तत्र "तमेव०" इत्यादिश्रुतौ। यागादेरेव यज्ञपदेन कुतो न ग्रहणमित्याकाङ्क्षायामाह– हिंसात्मकयागेष्विति। येन वाक्येन यागादिकं कर्तव्यत्वेनोपदिश्यते तत्र स्वर्गादिफलमुपादिश्यत एव, तत्प्रतिनियतस्वर्गादिफलं परित्यज्य विविदिषार्थतया हिंसात्मकत्वेन सावद्यस्यापि यागादेः कर्तव्यत्वेन मुमुक्षोस्तत्कामनालक्षणाधिकारस्याभ्युपगमे श्येनयागाद्यधिकारित्वमपि तस्य प्रसज्येतेत्याह– प्रतिपादोक्तफलत्यागेनेति। वेदान्त्येकदेशिनं प्रत्ययं दोषो नास्माकमेवानुमतः, किन्तु साङ्ख्याचार्याणामपि श्रुत्यनुयायिनामित्यावेदनायोक्तम्– साङ्ख्याचार्यैरेवेति। विस्तरार्थिना विस्तरतस्तद्विषयावगमाभिलाषिणा। एतद्विषये वेदान्तानामेव विधिशेषत्वम्, न तु विधीनां वेदान्तशेषत्वमित्युपक्रान्तविषये ॥

विस्तरार्थिना चैतद्विषयेऽस्मत्कृतस्याद्वादकल्पलता द्रष्टव्या ॥

सङ्ग्रहनयविचारः सम्पूर्णः ॥

दर्शितेयं यथाशास्त्रं, सङ्ग्रहस्य नयस्य दिग् ।
वेदान्तदृष्टा(राद्धा)न्तहेतुर्यशोविजयवाचकैः ॥ २ ॥

व्यवहरणं व्यवहारः, व्यवहरतीति वा व्यवहारः, विशेषतोऽवह्रियते निराक्रियते सामान्यमनेनेति वा व्यवहारः । अयमुपचारबहुलो लोकव्यवहारपरः—"वच्चइ विणिच्छयत्थं, ववहारो सव्वदव्वेसु"

सङ्ग्रहनयविचारमुपसंहरति- दर्शितेयमिति- वेदान्तराद्धान्तहेतुः सङ्ग्रहस्य नयस्येयं दिक्, यथाशास्त्रं यशोविजयवाचकैर्दर्शितेति सम्बन्धः, व्यक्तमदः ॥

गूढार्थावेदनार्था भवति च विवृतिर्मन्दशिष्यावगत्यै,
नो वाक्काठिन्ययोगे सति तत इह नो तादृशो वाग्विलासः ।
इत्थं सम्यग् विचार्याऽणुमतिरपि मितां चेह लावण्यसूरि-
र्व्याख्यामाख्यातवान् यद्भवतु ननु ततः सङ्ग्रहस्यावबोधः ॥१॥

इति सङ्ग्रहनयविचारव्याख्या ॥

अथ व्यवहारनयनिरूपणम्—

व्यवहारनयं निरूपयति- व्यवहरणमिति- एषा निरुक्तिर्भावे, व्यवहरतीति कर्तरि । करणव्युत्पत्तिमवलम्ब्याह- विशेषत इति-एतद्व्युत्पत्त्या 'विशेषाभ्युपगमेन सामान्यनिराकरणपरोऽभ्युपगमपरो व्यवहारः' इति व्यवहारनयलक्षणं दर्शितं भवति । एतावता सङ्ग्रहात् सामान्याभ्युपगमपरात् तन्निराकरणपरस्यास्य वैलक्षण्येऽवधृतेऽप्यन्यद् वैलक्षण्यप्रयोजकमाह- अयमिति- व्यवहारनय इत्यर्थः । उपचारबहुल इति- उपचारबाहुल्यं चास्य "दह्यते गिरिरध्वाऽसौ याति स्रवति कुण्डिका

त्ति [विशेषावश्यक–नि० गाथा २१८३] सूत्रम्, व्यवहारः सर्वद्रव्येषु विचार्य विशेषानेव सत्त्वेन व्यवस्थापयतीत्येतदर्थः, इत्थं ह्यसौ विचारयति–ननु सदिति यदुच्यते तद् घट-पटादिविशेषेभ्यः किमन्यन्नाम ?, वार्तामात्रप्रसिद्धं सामान्यमनुपलम्भान्नास्त्येव। ननु

इत्यादिरुपचारोऽस्मिन् बाहुल्येनोपलभ्यते ”॥ [नयोपदेशश्लो० २६]

इतिपद्यावसेयम्।

उक्तपद्यस्य चेत्थं व्याख्यानम्– दह्यत इति– असौ गिरिर्दह्यते, अत्र गिरिपदस्य गिरिस्थतृणादौ लक्षणा, भूयोदग्धत्वप्रतीतिः प्रयोजनम्। 'असावध्वा याति' इत्यत्राध्वपदस्य अध्वनि गच्छति पुरुषसमुदाये लक्षणा, नैरन्तर्यप्रतीतिः प्रयोजनम्। 'कुण्डिका स्रवति' इत्यत्र कुण्डिकापदस्य कुण्डिकास्थजले लक्षणा, अनिबिडत्वप्रतीतिः प्रयोजनम्, सर्वत्रोद्देश्यप्रतीतिर्लक्ष्यार्थे मुख्यार्थाभेदाध्यवसायात्मकव्यञ्जनामहिम्ना वेति विवेचितमन्यत्र, इत्यादिरुपचारो गौणः, अस्मिन्–व्यवहारनये, बाहुल्येन इतरनयापेक्षया भूम्ना, उपलभ्यते इति। लोकव्यवहारपर इति– यथैव यो लोके व्यवह्रियते तथैव तमभ्युपैतीति लोकव्यवहारपरः, यथा– निश्चयतः पञ्चवर्णेऽपि भृङ्गे लोके 'कृष्णो भ्रमरः' इत्येव व्यवह्रियते, अयमपि कृष्णत्वेन भ्रमरमुपगच्छतीति। व्यवहारस्वरूपप्ररूपकं सूत्रं दर्शयति– "वच्चइ०" इति– "व्रजति विनिश्चयार्थं व्यवहारः सर्वद्रव्येषु" इति संस्कृतम्। सूत्रार्थं दर्शयति– व्यवहार इति। 'विचार्य' इति यदुक्तं तदेव भावयति– इत्थमिति– अनन्तरवक्ष्यमाणप्रकारेणेत्यर्थः। हि यतः। असौ व्यवहारः। व्यवहारस्य विचारमुल्लिखति– नन्वित्यादिना। सदिति यदुच्यते सदित्येवंस्वरूपशब्देन यत् सत्तालक्षणं महासामान्यं प्रतिपाद्यते, तत् सत्तासामान्यम, घट-पटादिविशेषेभ्यः, अन्यत्– भिन्नम्, किं नाम–न किञ्चित्, घट-पटादयो विशेषा एव सदितिप्रतीतिव्यवहारविषयाः, तेभ्योऽतिरिक्तं सत् सामान्यं नास्त्येवेत्यर्थः।

अनुपलम्भमात्रं नाऽभावग्राहकम्, आकाशादावतिप्रसङ्गात्, किन्तु योग्यानुपलम्भस्तथा, योग्यत्वं च प्रतियोगि-तद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधानम्, तच्चात्र नास्त्येव सामान्यग्राहकद्रव्यो-

---

वार्तामात्रप्रसिद्धं सत्सदितिवचनमात्रप्रसिद्धं सामान्यम्। अनुपलम्भान्नास्त्येव यदि विशेषेभ्यो व्यतिरिक्तं सामान्यं स्यात् तर्हि विशेषेभ्यो व्यतिरेकेणोपलभ्येत, यद् यतो व्यतिरिक्तं तत् ततो व्यतिरेकेणोपलभ्यते, यथा- पटादिकं घटादितो व्यतिरेकेण, अनुपलम्भनाच्च नास्त्येव सामान्यमित्यर्थः। अत्र परः शङ्कते - नन्विति। आकाशादावतिप्रसङ्गादिति- आकाशादेरप्यनुपलम्भादभावः प्रसज्येतेत्यर्थः। किन्विति- यद्यनुपलम्भमात्रं नाऽभावग्राहकं तर्हि कीदृशोऽनुपलम्भोऽभावग्राहक इति? तत्राह- योग्येति। तथा अभावग्राहकः। अनुपलम्भे योग्यत्वं किमित्यपेक्षायामाह—योग्यत्वं चेति। प्रतियोगीति—प्रतियोगि-प्रतियोगिव्याप्यभिन्ना यावन्तः प्रतियोग्युपलम्भकास्तेषां समवधानं योग्यत्वमित्यर्थः, एतत्सङ्गमना चेत्थम्-यत्राऽऽलोकादिकं चाक्षुषप्रत्यक्षजनकं विद्यते तत्र घटाभावप्रतियोगिघट-तद्व्याप्यघटचक्षुः- संयोग-तद्गतमहत्त्वोद्भूतरूपादिव्यतिरिक्तयावद्घटोपलम्भकसमवधानं समस्ति तत्र यदि घटो भवेत् तदा तदुपलम्भः स्यादेवेति तादृशसमवधानविशिष्टघटानुपलम्भस्य घटाभावव्याप्यत्वेन तत्सत्त्वेऽवश्यं घटाभाव इति, अत्र 'प्रतियोगि-तद्व्याप्येतर' इति विशेषणानुक्तौ यावत्प्रतियोग्युपलम्भकमध्ये प्रतियोगितद्व्याप्ययोरपि प्रवेशात् तत्समवधाने प्रतियोग्युपलम्भ एव, न तु तदनुपलम्भ इति तादृशसमवधानविशिष्टप्रतियोग्यनुपलम्भस्याप्रसिद्धिरेवेत्यतस्तदुपादानमिति। तच्च निरुक्तयोग्यत्वं च। अत्र सामान्योपलम्भे। द्रव्योपयोगे सति सामान्योपलम्भो भवति यदा द्रव्योपयोगो नास्ति तदा सदपि सामान्यं नोपलभ्यत इति तत्कालीनसामान्यानुपलम्भो न प्रतियोगि-तद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवहित इति योग्यानुपलम्भाभा-

पयोगाभावात्, तत्सत्त्वे च सामान्यानुपलम्भस्यैवासिद्धेरिति चेत्? न–जलाहरण-व्रणपिण्डीप्रदानादिव्यवहारस्य घट-निम्बपत्रादिविशेषैरेव क्रियमाणस्य दर्शनेन सामान्यस्य व्यवहाराऽनिर्वाहकत्वेन द्रव्योपयोगेन तद्ग्रहेऽपि तस्य दोषजन्यज्ञानतया भ्रमत्वेन ततो वस्त्वसिद्धेः। एतेन यदुच्यते सङ्ग्रहवादिना–

" यथा कटकशब्दार्थः, पृथक्त्वार्हो न काञ्चनात्।
न हेम कटकात् तद्वज्जगच्छब्दार्थताऽवरे॥ १॥ [ ], इति।"

तदपास्तम्, अत्र हि 'न हेम कटकाद्' इति–हेम कटकात्

वान्न सामान्याभावसिद्धिरित्याह- सामान्यग्राहकेति। तत्सत्त्वे च द्रव्योपयोगसत्त्वे च। व्यवहारनय उक्ताशङ्कां प्रतिक्षिपति- नेति। विशेषेभ्य एव प्रतिनियतेभ्यः प्रतिनियतानामर्थक्रियाणां दर्शनेन विशेषा एव व्यवहारनिर्वाहकत्वात् सन्तः, सामान्यात् तु नार्थक्रिया काचिद् दृश्यत इति व्यवहारानिर्वाहकत्वादसदेव सामान्यमिति तज्ज्ञानं भ्रम एव, तत्र द्रव्योपयोगो दोषविधयैव कारणमिति दोषजन्यभ्रमात् सामान्यात्मकवस्त्वसिद्धेरित्याह- जलाहरणेति। तद्ग्रहेऽपि सामान्यज्ञानेऽपि। तस्य सामान्यज्ञानस्य। ततः भ्रमात्मकसामान्यज्ञानात्। वस्त्वसिद्धेः सामान्यरूपवस्तुनोऽसिद्धेः। 'एतेन' इत्यस्य 'अपास्तम्' इत्यनेनान्वयः। सङ्ग्रहवादिवक्तव्यमेवोपदर्शयति- यथेत्यादिपद्येन- यथा काञ्चनात् पृथक्त्वार्हो न कटकशब्दार्थः, किन्तु काञ्चनमेवानुगामिस्वरूपं सत्यमिति तदात्मक एव कटकशब्दार्थः, तद्वत् कटकान्न पृथक्त्वार्हं हेम न, 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति वचनाद् हेम कटकात् पृथक्त्वार्हमेव, न विद्यते वरमनुगतं यस्मात् तदवरं सत्सामान्यम्, तस्मिन्, जगच्छब्दार्थता सर्वशब्दवाच्यता, सर्वस्य वस्तुनः सत्सामान्यरूपत्वात् तद्व्यतिरिक्तवस्तुनोऽभावात् सत्सामान्यमेव शब्द-

पृथक्त्वार्हं नेति नेत्यर्थः, स चायुक्तः-हेमसामान्यस्य यावत्कटकाऽङ्गदादिविशेषपार्थक्याऽसिद्धेः, शाखादियावदवयवभिन्नवृक्षाद्यूर्ध्वतासामान्यस्येव यावद्व्यक्तिभिन्नतिर्यक्सामान्यानुपलब्धेः। यद्वा, उक्तसूत्रस्य, 'अधिकश्चयो निश्चयः, यथा-अधिको दाघो निदाघः, स च निश्चयोऽत्र सामान्यम्, तदभावो विनिश्चयः, तदर्थं व्यवहारनयो व्रजति, सामान्याभावार्थं यतते' इत्यर्थः।

ननु सामान्य-विशेषात्मके वस्तुनि विशेषं गृह्णता व्यवहारेण सामान्यमपि सम्भृतसामग्रीकतया ग्राह्यमेव सूक्ष्म-सूक्ष्मतरपर्यायनय-

---

मात्रवाच्यमित्यर्थः। तृतीयचरणार्थमस्फुटत्वात् सन्दिग्धो मा भूदिति स्पष्टयति-अत्र हीति। अत्र उक्तपद्ये। विशेषाः सामान्यस्वरूपा एव, न तद्व्यतिरिक्ताः सन्ति, सामान्यं तु विशेषव्यतिरिक्तं समस्तीति सङ्ग्रहवादिनोऽभिप्रायोऽयुक्त इत्याह- स चायुक्त इति। अयुक्तत्वे व्यवहारनयो हेतुमुपदर्शयति- हेमसामान्यस्येति। अनुपलब्ध्या पार्थक्याऽसिद्धिं व्यवस्थापयति- शाखादीति- अनुपलब्धेर्यथोर्ध्वतासामान्यं नास्ति तथाऽनुपलब्धेरेव तिर्यक्सामान्यमपि नास्तीति मुकुलितोऽर्थः।

"वच्चइ विणिच्छयत्थं० [पत्र-२९१]" इति सूत्रं प्रकारान्तरेण व्याकरोति- यद्वेति। अधिकार्थत्वं निरुपसर्गस्य दृष्टान्ततः स्पष्टयति-यथेति। अन्यत्र निश्चयशब्दस्तदभावाऽप्रकारकतत्प्रकारकज्ञाने रूढ इत्यत आह- अत्रेति- प्रकृतसूत्र इत्यर्थः, प्रकृतसूत्रघटकनिश्चयपदप्रतिपाद्यं सामान्यमिति यावत्। तदभावः सामान्याभावः, वेविरुद्धार्थकत्वस्यापि दृष्टत्वेन सामान्यविरुद्धस्य सामान्याभावस्य विनिश्चशब्दप्रतिपाद्यत्वसम्भवात् तदर्थं सामान्याभावार्थम्॥

ननु सामान्य-विशेषोभयात्मके वस्तुनि प्रधानतया विशेषं गृह्णता व्यवहारेण गौणतया सामान्यमपि गृह्यत एवेति कथमस्य सामान्याभावार्थं यत्न इत्याशङ्कते- नन्विति। सम्भृतसामग्रीकतया सम्पूर्णसामग्री-

त्यक्तस्यार्थस्य द्रव्यार्थिकविषयत्वात्। तदुक्तं सम्मतौ–

" पज्जवणयवुक्कंतं, वत्थू दव्वट्ठियस्स, वत्तव्वं (वयणिज्जं)।
जावदविओवओगो,अपच्छिमवियप्प-निव्वयणो ॥
[का०१गा०८]त्ति ॥

अत्र न विद्येते पश्चिमे विकल्प-निर्वचने-सविकल्पकधी-व्यवहार-लक्षणे यत्र स तथा, सङ्ग्रहावसान इति यावत्, ततः परं विकल्प-वचनाप्रवृत्तेः, ईदृशो यावद् द्रव्योपयोगः प्रवर्तते तावद् द्रव्यार्थिकस्य वचनीयं वस्तु, तच्च पर्यायनयेन, वि-विशेषेण, उद्-ऊर्ध्वम्, क्रान्तमेव-विषयीकृतमेव, पर्यायाऽनाक्रान्तसत्तायां मानाभावादित्येकोऽथः।

कतया। सूक्ष्मपर्यायनयो यं विशेषं गृह्णाति तं सूक्ष्मतरपर्यायनयः परित्यज्य ततोऽपि विशेषं गृह्णाति, एवं ततोऽपि सूक्ष्मतरपर्यायनयस्तं विशेषं परित्यज्य ततोऽपि विशेषं गृह्णातीत्युत्तरोत्तरविशेषापेक्षया पूर्वपूर्वविशेषस्य सामान्यरूपत्वमिति कृत्वा व्यवहारस्यापि सामान्यग्राहित्वं पूर्वपूर्वविशेषस्योत्तरोत्तरविशेषानुगततया द्रव्यार्थिकनयविषयत्वादित्याह– सूक्ष्म–सूक्ष्मतरेति।

उक्तार्थं प्रमाणीकर्तुं सम्मतिगाथासंवादमुपदर्शयति– तदुक्तं सम्मताविति। " पज्जव० " इति–" पर्यवनयव्युत्क्रान्तं वस्तु द्रव्यार्थिकस्य वचनीयम्। यावद् द्रव्योपयोगोऽपश्चिमविकल्प-निर्वचनः " इति संस्कृतम्। उक्तगाथां व्याख्यानयति– अत्रेति। तथा अपश्चिमविकल्प-निर्वचनः। कथमपश्चिमविकल्प-निर्वचनस्य सङ्ग्रहावसानतेत्यपेक्षायामाह– ततः परमिति-सङ्ग्रहात् परमित्यर्थः, सङ्ग्रहविषयस्य महासामान्यसत्तारूपस्य कस्याप्यपेक्षया विशेषरूपत्वाभावेन सामान्यरूपत्वमेव तस्य, न विशेषरूपत्वमिति तद्विषयो द्रव्यार्थिक एव न पर्यायार्थिक इति सङ्ग्रहावसानत्वमवसेयम्। ईदृशः अपश्चिमनिर्विकल्पनिर्वचनः।

यद्वा यद् वस्तु सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमादिबुद्धिना पर्यायनयेन स्थूलरूपं त्यजता व्युत्क्रान्तं-गृहीत्वा मुक्तं 'किमिदं मृत्सामान्यं यद् घटादिविशेषान्यबुद्धिविषयीभवेद्' इत्येवमाकारेण यावच्छुक्लरूपतमोऽन्त्यो विशेषस्तावत् तत् सर्वं द्रव्यार्थिकस्य वचनीयम्, यतो यावदपश्चिमविकल्प-निर्वचनोऽन्त्यो विशेषस्तावद् द्रव्योपयोगः प्रवर्तत इति द्वितीयोऽर्थः।

इयं व्याख्या "अन्त्यविशेषमारभ्य महासामान्यपर्यन्तं द्रव्योपयोगः प्रवर्तत इति पूर्वपूर्वद्रव्यार्थिकविषयः पर्यायार्थिकविषयोऽपि, यत उत्तरोत्तरस्य पूर्वपूर्वापेक्षयाऽधिकव्यापित्वेन द्रव्यत्वे उत्तरोत्तरापेक्षया पूर्वपूर्वस्याऽल्पव्यापित्वेन विशेषरूपतया पर्यायत्वं सुस्पष्टमेव" इत्यर्थस्यावेदिका, इदानीं "पूर्वपूर्वव्यापिस्वरूपापेक्षयोत्तरोत्तराव्यापिस्वरूपस्य पर्यायत्वमुत्तरोत्तरव्यापिस्वरूपापेक्षया पूर्वपूर्वव्यापिस्वरूपस्य द्रव्यत्वमित्यवलम्बनेन पर्यायार्थिकविषयस्य द्रव्यार्थिकविषयत्वमन्त्यविशेषं यावद्" इत्यर्थावेदिकां व्याख्यामुपदर्शयति– यद्वेति। 'यद् वस्तु' इत्यस्य 'गृहीत्वा मुक्तम्' इत्यनेनान्वयः। 'व्युत्क्रान्तम्' इत्यस्य गृहीत्वा मुक्तमित्यर्थः। केन गृहीत्वा मुक्तमित्याकाङ्क्षया 'पर्यायनयेन' इत्यन्वेति। 'पर्यायनयेन' इत्यस्य यद् विशेषणं 'स्थूलरूपं त्यजता' इति तदुपपादकम्– सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमादिबुद्धिना' इति। 'इदं मृत्सामान्यम्' इत्याकारकबुद्धिना पर्यायनयेन मृत्सामान्यं गृहीतं भवति, 'गृहीत्वा मुक्तम्' इति यदुच्यते तत् कीदृशाकारेण तेनेत्यपेक्षायामाह– किमिदमिति– किमित्याक्षेपे, तेन 'इत्थम्भूतं मृत्सामान्यं नास्त्येव, यद् घटादिविशेषान्यबुद्धिविषयीभवेद्' इत्येवमाकारेण पर्यायनयेन मुक्तमित्यर्थः। कियत्पर्यन्तं गृहीत्वा मुक्तं भवतीत्यपेक्षायामाह– यावच्छुक्लरूपतम इति– अत्र 'यावत्सूक्ष्मरूपतमः' इति पाठो युक्तः। द्वितीयव्याख्यानतो निर्गलितमर्थमुप-

अत एव द्रव्य-पर्यायविषयताभ्यां तदितराऽविषयतया वा न शुद्धजातीयद्रव्यार्थिकपर्यायार्थिकभावव्यवस्था, किन्तूपसर्जनीकृतान्यार्थ-प्रधानीकृतस्वार्थविषयतयाऽनेकान्तानुप्रवेशादेव, तदुक्तम्–

"दव्वट्ठिओ त्ति तम्हा, णत्थि णओ णियमसुद्धजाईओ।
ण य पज्जवट्ठिओ णाम, कोइ भयणाइ उ विसेसो" ॥

[सम्मतौ का० १, गा० ९]

भजना–उपसर्जन-प्रधानभावावगाहना, तथा च कथं वस्तुगत्या सामान्यविषयस्य व्यवहारस्य तदभावाऽर्थं यत्न इति

दर्शयति– यत इति। अत एव द्रव्यार्थिकविषयस्य पर्यायार्थिकविषयत्वं पर्यायार्थिकविषयस्य द्रव्यार्थिकविषयत्वमित्येवमुभयस्यैकत्र समन्वयादेव। द्रव्येति– द्रव्यविषयकः शुद्धजातीयद्रव्यार्थिकः, पर्यायविषयकः शुद्धजातीयपर्यायार्थिक इत्येवं शुद्धजातीयद्रव्यार्थिक-पर्यायार्थिकभावव्यवस्था, वा अथवा द्रव्येतराविषयकः शुद्धजातीयद्रव्यार्थिक-पर्यायेतराविषयकः शुद्धजातीयपर्यायार्थिक इत्येवमुक्तव्यवस्था न सम्भवतीत्यर्थः। किन्तु तर्हि कथं द्रव्यार्थिक-पर्यायार्थिकव्यवस्था ? उपसर्जनीकृतेति– य उपसर्जनतया पर्यायं विषयीकरोति प्रधानतया द्रव्यं च विषयीकरोति स द्रव्यार्थिकः, यश्चोपसर्जनतया द्रव्यं विषयीकरोति प्रधानतया च पर्यायं विषयीकरोति स पर्यायार्थिक इत्येवमुपसर्जनीकृतान्यार्थप्रधानीकृतस्वार्थविषयतयाऽनेकान्तानुप्रवेशात् कथञ्चिद्द्रव्यार्थिक-कथञ्चित्पर्यायार्थिकभावस्यैव भद्रेत्यर्थः। उक्तार्थे संवादकतया सम्मतिगाथामुपदर्शयति–तदुक्तमिति। "दव्वट्ठिओ त्ति०" इति–"द्रव्यार्थिक इति तस्मान्नास्ति नयो नियमशुद्धजातीयः। न च पर्यायार्थिको नाम कोऽपि भजनया तु विशेषः॥ इति संस्कृतम्। अत्र भजनापदार्थः क इत्यपेक्षायामाह– भजनेति– एकस्योपसर्जनभावेनाऽपरस्य प्रधानभावेन याऽवगाहना सा भजनेत्यर्थः। प्रश्नार्थमुपसंहरति– तथा चेति। 'कथम्' इत्यस्य 'यत्नः'

चेत्? नहि सार्वजनीनो नयान्तरार्थप्रतिभासो नयान्तरेण बाध्यते, किन्तु तदप्रामाण्यं विषयीक्रियत इति ज्ञानप्रामाण्यसंशयादर्थसंशय इव तदप्रामाण्यनिश्चयात् तदर्थाभावनिश्चय इति सामान्यनयाप्रामाण्यनिश्चयप्रयुक्ततदभावनिश्चयत्वमेव तदभावार्थयत्नपरत्वमिति न कोऽपि दोषः। तदिदमुक्तं महावादिना—

"दव्वट्ठियवत्तव्वं, अवत्थु णियमेण होइ पज्जाए [पज्जवणयस्स]।
तह पज्जववत्थुमवत्थुमेव दव्वट्ठियणयस्स ॥

[सम्मतौ का०१,गा०१०]

इत्यनेनान्वयः। तदभावार्थं सामान्याभावार्थम्। समाधत्ते— नहीति-अस्य 'बाध्यते' इत्यनेनान्वयः। सार्वजनीनः सर्वजनसिद्धः। यदि नयान्तरार्थप्रतिभासो नयान्तरेण न बाध्यते तर्हि तद्विचारस्य प्रयोजनं किम्? नयान्तरविषयाभावार्थो यत्नोऽपि तस्य कुण्ठ एव, तत्प्रयत्नेऽपि नयान्तरविषयोऽवतिष्ठत एवेति पृच्छति— किन्त्विति। उत्तरयति— तदप्रामाण्यमिति— सामान्यविषयकज्ञानरूपद्रव्यार्थिकनयाऽप्रामाण्यं पर्यायार्थिकनयेन विषयीक्रियत इत्यर्थः। ज्ञानेति— यथा तद्विषयकज्ञानप्रामाण्यसंशयात् तदर्थविषयकः संशयस्तथा तदर्थविषयकज्ञानाऽप्रामाण्यनिश्चयात् तदर्थाभावनिश्चय इत्यतः सामान्यविषयकज्ञानरूपद्रव्यार्थिकनयाऽप्रामाण्यनिश्चयप्रयुक्तसामान्याभावविषयकनिश्चयत्वमेव पर्यायार्थिकनयस्य तदभावार्थयत्नपरत्वमित्येवमभ्युपगमे न कश्चिद् दोष इत्यर्थः। उक्तार्थे सम्मतिगाथासंवादमाह— तदिदमुक्तमिति। महावादिना वादिप्रकाण्डेन श्रीसिद्धसेनदिवाकरेण। "दव्वट्ठिय०" इति— "द्रव्यार्थिकवक्तव्यम् अवस्तु नियमेन भवति पर्याये [पर्यवनयस्य]। तथा पर्यववस्तु अवस्त्वेव द्रव्यार्थिकनयस्य।" इति संस्कृतम्।

अवस्तु–इतरनयप्राधान्यो पस्थितिजनिततन्नयाप्रामाण्यनिश्चय–कृतावस्तुत्वनिश्चयविषयः, तथा चैतदभ्युच्चयार्थमुक्तम्—

उप्पज्जंति चयंति अ, भावा णियमेण पज्जवणयस्स ।
दव्वट्ठियस्स सव्वं, सया अणुप्पण्णमविणट्ठं ॥

[सम्मतौ का० १,गा० ११]

नन्वेवं सङ्ग्रह-व्यवहारयोरवधारणांशे द्वयोरपि मिथ्यात्वं स्यात् सामान्य - विशेषान्यतराभाववद्विशेष्यकत्वाभाववत्यन्यतरस्मिँस्तद-

'अवस्तु' इत्यस्योक्तार्थदार्ढ्याय पर्यवसितमर्थमुपदर्शयति– अवस्त्विति– इतरनयेन पर्यायार्थिकनयेन, प्रधान्येन या पर्यायस्योपस्थितिः, तया जानितो यो द्रव्यार्थिकनयाऽप्रामाण्यनिश्चयः, तत्कृतस्यावस्तुत्वनिश्चयस्य विषयो द्रव्यार्थिकवक्तव्यो भवति, एवमितरनयेन– द्रव्यार्थिकनयेन, प्राधान्येन या द्रव्यस्योपस्थितिः, तया जनितो यः पर्यायार्थिकनयाप्रामाण्यनिश्चयः, तत्कृतस्यावस्तुत्वनिश्चयस्य विषयः पर्यायार्थिकवक्तव्यो भवतीत्यर्थः । उक्तोऽर्थस्तदोपपद्येत यदि पर्यायवक्तव्यो द्रव्यार्थिकवक्तव्यश्च परस्परविरुद्धो भवेदिति तद्विरोधावगमनाय सम्मतिगाथामवतार्य दर्शयति– तथा चैत । "उप्पज्जंति० "इति– "उत्पद्यन्ते च्यवन्ते च भावा नियमेन पर्यवनयस्य । द्रव्यार्थिकस्य सर्वं सदाऽनुत्पन्नमविनष्टम् " ॥ इति संस्कृतम् । शङ्कते– नन्विति । एवम् एकनयवक्तव्यस्याऽन्यनयेनावस्तुत्वे । अवधारणांशे सामान्यमेवास्ति न विशेषाः, विशेषा एव सन्ति न सामान्यमित्येवमवधारणस्वरूपे । द्वयोरपि सामान्य-विशेषग्राहिद्रव्यार्थिक-पर्यायार्थिकनययोरपि । मिथ्यात्वं कथमित्यपेक्षाया माह– सामान्येति– वस्तुनि सामान्यविशेषोभयात्मके व्यवस्थिते तद्विशेष्यकं यद् द्रव्यार्थिकज्ञानं तद् वस्तुगत्या विशेषाभाववद्विशेष्यकं न भवति, एवं तद्विशेष्यकं पर्यायार्थिकज्ञानं तद्वस्तुगत्या सामान्याभाववद्विशेष्यकं न भवति, अथापि द्रव्यार्थिकज्ञानं स्वसंविदित-

भाववद्विशेष्यकत्वावगाहित्वादिति चेत् ? स्यादेव, उत्पाद-स्थिति-भङ्गाः समुदिता हि द्रव्यलक्षणम्, न तु प्रत्येकम्, एकैकविनिर्मोकेण द्रव्याऽप्रतीतेरिति प्रत्येकलक्षणग्राहिणौ द्रव्यार्थिक-पर्यायार्थिकौ मूलनयाविह हि मिथ्यादृष्टी, न चास्ति तृतीयः कश्चिन्नय इति, द्वयोर्मूलनययोरेव यदि परस्परात्यागरूपविशेषेण भज्यमानयोरेव सम्यक्त्वहेतुता, न तु निरपेक्षग्राहिणोः, तदा कैव प्रत्याशा निरपेक्षग्राहिणां मूलनयार्थप्रज्ञापनामात्रव्यापृतानां विशिष्टांशाधिगममात्रेण भेदभाजामुत्तरनयानां प्रामाण्ये इति । यद् वादी–

रूपं विशेषाभाववद्विशेष्यकत्वेन स्वस्वरूपं गृह्णाति, पर्यायार्थिकज्ञानं च सामान्याभाववद्विशेष्यकत्वेन स्वस्वरूपमवगाहत इति द्रव्यार्थिकज्ञानस्य विशेषाभाववद्विशेष्यकत्वाभाववति स्वस्मिन् विशेषाभाववद्विशेष्यकत्वावगाहित्वेन, पर्यायार्थिकज्ञानस्य च सामान्याभाववद्विशेष्यकत्वाभाववति स्वस्मिन् सामान्याभाववद्विशेष्यकत्वावगाहित्वेन च मिथ्यात्वं स्यात्, तद्भाववति तज्ज्ञानत्वं मिथ्यात्वमिति सामान्यलक्षणस्यात्र सत्त्वादित्यर्थः । अत्रेष्टापत्त्या समाधत्ते– स्यादेवेति । न तु प्रत्येकमिति– केवलमुत्पादः केवलं स्थितिः केवलं विनाशश्च न द्रव्यलक्षणमित्यर्थः । प्रत्येकं कथं न लक्षणमित्यपेक्षायामाह– एकैकविनिर्मोकेणेति– उत्पादादीनां त्रयाणां मध्यादेकैकपरित्यागेनेत्यर्थः । एवं सति यद् व्यवस्थितं तदाह– प्रत्येकेति । ननु द्रव्यार्थिक-पर्यायार्थिकनययोर्मिथ्यात्वेऽपि ताभ्यां भिन्नस्तृतीयो नयः सम्यङ्नयो भविष्यतीत्यत आह– न चास्तीति । एवं च मूलनययोर्द्वयोरपि परस्पराऽत्यागरूपविशेषेण भज्यमानयोरेव सम्यक्त्वं न तु परस्परनिरपेक्षग्राहिणोः, एवं सति तदर्थप्रज्ञापनामात्रप्रवणानामुत्तरनयानामपि निरपेक्षग्राहिणां न प्रामाण्यमित्याह– द्वयोर्मूलनययोरेवेति । न त्विति– निरपेक्षग्राहिणोस्तयोर्न सम्यक्त्वहेतुतेत्यर्थः । 'कैव प्रत्याशा' इत्यस्य 'प्रामाण्ये' इत्यनेनान्वयः, अन्यत् स्पष्टम् । उक्तार्थे सन्मतिगाथापञ्चकं संवाद-

"दव्वं पज्जवविजुयं, दव्वविजुत्ता य पज्जवा णत्थि ।
उप्पाय-ट्ठिइ-भंगा, हंदि ! दवियलक्खणं एयं ॥
एए पुण संगहओ, पाडिक्कमलक्खणं दुवेण्हं पि ।
तम्हा मिच्छद्दिट्ठी, पत्तेयं दो वि मूलणया ॥
ण य तइओ अत्थि णओ, ण य सम्मत्तं ण तेसु पडिपुण्णं ।
जेण दुवे एगंता, विभज्जमाणा अणेगंतो ॥
जह एए तह अण्णे, पत्तेअं दुणया णया सव्वे ।
हंदि हु मूलणयाणं, पण्णवणे वावडा ते वि ॥
सव्वणयसमूहम्मि वि, णत्थि णओ उभयवायपण्णवओ ।
मूलनयाणं (ण उ) आणं, पत्तेयविसेसियं बिंति ॥"

[सम्मतितर्कप्रथमकाण्डे १२, १३, १४, १५, १६]

नन्वेवं 'सर्वेऽपि नयवादा मिथ्याः, स्वपक्षेणैव प्रतिहतत्वात्,

कतयोपदर्शयति- यद्वादीति। "दव्वं०" इति- "द्रव्यं पर्यायवियुतं द्रव्यवियुक्ताश्च पर्यवा न सन्ति। उत्पाद-स्थिति-भङ्गा हन्त! द्रव्यलक्षणमेतत् ॥ १ ॥ एते पुनः सङ्ग्रहतः प्रत्येकमलक्षणं द्वयोरपि तस्मान्मिथ्यादृष्टी प्रत्येकं द्वावपि मूलनयौ ॥ २ ॥ न च तृतीयोऽस्ति नयो न च सम्यक्त्वं न तयोः प्रतिपूर्णम्। येन द्वावेकान्तौ विभज्यमानावनेकान्तौ ॥ ३ ॥ यथा एतौ तथा अन्ये प्रत्येकं दुर्नया नयाः सर्वे। हन्त! हु मूलनययोः ज्ञापने व्यापृतास्तेऽपि ॥ ४ ॥ सर्वनयसमूहेऽपि नास्ति नय उभयवादप्रज्ञापकः। मूलनययोः तु आज्ञां प्रत्येकं विशेषितां ब्रुवन्ति" ॥ ५ ॥ इति संस्कृतम् ॥

सर्वेषां नयानां प्रत्येकं मिथ्यात्वे तत्समूहस्यापि मिथ्यात्वमिति शङ्कते- नन्वेवमिति। 'सर्वेऽपि नयवादाः' इति पक्षनिर्देशः, 'मिथ्या'

चौरवाक्यवद्' इत्यनुमानात् सर्वेषामेव नयानां मिथ्यादृष्टित्वे तत्समुदायेऽपि सम्यक्त्वं न स्यादिति चेत् ? न-अन्योन्यनिश्रितत्वेन समुदाये सम्यक्त्वसम्भवात् । आह च—

"तम्हा सव्वे वि णया, मिच्छादिट्ठी सपक्खपडिबद्धा (बद्धा)।
अण्णुण्णणिस्सिया पुण, हवंति सम्मत्तसब्भावा"

[सम्मति० का० १ गा० २१]

सम्यक्त्वस्य-यथावस्थितप्रत्ययस्य, भावयन्तीति भावाः, सन्तो भावाः सद्भावाः,अवन्ध्यकारणानीत्यर्थः; ज्ञानात्मकनयपक्षे सम्यक्त्वसद्भावाः-सम्यक्त्वस्वभावा इति वाऽर्थः ।

[सम्मति० का० १, गा० २१]

प्रत्येकं मिथ्यावधारणानामन्यनिश्रितसमुदायेऽपि कथं सम्यक्त्वम् ?

इति साध्यनिर्देशः। 'स्वपक्षेणैव प्रतिहतत्वाद्' इति हेतुः। 'चौरवाक्यवद्' इति दृष्टान्तः। तत्समुदायेऽपि नयसमूहेऽपि। अन्योऽन्यनिरपेक्षाणां मिथ्यात्वेऽपि परस्परसापेक्षाणां सम्यक्त्वसम्भवादिति समाधत्ते- नेति। अन्योऽन्यनिश्रितत्वेन अन्योऽन्यापेक्षत्वेन। उक्तार्थे सम्मतिगाथा- संवादमाह- आह चेति। "तम्हा०" इति- "तस्मात् सर्वेऽपि नया मिथ्यादृष्टयः स्वपक्षप्रतिबद्धाः। अन्योऽन्यनिश्रिताः पुनर्भवन्ति सम्यक्त्वसद्भावाः [स्वभावाः]" ॥ इति संस्कृतम्। 'सम्यक्त्वसद्भावाः' इति विवृणोति- सम्यक्त्वस्येति- 'यथावस्थितप्रत्ययस्यावन्ध्यकारणानि' इति 'सम्यक्त्वसद्भावाः' इत्यस्यार्थः शब्दस्वरूपनयपक्षे। ज्ञानस्वरूपनयपक्षे तस्यार्थान्तरमुपदर्शयति- ज्ञानात्मकनयपक्ष इति। एतद्विषये सम्मतिवृत्तिकृतोऽभिप्रायस्यावतारणाय शङ्कते- प्रत्येकमिति। सम्यक्त्वासम्भवे हेतुमुपदर्शयति- स्वगो वरापरित्यागेनेति।

स्वगोचराऽपरित्यागेन तत्रापि तेषां विषयान्तराऽप्रवृत्तेरिति चेत्? अत्र सम्मतिवृत्तिकृतः–"प्रत्येकमप्यपेक्षितेतरांशस्वविषयग्राहकतयैव सन्तो नयाः, तद्व्यतिरिक्तरूपतया त्वसन्त इति सतां सत्समुदाये सम्यक्त्वे न कश्चिद्दोषः। नन्वितरेतरविषयाऽपरित्यागवृत्तीनां कथं ज्ञानानां समुदायः सम्भवति? येन तत्र सम्यक्त्वमभ्युपगम्येत, अनुक्तोपालम्भ एषः, नह्येकदाऽनेकज्ञानोत्पादतस्तेषां समुदायो विवक्षितः, अपि त्वपरित्यक्तेतररूपविषयाध्यवसाय एव समुदायः, 'अन्योऽन्यनिश्रिताः' इत्यनेनाप्ययमेवार्थः प्रतिपादितः, नहि

तत्रापि अन्यनिश्रितसमुदायेऽपि। तेषां नयानाम्, असतोऽवधारणरूपस्य स्वविषयस्याऽपरित्यागेनैव तेषां समूहो भवति तथा च समुदायभावे न विषयान्तरं नयानामिति यद्विषयत्वेन मिथ्यात्वमसमुदितावस्थायां तद्विषयत्वस्य तदानीमपि सत्त्वेन मिथ्यात्वमेव स्यादिति शङ्काथः। अत्र उक्ताशङ्कायाम्, प्रत्येकं मिथ्यात्वे तत्समुदायेऽपि मिथ्यात्वमुररीक्रियत एव, परमपेक्षितेतरांशस्य स्वविषयस्य ग्राहकत्वेन प्रत्येकमपि सन्त एव नया अभ्युपगम्यन्ते, सतां च तेषां समुदायेऽपि सद्रूपे सम्यक्त्वमुररीक्रियत इति न कश्चिद्दोष इत्यर्थः। ननु ज्ञानानां यौगपद्यं नाङ्गीक्रियत इति नयानां ज्ञानस्वरूपाणां विभिन्नकालीनानां समुदाय एवैककालीनो न सम्भवतीति कथं तस्य सम्यक्त्वमित्याशङ्कते– नन्विति। समाधत्ते– अनुक्तोपालम्भ एव इति– एकदा नानाज्ञानानां समुदायो भवति, तस्य सम्यक्त्वमिति नास्माभिरुक्तं येन तत्रोक्तोपालम्भो युज्येतेत्यर्थः। एतदेव स्पष्टयति– नहीति– अस्य 'विवक्षितः' इत्यनेनान्वयः। तेषां नानाज्ञानानाम्। तर्हि समुदायपदेन किं विवक्षितमित्यपेक्षायामाह– अपि त्विति। ननु गाथायाम्, "अण्णुण्णणिस्सिया" इत्युक्तं तत् कथं सङ्गतमित्यत आह– अन्योऽन्यनिश्रिता इत्यनेनापीति। अयमेवार्थः अपरित्यक्तेतररूपविषया-

द्रव्यार्थिक-पर्यायार्थिकाभ्यामत्यन्तपृथग्भूताभ्यामङ्गुलिद्वयसंयोगवदुभयवादोऽपरः प्रारब्धः" इत्याहुः ॥

अत्रेदं मनाग् मीमांसामहे– ननु विशिष्टैकाध्यवसायस्य समुदायार्थत्वे द्वित्वविशिष्टावग्रहादिजनितघट-पटोभयसमूहालम्बनवत् सकलनयार्थसमूहालम्बनमेकं प्रमाणज्ञानं प्राप्नोति, तच्चायुक्तम्– क्रमिकनयवाक्यैः समूहालम्बनैकप्रमाणज्ञानजननाऽयोगात्, सकलनयार्थवाचकस्य च वाक्यस्याप्येकस्य सप्तभङ्ग्या निषेत्स्यमानत्वात्। न च परेषामवयववाक्यार्थज्ञानजन्यन्यायवाक्यार्थज्ञानवदस्माकमपि

ध्यवसायात्मकसमुदायस्वरूपार्थ एव। उक्तार्थ एव प्रतिपादित इति कथमवगम्यते ? इत्यपेक्षायामाह– नहीति– अस्य 'प्रारब्धः' इत्यनेनान्वयः। आहुरिति– 'सम्मतिवृत्तिकृतः' इत्यनेनान्वितम्, अन्यत् स्पष्टम्।

प्रकृतविषये ग्रन्थकृत् स्वाभिप्रायमाविर्भावयति– अत्रेति– प्रस्तुतविचार इत्यर्थः। इदं 'ननु०' इत्यादिनाऽनन्तरमेवाभिधीयमानम्। मनाक् किञ्चित्। मीमांसामहे विचारयामः। 'द्वित्वविशिष्टावग्रहादि०' इत्यादिपदाद् घटत्वविशिष्टावग्रह-पटत्वविशिष्टावग्रहयोरुपसंग्रहः। सकलनयार्थविषयकैकसमूहालम्बनज्ञाने सम्भवति सत्येव तस्य प्रामाण्यं स्यात्, तदेव तु न सम्भवतीत्याह– क्रमिकेति– क्रमिक नयवाक्यैः क्रमिकाणामेव तत्तद्वाक्यार्थज्ञानानामुदयः, तत्तद्वाक्यार्थज्ञानं प्रत्येव तत्तद्वाक्यानां कारणत्वात्, सकलनयार्थविषयकसमूहालम्बनज्ञानं प्रति प्रत्येकं तत्तन्नयवाक्यानां कारणत्वाभावेन तैरुक्तसमूहालम्बनज्ञानासम्भवात्। नन्वेकवाक्यमेव तथाविधं भवेत्, येन सकलनयार्थविषयकसमूहालम्बनज्ञानोत्पत्तिः स्यादित्यत आह– सकलनयार्थवाचकस्येति– सकलनयार्थबोधकस्येत्यर्थः, यदीदृशं किञ्चिद् वाक्यं भवेत् तर्ह्येकेन तेन सकलनयार्थप्रतिपत्तिसम्भवे सप्तभङ्ग्युपासनमेवानर्थकमापद्येतेत्युपास्यमानया सप्तभङ्ग्या सकलनयार्थप्रतिपादकस्यैकस्य वाक्यस्यात्रैव ग्रन्थेऽग्रे निषेत्स्यमानत्वादित्यर्थः।

क्रमिकनयवाक्यार्थज्ञानजन्यमहावाक्यार्थज्ञानरूपप्रमाणात्मकैकाध्यवसायोपपत्तिरिति वाच्यम्, न्यायवाक्यस्थलेऽपि प्रतीत्यसमुत्पादेनैकैकजनितखण्डवाक्यार्थज्ञानसमुदायस्यैव महावाक्यार्थज्ञानत्वेनास्माभिरभ्युपगमात्, शबलाध्यवसायान्यथानुपपत्त्या परमतस्यायुक्तत्वात्, अन्यथाऽङ्गुलिद्वयसंयोगस्थानीयोभयवादारम्भप्रसङ्गाच्च किञ्च, इयं कल्पना रत्नावलीदृष्टान्तेन नय-प्रमाणात्मकैकचैतन्योपादकसम्मतिवचनविरुद्धत्वादेवानुपादेया, एवं हि तत्—

"जहऽणेगलक्खण-गुणा, वेरुलियाई मणी विसंजुत्ता ।
रयणावलिववएसं, ण लहंति महग्घ(त्थ)मुल्ला वि ॥"

[सम्मति० का० १, गा० २२

'न च' इत्यस्य 'वाच्यम्' इत्यनेनान्वयः । परेषां नैयायिकादीनाम् । अवयवेति- प्रतिज्ञाद्यवयवेत्यर्थः । न्यायवाक्येति- प्रतिज्ञाद्यवयवपञ्चकात्मकमहावाक्यलक्षणन्यायवाक्येत्यर्थः । अस्माकमपि जैनानामपि । प्रत्येकमवयववाक्यार्थज्ञानपञ्चभ्यो महावाक्यस्वरूपन्यायवाक्यार्थज्ञानमुपजायत इति नास्माभिरुपेयते, किन्तु पूर्वपूर्वावयववाक्यार्थज्ञानं प्रतीत्योत्तरोत्तरावयववाक्यार्थज्ञानमुपजायत इत्येवं पूर्वापरभावेनोपजायमानखण्डवाक्यार्थज्ञानसमुदायस्यैव महावाक्यार्थज्ञानत्वेन जैनैरभ्युपगमादिति निषेधहेतुमुपदर्शयति- न्यायवाक्यस्थलेऽपीति- अपिना नयवाक्यस्थले क्रमिकनयवाक्यार्थज्ञानसमुदायस्यैव प्रमाणात्मकत्वम्, न तु समूहालम्बनात्मकैकज्ञानस्य प्रमाणत्वमित्यस्याऽऽक्षेडनम् । एवमेव शबलाध्यवसायसम्भवो नान्यथेत्यतोऽतिरिक्तमहावाक्यार्थज्ञानपरस्य न्यायमतस्यायुक्तत्वादित्याह- शबलेति । अन्यथा सकलनयार्थविषयकसमूहालम्बनात्मकैकप्रमाणज्ञानाभ्युपगमे । सम्मतिवचनविरोधादपि नोक्तकल्पना भद्रेत्याह- किञ्चेति । 'इयं कल्पना' इत्यस्य 'अनुपादेया' इत्यनेनान्वयः । तत् सम्मतिवचनम् ।

यथाऽनेकप्रकाराः–विषघातहेतुत्वादीनि लक्षणानि, नीलत्वादयश्च गुणा येषां ते वैडूर्यादयो मणयः पृथग्भूता रत्नावलीव्यपदेशं न लभन्ते महार्थमूल्या अपि ॥

"तह णिययवायसुविणिच्छिया वि अण्णुण्णपक्खणिरवेक्खा ।
सम्मद्दंसणसद्दं, सव्वे वि णया ण पाविंति ॥"

[सम्मति० का० १, गा० २३]

तथा प्रमाणावस्थायाम्, इतरसव्यपेक्षस्वविषयपरिच्छेदकाले वा स्वविषयपरिच्छेदकत्वेन सुविनिश्चिता – अप्यन्योऽन्यनिरपेक्षाः 'प्रमाणम्' इत्याख्यां सर्वेऽपि नया न प्राप्नुवन्ति, निजे वा निरपेक्षसामान्यादिग्रादे, सुविनिश्चिता अपि–हेतुप्रदर्शनकुशला अपि, अन्योऽन्यपक्षनिरपेक्षत्वात् सम्यग्दर्शनशब्दं 'सुनयाः' इत्येवंरूपम्, सर्वेऽपि–सङ्ग्रहादयो नया न प्राप्नुवन्ति ॥

"जह पुण ते चेव मणी, जहागुणविसेसभागपडिबद्धा ।
रयणावलि त्ति भण्णइ, जहेति पाडेक्कसण्णाओ ।"

[सम्मति०काण्ड० १, गा० २४]

"जह०" इति– "यथाऽनेकलक्षण-गुणा वैडूर्यादयो, मणयो विसंयुक्ताः । रत्नावलीव्यपदेशं न लभन्ते महार्थमूल्या अपि" ॥ इति संस्कृतम् । विवृणोति– यथेत्यादिना, स्पष्टम् ॥

"तह०" इति– "तथा नियत[निजक]वादसुविनिश्चिता अपि अन्योऽन्यपक्षनिरपेक्षाः । सम्यग्दर्शनशब्दं सर्वेऽपि नया न प्राप्नुवन्ति" ॥ इति संस्कृतम् । विवृणोति– तथेत्यादिना । व्याख्यान्तरमाह– निजे वेति ।

"जह पुण०" इति– "यथा पुनस्त एव मणयो यथागुणविशेष-

यथा पुनस्त एव मणयो यथागुणविशेषपरिपाट्या प्रतिबद्धा रत्नावलीति भण्यन्ते, प्रत्येकाभिधानानि च त्यजन्ति, रत्नानुविद्धतया रत्नावल्यास्तदनुविद्धतया च रत्नानां प्रतीतेः, रत्नीयसन्निवेशविशेषस्य तद्विशिष्टरत्नानां वा रत्नावलीशब्दवाच्यत्वाद् विशिष्टानामविशिष्टवाचकशब्दाऽवाच्यत्वाद्, विशिष्टाऽविशिष्टयोः कथञ्चिद्भेदस्य प्रातीतिकत्वात् ॥

"तह सव्वे णयवाया, जहाणुरूवविणिउत्तवत्तव्वा ।
सम्मद्दंसणसद्दं, लहंति ण विसेससण्णाओ ॥"

[सम्मति० का० १, गा० २५]

तथा सर्वे नयवादा यथानुरूपविनियुक्तवक्तव्याः, 'यथा' इति वीप्सार्थे, यद् यदनुरूपं तत्र तत्र विनियुक्तं वक्तव्यमुपचारात्

भागप्रतिबद्धाः । रत्नावलीति भण्यन्ते जहति प्रत्येकसंज्ञाः" ॥ इति संस्कृतम् । मणीनां 'रत्नावली' इति व्यपदेशे स्वाभिधानापरित्यागे च हेतुमुपदर्शयति- रत्नानुविद्धतयेति- रत्नानुविद्धतया रत्नावल्याः प्रतीतेरित्यन्वयः। तदनुविद्धतया च रत्नावल्यनुविद्धतया च। रत्नीयसन्निवेशविशेषस्य रत्नावलीशब्दवाच्यत्वादित्यन्वयः । तद्विशिष्टेति- सन्निवेशविशेषविशिष्टेत्यर्थः । ननु विशिष्ट-शुद्धयोरनतिरिक्तत्वाद् विशिष्टरत्नस्य रत्नावलीशब्दवाच्यत्वे शुद्धस्यापि रत्नस्य रत्नावलीशब्दवाच्यत्वं प्रसज्येतेत्यत आह- विशिष्टानामिति- सन्निवेशविशेषविशिष्टरत्नानामित्यर्थः । अविशिष्टेति- शुद्धरत्नवाचकरत्नशब्दाऽवाच्यत्वादित्यर्थः । रत्नावलीदृष्टान्तमुपपाद्य दार्ष्टान्तिकं नय-प्रमाणात्मकैकचैतन्यमुपपादयति- "तह सव्वे" इति । पूर्वार्धस्य संस्कृतमुल्लिखति- तथेति । उत्तरार्द्धस्य "सम्यग्दर्शनशब्दं लभन्ते न विशेषसंज्ञाः" ॥ इति संस्कृतम् । यथानुरूपेत्यादेर्विवरणमाह- 'यथा' इति वीप्सार्थ इति । तथा

तद्वाचकः शब्दो येषां ते तथा, सम्यग्दर्शनं 'प्रमाणम्' इत्याख्यां लभन्ते, न विशेषसंज्ञाः पृथग्भूताभिधानानि, अजहद्वृत्त्यैकोपयोगत्वविशिष्टसाकाङ्क्षसकलनयवाक्यजनितनयज्ञानानां तादृशनयज्ञानीया-

---

च 'यथानुरूपः' इत्यस्य यद् यद् अनुरूपं तत्र तत्रेत्यर्थः। तथा यथानुरूपविनियुक्तवक्तव्याः। 'विशेषसंज्ञाः' इत्यस्य 'पृथग्भूताभिधानानि' इति विवरणम्॥ यथा एकसूत्राग्रथितानां रत्नानां न रत्नावलीशब्दवाच्यत्वं तथाऽन्योन्यनिरपेक्षाणां स्वस्वविषयपरिच्छेदकत्वेन व्यवस्थितानां नयवादानां न सम्यग्दर्शनशब्दवाच्यत्वं न प्रमाणशब्दवाच्यत्वम्, यथा पुनस्तेषामेव रत्नानां यथागुणविशेषपरिपाट्यैकसूत्रग्रथितानां नैकैकप्रतिनियतस्वस्ववाचकशब्दवाच्यत्वं किन्तु रत्नावलीत्येकशब्दव्यपदेश्यत्वम्, तथाऽशेषाणामपि सङ्ग्रहादिनयवादानां परस्परसापेक्षाणामेतदपेक्षया द्रव्यरूपत्वमेतदपेक्षाया पर्यायरूपत्वमित्येवं स्वस्वविषयप्रतिबद्धानां न प्रत्येकसंग्रहादिनयप्रतिपादकसंग्रहादिप्रतिनियतशब्दवाच्यत्वं किन्तु सम्यग्दर्शनापरपर्यायप्रमाणशब्दवाच्यत्वम्, यथा चानेकेषां रत्नानां रत्नावलीत्येकसंज्ञाभिधेयत्वं तथा चानेकेषां नयानामेकप्रमाणशब्दाभिधेयत्वम्, तत्र कथम्भावाकाङ्क्षानिवृत्तयेत्याह- अजहद्वृत्त्यैकोपयोगत्वेति- प्रमाणशब्दस्यानन्तधर्मात्मकवस्तुविषयकैकोपयोगे रूढस्याप्येकोपयोगत्वविशिष्टेषु साकाङ्क्षसकलनयवाक्यजनितनयज्ञानेषु याऽजहल्लक्षणाख्या वृत्तिस्तया, अस्य 'प्रमाणशब्दवाच्यत्वाद्' इत्यनेनान्वयः, यथा रत्नानां सन्निवेशविशेषविशिष्टानामेकरत्नावलीत्वधर्मविशिष्टत्वं तथा साकाङ्क्षसकलनयवाक्यजनितनयज्ञानानामप्येकोपयोगत्वविशिष्टत्वम्, क्रमिकनयवाक्यजनितनयज्ञानानामनुस्यूतैकदीर्घोपयोगस्वरूपत्वस्यावग्रहादिज्ञानचतुष्टयेषु दीर्घैकमतिज्ञानोपयोगरूपत्वस्येव सम्भवात्, एवं चैकोपयोगत्वविशिष्टानि यानि साकाङ्क्षसकलनयवाक्यजनितनयज्ञानानि तेषां प्रमाणशब्दवाच्यत्वात्। वा अथवा, तादृशनयज्ञानीया साकाङ्क्षसकलनयवाक्यजनितनय-

ऽजहद्वृत्त्यैकोपयोगस्य वा प्रमाणशब्दवाच्यत्वाद् विशिष्टनयात्मकस्यापि प्रमाणचैतन्यस्य शुद्धनयशब्दवाच्यत्वात् ।

नन्ववग्रहादिचतुष्टयात्मकमतिज्ञानोपयोगवत् साकाङ्क्षसकलनयवाक्यजनितनयप्रमाणात्मकचैतन्यस्याध्यक्षसिद्धत्वात् तत्र रत्नावलीदृष्टान्तोपादानं व्यर्थमिति चेत् ? न-एका-ऽनेकात्मकोपयोगे स्वसंवेदनसिद्धेऽपि वादिविप्रतिपत्तिजसंशयनिरासेन निश्चयदार्ढ्यार्थं तदुपपादनात्, तदाह–

ज्ञानसम्बन्धिनी याऽजहद्वृत्तिस्तया, एकोपयोगस्य निरुक्तनयज्ञानानुस्यूतदीर्घैकोपयोगस्य प्रमाणशब्दवाच्यत्वात् । विशिष्टनयात्मकस्यापि एकोपयोगत्वविशिष्टसाकाङ्क्षसकलनयवाक्यजनितनयज्ञानरूपस्यापि । प्रमाणचैतन्यस्य प्रमाणात्मकचैतन्यस्य । शुद्धनयशब्दवाच्यत्वात् शुद्धनयशब्दाभिधेयत्वात्, परस्परनिरपेक्षा ये संग्रहादयो नयास्ते मिथ्यादृष्टयोऽशुद्धनयशब्दव्यपदेश्याः, यत् तु प्रमाणचैतन्यं निरुक्तविशिष्टनयस्वरूपं तच्छुद्धनयशब्दव्यपदेश्यमिति सर्वेषां नयानां मिथ्यादृष्टित्वाच्छुद्धनयशब्दवाच्यत्वं नास्त्येवेत्याशङ्का व्यपाकृता भवतीति । आनुमानिकेऽर्थे दृष्टान्ताभिधानमुचितम्, प्रकृतं तु प्रत्यक्षसिद्धमेवेति तत्र दृष्टान्ताभिधानमनुचितमित्याशङ्कते– नन्विति । 'अवग्रहादि' इत्यादिपदादिहा-ऽवायधारणानां परिग्रहः । तत्र नय-प्रमाणात्मकचैतन्ये । समाधत्ते– नेति । यथा दीर्घोपयोगरूपस्यैकस्य मतिज्ञानस्याऽवग्रहादिचतुष्टयात्मकत्वं तथा क्रमिकपरस्परसाकाङ्क्षनयवाक्यप्रभवानेकक्रमिकनयात्मकैकप्रमाणोपयोगस्वरूपचैतन्यस्य स्वसंवेदनसिद्धत्वेऽपि एकान्ताभिनिवेशलक्षणकदाग्रहशालिनस्तत्र विप्रतिपद्यन्ते वादिन इति तद्विप्रतिपत्तिजश्चैतन्यमेकाऽनेकस्वरूपं भवति नवेति संशयो भवति, तन्निरासेनैकं चैतन्यं क्रमिकनयप्रमाणात्मकमिति निश्चयो रत्नावलीदृष्टान्तत एव सुदृढो भविष्यतीत्येतदर्थं रत्नावलीदृष्टान्तोपपादनमित्याह– एका-ऽनेकात्मकोपयोगे इति । तदुपपादनात् रत्नावलीदृष्टान्तोपपादनात् ।

"लोइयपरिच्छयसुहो, णिच्छयवयणपडिवत्तिमग्गो य ।
अह पण्णवणाविसओ त्ति, तेण वीसत्थमुवणीओ ॥"
[सम्मति० का० १, गा० २६]

लौकिक-परीक्षकाणां– व्युत्पत्तिविकल-तद्युक्तप्राणिनाम्, सुखः– सुखप्रतिपत्त्युपायः, निश्चयवचनस्य–एका-ऽनेकात्मकनिश्चयवाक्यस्य, प्रतिपत्तिमार्गः– प्रामाण्यप्रदर्शकः, 'अथ' इत्यवधारणे, प्रज्ञापनाविषयः– प्रकृतनिदर्शनवाक्यविषयो रत्नावलीदृष्टान्तः, इति– तेन कारणेन, विश्वस्तं– निःशङ्कं यथा ज्ञायते तथा, 'ज्ञापयितुम्' इति शेषः, उपनीतः– उपदर्शितः ॥

न चावश्यवस्थातः प्राग् उत्तरकाले च रत्नानां नियतोपलम्भात् प्रमाणावस्थायाश्च प्रागुत्तरकालं नयानां तदभावादुदाहरणवैषम्यमिति वाच्यम्, प्रमाणस्यैका-ऽनेकात्मकोपपत्तिमात्रार्थमावश्यवस्थोदाहरणोपादानात्, सर्वथासाम्ये दृष्टान्त-दार्ष्टान्तिकभावानुपपत्तेः ।

उक्तार्थं सम्मतिगाथासंवादमाह– तदाहेति । 'लोइय०" इति– "लौकिक-परीक्षकसुखो निश्चयवचनप्रतिपत्तिमार्गश्च । अथ प्रज्ञापनाविषय इति तेन विश्वस्तमुपनीतः' ॥ इति संस्कृतम् । विवृणोति– लौकिकेति । व्युत्पत्ति ति - व्युत्पत्तिविकलाः प्राणिनो लौकिकाः, व्युत्पत्तियुक्ताः प्राणिनः परीक्षकास्तेषामित्यर्थः । 'सुख.' इत्यस्य विवरणम्– सुखप्रतिपत्त्युपाय इति– लौकिक-परीक्षकाणां सुखेन=अनायासेन, या दार्ष्टान्तिकस्य प्रतिपत्तिः– ज्ञानम्, तदुपायः– तन्निमित्तमित्यर्थः । 'निश्चयवचनस्य' इत्यस्य विवरणम्– एकानेकात्मकनिश्चयवाक्यस्येति, एवमग्रेऽपि ज्ञेयम् ॥

दार्ष्टान्तिकवैषम्यान्नोक्तदृष्टान्तः सङ्गत इत्याशङ्क्य प्रतिक्षिपति– न चेति– अस्य 'वाच्यम्' इत्यनेनान्वयः । तदभावात् नियतोपलम्भा-

रत्नादिकारणेष्वावश्यादिकार्यं सदेवेति साङ्ख्यः, तेषामेवानेन रूपेण व्यवस्थितत्वात्, तदव्यतिरिक्तं विकारमात्रं कार्यं परिणमत एवेति सांख्यविशेषः। न खलु कार्यं कारणे प्राग् उत्पत्तेर्विद्यते, नवा

भावात्। प्रतिक्षेपहेतुमाह- प्रमाणस्येति। सर्वथा साम्य इति- अन्यत्रापि यावन्मात्रप्रसिद्ध्यर्थं दृष्टान्तोपादानं तावन्मात्रेणैव दृष्टान्त-दार्ष्टान्तिकयोः साम्यम, यथा- 'पर्वतो वह्निमान् धूमाद्' इत्यादौ पर्वते धूमवत्त्वेन वह्निप्रसिद्ध्यर्थं महानसरूपदृष्टान्तोपादानम्, यथा धूमवत्त्वान्महानसे वह्निरस्ति, एवं पर्वतेऽपि धूमवत्त्वाद् वह्निरिति, एतावन्मात्रेणैव तयोः साम्यम्, पर्वते पर्वतत्वं न तु महानसत्वम्, महानसे महानसत्वं न तु पर्वतत्वमिति वैषम्यं तयोरपि समस्त्येव, अन्यथा धर्ममात्रेण साम्ये भेदप्रयोजकस्य विरुद्धधर्माध्यासस्याभावात् सर्वथैक्यमेव दृष्टान्त-दार्ष्टान्तिकयोरिति भेदनिबन्धनदृष्टान्त-दार्ष्टान्तिकभावानुपपत्तिः स्यात्, तथा प्रकृतेऽपीत्याशयः॥

अत्र सत्कार्यवादिनः सांख्यस्याऽसत्कार्यवादिनो वैशेषिकादेरभ्युपगमो न समीचीनः, किन्तु सदसत्कार्यवादिनो जैनस्याऽभ्युपगम एव ज्यायानित्यावेदयितुं परमतापदर्शनपुरस्सरं तन्मिथ्यात्वमाविष्करोति- रत्नादिकारणेष्विति। तेषामेव रत्नानामेव। अनेन रूपेण रत्नावलीरूपेण। तदव्यतिरिक्तं रत्नाव्यतिरिक्तम्। साङ्ख्याभिप्रायमुपदर्श्य वैशेषिकाद्यभिप्रायमुपदर्शयति- न खल्वित्यादिना- उत्पत्तेः पूर्वमपि कार्यं कारणे विद्यत इत्येतत् सांख्यमतं न युक्तमित्यर्थः। नवेति- कारणं कार्यरूपेण परिणमत इति साङ्ख्यविशेषस्य मतमपि न युक्तमित्यर्थः। तर्हि किमभिमतमायुष्मत इति पृच्छति- किन्त्विति। उत्तरयति- तत्रेति- कारणे इत्यर्थः। पृथग्भूतमेव कारणाद् भिन्नमेव। द्रव्यैकान्तवादिमतमावेदयति- न कार्यमिति- द्रव्यमात्रमेव, तच्च नित्यमेवेति न कार्यम् कार्याभावे च कं प्रति कारणं भवेदिति न किमपि कारणमित्येवमपरे

कारणं कार्यरूपेण परिणमते, किन्तु तत्र पृथग्भूतमेव कार्यं सामग्रीत उत्पद्यते इति वैशेषिकादयः। न कार्यं कारणं वाऽस्ति द्रव्यमात्रमेव तत्त्वमित्यपरे। इति नानाविधाभिप्रायवदेकान्तवादिमते दृष्टान्तस्य साध्यसमतेत्य आह–

" इहरा समूहसिद्धो, परिणामकओ व्व जो जहिं अत्थो।
ते तं व ण तं तं चेव त्ति णियमेण मिच्छत्तं॥ "

[सम्मति० का० १, गाथा० २७]

इतरथा उक्तप्रकारानभ्युपगमे, समूहसिद्धः– रत्नावल्यादिः, परिणामकृतो वा-क्षीरादिषु दध्यादिर्यः, यत्रार्थः, सर्वस्यैव परमाणु-

---

उच्यन्तीत्यर्थः। दृष्टान्तस्य रत्नावलीरूपदृष्टान्तस्य। साध्यसमता साध्यस्यैका-ऽनेकरूपप्रमाणचैतन्यस्य यथाऽसिद्धता तथाऽसिद्धता। "इहरा०" इति– " इतरथा समूहसिद्धः परिमाणकृतो वा यो यत्रार्थः। ते तदेव न तत् तदेवेति नियमेन मिथ्यात्वम्"॥ इति संस्कृतम्। विवृणोति– इतरथेति। अस्यार्थः– उक्तप्रकारानभ्युपगमे, रत्नीयसन्निवेशविशेषस्य सन्निवेशविशेषविशिष्टानां वा रत्नावलीशब्दवाच्यत्वमित्यस्यानभ्युपगमे इत्यर्थः, समूहसिद्धः रत्नावल्यादिः साङ्ख्यमते रत्नादिरूपकारणे रत्नावल्यादिकार्यमवतिष्ठत एवेति कृत्वा रत्नादिसमूह एव रत्नावल्यादिरित्यर्थः। परिणामकृतो वेति– साङ्ख्यविशेषमते रत्नादिरेव रत्नावल्यादिरूपेण परिणमत इति कृत्वा 'परिणामकृतो वा' इति। एतत्सुस्पष्टाधिगतये आह– क्षीरादिष्विति– क्षीरादिकं दध्यादिरूपेण परिणमत इति क्षीरादिषु दध्यादिः परिणामकृत इति। 'यः, यत्रार्थः' इत्यनेन व्याप्तिरभिमता– उक्तदिशा यो यत्रार्थः स तत्समूहकृत- परिणामकृतो वेति। रत्नावल्यादिरपि रत्नादिसमूहकृतो रत्नादिपरिणामकृतश्च; दध्यादिरपि परमाणुसमूहरूप-

समूह-परिणामोभयकृतत्वेऽपि विकल्पाभिधानं लौकिकव्यवहारापेक्षया, ते-रत्नादयः, तदेव-आवल्यादिकमेव, तद्-दध्यादिकम्, न तदेव-न क्षीरादिकमेवेति, नियमेन मिथ्यात्वम्, सत्कार्यवादे कारणव्यापार-वैफल्यप्रसङ्गात्, असत्कार्यवादे च क्षीरादिकमेव दध्यादित्वेन परिणतमिति व्यवहारविलोपप्रसङ्गात्, सदसत्कार्याभ्युपगमे च

क्षीरादिकृतस्तत्परिणामकृतश्चेत्येवमविशेषेऽपि यद् विकल्पेनाभिधानं तल्लोके रत्नावल्यादीनां समूहकृतत्वेन व्यवहारः, दध्यादीनां च परिणामकृतत्वेन व्यवहार इति लौकिकव्यवहारापेक्षयेत्याह- सर्वस्यै-वेति। तत्र कारणमेव कार्यमिति सत्कार्यवादिमतमपि मिथ्या, कार्यं कारणाद् भिन्नमेवेत्यसत्कार्यवादिमतमपि मिथ्येत्युपदर्शनपरं मूलं विवृणोति- त इति। तच्छब्देन रत्नादीनां परामर्शमाश्रित्याह- रत्नादय इति। 'तदेव' इति तच्छब्देन रत्नावलीपरामर्शमभिप्रेत्याह- आवल्यादिकमेवेति, पक्षमप्रेऽपि। रत्नादिकमेव रत्नावल्यादिकमिति सत्कार्यवादे सम्भवदुक्तकम्, सत्कार्यवादश्च कारणव्यापारवैफल्य-प्रसङ्गतो न युक्त इति तस्य मिथ्यात्वमित्याह- सत्कार्यवादे इति। दध्यादिकं क्षीरादिकं नेति वचनमसत्कार्यवादमवलम्ब्य शोभते, असत्कार्यवादश्च क्षीरादिकमेव दध्यादिरूपेण परिणतमिति व्यवहार-विलोपप्रसङ्गतो न युक्त इति तदपि मिथ्येत्याह- असत्कार्यवादे चेति। तदेवमेकान्तवादः सर्वोऽपि मिथ्येति तत्र दृष्टान्तस्य साध्यसमता न दोषपोषाय, किन्त्वनेकान्तवादिनः सदसत्कार्यवाद एव युक्तः, तत्र रत्न-रत्नावल्योर्भिन्नाभिन्नत्वं सुव्यवस्थितमिति तद्दृष्टान्तेनैका-ऽनेकस्वरूपनय-प्रमाणचैतन्यमपि व्यवस्थितमित्यभिप्रायवानाह- सद-सत्कार्याभ्युपगमे चेति- रत्नत्वादेस्तिर्यक्सामान्यत्वाद् रत्नसमूहो नाना-तिर्यक्सामान्यशालित्वेन तिर्यक्प्रचयः, तेन सामूहिकव्यवहारक्षम-कार्यं रत्नावलिस्वरूपं यथा भवति तथा उत्तरोत्तरपर्यायानुगामित्वा-

तिर्यक्प्रचयेनेवोर्ध्वताप्रचयेनाऽपि सामूहिकव्यवहारक्षमकार्यसम्भवादात्मद्रव्यानुस्यूतनय-प्रमाणात्मकचैतन्यमप्रत्यूहमिति भावः ॥

एतदेवाह—

"णिययवयणिज्जसच्चा, सव्वणया परवियालणे मोहा ।
ते पुण ण दिट्ठसमओ, विभयइ सच्चे व अलिए वा ॥"

[सम्मति० का० १, गा० २८]

निजकवचनीये—स्वांशे परिच्छेद्ये, सत्याः—सम्यग्ज्ञानरूपाः, सर्व एव नयाः—सङ्ग्रहादयः, परविचालने-परविषयोत्खनने, मुह्यन्तीति मोहाः-मिथ्याप्रत्ययाः, परविषयस्यापि सत्यत्वेनोन्मूलयितुमशक्यत्वात्, तदभावे स्वविषयस्याप्यव्यवस्थितेः, कस्मात् तानेव नयान्, पुनःशब्दस्यावधारणार्थत्वाद्, दृष्टसमयः— निर्णीतानेकान्ततत्त्वः, सत्यान् वाऽलीकान् वा न विभजते, अपि तु प्रमाणावस्थायां सापेक्षतया

क्यैतन्यमूर्ध्वतासामान्यमिति तदात्मकक्रमिकज्ञानसमूह ऊर्ध्वताप्रचयः, तेनापि सामूहिकव्यवहारक्षमकार्यस्य सम्यङ्नय-प्रमाणस्वरूपस्य सम्भवादात्मद्रव्यानुस्यूतनय-प्रमाणात्मकचैतन्यमविघ्नितरूपमित्यर्थः।

उक्तार्थसंवादिनीं सम्मतिगाथामुपदर्शयति– एतदेवाहेति। "णिययव०" इति– "निजकवचनीयसत्याः सर्वेनयाः परविचालने मोहाः। तान् पुनर्न दृष्टसमयो विभजते सत्यान् वाऽलीकान् वा" ॥ इति संस्कृतम्। विवृणोति– निजकवचनीय इति– अस्यार्थकथनम्– स्वांशे परिच्छेद्ये इति, एवमग्रेऽपि। परविषयोत्खनने कथं नयानां मिथ्याप्रत्ययत्वमित्यपेक्षायामाह– परविषयस्यापीति– परनयविषयस्यापीत्यर्थः। तदभावे परनयविषयाभावे। 'तान् पुनः' इत्यत्रावधारणार्थकस्यैवकारस्याभावात् तानेव नयानित्यर्थः कथमत आह– पुनःशब्दस्येति।

'स्यादस्त्येव द्रव्यार्थतः' इत्यादिरीत्या नयविषयं विभजेतेत्यर्थः ॥

तस्मान्नय-प्रमाणात्मकमेकरूपमेवात्मस्वरूपं व्यवस्थितम्, तत्र कथं विशिष्टैकाध्यवसायलक्षणसमुदायार्थत्वोपपत्तिरिति चेत्? सत्यम्- 'अपरित्यक्तेतररूपविषयाध्यवसाय एव समुदायः' इत्यत्रैकत्वस्याविवक्षितत्वादपरित्यक्तेतररूपविषयत्वस्यैव समुदायार्थस्य नय-प्रमाणसाधारणस्याभिप्रेतत्वात् सकलनयज्ञानं प्रमाणम्, तदेकदेशग्राहका इतराप्रतिक्षेपिणो नयाः, तत्प्रतिक्षेपिणश्च दुर्नया इति त्रैविध्यव्यवस्थानात्, तथा च स्तुतिकारः [श्रीहेमचन्द्रसूरिः]-

"सदेव सत् स्यात् सदिति त्रिधार्थो, मीयेत दुर्नीति-नय-प्रमाणैः।
यथार्थदर्शी तु नय-प्रमाणपथेन दुर्नीतिपथं त्वमास्थः ॥"

[अन्ययोगव्यवछेदिका-श्लो० २८] इति। किमतिविस्तरेण ?।

यदीत्थं न विभजते तर्हि कथं विभजत इत्यत आह- अपि त्विति। 'ननु विशिष्टस्यैकाध्यवसायस्य समुदायार्थत्वे' इत्यादिना प्रारब्धं पूर्वपक्षमुपसंहरति- तस्मादिति। समाधत्ते- सत्यमिति। अत्र अध्यवसाये। यदा चकत्वं न विवक्षितमध्यवसाये तदा यदभीष्टं सिद्ध्यति तदाह- सकलनयज्ञानं प्रमाणमिति। तदेकदेशग्राहकाः प्रमाणविषयीभूतवस्त्वेकदेशग्राहकाः। इतराप्रतिक्षेपिणः स्वविषयीभूतांशातिरिक्तांशाऽप्रतिक्षेपिणः। तत्प्रतिक्षेपिणश्च स्वविषयीभूतांशातिरिक्तवस्त्वंशप्रतिक्षेपिणः पुनः। इति त्रैविध्यव्यवस्थापनात् प्रमाणं नयो दुर्नयश्चेत्येवं त्रैविध्यस्य व्यवस्थितेः ॥

उक्तार्थे श्रीहेमचन्द्रसूरिभगवद्वचनं संवादकतयोपदर्शयति- तथा च स्तुतिकार इति- दुर्नीतितः 'सदेव' इत्येवंरूपेणाऽर्थो मीयेत, तथा च 'सन्नेव घटः' इत्यादिकं दुर्नयवाक्यम्, नयेन 'सद्' इत्येवंरूपेणार्थो मीयेत, तथा च 'सन् घटः' इत्यादिकं सुनयवाक्यम्,

ननु तथापि विसामान्यार्थयत्नो व्यवहारनयस्यानुपपन्नः, इतरार्थप्रतिक्षेपे नयत्वायोगादिति चेत् ? सत्यम्– दुर्नयावस्थायामेव तदुपपत्तेः, अथवा परेषां प्रमाणानुग्राहकतर्कस्येव विसामान्यार्थयत्नस्यात्र स्वार्थदार्ढ्यायैवापेक्षा, न त्वितरांशप्रतिक्षेपमुख्योद्देशेन, तादृशो-

---

प्रमाणेन 'स्यात् सद्' इत्येवंरूपेणार्थो मीयेत, तथा च 'स्यात् सन् घटः' इत्यादिकं प्रमाणवाक्यम्। स्तुत्यं भगवन्तं सम्मुखीकरोति– यथेति– हे भगवन् ! यथार्थदर्शी त्वं नय-प्रमाणपथेन दुर्नीतिपथम्, आस्थः– निराकृतवान्, इत्येवमन्वयः। अस्याऽभिप्रेतार्थो विस्तरतः स्याद्वादमञ्जरीतोऽवसेय इति॥

ननु यदीतरनयविषयाप्रतिक्षेपिण एव नयास्तर्हि सङ्ग्रहनयविषयसमान्यप्रतिक्षेपित्वे व्यवहारस्य नयत्वमेव भज्येतेत्यतः सामान्याऽभावार्थं यत्नो व्यवहारनयस्य न युक्त इत्याशङ्कते– नन्विति। तथाऽपि दुर्नीति-नय-प्रमाणैस्त्रिधाऽर्थैस्य प्ररूपणेऽपि। विसामान्यार्थेति– सामान्याभावार्थेत्यर्थः। समाधत्ते– सत्यमिति। तत् किं विसामान्यार्थयत्नस्यानुपपन्नत्वमेवेत्यत आह – दुर्नयेति। तदुपपत्तेः विसामान्यार्थोपपत्तेः, दुर्नयावस्थस्यैव व्यवहारस्य विसामान्यार्थं यत्नो न तु सुनयभावापन्नस्येत्यर्थः। व्यवहारस्य प्राधान्येन विषयत्वात् स्वविषयो विशेष एव, तस्य दार्ढ्यं तदा भवेद् यदि सामान्यस्य गौणतया विषयत्वप्रयोजकं किञ्चित् स्यादित्यतो विसामान्यार्थं यत्नो वस्तुतोऽनुपपन्नाऽप्याद्रियते, यथा पर्वते वह्नि-धूमयोः सद्भाव एव न त्वसद्भावः, एवमप्यनुमितिविषयस्य पर्वते वह्निसद्भावस्य दार्ढ्यार्थमारोपरूपस्यैव यदि वह्निर्न स्याद् धूमोऽपि न स्यादित्येवंरूपस्य पर्वतेऽसतोरेव वह्न्यभाव-धूमाभावयोरावेदकस्य तर्कस्यादर इत्याह – अथवेति। परेषां नैयायिकादीनाम्। अत्र व्यवहारनये। स्वार्थदार्ढ्याय प्रधानया स्वविषयीभूतविशेषरूपार्थदार्ढ्याय। तादृशोद्देश-

देशस्यव च दुर्नयत्वप्रयोजकत्वमिति न कश्चिद्दोष इत्यादि निर्णीतं नयरहस्यादावस्माभिः।

अथवा 'वच्चइ०' [पत्र० २९१] इत्यादेर्लोकव्यवहारो विनिश्चयतः, तदर्थं व्रजति व्यवहार इत्यर्थः, तथाहि- निश्चयनयमतेन भ्रमरादेः पञ्चवर्ण-द्विगन्ध-पञ्चरसा-ऽष्टस्पर्शवत्त्वे सत्यपि यत्र कृष्णवर्णादौ जनपदस्य निश्चयो भवति तमेवार्थं व्यवहारनयः स्थापयति, न तु सम्मतमप्यन्यम्, तथैव लोकयात्रानिर्वाहात्, न चैवं 'भ्रमरो न श्वेतः' इत्याद्यध्यक्ष-शाब्दयोरतस्मिंस्तद्ग्राहकत्वेन लौकिकप्रामाण्यमपि न स्यादिति शङ्कनीयम्, 'न श्वेतः' इत्याद्यध्यक्षस्योद्भूततया

स्यैव इतरनयविषयप्रतिक्षेपमुख्योद्देशस्यैव। नयरहस्यादाविति- यद्यपि नयरहस्ये- "न चैवमितरांशप्रतिक्षेपित्वाद् दुर्नयत्वम्, तत्प्रतिक्षेपस्य प्राधान्यमात्र एवोपयोगात्, एतद्विषयविस्तरस्तु नाऽत्राऽभिधीयते ग्रन्थान्तरप्रसङ्गात्" [पत्र० ३२] इत्येतावन्मात्रमभिहितम्, तथाऽपि 'नात्र' इत्युपादानतोऽन्यत्र तद्विस्तारः कृत इत्यवगम्यत इति विशेषजिज्ञासुभिरस्मत्कृतग्रन्थान्तरमेतदुपपादकमवलोकनीयमित्येतत्तात्पर्यकमिदं वचनम्, अत एव 'नयरहस्यादौ' इत्यादिपदमुपात्तमिति। "वच्चइ विणिच्छयत्थं" [पत्र० २९१] इति सूत्रस्य व्याख्यान्तरमाह- अथवेति। लोकव्यवहारार्थं व्यवहारनयो व्रजतीत्यमुमर्थमुपपादयति- तथाहीत्यादिना। न चेति- निश्चयनयसम्मतमपि भ्रमरादेः पञ्चवर्णादिकं व्यवहारनयो नैव स्थापयतीत्यर्थः। तथैव भ्रमरादेः कृष्णवर्णादिमत्त्वेनैव। लोकयात्रानिर्वाहात् लोकव्यवहारोपपत्तेः। 'न च' इत्यस्य शङ्कनीयमित्यनेनान्वयः। एवं भ्रमरादेः पञ्चवर्णादिमत्त्वस्यापि निश्चयतो भावे। अतस्मिन् श्वेतत्वाभावाभाववति भ्रमरे। तद्ग्राहकत्वेन श्वेतत्वाभावग्राहकत्वेन। निषेधे हेतुमाह- न श्वेत इति। उद्भूततयेति-

श्वेताद्यभावविषयकत्वोपगमात्, तादृशशब्दस्थले च भावसत्यता-ग्राहकव्युत्पत्तिमहिम्ना श्वेतादिपदानामुद्भूतश्वेतादिपरत्वग्रहेण दोषाभावादिति दिग्॥

अस्मान्नयादेकान्तनित्यचेतनाऽचेतनवस्तुद्वयप्रतिपादकं सांख्यदर्शनमुत्पन्नम्, यद् वादी-

---

उद्भूतत्वेन श्वेताद्यभाववान् भ्रमर इत्येवं पर्यवसितस्वरूपस्य 'भ्रमरो न श्वेतः' इत्याद्यध्यक्षस्योद्भूततया श्वेताद्यभावविषयकत्वेन भ्रमरे श्वेतादिरनुद्भूत एवेत्युद्भूततया श्वेताद्यभाववति भ्रमरे उद्भूततया श्वेताद्यभावावगाहित्वेन तद्वति तत्प्रकारकत्वलक्षणलौकिकप्रामाण्यस्य तत्र सम्भवादित्यर्थः। तादृशशब्दस्थले च 'भ्रमरो न श्वेतः' इत्यादिशब्दस्थले च। भावसत्यतेति- अभिप्रायसत्यतेत्यर्थः 'भ्रमरो न श्वेतः' इति वाक्यप्रयोक्तुः पुंसः 'इदं वाक्यं भ्रमरे उद्भूतश्वेताभावं बोधयतु' इत्यभिप्रायः, तत्सत्यताग्राहकव्युत्पत्तिः- यद् वाक्यं यदर्थवाञ्छयोच्चरितं तद्वाक्यस्य स एवार्थ इति, तन्महिम्ना तत्सामर्थ्येनेत्यर्थः। श्वेतपदस्योद्भूतश्वेतार्थकत्वं यदि नाऽऽश्रीयेत तदा वक्तुस्तात्पर्यं नोपपद्येतेति तात्पर्यान्यथानुपपत्त्या श्वेतादिपदस्योद्भूतश्वेतादौ लक्षणाऽऽश्रीयत इति 'श्वेतादिपदमुद्भूतश्वेतबोधेच्छयोच्चरितम्' इत्येवंस्वरूपोद्भूतश्वेतादिपरत्वग्रहलक्षणतात्पर्यग्रहतः श्वेतादिपदतो लक्षणावृत्तिग्रहजन्योद्भूतश्वेताद्यर्थोपस्थितिद्वारा 'उद्भूतश्वेताद्यभाववान् भ्रमरः' इत्येवंस्वरूपस्य तद्वति तत्प्रकारकत्वलक्षणप्रामाण्याकलितस्य शाब्दबोधस्य सम्भवेन दोषाभावादित्यर्थः

व्यवहारनयसमुत्थं साङ्ख्यदर्शनमिति प्रतिपादयति- अस्मान्नयादिति- व्यवहारनयादित्यर्थः, अस्य 'उत्पन्नम्' इत्यत्रान्वयः।

नन्वन्यत्र चार्वाकमतस्यैव व्यवहारनयसमुत्थत्वेन प्रतिपादनम्, भवता तु साङ्ख्यदर्शनमेव व्यवहारनयसमुत्थत्वेन प्रतिपाद्यत इति

"जं कविलं दरिसणं, एयं दव्वट्ठियस्स वत्तव्वं" ॥

[सम्मति० का० ३ गा० ४८] इति

द्रव्यार्थिकपदमत्र व्यवहारलक्षणा-ऽशुद्धद्रव्यार्थिकपरं द्रष्टव्यम्, शुद्धद्रव्यार्थिकप्रकृतेः सङ्ग्रहनयरूपाया वेदान्तदर्शनोत्पत्तिमूलताया उक्तत्वात्। तस्य चेयं प्रक्रिया- "महदादिकार्यग्रामजनकाशेष-शक्तिप्रचितात् प्रधानादेव कार्यभेदाः प्रवर्तन्ते, तच्च सत्त्व-रज-

---

स्वकपोलकल्पितमेवेदं प्रतिभासत इत्यतस्तत्र सिद्धसेनदिवाकर-वचनं प्रमाणतयोपदर्शयति- यद् वादीति- यद् यस्माद् वादी वादि-प्रकाण्डः सिद्धसेनदिवाकर एवमाहेत्यर्थः। "जं कविलं" इति- यत् कापिलं दर्शनमेतद् द्रव्यार्थिकस्य वक्तव्यम्। इति संस्कृतम् ॥ द्रव्यार्थिकनयः शुद्धाऽशुद्धभेदेन द्विविधः, तत्र शुद्धद्रव्यार्थिकः सामान्यमात्रग्राही सङ्ग्रहः, अशुद्धद्रव्यार्थिको भेदग्राही व्यवहारः, स एव द्रव्यार्थिकपदेनात्र विवक्षित इत्याह- द्रव्यार्थिकपदमत्रेति। शुद्ध-द्रव्यार्थिकस्य द्रव्यार्थिकपदेन कुतो न ग्रहणमित्यपेक्षायामाह- शुद्धद्रव्यार्थिकप्रकृतेरिति।

साङ्ख्यदर्शनमन्तव्यमावेदयति- तस्य चेति- साङ्ख्यदर्शनस्य चेत्यर्थः। इयं 'महादादि' इत्यादिनाऽनन्तरमेव वक्ष्यमाणा। प्रक्रिया मन्तव्यपरिपाटी। महदादीति- महच्छब्देन बुद्ध्यभिधानमन्तःकरण-मुच्यते, अव्यक्तात् प्रधानात् प्रथमं व्यक्तस्वरूपा बुद्धिरेवोत्पद्यत इत्यत-स्तस्य महच्छब्दवाच्यता, आदिपदादहङ्कारादेर्ग्रहणम्, प्रकृतेः सर्वा-पेक्षया प्रधानत्वं महदाद्यशेषकार्यजननानुकूलशक्तिसमन्वितत्वादेवे-त्यावेदनाय 'महदादिकार्यग्रामजनकाशेषशक्तिप्रचितात्' इति 'प्रधानात्' इत्यस्य विशेषणम् प्रधानमिति प्रकृतेः सञ्ज्ञा। प्रधानं किंस्वरूपमित्यपे-क्षायामाह-तच्चेति- प्रधानं चेत्यर्थः, । सत्त्वं लघु प्रकाशकं च, रज

स्तमसां साम्यावस्थालक्षणम्, ततः प्रथमं बुद्धिरुत्पद्यते, बुद्धेरहङ्कारः, अहङ्कारात् पञ्च तन्मात्राणि शब्द-स्पर्श-रूप-रस-गन्धात्मकानि, इन्द्रियाणि चैकादशोत्पद्यन्ते, तत्र श्रोत्र त्वक्-चक्षुर्जिह्वाघ्राणलक्षणानि बुद्धीन्द्रियाणि पञ्च, वाक्पाणि-पाद-पायूपस्थसंज्ञानि कर्मेन्द्रियाणि च पञ्च, एकादशं च मन इति, पञ्चभ्यस्तन्मात्रेभ्यः पञ्च भूतानि, शब्दादाकाशः, स्पर्शाद् वायुः, रूपात् तेजः, रसा-

---

उपष्टम्भकं चलं च, तमो गुरु वारणकं च, एवंस्वरूपाणां सत्त्वरजस्तमसां साम्यावस्थालक्षणम्- समभावेन यदवस्थानं तत्स्वरूपं प्रधानं प्रकृतिरित्युच्यते, तच्च सर्वस्य कार्यस्य कारणमेव, न तु कस्यापि कार्यमतो मूलप्रकृतिरित्याख्यायते । ततः प्रकृतिस्वरूपात् प्रधानात् । प्रथमं न ततः पूर्वं कस्यापि कार्यस्याविर्भाव इत्यतः प्रथमम्, बुद्धिश्च प्रकृतिकार्यत्वाद् विकृतिः, अहङ्कारकारणत्वाच्च प्रकृतिरिति प्रकृतिविकृतिः । बुद्धेरहङ्कारः 'उत्पद्यते' इत्यनुवर्तते, सोऽपि महतः कार्यत्वाद् विकृतिः, तन्मात्रादिषोडशकार्यवर्गस्य कारणत्वात् प्रकृतिरिति प्रकृतिविकृतिः । अहङ्कारादित्यादि स्पष्टम्, केवलं शब्दादौ प्रत्येकं तन्मात्रयोजनया शब्दतन्मात्र-स्पर्शतन्मात्र-रूपतन्मात्र-रसतन्मात्र-गन्धतन्मात्राणीत्येवं पञ्च तन्मात्राणि बोध्यानि । इन्द्रियाणामेकादशसंख्यकत्वं कथमित्यपेक्षायामाह- तत्रेति- इन्द्रियेषु मध्ये इत्यर्थः, अत्र पञ्च तन्मात्राणि अहङ्कारकार्यत्वाद् विकृतिः, पञ्चाकाशादिभूतकारणत्वात् प्रकृतिरिति प्रकृतिविकृतिः, एकादशेन्द्रियाणि तु अहङ्कारकार्यत्वाद् विकृतिः, न तु कस्यापि तत्त्वान्तरस्य कारणमिति न प्रकृतिः । पञ्चभ्यस्तन्मात्रेभ्यः पञ्चभूतानि- 'उत्पद्यन्ते' इत्यस्याऽनुकर्षेणान्वयः । कस्मात् तन्मात्रात् कस्य भूतस्योत्पत्तिरित्यपेक्षायामाह- शब्दादिति- शब्दतन्मात्रादाकाश उत्पद्यते, स्पर्शतन्मात्राद् वायुरुत्पद्यते, रूपतन्मात्रात् तेज उत्पद्यते, रसतन्मात्रादापः समुत्पद्यते, गन्धतन्मात्रात् पृथ्वी समुत्पद्यत इति । उक्तार्थे साङ्ख्याचार्यस्येश्वरकृष्णस्य सम्मति-

दापः, गन्धात् पृथिवी" इति, तदुक्तमीश्वरकृष्णेन–

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात्, पञ्चभ्यः पञ्च भूतानि"।

[साङ्ख्यकारिका–२२]

अत्र च 'महान्' इति बुद्ध्यभिधानम्, बुद्धिश्च 'घटः पटः' इत्याद्यध्यवसायलक्षणा, अहङ्कारस्तु– 'अहं सुभगोऽहं दर्शनीयः' इत्याद्याकारः, मनस्तु सङ्कल्पलक्षणम्, यथा–कस्यचिद् वटोर्ग्रामान्तरे भोजनमस्तीति शृण्वतः सङ्कल्पः स्यात् 'यास्यामि, किं तत्र दधि स्याद्, उतस्विद् दुग्धम्?' इति, तदयं बुद्ध्यहङ्कार-मनसां भेदो मन्तव्यः, महदादयः २३ प्रधान-पुरुषौ चेति पञ्चविंशतिस्तत्त्वानि,

मुपदर्शयति– तदुक्तमीश्वरकृष्णेनेति। प्रकृतेरित्यादिकारिकार्थो व्यक्तः। अत्र च उक्तकारिकायां च। प्रतिनियतकार्योपदर्शनेन बुद्ध्यादीनां लक्षणं क्रमेण प्रकटयति– बुद्धिश्चेत्यादिना–'घटः पटश्च' इत्याद्यध्यवसायेन कार्येण लक्ष्यते बुद्धिः, यस्याऽयमध्यवसायः कार्यमन्तःकरणस्य, तदन्तःकरणमित्युक्ताध्यवसायलक्षणा बुद्धिरित्यर्थः। अहङ्कारस्त्विति– 'अहं सुभगोऽहं दर्शनीयः' इत्याद्याकारः परिणामो यस्मादन्तःकरणात् समुल्लसति तदन्तःकरणमहङ्कार इत्यर्थः। मनस्त्विति– यस्मादन्तःकरणात् संकल्प उपजायते तदन्तःकरणं मन इत्यर्थः। संकल्पः कीदृशः समुल्लसतीत्यपेक्षायामाह– यथेति। तत्र ग्रामान्तरे। अन्तःकरणत्वाऽविशेषेऽप्युक्तकार्यवैलक्षण्याद् बुद्ध्यादीनां भेद इत्याह– तदयमिति। एवं चोक्तदिशा साङ्ख्यदर्शने पञ्चविंशतिस्तत्त्वानि, तज्ज्ञानाच्च मुक्तिरित्याह– महदादय इति– अत्रादिपदादहङ्कार पञ्चतन्मात्रैकादशेन्द्रिय-पञ्च भूतानां ग्रहणम्, तेन त्रयोविंशतिर्महदादयः। यज्ज्ञानमात्रादेव-पञ्चविंशतितत्त्वज्ञानमात्रादेव। एवकारव्यवच्छेद्यमुपदर्श-

यज्ज्ञानमात्रादेव सर्वेषां मुक्तिः, न तु वर्णाश्रमोचिताचारस्याप्यपेक्षा, तदुक्तम्—

"पञ्चविंशतितत्त्वज्ञो, यत्र य(त)त्राश्रमे रतः ।
जटी मुण्डी शिखी वापि, मुच्यते नात्र संशयः "॥ [ ] इति ।

महदादयश्च प्रधानात् प्रवर्तमाना न कारणादत्यन्तभेदिनो भवन्ति बौद्धाद्यभिमता इव कार्यभेदाः, किन्तु त्रैगुण्यादिना प्रधानात्मान एव, तथाहि-यथा प्रधानं त्रिगुणात्मकं तथा बुद्ध्यहङ्कार तन्मात्रेन्द्रिय-भूतात्मकं व्यक्तमपि त्रिगुणात्मकम्, कृष्णादितन्त्वारब्धपटादेः कृष्णादित्वस्यैवोपलम्भेन कारणगुणानुरूपगुणस्यैव कार्यस्य सिद्धेः । किञ्च 'इमे सत्त्वादयो गुणाः, इदं च महदादि

यति- न त्विति । वर्णेति- ब्राह्मण-क्षत्रिय-वैश्य-शूद्राश्चत्वारो वर्णाः, ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासाश्चत्वारश्चाश्रमाः, तेषां प्रत्येकं कर्तव्यत्वेन विहितस्याचारस्य प्रतिनियतस्यापि मुक्तौ नापेक्षेत्यर्थः । उक्तार्थं प्राचां सम्मतिमाह- तदुक्तमिति । 'जटी' इति- जटाधारिणां ब्रह्मचर्य-वानप्रस्थानां ग्रहणम् । 'मुण्डी' इति संन्यासिनो ग्रहणम् । 'शिखी' इति गृहस्थस्य ग्रहणम् । साङ्ख्यमते कार्यस्य कारणादभेद एव न तु भेद इत्याह- महदादयश्चेति । 'बौद्धा०' इत्यादिव्यतिरेकिदृष्टान्तः, तथा च बौद्धादिमते तथा कार्याणि कारणादत्यन्तभिन्नानि न तथा साङ्ख्यमते महदादिकार्यं प्रधानरूपकारणतोऽत्यन्तभिन्नमित्यर्थः । यदि महदादयो न प्रधानादत्यन्तभिन्नास्तर्हि कीदृशास्ते? इति पृच्छति- किन्त्विति । उत्तरयति- त्रैगुण्यादिनेति । महदादीनां त्रैगुण्यादिना प्रधानात्मत्वमेव प्रपञ्चतो दर्शयति- तथाहीत्यादिना । प्रधानस्य त्रिगुणात्मकत्वे तत्कार्यस्य महदादेरपि त्रिगुणात्मकत्वं कारणगुणानुरूपगुणकमेव कार्यं भवतीत्येतत्समर्थनेन व्यवस्थापयति- कृष्णादीति । त्रिगुणत्वेन महदादिकार्यस्य प्रधानात्मत्वं व्यवस्थाप्या-

व्यक्तम्' इति न शक्यते विवेक्तुं, किन्तु 'ये गुणास्तद् व्यक्तम्, यद् व्यक्तं ते गुणाः' इत्यविवेक्येवोभयम्, तथोभयमप्यविशेषतो विषयो भोग्यस्वभावत्वात्, सर्वपुरुषाणामविशेषेण भोग्यत्वात्, पण्यस्त्रीवद्, अचेतनं च सुख-दुःख-मोहावेदकत्वात् प्रसवधर्मि च, यतः प्रधानं बुद्धिं सामान्यं च जनयति, साप्यहङ्कारम्, सोऽपि तन्मात्राणीन्द्रियाणि च, तन्मात्राणि च महाभूतानि जनयन्तीति,

ऽविवेकित्वेन तद्व्यवस्थापयति- किञ्चेति। आकारतो विवेकस्वरूपमुपदर्श्य तदभावं भावयति- इमे इति। इति एवंरूपेण। विवेचनस्याऽशक्यत्वे किं स्यादिति पृच्छति- किन्त्विति। उत्तरयति- य इति, तथा चामेदेन ग्रहणमेवाविवेकित्वमन्तेन च सत्त्वादित्रिगुणस्वरूपप्रधानात्मकत्वं महदादेरित्याशयः। भोग्यस्वभावत्वेन विषयत्वं यथा प्रधानस्य तथा महदादेरपीति विषयत्वेन प्रधानात्मकत्वं महदादेरित्याह- तथेति। उभयमपि। प्रधानात्मककारण-महदादिकार्यं तद्द्वयमपि। पण्यस्त्रीव इति- पण्यस्त्री यथा सर्वपुरुषाणामविशेषेण भोग्या तथैव तदुभयमपीत्यर्थः। सुखदुःखमोहावेदकत्वेन यथा प्रधानमचेतनं तथा महदादिकमपीत्यचेतनत्वेन तयोरैक्यमित्याह- अचेतनं चेति। सुखेति- "एकैव स्त्री रूप-यौवन लावण्यसम्पन्ना स्वामिनं सुखाकरोति, तत् कस्य हेतोः? तं प्रति सत्त्वरूपगुणसमुद्भवात्, सपत्नीर्दुःखाकरोति, तत् कस्य हेतोः? ताः प्रति रजोगुणसमुद्भवात्, स्वमविन्दमानं जनान्तरं मोहयति, तत् कस्य हेतोः? तं प्रति तमोगुणसमुद्भवाद्" इति वचनेनैकस्या अपि स्त्रियः सुख-दुःखमोहावेदकत्वं सत्त्व-रजस्तमोगुणमयत्वेन स्पष्टीकृतम्, तद्दृष्टान्तेन सर्वस्य पुरुषभिन्नस्य सुख-दुःख-मोहावेदकत्वमवगन्तव्यम्। प्रसवधर्मित्वेन प्रधानात्मकत्वं महदादेरुपदर्शयति- प्रसवधर्मि चेति। प्रसवधर्मित्वमेव प्रधानादीनां स्पष्टयति-यत इत्यादिना। सोऽपि बुद्धिरपि। अहङ्कारं 'जनयति' इत्यनुवर्तते, एवमग्रेऽपि। सोऽपि अहङ्कारोऽपि। कार्य-

तस्मात् त्रैगुण्यादिना तद्रूपा एव कार्यभेदाः प्रवर्तन्ते । यथोक्तम्–

" त्रिगुणमविवेकि विषयः, सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं, तद्विपरीतस्तथा च पुमान् " ॥

[साङ्ख्यकारिका–११] इति ।

अथ यदि तद्रूपा एव कार्यभेदाः कथं शास्त्रे व्यक्ता-ऽव्यक्तयोर्वैलक्षण्योपवर्णनम् ?–

" हेतुमदनित्यमव्यापि, सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं, व्यक्तं विपरीतमव्यक्तम् " ॥

[साङ्ख्यकारिका–१०]

इति क्रियमाणं शोभेत ? । अत्र ह्ययमर्थः–हेतुमत्– कारणवद् व्यक्तमेव, बुद्ध्यादीनामेव प्रधानादिहेतुमत्त्वात्, न त्वेवमव्यक्तं कुतश्चित्, यतः, अनित्यम्, अन्यतो हेतुमत्त्वाऽसिद्धेरेतद् हेत्वभि-

---

कारणयोस्तादात्म्यमुपसंहरति– तस्मादिति । तद्रूपा एव प्रधानरूपा एव । उक्तार्थं साङ्ख्यकारिकां संवादकतया दर्शयति– तदुक्तमिति । " त्रिगुणं० " इति कारिका निरूपितार्था एव । तद्विपरीतः त्रैगुण्याद्यभावात् प्रधान-व्यक्ताभ्यां विलक्षणः । तथा च व्यापकत्वादिना प्रधानसदृशश्च, पुमान् कूटस्थनित्यश्चेतनः पुरुषः ।

ननु साङ्ख्यमते यदि प्रधानान्महदादेरभिन्नत्वमेव तर्हि साङ्ख्यशास्त्र एव तयोर्वैलक्षण्योपवर्णनसङ्गतमित्याशङ्कते– अथेति । तद्रूपा एव कारणीभूतप्रधानात्मका एव । ' कथम् ' इत्यस्य ' शोभेत ' इत्यनेनान्वयः । शास्त्रे साङ्ख्यग्रन्थे । वैलक्षण्योपवर्णनं " हेतुमद्० " इत्यादिस्वरूपेण क्रियमाणम् कथं शोभेत इत्यन्वयः । " हेतुमद्० " इत्यादिकारिकार्थमुपदर्शयति– अत्रेति– " हेतुमद्० " इत्यादिकारिकाया-मित्यर्थः । व्यक्तमेव बुद्ध्यादिकमेव– अत्रैव हेतुमाह– बुद्ध्यादीनामेवेति । एवकारव्यवच्छेद्यमुपदर्शयति– न त्विति । अव्यक्तं प्रधानम्, एवं हेतुमत् ।

धानमिति न पौनरुक्त्यम्; तथा प्रधान-पुरुषौ यथा विभुत्वेन व्याप्त्या वर्तेते इति तौ व्यापिनौ, नैवं व्यक्तमिति तदव्यापि, यथा च संसारकाले बुद्ध्यहङ्कारेन्द्रियसंयुक्तं सूक्ष्मशरीराश्रितं व्यक्तं संसरि, नैवमव्यक्तम्, तस्य विभुत्वेन सक्रियत्वायोगात्, बुद्ध्यहङ्कारादिभेदेन चानेकविधं व्यक्तमुपलभ्यते, नाव्यक्तम्, तस्यैकस्यैव सतस्त्रैलोक्यकारणत्वात्; आश्रितं च व्यक्तम्, यद् यत्रोत्पद्यते तस्य तदाश्रितत्वात्, न त्वेवमव्यक्तम्, अकार्यत्वात् तस्य; लयं

न तु नैव, पतेन विपरीतमव्यक्तमित्युपवर्णितं भवति । 'कुतश्चिद्' इति स्थाने 'कुतश्चैतद् ?' इति पाठो युक्तः, कुतः कस्माद्धेतोर्व्यक्तं हेतुमदित्यवधारितमिति पृच्छा। उत्तरयति– यतोऽनित्यम् अनित्यं हि हेतुमद् भवति, अनित्यत्वाद् बुद्ध्यादिकं हेतुमदित्यर्थः। अनित्यत्वमेव हेतुमत्त्वसिद्धये कुत उपदर्शितमित्यपेक्षायामाह– अन्यत इति– अनित्यत्वभिन्नादित्यर्थः। एतद्धेत्वभिधानम् कारिकायाम् 'अनित्यम्' इति हेतुवचनम्। इति पतस्मात् कारणात्। न पौनरुक्त्यम् 'हेतुमद्' इत्यनेनाऽनित्यमेव वस्त्वभिधीयते, तदेव च 'अनित्यम्' इत्यनेनापीत्यर्थतो यत् पौनरुक्त्यं तद् 'हेतुमद्' इत्यस्य सिद्धये हेतुवचनमेतद्, न तु स्वतन्त्रमेतदित्युपवर्णनेन सम्भवतीत्यर्थः। अव्यापि व्यक्तं व्यापि च प्रधानमित्येवं तयोर्वैलक्षण्यमित्याह– तथेति। तौ प्रधान-पुरुषौ। नैवं प्रधान-पुरुषाविव न व्यापि। तत् अव्यक्तम्। व्यक्तं सक्रियम्, प्रधानश्चाक्रिय इत्येवं सक्रियत्वाऽक्रियत्वाभ्यां व्यक्तप्रधानयोर्वैलक्षण्यमित्याह– यथा चेति। नैवमव्यक्तमिति– प्रधानं न तथा संसरणशीलमित्यर्थः। तत्र हेतुमाह– तस्येति– प्रधानस्येत्यर्थः। बुद्ध्यादेर्व्यक्तस्यानेकत्वं प्रधानस्याऽव्यक्तस्यैकत्वमित्यनेकत्वैकत्वाभ्यां तयोर्वैलक्षण्यमित्याह– बुद्ध्यहङ्कारादिभेदेनेति। नाऽव्यक्तम् अव्यक्तं प्रधानमनेकविधं नोपलभ्यते। तस्य प्रधानस्य। आश्रितत्वा-ऽनाश्रितत्वाभ्यामपि व्यक्ताऽव्यक्तयोर्वैलक्षण्यमित्युपदर्शयति– आश्रितं चेति। न त्वेवमव्यक्तम्

गच्छतीति कृत्वा लिङ्गं च व्यक्तम्, तथाहि- प्रलयकाले भूतानि तन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि चाहङ्कारे, सोऽपि बुद्धौ, सापि प्रधाने, न त्वेवमव्यक्तं क्वचिदपि लयं गच्छति; लीनं वाऽव्यक्तलक्षणमर्थं गमयति कार्यत्वादिति लिङ्गं व्यक्तम्, न त्वेवमव्यक्तम्, अकार्यत्वात् कार्योन्मुखरूपानुपलम्भेन तस्य कारणलिङ्गत्वाभावाच्च, सावयवं व्यक्तम्, शब्द-स्पर्श-रूप-रस गन्धात्मकैरवयवैर्युक्तत्वात्, न चैवमव्यक्तम्, तत्र शब्दादिव्यक्तीनामनुपलब्धेः, तथा यथा 'पितरि जीवति पुत्रो न स्वतन्त्रः' तथा व्यक्तं सदा कारणायत्तत्वात् परतन्त्रम्, नैवमव्यक्तम्, अकारणाधीनत्वात्, सर्वदा तस्येति ॥

अव्यक्तमाश्रितं न भवति। तत्र हेतुः- अकार्यत्वात् तस्येति- प्रधानस्याऽकार्यत्वान्न कस्मिन्नपि तदुत्पद्यत इत्यतोऽनाश्रितमित्यर्थः। लयगामित्वलक्षणलिङ्गत्व-तदगामित्वलक्षणालिङ्गत्वाभ्यां तयोर्वैलक्षण्यमित्याह- लयमिति। निरुक्तस्वरूपलिङ्गत्वमेव व्यक्तस्य भावयति- तथाहीत्यादिना- कार्यं कारणे विलीयत इति भूतानि कार्याणि कारणेषु तन्मात्रेषु लीयन्ते, एवमग्रेऽपि। अहङ्कारे 'लीयन्ते' इत्यनुकर्षः, एवमग्रेऽपि। सोऽपि अहङ्कारोऽपि, अत्र वचनविपरिणामेन 'लीयते' इति सम्बन्धः, एवमग्रेऽपि। साऽपि बुद्धिरपि। उक्तस्वरूपलिङ्गत्वं न प्रधान इत्याह- न त्वेवमिति। कार्यस्वरूपतया गमकत्वं लिङ्गत्वमिति पक्षान्तराश्रयणेन व्यक्तस्य लिङ्गत्वमव्यक्तस्याऽलिङ्गत्वमुपपादयति- लीनं वेति। 'न त्वेवमव्यक्तम्' इत्यस्य समर्थनायाह- अकार्यत्वादिति। तस्य प्रधानस्य। सावयवत्व-निरवयवत्वाभ्यां व्यक्ता-ऽव्यक्तयोर्वैलक्षण्यमुपपादयति- सावयवमिति। तत्र प्रधाने। परतन्त्रत्वा ऽपरतन्त्रत्वाभ्यां तयोर्वैलक्षण्यमावेदयति- तथेति। कारणायत्तत्वलक्षणं पारतन्त्र्यमव्यक्तस्य कारणाभावान्नास्तीत्याह- अकारणाधीनत्वादिति। समाधत्ते-

न- परमार्थतस्ताद्रूप्येऽपि प्रकृति-विकृतिभेदेन तयोर्भेदाऽविरोधात्, विकाराणां स्वभावतस्त्रैगुण्यरूपेण प्रकृतिरूपत्वेऽपि सत्त्व-रजस्तमसामुत्कटत्वविशेषान्महदादिभेदेन सर्गवैचित्र्यसिद्धेः, वैधर्म्यं ह्येतन्न तु भेद इति कारणात्मनि कार्यमस्तीति प्रतिज्ञातं भवति। अत्रेदं हेतुकदम्बमुद्भावयन्ति-

---

मेति। ताद्रूप्येऽपि महदादेः प्रकृत्यात्मकत्वेऽपि। प्रकृति-विकृतिभेदेन प्रधानं प्रकृतिः, महदादिकं विकृतिरित्येवं प्रकृति-विकृतिभेदेन। तयोः प्रधान-महदाद्योः। ताद्रूप्ये सति भेदः कथमित्यपेक्षायामाह- विकाराणामिति- महदादीनामित्यर्थः। स्वभावत इति- प्रतिक्षेपं सत्त्वं सत्त्वरूपेण परिणमते, रजो रजोरूपेण, तमस्तमोरूपेणेत्येवं यः स्वभावः कारणगतः स कार्येऽपि, तस्मादित्यर्थः। त्रैगुण्यरूपेणेति- निरुक्तस्वभावतस्त्रैगुण्यं यथा प्रकृत्यवस्थायां तथा विकृत्यवस्थायामपीति तेन त्रैगुण्यरूपेणेत्यर्थः। प्रकृतेः प्रकृतिरूपत्वं सत्त्व-रज-स्तमोरूपत्वम्, तच्च विकृतावपि, एतावांस्तु विशेषः प्रकृत्यवस्थायां गुणानां समभावेन व्यवस्थानं विकृत्यवस्थायां तु विषमभावेनेति सम-विषमभावाऽविवक्षयोभयोरपि त्रैगुण्यरूपेणैकत्वमिति कृत्वा प्रकृतिरूपत्वेऽपीति। सात्त्विक-राजस-तामसभेदेन बुद्ध्यादिनां त्रैविध्यम्, तत्र यस्मिन् बुद्ध्यादौ रजस्तमोगुणद्वयापेक्षया सत्त्वस्योत्कटत्वं तत् सात्त्विकम्, एवं राजस-तामसे अपि बोध्ये, तादृशोत्कटत्वविशेषतः सात्त्विक-राजस-तामसबुद्ध्यादिभेदेन सर्गवैचित्र्यसिद्धिरित्याह- सत्त्व-रजस्तमसामिति। अयं च वैधर्म्यात्मा भेदो न स्वरूपभेद इति तादृशवैधर्म्यसद्भावेऽपि कारणात्मत्वं कार्यस्य न विरुद्ध्यत इति कारणात्मनि कार्यमस्तीति प्रतिज्ञातं साङ्ख्यस्याऽनाबाधमित्याह- वैधर्म्यं ह्येतदिति। कारणात्मनि कार्यमस्तीति प्रतिज्ञामात्रेण न सत्कार्यवादसिद्धिः, तथा सति कारणात्मनि कार्यं नास्तीति प्रतिज्ञामात्रेणाऽसत्कार्यवादोऽपि सिध्येदित्यतस्तत्र हेतुरवश्यमेवोद्भावनीय इत्या-

" असदकरणादुपादानग्रहणात् सर्वसम्भवाऽभावात् ।
शक्तस्य शक्यकारणात्, कारणभावाच्च सत्कार्यम् " ॥
[साङ्ख्यकारिका-९]

यद्यसत् क्रियेत, तदा नभोनलिनमपि क्रियेत, न चैवं भवति, तस्माद् यत् क्रियते तिलादिभिस्तैलादिकार्यं तत् तस्मात् प्रागपि शक्तिरूपेण सिद्धम्, व्यक्तिरूपेण तु तत् तदा कापिलैरपि नेष्यते, इति न व्यवहारबाधः १ । तथा यद्यसत्कारणे कार्यं भवेत् तदा

शयेनाह- अत्रेति- कारणात्मनि कार्यमस्तीति प्रतिज्ञात इत्यर्थः । इदम् " असदकरणाद्० " इत्यादिनाऽनन्तरमेव वक्ष्यमाणम् । 'कार्यमुत्पत्तितः प्रागपि कारणात्मनि सद्' इति प्रतिज्ञा, 'असदकरणाद्' इत्यादिकं तत्र हेतुवचनम् । असतः शशशृङ्गादेः कदाचिदपि केनापि कारणेन करणम्- उत्पादनं न भवति, तद् यदि कार्यत्वेन सम्मतं घट-पटादिकमपि स्वकारणे कपाल तन्त्वादावुत्पत्तितः प्रागसदेव भवेत्, ततस्तस्यापि करणं न स्याद्, भवति च तस्य करणम्, अत उत्पत्तितः प्रागपि कारणात्मनि तदस्तीत्यभिप्रायेणोक्तम् 'असदकरणाद्' इति हेतुं भावयति- यद्यसत्क्रियेतेति । न चैवं भवति असतो नभोनलिनस्य करणं न भवति । तस्मात् असतोऽकरणात् । तत् तैलादिकार्यम्, तस्मात् तैलाद्युत्पत्तिकालात् । शक्तिरूपेण कारणात्मतालक्षणशक्तिरूपेण । व्यक्तिरूपेण तैलादिविशिष्टसंस्थानाविर्भावलक्षणव्यक्तिरूपेण । तत् तैलादिकम् । तदा तैलादिस्वरूपाविर्भावपूर्वकाले । कापिलैरपि सत्कार्यवादिभिः साङ्ख्यैरपि, अपिना असत्कार्यवादिभिस्तु शक्तिरूपेणाऽपि तदानीं तदनभ्युपगच्छद्भिर्व्यक्तिरूपेण सुतरां नेष्यत इत्यस्य सूचनम् । इति न व्यवहारबाधः एतस्मात् कारणादुत्पत्तितः प्राग् यः कार्यस्यासत्त्वव्यवहारस्तस्य न बाधः, तदानीं तदसत्त्वव्यवहारस्य व्यक्तिरूपेण तदसत्त्वविषयकत्वाद् व्यक्तिरूपेण तदसत्त्वस्य भावादुपपद्यत एव तथा व्यवहार इति एवं तन्तुपूत्पत्तितः प्राग्

पुरुषाणां प्रतिनियतोपादानग्रहणं न स्यात्, शालिफलार्थिनश्च शालिबीजमेवोपाददते, न कोद्रवबीजम् शालिबीजादिषु शालिफलादीनामसत्त्वे च तद्वत् कोद्रवबीजानामपि ग्रहणप्रसङ्गः, न चैवं भवति, तस्मात् तत्र तत्कार्यमस्तीति गम्यते २। तथा यद्यसदेव कार्यमुत्पद्यते तदा तृण-पांस्वादेः सर्वस्वर्ण रजताद्युत्पत्तिप्रसङ्गः, पूर्वं कारणमुखेन

यदि पटो न स्यात् तर्हि यथा तन्तुषु पटो नास्ति तथा कपालादिष्वपि पटो नास्तीति पटार्थी तन्तूनेवोपादत्ते न कपालादीनिति नियतकारणोपादानं नैव भवेत्, पटाऽसद्भावाऽविशेषात् तन्तूनामिव कपालादीनामपि तदर्थमुपादानं स्यात्, नैव वा कपालादीनामिव तन्तूनामप्युपादानं स्यादिति प्रतिनियतोपादानग्रहणादुत्पत्तितः प्रागपि कारणात्मनि कार्यमस्तीत्यभिप्रायकम् 'उपादानग्रहणाद्' इति हेतुं समर्थयति- तथेति। प्रतिनियतोपादानग्रहणमेव स्पष्टयति- शालिफलार्थिनश्चेति। उत्पत्तितः प्राक् कार्याऽसत्त्वे तु प्रतिनियतोपादानग्रहणानुपपत्तिं भावयति- शालिबीजादिष्विति। तद्वदिति- शालिफलार्थिनः शालिबीजग्रहणवदित्यर्थः। उक्तप्रसङ्गं इष्टापत्तिं परिहरति- न चैवमिति- शालिफलार्थिनः शालिबीजग्रहणवत् कोद्रवबीजग्रहणं न भवतीत्यर्थः। तस्मात् प्रतिनियतोपादानग्रहणात्। तत्र शालिबीजादिषु। तत्कार्यं शालिबीजकार्यं शालिफलादिकम्। यद्यसदेव कार्यं कारणाद् भवेत् तदाऽसत्त्वाविशेषात् तन्तुभ्यो यथा पटो भवति तथा घटादिरपि स्यादिति सर्वस्मात् सर्वस्योत्पत्तिप्रसङ्गः, न च भवति सर्वं सर्वस्मादिति यदेव कार्यं यत्र कारणे तस्मात् कारणात् तस्यैव कार्यस्य भाव इति सत्कार्यसिद्धिरित्यभिप्रायकं 'सर्वसम्भवाऽभावाद्' इति हेतुं विवृणोति- तथेति। 'उपादानग्रहणाद्' इति हेतौ तत्कारणस्योपादानवत् तदन्यस्याप्युपादानं स्यादिति कारणमुखेन प्रसङ्ग उपदर्शितः, 'सर्वसम्भवाभावाद्' इति हेतौ च प्रतिनियतकार्योत्पादवत् तदन्यकार्यस्याप्युत्पादप्रसङ्ग इति कार्यमुखेन प्रसङ्ग इत्यनयोरेकेनाऽपरस्य न गतार्थता, उक्तदिशा विशेषसद्भावादित्याह- पूर्वमिति। प्रसङ्गे इष्टापत्तिं

प्रसङ्ग उक्तः, सम्प्रति तु कार्यमुखेनेति विशेषः, न च सर्वं सर्वतो भवति, तस्मादयं नियमः, तथैव तस्य सद्भावादिति गम्यते ३ । स्यादेतत्– 'कारणानां प्रतिनियतेष्वेव कार्येषु शक्तयः प्रतिनियताः, तेन कार्यस्याऽसत्त्वेऽपि किञ्चिदेव कार्यं क्रियते, न नभोनलिनम्, किञ्चिदेवोपादानमुपादीयते यदेव समर्थम्, किञ्चिदेव च कुतश्चिद् भवति न तु सर्वं सर्वस्मादिति नोक्तप्रसङ्गेभ्य सत्कार्यसिद्धिः' इति, असदेतत्– यतः शक्ता अपि हेतवः कार्यं कुर्वाणाः शक्यक्रियमेव कुर्वन्ति नाशक्यक्रियम्, असच्च कार्यं शशविषाणवदनाधेयातिशयत्वादशक्य-

---

परिहरति– न चेति। तस्मात् **सर्वस्मात् सर्वसम्भवाभावात्**। अयं नियमः **तन्तुभ्य एव पटस्यैव सम्भव इति नियमः**। तत्रैव तस्य तद्भावात् **तन्तुष्वेव पटस्य सद्भावात्**। **'शक्तस्य शक्यकरणाद्' इति चतुर्थहेतुसमर्थनाय** पराशङ्कां तावदाशङ्क्योपन्यस्यति– स्यादेतदिति– **'यदि कारणात्मनि कार्यं न स्यात् सर्वस्मात् सर्वं स्याद्'** इति प्रसङ्गो योऽभिहितः स न सम्भवति, असत्त्वाऽविशेषेषु प्रतिनियत एव कार्ये प्रतिनियतस्य कारणस्य शक्तिः, न तु नभोनलिनादिके शक्तिः कस्यापि कारणस्येति न नभोनलिनादिकं कुतोऽपि कारणाद् भवितुमुत्सहते, न तु पटशक्ततन्त्वादिकारणात् पटस्येव घटादेरप्युत्पत्तिः, एवं यदेव कारणं यत्र कार्ये शक्तं तत्कार्यार्थं तदेव कारणमुपादीयते, अन्यत् तु तत्रासमर्थत्वादेव नोपादीयते, यदेव च यत्र समर्थं समर्थात् ततस्तस्यैवाऽसतोऽपि सम्भवो नान्यस्येति न सर्वस्मात् सर्वसम्भवप्रसङ्गोऽपीति नोक्तप्रसङ्गेभ्यः सत्कार्यसिद्धिरिति शङ्कार्थः। यच्चाऽशक्यक्रियं तस्य समर्थादपि कारणान्न सम्भवः, यथाऽशक्यक्रियस्य शशशृङ्गादेर्न कस्मादपि सम्भवः अशक्यक्रियमेव च पूर्वमसत्त्वयाऽभ्युपगतं कार्यमिति न तस्य समर्थादपि कारणादुत्पत्तिसम्भव इत्याशयेनोक्ताशङ्कां प्रतिक्षिपति– असदेतदिति। 'असच्च कार्यम्' इत्यस्य **'अशक्यक्रियम्'** इत्यनेन सम्बन्धः, असतोऽशक्यक्रियत्वे

क्रियम् । न च प्रागसदपि सामग्रीसम्पत्तौ सदवस्थाप्रतिपत्तेर्विक्रियत इति शक्यक्रियम् ? तस्य विकृताविष्यमाणायां निरुपाख्यात्माऽसद्रूपहानिप्रसङ्गात्, नह्यसतः स्वभावापरित्यागे सद्रूपतापत्तिर्युक्ता, परित्यागे वा नासदेव सद्रूपतां प्रतिपन्नमिति सिद्ध्येत्, अन्यदेव हि सद्रूपमन्यचाऽसद्रूपम्, परस्परपरिहारेण तयोरवस्थितत्वात्, तस्माद् यद् असत् तद् अशक्यक्रियमेव, तथाभूतकार्य-

'अनाधेयातिशयत्वाद्' इति हेतुः । शशविषाणवदिति- यथा शशविषाणमसदित्यनुपाख्यत्वादनाधेयातिशयम्, तत्त्वाच्चाशक्यक्रियं न केनापि कर्तु शक्यते तथेत्यर्थः । ननु पूर्वमसदपि सामग्रीसम्पत्त्या सदवस्थाप्राप्त्या विक्रियामाप्नोतीति शक्यक्रियं भवतीत्याशङ्क्य प्रतिक्षिपति- न चेति । निषेधे हेतुमाह- तस्येति- प्रागसतः कार्यस्येत्यर्थः, संस्थानाद्यवाप्तिलक्षणविकाराभ्युपगमे तस्य यथाविधधर्मवत्त्वेन सोपाख्यत्वतो निरुपाख्यलक्षणस्याऽसद्रूपस्य हानिः प्रसज्यते, ततो नाऽसतो विकृतिसम्भव इत्यर्थः । विकृतावसद्रूपहानिप्रसङ्गो योऽभिहितस्तदुपपादनायाह- नहीति- अस्य 'उक्ता' इत्यनेनान्वयः । ननु पूर्वमसदपि निरुपाख्यलक्षणस्वस्वभावं परित्यज्यैव सद्रूपतामाप्नोतीत्यत आह- परित्यागे वेति । असत्स्वभावपरित्यागे वेत्यर्थः, तथा चासत्स्वभावपरित्यागे तदानीं नासदिति नासदेव सद्रूपतां प्रतिपन्नम्, किन्त्वन्यदेव असत्, अन्यच्च सद्रूपताभाजनमिति । एतदेव स्पष्टयति- अन्यदेवेति । हि यतः । कथं सद्रूपाऽसद्रूपयोरन्यत्वमित्यपेक्षायामाह- परस्परपरिहारेणेति- यन्न सत् तदसत्, यन्नाऽसत् तत् सदित्येवं परस्परव्यवच्छेदेनेत्यर्थः । तयोः सद्रूपाऽसद्रूपयोः । एवं च असद्रूपं विक्रियां नाप्नोत्येवेत्यनाधेयातिशयस्य तस्य न शक्यक्रियत्वमित्युपसंहरति- तस्मादिति । भवत्वसदशक्यक्रियम्, एवंविधमपि तत् करोतु कारणमित्यत आह- तथाभूतेति अशक्यक्रियेत्यर्थः । तच्च कारणानामशक्यकारित्वं च, यद्यशक्यक्रियमपि कार्यं करोति कारणं तर्हि शशशृङ्गादि-

कारित्वाभ्युपगमे च कारणानामशक्यकारित्वमेवाभ्युपगतं स्यात्, तच्चातिप्रसङ्गादयुक्तमिति शक्तिप्रतिनियमादसत्कार्यप्रतिनियम इत्युत्तरम्; एतेन 'शक्तस्य शक्यकरणाद्' इति ४ चतुर्थो हेतुर्व्याख्यातः।

"कार्यस्यैव न योगाच्च, किं कुर्वत् कारणं भवेत् ?।
ततः कारणभावोऽपि, बीजादेर्न विकल्प्यते"॥ [ ]

इति पञ्चमहेतुसमर्थनस्यार्थः- यथोक्तहेतुचतुष्टयादसत्कार्यवादे सर्वदा कार्यस्यायोगात् किं कुर्वद्बीजादि कारणं भवेत् ? तथा चैवं शक्यते वक्तुम्- न कारणं बीजादिकमविद्यमानकार्यत्वाद् गगनाब्जवत्, न चैवम्, तस्माद् विपर्यय इति सिद्धं प्रागुत्पत्तेः कार्यं सत्।

कमपि कुर्यादित्यतिप्रसङ्गभाग्या कारणानामशक्यक्रियकारित्वं नाभ्युपगन्तुं युक्तमित्यर्थः। यदा चाशक्यक्रियेऽसति कार्ये शक्तिरेव कारणस्य न सम्भवति तर्हि सुतरां शक्तिप्रतिनियमादसत्कार्यप्रतिनियमो न सम्भवतीत्याह- इति शक्तिप्रतिनियमादिति। यदर्थमुक्तशङ्काप्रतिविधानगुम्फनं तं प्रकृतमर्थमनुसरति- एतेनेति-शक्तिप्रतिनियमादसत्कार्यप्रतिनियमासम्भवेनेत्यर्थः, अस्य 'व्याख्यातः' इत्यनेनान्वयः। 'कारणभावाच्च' इति पञ्चमहेतुसमर्थनायाह- कार्यस्यैवेति। इति पञ्चहेतुसमर्थनस्य "कार्यस्यैवः' इत्यादिस्वरूपपद्यस्य 'कारणभावाद्' इति पञ्चमहेतुसमर्थनपरस्य। अर्थः 'प्रदर्श्यते' इति शेषः। यथोक्तेति-'असदकरणाद्०' इत्याद्युक्तेत्यर्थः। हेतुचतुष्टयात् असदकरणम्, उपादानग्रहणं सर्वसम्भवाभावः शक्तस्य शक्यकरणमित्येवं हेतुचतुष्टयात्। 'कार्यस्यैव न योगाद्०' इत्यस्यार्थकथनम्- 'असत्कार्यवादे सर्वदा कार्यस्यायोगाद्' इति तत्र च हेतुः- 'यथोक्तहेतुचतुष्टयाद्' इति। उत्तरार्धफलितार्थकथनम्- तथा चेत्यादिना वक्तव्यमेवोपदर्शयति- न कारणमिति। न चैवं बीजादिकं न कारणमिति, न च अर्थाद् बीजादिकं कारणमेव तस्माद् विपर्ययः

स्यादेतत्- एवं हि नाम सत्कार्यं सिद्ध्यतु, प्रधानादेव महदादिकार्यभेदा इत्येतत् तु कथं सिध्यति ?, उच्यते-

" भेदानां परिमाणात्, समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारण-कार्यविभागादविभागाद् वैश्वरूप्यस्य " ॥

[साङ्ख्यकारिका० १५]

भेदानां महदादीनाम्, परिमाणं दृश्यते- एका बुद्धिः, एकोऽहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि इति, ततस्तत्कारणमेकमेष्टव्यम्, परिमितत्वेनोपलभ्यमानघटादेरिव मृदादि, तदेव प्रधानम् १ । तथा भेदानां समन्वयात्- कारणजात्यनुवृत्तिदर्शनात्, यज्जातीयमन्वितं हि यदुपलभ्यते तत् तन्मयकारणसम्भूतम्, यथा-घटशरावादयो मृज्जात्यन्विता मृदात्मककारणसम्भूताः,

'बीजादिकं विद्यमानकार्यकं कारणत्वाद्' इत्येवंरूपः 'करणं न भवेद्' इति प्रसङ्गस्य विपर्ययः । उपसंहरति- इति सिद्धमिति । प्रधानादेव महदादीनां प्रादुर्भावो नान्यस्मात् कारणादित्येतदसहमानस्य परस्याशङ्कां समाधातुमुपन्यस्यति- स्यादेतदिति । एवं हि असदकरणादिहेतुपञ्चकैः । समाधत्ते- उच्यत इति । " भेदानां० " इति साङ्ख्यकारिकां विवृणोति- भेदानामिति । परिमाणं परिमितत्वम् तत् स्पष्टयति- एका बुद्धिरिति- 'बुद्ध्यादय एककारणकाः परिमितत्वाद् घटादिवद्' इत्यनुमानमत्राभिमतमावेदयितुमाह- तत इति- भेदानां परिमितत्वादित्यर्थः । तत्कारणं महदादिभेदकारणम् । तदेव प्रधानं परिमितानां बुद्ध्यादीनां यदेवाऽपरिमितमेकं कारणं तत् प्रधानं प्रकृतिर्भवतीति ।

समन्वयाख्यद्वितीयहेतुतः प्रधानं साधयति-तथेति । 'समन्वयाद्' इत्यस्य फलितार्थकथनम्- 'कारणजात्यनुवृत्तिदर्शनाद्' इति । 'बुद्ध्यादयः सुख-दुःख-मोहात्मककारणसम्भूताः सुखदुःखमोहात्मकत्वाद्' इति विशेषानुमानेऽभिमते साध्य-साधनविशेषयोरविनाभावस्य कुत्रापि दृष्टान्ते ऽदर्शनेन साध्य-साधनसामान्यव्याप्तिमेवोपदर्शयति- यज्जाती-

सुख-दुःख-मोहादिजातिसमन्वितं चेदं व्यक्तमुपलभ्यते, प्रसाद-ताप-दैन्यादिकार्योपलब्धेः, तथाहि–प्रसाद-लाघवा-ऽभिष्वङ्गोद्धर्ष-प्रीतयः सत्त्वस्य कार्यम्, सुखमिति च सत्त्वमेवोच्यते; ताप-शोष-भेद-स्तम्भोद्वेगा रजसः कार्यम्, रजश्च दुःखम्; दैन्याऽऽवरण-सादना-ऽवध्वंस-बीभत्स-गौरवाणि तमसः कार्यम्, तमश्च मोहशब्देनोच्यते; एषां च महदादीनां सर्वेषां प्रसाद-ताप-दैन्यादिकार्यमुपलभ्यत इति सुख-दुःख-मोहानां त्रयाणामेते सन्निवेशविशेषा इत्यवसीयते, तेन सिद्धमेतेषां प्रसादादिकार्यतः सुखाद्यन्वितत्वम्, तदन्वयाच्च तन्मय-प्रकृतिसम्भूतत्वमिति प्रधानसिद्धिः २। तथेह लोके यो यस्मिन्नर्थे प्रवर्तते स तत्र शक्तः, यथा-तन्तुवायः पटकरणे, अतो व्यक्तोत्पादनार्थं प्रवर्तमानं किञ्चित् कारणं शक्तिमदेष्टव्यम्, तदेव प्रधानमिति शक्तितः प्रधानसिद्धिः ३। तथेह लोके कार्य-कारणयोर्विभागो दृष्टः, तद्यथा–मृत्पिण्डः कारणं घटः कार्यम्, स च मृत्पिण्डाद् विभक्तः, तथाहि–घटो मधूदक पयसां धारणसमर्थो न मृत्पिण्डः,

---

ति। इदं व्यक्तं **महदादिलक्षणं व्यक्तम्**। **प्रसादः सुखस्य कार्यम्, तापो दुःखस्य कार्यम्, दैन्यं मोहस्य कार्यमिति तदुपलब्धितः सुख-दुःख-मोहादिजातिसमन्वितं बुद्ध्यादिकमित्याह**-प्रसादेति। **प्रसादादिकार्यतः सुखादिसमन्वितत्वं महदादीनां भावयति**– तथाहीति– उद्धर्षो **रोमाञ्चम्, स्पष्टमन्यत्**। एते बुद्धादयः, तेन **सुख-दुःख-मोहसन्निवेशविशेषत्वेन**। एतेषां **महदादीनाम्**। तदन्वयाच्च **सुखाद्यन्वयात् पुनः**। तन्मयेति– **सुखादिमयेत्यर्थः**।

प्रधानसिद्धिनिबन्धनं 'शक्तितः प्रवृत्तेः' **इति तृतीयहेतुं भावयति**– तथेति। 'कारण-कार्यविभागाद्' **इति चतुर्थहेतुं भावयति**– तथेति। **कार्य-कारणविभागमेव स्पष्टयति**– तद्यथेति। स च **घटश्च**। **मृत्पिण्डाद् विभक्तत्वमेव घटस्य व्यवस्थापयति**– तथाहीति। एवं **यथा घटो**

एवमिदं महदादिकार्यमपि विभक्तमुपलभ्यमानं प्रधानं कारणं साधयतीति ४। तथा वैश्वरूप्यं नाम त्रयो लोकाः, तदविभागात् प्रधानसिद्धिः, तथाहि–प्रलयकाले पञ्च भूतानि पञ्चसु तन्मात्रेष्वविभागं गच्छन्ति, तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारस्तु बुद्धौ, बुद्धिः प्रधान इति। अविभागोऽविवेकः, यथा-क्षीरावस्थायामन्यत् क्षीरमन्यद् दधीति विवेको न शक्योऽभिधातुम्, तद्वत् प्रलयकाले 'इदं व्यक्तमिदमव्यक्तम्' इति विवेकोऽशक्यक्रिय इति मन्यामहे–अस्ति प्रधानम्, यत्र महदादिलिङ्गमविभागं गच्छतीति ५॥

सत्त्व-रजस्तमोलक्षणसामान्यमेकमचेतनं द्रव्यम्, अनेकं च चेतनम्, द्रव्यमर्थोऽस्तीत्यशुद्धद्रव्यार्थिको व्यवहारनयः साङ्ख्यदर्शनरूपः प्रवृत्तः।

सोऽयं मिथ्या, विचारासहत्वात्। तथाहि–'प्रधानादेव महदादिकार्यभेदाः प्रवर्तन्ते' इति यदुक्तं तत्र यदि महदादयः कार्यविशेषाः

मृत्पिण्डाद् विभक्त उपलभ्यते तथा। 'अविभागाद् वैश्वरूप्यस्य' इति पञ्चमहेतुं भावयति– तथेति। तदविभागात् लोकत्रयाविभागात्। अविभागतः प्रधानसिद्धिं समर्थयति– तथाहीति। अविभागात् प्रधानसिद्धिरभिमता, तत्राविभाग एव क इत्यपेक्षायामाह– अविभागोऽविवेक इति। अविवेकमेव दृष्टान्तावष्टम्भेन दार्ष्टान्तिके दर्शयति– यथेति।

अशुद्धद्रव्यार्थिकस्य व्यवहारनयस्य साङ्ख्यदर्शनरूपत्वमुपपादयति– सत्त्वेति। द्रव्यमर्थोऽस्तीति द्रव्यार्थिकः, तत्र महासामान्यशुद्धसत्त्वलक्षणद्रव्यविषयकस्य संग्रहनयस्य शुद्धद्रव्यार्थिकत्वम्, व्यवहारे च साङ्ख्यदर्शनरूपे एकद्रव्यविषयकत्वा-ऽनेकद्रव्यविषयकत्वयोः सद्भावादशुद्धद्रव्यार्थिकत्वमिति व्यवहारनयमूलकत्वेन प्रपञ्चितस्य साङ्ख्यदर्शनस्य विचारा-ऽसहत्वेन मिथ्यात्वं व्यवस्थापयति–सोऽयमिति

प्रधानस्वभावा एव, कथमेषां कार्यतया ततः प्रवृत्तिर्युक्ता ? न हि, यद् यतोऽव्यतिरिक्तं तत् तस्य कार्यं कारणं वेति व्यपदेष्टुं युक्तम् कार्य-कारणयोर्भिन्नलक्षणत्वात्, इत्थं च यदीश्वरकृष्णेनोच्यते–

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त।
षोडशकश्च विकारो, न प्रकृतिर्न विकृतिः पुरुषः" ॥

[साङ्ख्यकारिका–३] इति।

साङ्ख्यदर्शनरूपो व्यवहारनयोऽनन्तराभिहित इत्यर्थः। एषां प्रधानस्वभावानां महदादीनाम्। ततः प्रधानात्। प्रधानादभिन्नानां महदादीनां प्रधानकार्यत्वं न युक्तम्, ययोर्भेदस्तयोरेव कार्य-कारणभावो भवति, यच्च यत्स्वरूपं तत् तस्यैव कार्यं कारणं वेति व्यपदेष्टुं न शक्यमित्याह- नहीति। इत्थं च महदादीनां प्रधानस्वभावत्वेन प्रधानकार्यत्वाऽसम्भवे च।

मूलप्रकृतिरिति– सर्वेषामादिकारणत्वान्मूलप्रकृतिः प्रधानं, सा च न कस्यापि तत्त्वान्तरस्य कार्यमित्यविकृतिः। महदाद्या इति– महदहङ्कार-पञ्चतन्मात्राणीत्येवं सप्त प्रकृति-विकृतयः, तत्र महान् बुद्धिरहङ्कारस्य तत्त्वान्तरस्य कारणत्वात् प्रकृतिः, प्रधानस्य कार्यत्वाच्च विकृतिः, एवमहङ्कारः पञ्चतन्मात्रादिषोडशगणस्य कारणत्वात् प्रकृतिः, महतः कार्यत्वाद् विकृतिः, पञ्च तन्मात्राणि च पञ्चमहाभूतस्य कारणत्वात् प्रकृतिः, अहङ्कारस्य कार्यत्वाद् विकृतिरिति भवन्ति महदाद्याः सप्त प्रकृतिविकृतयः, पञ्चमहाभूत–पञ्चज्ञानेन्द्रिय-पञ्चकर्मेन्द्रिय-मनोलक्षणः षोडशगणश्च न कस्यापि तत्त्वान्तरस्य कारणमिति प्रकृतिर्न भवति, किन्तु पञ्चमहाभूतानां पञ्चतन्मात्रकार्यत्वमिन्द्रियाणां चैकादशानामहङ्कारकार्यत्वमिति विकार एव भवति, पुरुषस्तु कूटस्थनित्यत्वान्न कस्यापि कारणं कार्यं वेति प्रकृतिरपि न भवति नापि विकृतिरिति ॥

तत् सर्वमिदमिन्द्रजालम्–सर्वेषां परस्परमव्यतिरेकात् कार्यत्व-कारणत्वान्यतरस्यैव प्रसङ्गात्, अन्यापेक्षत्वात् कार्य-कारणभावस्या-पेक्षणीयरूपान्तराभावात् पुरुषवदप्रकृतिविकृतित्वप्रसङ्गाद् वा, अन्यथा पुरुषस्यापि प्रकृति-विकृतिव्यपदेशप्रसक्तेः, तत् सुष्ठूपहस्यते कापिला-चार्योऽसत्कार्यवादिभिः–

"यदेव दधि तत् क्षीरं, यत् क्षीरं तद् दधीति च ।
वदता विन्ध्यवासित्वं, ख्यापितं विन्ध्यवासिना" ॥

[ ] इति ।

तत् सर्वमिदम् ईश्वरकृष्णोक्तं "मूलप्रकृतिरविकृतिः" इत्याद्य-नन्तराभिहितमखिलम्। इन्द्रजालं तुच्छम्। सर्वेषां प्रधान-महदादीनाम्। परस्परमन्योऽन्यम्। अव्यतिरेकादभेदात् 'तदभिन्नाऽभिन्नस्य तदभिन्न-त्वम्' इति नियमेन महदभिन्नप्रकृत्यभिन्नस्याहङ्कारादेरपि महदभिन्न-त्वम्, एवमहङ्काराऽभिन्नप्रकृत्यभिन्नस्य महदादेरहङ्काराऽभिन्नत्वमि-त्येवमभेदात्। सर्वेषामभेदे एकमेव रूपं भवेत् कार्यत्वं कारणत्वं वा, कार्यत्वे सर्व एव विकृतयः स्युः, कारणत्वे सर्व एव प्रकृतयः स्युर्न तु कस्यचित् प्रकृतिमात्ररूपत्वं कस्यचिद् विकृतिमात्ररूपत्वं कस्य-चित् प्रकृति-विकृत्युभयस्वरूपत्वमित्याह– कार्यत्वेति– कार्यत्वं कारण-निरूपितम्, कारणत्वं कार्यनिरूपितमित्येवमन्यस्य सद्भावे सत्येव कार्य-कारणभावो निरूपयितुं शक्य इति, यदा च सर्व एव महदाद्य प्रधानैकात्मका एव तदा भिन्नस्य कस्यचिदभावात् तदपेक्षस्य कार्य-कारणभावस्याऽभावे पुरुषो यथा न प्रकृतिविकृतिरूपस्तथा महदादिकमपि न प्रकृति-विकृतिरूपं भवेत्, अप्रकृति-विकृतिरूप-त्वमित्थं महदादीनां प्रसज्यत इत्याह– अन्यापेक्षत्वादिति। अन्यथा अपे-क्षणीयान्यरूपस्याभावेऽप्येकस्मिन् कार्य-कारणभावमुपेत्य प्रकृतित्व-विकृतित्वाभ्युपगमे।

साङ्ख्याचार्यं प्रति असत्कार्यवादिनामुपहासवचनमुल्लिखति–

हेतुमत्त्वादिधर्मयुक्तव्यक्तविपरीतमव्यक्तमित्येतदपि बालप्रलापानुकारि, नहि यद् यतोऽव्यतिरिक्तस्वभावं तत् ततो विपरीतं युक्तम्, भेदव्यवहारोच्छेदप्रसङ्गात्, सत्त्व-रजस्तमसां चैतन्यानामपि

"यदेव०" इति - कार्य-कारणयोरभेदे क्षीरकारणकं दधि क्षीररूपमेव, क्षीरं च दधिरूपमेवेति स्यात्, लोके च क्षीरदध्नोर्भिन्नतयैवानुभव इत्यनुभवबाधितं क्षीरं दधि दधि क्षीरमित्येवं विन्ध्यवासिना साङ्ख्याचार्येण स्वगतं विन्ध्यवासित्वं पाषाणमयस्थानवासित्वम्, पाषाणमयस्थाननिवासिनां भिल्लादीनामतिजाड्यं भवति, तद्वद् बाधितमर्थं वदतः साङ्ख्याचार्यस्याप्यतिजाड्यमिति तत् ख्यापितमित्येवमसत्कार्यवादिभिः साङ्ख्याचार्यो यदुपहस्यते तत् सुष्ठ्वेव ॥

एवं "हेतुमदनित्यमव्यापि०" इत्यादिकारिकया व्यक्तस्य महदादेर्हेतुमत्त्वादियोगस्तद्वैपरीत्यं चाव्यक्तस्य प्रधानस्येत्येतदपि महदादेः प्रधानाभिन्नत्वे न युक्तम्, भेद एव विरुद्धधर्मोपपत्तेर्नाभेदे इत्याह- हेतुमत्त्वादीति। 'नहि' इत्यस्य 'युक्तम्' इत्यनेनान्वयः। वैपरीत्ये विरुद्धधर्माध्यासो भवति, 'अयमेव भेदो भेदहेतुर्वा, यदुत-विरुद्धधर्माध्यासः' इति वचनाद् विरुद्धधर्माध्यासनियतो भेदः एवं चाभेदे विरुद्धधर्माध्यासासम्भवान्न व्यक्तवैपरीत्यमव्यक्तस्य, अभेदेऽपि च विरुद्धधर्माध्यासाभ्युपगमे भेदनियततैव विरुद्धधर्माध्यासस्य न भवेदिति ततो भेदव्यवहारस्योच्छेद एव प्रसज्यत इत्याह- भेदव्यवहारोच्छेदप्रसङ्गादिति। यदा च व्यक्तादभिन्नोऽव्यक्ते वैपरीत्यं तर्हि प्रकृति-पुरुषयोरभेदेऽपि वैपरीत्यस्य सम्भवेन तयोर्भेदाभ्युपगमो निर्निमित्त एव भवेदित्याह- सत्त्व-रज-स्तमसामिति। दण्डे सति घटो भवति, दण्डाभावे घटो न भवतीत्येवमन्वय-व्यतिरेकाभ्यां दण्ड-घटयोः कार्य-कारणभावो गृह्यत इति दण्डाद् घटो भवतीत्येवं वक्तुमभ्युपगन्तुं च युज्यते, प्रधाने सति महदादिकं भवति, प्रधानाभावे महदादिकं न भवतीत्येवमन्वय-व्यतिरेकयोरनुपलम्भादभावे 'प्रधा-

च परस्परभेदाभ्युपगमस्य निर्निमित्तत्वापत्तेः, अभेदेऽपि परस्पर-वैपरीत्यसम्भवात्, अपि चान्वय-व्यतिरेकाभावादपि प्रधानादिभ्यो महदाद्युत्पत्तिक्रमोऽप्रामाणिकः। किञ्च, नित्यस्य क्रम-यौगपद्याभ्या-मर्थक्रियाविरोधादप्यसावयुक्तः। अथ नास्माभिरपूर्वस्वभावोत्पत्त्या कार्य-कारणभावोऽभ्युपगम्यते, यद् रूपभेदादसौ विरुध्यते, किन्तु प्रधानं महदादिरूपेण परिणतिमुपगच्छति सर्पः कुण्डलादिरूपेणेवेति प्रधानं महदादिकारणमिति व्यपदिश्यते, महदादयस्तु तत्परिणाम-रूपत्वात् कार्यव्यपदेशमासादयन्ति, न च परिणामोऽभेदेऽपि विरोध-मनुभवति, एकवस्त्वधिष्ठानत्वात् तस्येति, असम्यगेतत्-परिणामा-सिद्धेः, तथाहि-असौ पूर्वरूपप्रच्युतेस्तदप्रच्युतेर्वेति कल्पनाद्वयम्, तत्र यद्यप्रच्युतेरिति पक्षः ? तदाऽवस्थासाङ्कर्याद् वृद्धाद्यवस्थायामपि

नान्महान्, महतोऽहङ्कारः' इत्येवमुत्पत्तिक्रमोऽप्रामाणिकत्वान्न साङ्ख्यानां युक्त इत्याह- अपि चेति। प्रधान-महदादिकं सर्वमेव साङ्ख्यमते नित्यमेव, न च नित्यस्य क्रम-यौगपद्याभ्यामर्थक्रिया सम्भवतीत्यतोऽपि प्रधानादिभ्यो महदाद्युत्पत्तिक्रमो न युक्त इत्याह- किञ्चेति। असौ प्रधानादिभ्यो महदाद्युत्पत्तिक्रमः। साङ्ख्यः शङ्कते- अथेति- 'नञः अभ्युपगम्यत' इत्यनेनान्वयः। अस्माभिः कापिलाचार्यैः। रूपभेदाद् अकारणावस्थास्वरूपात् करणावस्थास्वरूपस्य भेदात्। असौ कार्य-कारणभावः। विरुद्धयेत एकान्तनित्ये नोपपद्येत। यद्यपूर्वस्वभा-वोत्पत्त्या कार्य-कारणभावो न भवद्भिरुपेयते तर्हि कथं कार्यकारण-भाव उपेयते ? येन एकान्तनित्ये विरोधो न भवेदिति पृच्छति- किन्त्विति। उत्तरयति- प्रधानमिति। तत्परिणामरूपत्वात् प्रधानपरिणामरूप-त्वात्। 'न च' इत्यस्य 'अनुभवति' इत्यनेनान्वयः। तस्य परिणामस्य। उक्ताशङ्कां सिद्धान्ती प्रतिक्षिपति- असम्यगेतदिति। परिणामासिद्धिमेव विकल्पतो व्यवस्थापयति- तथाहीति। असौ परिणामः। तदेति- पूर्व-

युवत्वाद्यवस्थोपलब्धिप्रसङ्गः, अथ प्रच्युतेरिति पक्षः ? तदा पूर्वस्वभावान्तरं निरुद्धमपरं चोत्पन्नं स्थिरं किञ्चित् स्थितमिति न कस्यचित् परिणामः सिद्ध्येत् । अपि च तस्यैवान्यथाभावः परिणामो भवद्भिर्वर्ण्यते, स च एकदेशेन सर्वात्मना वा ?, न तावदेकदेशेन, एकस्यैकदेशाऽसम्भवात्, नापि सर्वात्मना, पूर्वपदार्थविनाशेन पदार्थान्तरोत्पादप्रसङ्गात्, अतो न नित्यैकान्ते तव तस्यैवान्यथात्वं

रूपाप्रच्युतेः परिणामाभ्युपगमे । अवस्थासाङ्कर्यात् रूपान्तरभवनलक्षणपरिणामावस्थापूर्वस्वभावावस्थयोः साङ्कर्यात् । यदा पुरुषो वृद्धत्वेन परिणमते तदानीं पूर्वरूपस्य युवत्वस्याऽप्रच्युतेस्तस्यापि सद्भाव इति वृद्धाद्यवस्थायां युवत्वाद्यवस्थाऽप्युपलभ्येतेत्याह- वृद्धाद्यवस्थायामपीति । तदा पूर्वरूपप्रच्युतेः परिणामो भवतीत्यभ्युपगमे । पूर्वेति- पुरुषस्य पूर्वस्वभावान्तरं युवत्वादिकं विरुद्धं विनष्टम् । अपरं च वृद्धत्वाद्यवस्थालक्षणस्वभावान्तरं चोत्पन्नम्, स्थिरं पुरुषस्वभावलक्षणस्वरूपं स्थितं युवाद्यवस्थायामपि वृद्धाद्यवस्थायामप्यवतिष्ठत इत्येतत् त्रितयस्वरूपं परस्परभिन्नमेवेति न कस्यचित् परिणामः सिद्ध्येदित्यर्थः । परस्य स्वाभ्युपगमत एव परिणामवादो न सम्भवतीत्याह- अपि चेति । भवद्भिः साङ्ख्याचार्यैः । स च अन्यथाभावश्च, एकदेशेन तस्यैवान्यथाभावः परिणाम इति प्रथमपक्षो न सम्भवतीत्याह- न तावदेकदेशेनेति । अखण्डस्य वस्तुन एकदेशभावेऽखण्डवस्तुस्वरूपमेव न भवेदिति नैकस्य वस्तुन एकदेशोऽस्तीति तदभावादेकदेशेनाऽन्यथाभावो न सम्भवतीत्याह- एकस्यैकदेशाऽसम्भवादिति । तस्यैव सर्वात्मनाऽन्यथाभावः परिणाम इति द्वितीयपक्षमपहस्तयति- नापि सर्वात्मेति । तस्यैव सर्वात्मनाऽन्यथाभावस्तदा भवेद् यदि तद् वस्तु सर्वथा नश्येद् वस्त्वन्तरमेव चोत्पद्येत, एवं तु स्वीकर्तुं नैकान्तनित्यवादी साङ्ख्यः प्रभवतीति तदनिष्टं तस्य प्रसज्यत इत्याह- पूर्वपदार्थविनाशेनेति । अतः एकदेशेनान्यथाभावे

युक्तम्, तस्य स्वभावान्तरोत्पादनिबन्धनत्वात्। व्यवस्थितस्य धर्मिणो धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भावलक्षणः परिणामोऽभ्युपगम्यते, न तु स्वभावान्यथात्वम्, क्रमिकोभयधर्मैकस्वभावस्य वस्तुनोऽव्याहतत्वादिति चेत्? असदेतत्–यतः प्रच्यवमान उत्पद्यमानश्च धर्मो धर्मिणोऽर्थान्तरभूतोऽभ्युपगन्तव्यः, अन्यथा धर्मिण्यवस्थिते तस्य तिरोभावाऽऽविर्भावासम्भवात्, तथाहि–यस्मिन् वर्तमाने यो

सर्वात्मनाऽन्यथाभावे चोक्तदिशा दोषसद्भावात्। नन्वः **'युक्तम्'** इत्यनेनान्वयः। नित्यैकान्ते **नित्यैकान्ताभ्युपगमे**। तव **साङ्ख्यस्य**। **कथं न युक्तमित्यपेक्षायामाह**–तस्येति–**अन्यथात्वस्येत्यर्थः**। **धर्मी सदाऽवतिष्ठत एव, न तु तस्य निवृत्तिः, अतो न तस्य स्वभावान्यथात्वमिति न तत्स्वरूपः परिणामोऽभ्युपगम्यते, किन्तु पूर्वधर्मनिवृत्तौ सत्यां धर्मान्तरस्य प्रादुर्भाव एव परिणामोऽभ्युपेयते, सोऽयं परिणामः क्रमिकोभयस्वभावस्य वस्तुनः सम्भवत्येवेति साङ्ख्यः शङ्कते**– व्यवस्थितस्येति– **पूर्वोत्तरकालमवस्थितस्येत्यर्थः**। धर्मान्तरनिवृत्तौ **पूर्वधर्मनिवृत्तौ**। धर्मान्तरप्रादुर्भावलक्षणः **उत्तरधर्मप्रादुर्भावस्वरूपः**। **नन्वेवं पूर्वधर्मस्वरूपस्य स्वभावस्य प्रच्युतिरुत्तरधर्मस्वरूपस्य स्वभावस्याविर्भाव इत्युपगतौ स्वभावान्यथात्वमागतमेवेति रिक्तमिदमुच्यते– न तु स्वभावान्यथात्वमित्यत आह**– क्रमिकोभयेति– **क्रमिकोभयधर्म एकस्वभावो यस्य स क्रमिकोभयधर्मैकस्वभावस्तस्येत्यर्थः, एवम्भूतश्च स्वभावः क्रमेणोभयधर्मभाव एवोपपद्यत इति पूर्वधर्मनिवृत्तौ धर्मान्तरप्रादुर्भावे च सति नोक्तस्वभावस्यान्यथात्वमित्युक्तस्वभावस्य वस्तुनः पूर्वधर्मनिवृत्तिः धर्मान्तरप्रादुर्भावभावेऽप्यव्याहतत्वादित्यर्थः। सिद्धान्ती उक्ताशङ्कां प्रतिक्षिपति**–असदेतदिति। **तत्र हेतुः**–यत इति। अन्यथा **उक्तधर्मद्वयस्य धर्मिभिन्नत्वाभावे**। तस्य **क्रमिकधर्मद्वयस्य**। **अवस्थिते धर्मिणि तदभिन्नस्य धर्मस्य तिरोभावाऽऽविर्भावाऽसम्भवतो भेदमेवोपपादयति**– तथाहीति। **ततो घटात्**। **असौ धर्मकलापः**।

व्यावर्तते स ततो भिन्नः, यथा–घटेऽनुवर्तमाने ततो व्यावर्तमानः पटः, व्यावर्तते च धर्मिण्यनुवर्तमानेऽपि आविर्भाव-तिरोभावासङ्गी धर्मकलाप इति कथमसौ ततो न भिद्यते? इति, ततो धर्मी तदवस्थ एवेति कथं परिणतो नाम?, नह्यर्थान्तरभूतयोः कट-पटयोरुत्पाद-विनाशाभ्यामचलितरूपस्य घटादेः परिणामो भवति, अतिप्रसङ्गात्, अन्यथा चैतन्यमपि परिणामि स्यात्। तत्सम्बद्धयोर्धर्मयोरुत्पाद-विनाशाभ्यां तस्य परिणामोऽभ्युपगम्यते, नान्यस्य, चैतन्यसम्बद्धस्तु न कोऽपि धर्म उत्पाद-विनाशयोगी, कूटस्थनित्यत्वश्रुतेस्तस्य निर्धर्मकत्वाभ्युपगमादिति नातिप्रसङ्ग इति चेत्? न–तथापि धर्मि-

ततो धर्मिणः। यदा च तिरोभूताऽऽविर्भूतधर्मयोर्धर्मिणो भिन्नत्वं तदा तत्तिरोभावाऽऽविर्भावतो न धर्मिणः किमपि जातमिति तदवस्थो धर्मी परिणतो न भवेदित्याह- तत इति धर्मतो भेदादित्यर्थः अविचलित-स्वरूपस्य धर्मिणः परिणामाऽभावमेवोपपादयति-नहीति-अस्य 'भवति' इत्यनेन सम्बन्धः। 'अतिप्रसङ्गाद्' इत्युक्तं तदेव दर्शयति- अन्यथेति- अन्योत्पाद-विनाशाभ्यामप्यन्यस्य परिणामाभ्युपगमे अचेतनधर्मो-त्पाद विनाशाभ्यां पुरुषस्य स्वरूपमविचलितं चैतन्यमपि परिणामि प्रसज्यत इत्यर्थः। अन्योऽपि यो यस्य सम्बद्धस्तस्यैवोत्पाद-विना-शतस्तस्य परिणामोऽभ्युपगम्यते, चैतन्यसम्बन्धी च धर्मो नोत्पाद-विनाशशालीत्यचेतनसम्बद्धधर्मोत्पाद-विनाशाभ्यामचेतनस्यैव परि-णामो न चेतनस्येत्येवमतिप्रसङ्गपरिहारमाशङ्कते-तत्सम्बद्धयोरिति-चैतन्य-सम्बद्धधर्मो नोत्पाद विनाशयोगीति कथमवगम्यत इत्यपेक्षायामाह- कूटस्थनित्यत्वश्रुतेरिति-" असङ्गो ह्ययं पुरुषः " "नित्यं विज्ञानमानन्दं ब्रह्म० " "अविनाशी वा अरेऽयमात्मा० " इत्यादिश्रुतेश्चैतन्यस्वरूप-स्यात्मानो निर्धर्मकत्वाभ्युपगमात् तत्तत्सम्बद्धस्य धर्मस्यैवाभावेन न तदुत्पाद-विनाशाभ्यामात्मनः परिणामप्रसङ्ग इत्यर्थः, प्रतिक्षिपति-नेति। तथाऽपि तत्सम्बद्धयोर्धर्मयोरुत्पाद-विनाशाभ्यां परिणामाभ्यु-

भिन्नसम्बन्धाभ्युपगमे तस्यापि सम्बन्धान्तरगवेषणायामनिष्ठापातात्, तदभिन्नसम्बन्धाभ्युपगमे चार्थान्तरवादक्षतेः, न च व्यतिरिक्त-धर्मान्तरोत्पाद-विनाशाभ्यां परिणामः साङ्ख्यैर्व्यवस्थापितः, किन्तु यत्रात्मभूतैकस्वभावानुवृत्तिरवस्थाभेदश्च तत्रैव तद्व्यवस्था कृता, न च धर्मिणः सकाशाद् धर्मयोर्व्यतिरेके सत्येकस्वभावानुवृत्तिरस्ति,

---

पगमेऽपि। धर्म-धर्मिणोः सम्बन्धे सति तत्सम्बद्धधर्म इति वक्तुं शक्यते, स च सम्बन्धः सम्बन्धिभ्यां भिन्नोऽभिन्नो वाऽभ्युपेयेत? आद्येऽतिप्रसङ्गभयात् सोऽपि सम्बन्धो भिन्नसम्बन्धेन सम्बद्ध एव धर्म-धर्मिभावनियामको भवेत्, एवं सम्बन्धसम्बन्धोऽपि भिन्नसम्बन्धेन सम्बद्धोऽभ्युपेय इत्येवमनवस्था स्यादित्याह- धर्मिभिन्नसम्बन्धाभ्युपगम इति०। तस्यापि **धर्मिभिन्नसम्बन्धस्यापि**, अनिष्ठापातादिति-**निष्ठा विश्रान्तिस्तदभावोऽनिष्ठाऽविश्रान्तिरनवस्थेति यावत् तदापातात्-तत्प्रसङ्गादित्यर्थः।**

सम्बन्धिभ्यां सम्बन्धोऽभिन्न इति द्वितीयपक्षे **'तदभिन्नाऽभिन्नस्य तदभिन्नत्वम्' इति नियमबलाद् धर्म्यभिन्नसम्बन्धाऽभिन्नस्य धर्मस्य धर्म्यभिन्नत्वमिति धर्म्यभिन्नस्य धर्मस्य नाशे उत्पादे च धर्मिणोऽपि नाशोत्पादाविति स्वभावान्यथात्वमेव परिणाम इति तदानीमेकान्तनित्यवादप्रच्युतिः, प्रच्यवमानोत्पद्यमानधर्मयोश्च धर्मिणोऽर्थान्तरतोपगमवादहानिश्चेत्याह**- तदभिन्नसम्बन्धाभ्युपगम इति-**धर्म्यभिन्नधर्मसम्बन्धाभ्युपगम इत्यर्थः। धर्मिव्यतिरिक्तधर्मिसम्बन्धिधर्मोत्पाद-विनाशाभ्यां वस्तुनः परिणामवादः साङ्ख्यस्याभीष्टोऽपि नेति तथा समर्थनेऽपसिद्धान्तापत्तिरपि तस्येत्याह।** न चेति अस्य **'व्यवस्थापितः' इत्यनेनान्वयः। तर्हि तैः परिणामव्यवस्था कीदृशी कृतेति पृच्छति-**किन्त्विति। **उत्तरयति-**यत्रेति। तद्व्यवस्था **परिणामव्यवस्था।** कृता **साङ्ख्यैः कृता। भवतु सैव व्यवस्थाऽर्थान्तरभूतधर्माभ्युपगमेऽपीत्यत आह-**न चेति-अस्य **'अस्ति' इत्यनेनान्वयः। एकस्वभावानुवृत्त्यभावे हेतुमुप-**

यतो धर्म्येव तयोरेक आत्मा, स च व्यतिरिक्त इति, न च निरुध्यमानोत्पद्यमानधर्मद्वयव्यतिरिक्तो धर्मी उपलब्धिलक्षणप्राप्तो दृग्गोचरमवतरति कस्यचिदिति तादृशोऽसद्व्यवहारविषयतैव। अथा-

---

दर्शयति–यत इति। तयोः धर्मयोः। स च धर्मी च। व्यतिरिक्तः धर्माभ्यां भिन्नः, तथा च कथं स तयोरेक आत्मा, यो हि यतो व्यतिरिक्तः स न तस्यात्मेति। न च धर्माभ्यां व्यतिरिक्तो धर्मी उपलभ्यत इति योग्यानुपलब्ध्या धर्मव्यतिरिक्तस्य धर्मिणोऽभाव एवेति तदनुवृत्त्या परिणामव्यवहारोऽसन्नेवेत्येवमुपगमेऽसद्व्यवहारविषयतैव धर्मव्यतिरिक्तस्य धर्मिण इत्याह– न चेति– अस्य 'अवतरति' इत्यनेनान्वयः। 'उपलब्धिलक्षणप्राप्तः' इत्यनेन योग्यत्वं तस्यावेदितम्, तेनाऽयोग्यानुपलब्धेरभावानियतत्वेऽपि न क्षतिः। तादृशः उपलब्धिलक्षणप्राप्तस्यापि निरुध्यमानोत्पद्यमानधर्मद्वयव्यतिरिक्तस्य धर्मिणः सर्वैरपि प्रमातृभिरनुपलभ्यमानस्य। असद्व्यवहारविषयतैवेति–यो हि योग्यत्वे सति न कस्यापि प्रमातुर्दृग्गोचरत्वमवतरति सोऽसन्निति व्यवह्रियते निरुध्यमानोत्पाद्यमानधर्मद्वयव्यतिरिक्तोऽपि धर्मी योग्यः सन्न कस्यापि प्रमातुर्दृग्गोचरमवतरतीति सोऽप्यसन्नित्येवं व्यवहर्तव्य इति। 'असद्' इत्याकारकव्यवहारविषयता तस्येत्यर्थः। प्रच्यवमान उत्पद्यमानश्च धर्मी धर्मिणोऽभिन्न एवोपेयते तदाऽपि साङ्ख्यस्य निरुक्तपरिणामवादो न सम्भवतीत्याह– अथेति– यदीत्यर्थः। तथाऽपि निरुध्यमानोत्पद्यमानधर्मयोर्धर्मिणोऽभिन्नत्वाभ्युपगमेऽपि, यथा धर्मिस्वरूपेण धर्मी परिणमतीति न भवति तथोत्पद्यमान-निरुध्यमानधर्माविपि धर्मिस्वरूपाभिन्नाविति 'तदभिन्नाऽभिन्नस्य तदभिन्नम्' इति नियमात् परस्परमप्यभिन्नाविति त्रयाणामप्यैक्ये सति न केनापि रूपेण धर्मी परिणमतीति स्यात्, एवमुक्तधर्माभ्यां धर्मिणोऽभिन्नत्वे धर्मप्रादुर्भाव-तिरोभावतो धर्मिणोऽपि प्रादुर्भाव-तिरोभावौ स्यातामिति स्थिरस्य कस्यचिदभावान्न कस्यापि परिणामित्वं सिद्धयेदित्याह– एकस्माद्

ऽनर्थान्तरभूत इति पक्षः कक्षीक्रियते ? तथाप्येकस्माद् धर्मिस्वरूपाद्-व्यतिरिक्तत्वात् तिरोभाव-ऽऽविर्भाववतोर्धर्मयोरप्येकत्वं धर्मिस्वरूपवदिति केन रूपेण धर्मी परिणतः स्यात् ? धर्माभ्यां च धर्मिणोऽनन्यत्वात् तस्य निवृत्ति-प्रादुर्भावौ स्यातामिति नैकस्य कस्यचित् परिणामित्वं सिद्ध्येत्, उभयजननैकस्वभावत्वं च कथञ्चित् प्रागभाव-प्रध्वंसात्मकवस्तुसत्ताभ्युपगन्तृस्याद्वादिमत एव शोभत इति न परिणामवशादपि साङ्ख्यानां कार्य-कारणव्यवहारः सङ्गच्छते।

यच्चासत्कार्यवादे "असदकरणाद्०" इत्यादिदूषणमभ्यधायि, तत् सत्कार्यवादेऽपि तुल्यं, तथाहि–सत्कार्यवादिनामपि शक्यमिदमित्थमभिधातुम्–

"न सदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्, कारणभावाच्च सत्कार्यम्" ॥१॥ इति

अत्र च 'न सत्कार्यम्' इति व्यवहितेन सम्बन्धो विधातव्यः, तत्र 'सदकरणाद्' इत्याद्यो हेतुः, यदि हि दुग्धादिषु दध्यादीनि

धर्मिस्वरूपादिति। पूर्वधर्मतिरोभावोत्तरधर्माविर्भावोभयजननैकस्वभावत्वमेव धर्मिणः परिणाम इति तु स्याद्वादमत एव घटते, न तु साङ्ख्यमत इत्याह–उभयजननैकस्वभावत्वं चेति। असत्कार्यवादे साङ्ख्योक्तदूषणमपि स्वपक्षसन्निवेशिदूषणसदृशत्वान्नोद्भावनार्हमित्याह–यच्चेति। तत् दूषणम्। अत्र 'असदकरणाद्' इत्यस्य स्थाने 'सदकरणाद्' इत्येकस्य विलक्षणत्वेऽप्यन्यस्य समानत्वात् तुल्यत्वमवसेयम्। 'अत्र च "न सदकरणाद्०" इति पद्ये च 'न सदकरणाद्' इत्यादावुपात्तस्य नञोऽन्ते स्थितेन 'सत् कार्यम्' इत्यनेन सम्बन्धे सति 'न सत्कार्यम्' इति प्रतिज्ञास्वरूपनिष्पत्तिर्भवतीति तथैव दर्शयति– न सत्कार्यमितीति। तत्र न सत्कार्यमिति प्रतिज्ञायाम्। आद्यः

कार्याणि रस-वीर्य-विपाकादिना विभक्तेन रूपेण सन्ति मध्यावस्थावत्, तदा तेषां किमपरं रूपमुत्पाद्यमवशिष्यते यत् तैर्जन्यं स्यात्? नहि विद्यमानमेव कारणायत्तोत्पत्तिकं भवति प्रकृति-चैतन्यरूपवत्, ततः सतः करणासम्भवान्न सत्कार्यमित्यर्थः, प्रयोगश्च-यत् सर्वात्मना

प्राथमिकः। सदकरणात् सत् कार्यं न भवतीत्येवोपपादयति– यदि हीति। मध्यावस्थावदिति– प्रादुर्भूतदध्याद्यवस्थायां यथा रस-वीर्य-विपाकादिना विभक्तेन रूपेण दध्यादीनि कार्याणि सन्ति तथेत्यर्थः 'दध्याद्यवस्थावद्' इति पाठस्तु स्पष्ट एव। दुग्धादौ यो रसादिस्ततो विजातीयो रसादिः प्रादुर्भूतदध्याद्यवस्थायामुपलभ्यत इति तदानीं दुग्धादिगतरसादिविजातीयरसादिमद् दध्यादिकं समस्ति, तादृशमेव दध्यादिकं दुग्धाद्यवस्थायामपि यदि समस्ति तदा नाऽन्यद्रूपमुत्पाद्यं तस्यावशिष्टमस्तीति व्यर्थ एव तत्र कारणव्यापारः स्यादित्याह– तदेति। तेषां दध्यादीनाम्। यद् अवशिष्टं रूपम्। तैः कारणैः, सत्कार्यवादे च सर्वमपि रूपं दध्यादीनां पूर्वमप्यस्त्येवेत्यवशिष्टरूपाभावान्न किञ्चित् कारणैर्जन्यं भवेदित्यर्थः। विद्यमानमेव भवतु कारणाधीनम्, तत्रैवं कारणव्यापारः सफलः स्यादित्यत आह– नहीति– अस्य 'भवति' इत्यनेनान्वयः। विद्यमानं कारणायत्तोत्पत्तिकं न भवतीत्यत्र दृष्टान्तमाह– प्रकृति-चैतन्यरूपवदिति– यथा प्रकृतिस्वरूपं चैतन्यस्वरूपं च सर्वदा विद्यमानं न कारणायत्तोत्पत्तिकं तथेत्यर्थः। उपसंहरति–तत इति- विद्यमानस्य कारणायत्तोत्पत्तिकत्वाभावादित्यर्थः। 'असदकरणाद्' इत्याद्यहेतुप्रभवानुमानस्य प्रयोगमुपदर्शयति–प्रयोगश्चेति– यद्यपि 'यत् सर्वात्मना सत् तन्न केनचिज्जन्यम्' इति सामान्यव्याप्तावेव 'यथा प्रकृतिश्चैतन्यं वा' इति दृष्टान्तस्य सङ्गतिः, न तु 'यत् सर्वात्मना कारणे सद्' इत्यादिव्याप्तौ, प्रकृति-चैतन्ययोः कारणस्यैवाभावेन 'यत् सर्वात्मना कारणे सद्' इत्यस्य तत्राघटमानत्वात्, तथापि 'कारणे' इति प्रकृतकार्याभिप्रायेणोक्तिर्न तु

कारणे सद् न तत् केनचिज्जन्यं यथा–प्रकृतिश्चैतन्यं वा, तदेव वा मध्यावस्थायां कार्यम्, सच्च सर्वात्मना परमतेन क्षीरादौ दध्यादीति व्यापकविरुद्धोपलब्धिप्रसङ्गः; न च, हेतोरनैकान्तिकता, अनुत्पाद्यातिशयस्यापि जन्यत्वे सर्वेषां जन्यत्वप्रसक्तेः, अनभिव्यक्तरूपेण

सामान्यव्याप्तौ तस्य प्रवेश इति बोध्यम्। 'प्रकृतिश्चैतन्यं वा' इति दृष्टान्तः साङ्ख्याभ्युपगममाश्रित्यैव, अतः सर्वानुमतिमाश्रित्य दृष्टान्तमाह– तदेव वा मध्यावस्थायां कार्यमिति– दध्यादिकार्यमेव प्रादुर्भूतदध्याद्यवस्थं न केनचिज्जन्यं यथा भवतीत्यर्थः। 'यत् सर्वात्मना' इत्याद्युदाहरणावयवोपन्यासः। 'सच्च सर्वात्मना' इत्याद्युपनयावयवोपन्यासः। परमतेन सत्कार्यवादिसाङ्ख्यमतेन। व्यापकविरुद्धोपलब्धिप्रसङ्ग इति– 'केनचिज्जन्यं न स्याद्' इति प्रसङ्गे निषेध्यस्य केनचिज्जन्यत्वस्य व्यापकं कथञ्चिदसत्त्वम्, तद्विरुद्धं सर्वात्मना सत्त्वम्, तदुपलब्धिप्रसङ्गः-तदुपलब्धिहेतुकः प्रसङ्ग आरोपितव्यापकविरुद्धहेतुकव्याप्यनिषेधप्रसञ्जनमिति यावत्। सर्वात्मना सत्त्वलक्षणहेतुमदपि केनचिज्जन्यमस्त्विति कृत्वा हेतोरनैकान्तिकत्वमाशङ्क्य प्रतिक्षिपति– न चेति-अस्य 'वाच्यम्' इति परेण योगः। हेतोः केनचिज्जन्यत्वाभावसाधकतयोपन्यस्तस्य सर्वात्मना सत्त्वलक्षणहेतोः। अनैकान्तिकता व्यभिचारिता। सर्वात्मना सत्त्वं कार्यस्य यदभ्युपगम्यतेऽस्माभिस्तच्छक्तिरूपेण, न तु व्यक्तिरूपेण, तथा चाऽनभिव्यक्तशक्तिरूपेण सर्वात्मना सदपि कार्यं कारणेनाऽभिव्यक्त्याद्यतिशयोत्पादनतो जन्यं भवतीत्येव सातिशयस्य जन्यत्वमुपेयते, नत्वनुत्पाद्यातिशयस्य जन्यत्वं प्रकृतिचैतन्यादिस्वरूपस्य जन्यत्वापत्तिभियोपेयते, इत्थं च शक्तिरूपेणाऽनभिव्यक्तसर्वात्मना सत्त्वमस्ति, केनचिज्जन्यत्वमप्यस्तीति केनचिज्जन्यत्वाभावलक्षणसाध्याभाववति हेतोः सत्त्वादनैकान्तिकतेत्याह-अनुत्पाद्यातिशयस्यापीति। ननु यद् अभिव्यक्त्यादिरूपेण सर्वात्मना कारणे सद्, न तत् केनचिज्जन्यमित्येवमेवोपेयते, तथा चाभिव्यक्त्यादि-

सतोऽप्यभिव्यक्ताद्यतिशयोत्पादनद्वारा सामग्रीजन्यत्वसम्भवात्, अभिव्यक्तादिरूपेण सविशेषणे च हेतावुपादीयमानेऽसिद्धता, नह्यस्माभिरभिव्यक्तादिरूपेणाप्युत्पत्तेः प्राक् कार्यमिष्यते सत्, किं तर्हि? शक्तिरूपेण, निर्विशेषणे तु तस्मिन्नुपादीयमानेऽनैकान्तिकता प्रतीयादिति वा, अभिव्यक्त्यादिलक्षणातिशयोत्पादनमुखेन सर्वस्य

रूपेण सर्वात्मना सत्त्वमेव हेतुरिति न तस्याऽनैकान्तिकत्वम्, यत्र सर्वात्मनाऽभिव्यक्त्यादिरूपेण सत्त्वं तत्र केनचिज्जन्यत्वाभावलक्षण-साध्यस्यापि सत्त्वादित्यत आह– अभिव्यक्त्यादिरूपेणेति। अभिव्यक्त्यादि-रूपेण सर्वात्मना कारणे सत्त्वस्य हेतुकरणे तथाभूतस्य हेतोर्न दध्यादिलक्षणकार्यरूपपक्षे सत्त्वमस्ति, नह्यभिव्यक्त्यादिरूपेण सर्वा-त्मना कार्यस्योत्पत्तेः प्राक् कारणे सत्त्वं साङ्ख्यैरुपेयत इति स्वरू-पासिद्धिरित्याह– नहीति– अस्य 'इष्यते' इत्यनेनान्वयः। अस्माभिः साङ्ख्याचार्यैः। तर्हि सत्कार्यवादो भवतां कथमुपपद्यत इति पृच्छति– किं तर्हीति। उत्तरयति– शक्तिरूपेणेति– उत्पत्तेः पूर्वं शक्तिरूपेण कार्यं कारणे सदिष्यते साङ्ख्यैरित्यर्थः। असिद्धिभयाद् 'अभिव्यक्तादि-रूपेण इति विशेषणं परित्यज्यैव 'यत् सर्वात्मना कारणे सद्' इत्येवमेव हेतुरुपादीयते तदा शक्तिरूपेण सत्त्वमादायोक्तहेतुः कार्ये समस्ति, अभिव्यक्त्याद्यतिशयोत्पादनतः किञ्चिज्जन्यत्वमप्यस्तीत्यनै-कान्तिकता वज्रलेपायितेत्याह निर्विशेषणे त्विति। तस्मिन् हेतौ 'प्रतीया-दिति वा' इति स्थाने 'प्रतीयादेव' इति पाठो युक्तः। किञ्चिज्जन्यत्वे सति अनैकान्तिकता, तत् कथमित्यपेक्षायामाह–अभिव्यक्त्यादिलक्षणाति-शयोत्पादनमुखेनेति। असत्करणपक्षेऽसत्त्वाऽविशेषात् सर्वस्य सर्वकार्यत्व-प्रसङ्गो भवति, स च सत्करणपक्षे न भवति, यस्यैव यत्र शक्ति-रूपेणोत्पत्तेः प्राक् सत्त्वं तस्यैव तत उत्पत्तिः, न च सर्वस्य सर्वत्रोत्पत्तेः प्राक् शक्तिरूपेण सत्त्वमित्याह– सर्वस्येति। सिद्धान्ती 'अभिव्यक्त्यादि-

सर्वकार्यत्वप्रसङ्गस्य निरवकाशत्वादिति वाच्यम्; अभिव्यक्त्यादिलक्षणस्यातिशयस्यापि प्राक् सत्त्वे उक्तहेतावसिद्धतादूषणाऽभावात्, प्रागसत्त्वे तु सत्कार्यवादक्षतेः, तत् स्थितमेतत्–सदकरणान्न सत्कार्यम् १ तथा सत्कार्यवादे साध्यस्याऽभावादुपादानग्रहणमप्यनुपपन्नं स्यात्, तत्साध्यफलवाञ्छयैव प्रेक्षावद्भिरुपादानपरिग्रहात् २ नियत-

---

लक्षणस्योत्पाद्यत्वबलात् सतोऽपि जन्यत्वं यद् भवद्भिरुपपाद्यते तत्र वक्तव्यम्, अभिव्यक्त्यादिलक्षणातिशयः किमुत्पत्तेः प्राक् सन्? असन् वा? आद्ये तस्यापि पूर्वमेव वृत्तत्वेन न जन्यत्वमिति न तद्बलात् कार्यस्यापि जन्यत्वम्, अन्ते असतोऽभिव्यक्त्यादिलक्षणातिशयस्योत्पादाभ्युपगमात् सत्कार्यवादहानिः' इत्याशयवान् प्रतिक्षेपहेतुमुपदर्शयति- अभिव्यक्त्यादिलक्षणस्येति। उक्तहेतौ अभिव्यक्त्यादिरूपेण यत् सर्वात्मना सदित्येवमुपादीयमानहेतौ। असिद्धतादूषणाभावात् तादृशस्य हेतोः पक्षे सत्त्वेन स्वरूपासिद्ध्यभावात्, अभिव्यक्त्यादिलक्षणातिशयस्याप्युत्पाद्यत्वाभावेन न तदादायापि जन्यत्वस्य सम्भव इति केनचिज्जन्यत्वाभावलक्षणसाध्यस्यैवोक्तहेतुमति भावेन नोक्तहेतोरनैकान्तिकताऽपीत्याशयः। प्रागसत्त्वे तु अभिव्यक्त्यादिलक्षणातिशयस्य प्रागसत्त्वे पुनः, यद्यपि तदानीम् 'अभिव्यक्त्यादिरूपेण सर्वात्मना सत्त्वम्' इति हेतुर्नास्तीत्यसिद्धता स्यादेवेति न तथा-सविशेषणो हेतुरुपादातुं शक्यः, तथापि साङ्ख्यस्यैवमुपगमे स्वाभ्युपगतसत्कार्यवादक्षतिरेव महद् दूषणम्। उपसंहरति– तत् स्थितमेतदिति।

'उपादानग्रहणाद्' इति द्वितीयहेतुं भावयति– तथेति। साध्यस्याभावादिति– किञ्चित्कार्यस्योत्पाद्यस्योत्पादनार्थमेवोपादानग्रहणं करोति कर्ता, सत्कार्यवादे तु साध्यस्योत्पादनलक्षणस्याभावात्, नहि सत एवोत्पादनं तदविरामप्रसङ्गादिति उपादानग्रहणमनुपपन्नमेव स्यादित्यर्थः। उपादानग्रहणानुपपत्तिमेव भावयति– तत्साध्येति– उपादानसाध्येत्यर्थः।

'सर्वसम्भवाभावाद्' इति तृतीयहेतुं समर्थयति–नियतादेव चेति। साध्यं यदि किञ्चित् स्यात् तदा तस्य नियताज्जन्म भवेत्, सत्कार्यवादे

तादेव च क्षीरादेर्दध्यादीनामुद्भव इत्येतदप्यनुपपन्नं स्यात्, साध्यस्यासम्भवादेव, यतः सर्वस्मात् सम्भवाभाव एव नियताज्जन्मेत्युच्यते, तच्च सत्कार्यवादे दुर्वचम्, सति सम्भवे सर्वस्माद् भावापत्तेरनिवारणात्, असति च 'सर्वस्माद्' इति वचनस्य नैरर्थक्यात् ३ तथा

साध्यस्याभावादेव न नियताज्जन्मसम्भव इत्याह– साध्यस्याऽसम्भवादेवेति। अमुकस्य कार्यस्यामुकादेव भावो न सर्वस्मादिति सिद्धौ सत्यामेव नियताज्जन्मेति प्रसिद्ध्यति, सत्कार्यवादे तु सतो जन्मैव विद्यते, नाऽमुकस्याऽमुष्माज्जन्मेत्यभिधातुं शक्यमिति कुतो नियताज्जन्म? सतोऽपि जन्यत्वे कस्यचिदतिशयस्योत्पादनमन्तरापि तत्कारणं किञ्चिदेष्टव्यम्, एवमन्यदप्यतिशयोत्पादकत्वाभावाविशेषात् किं न तत्कारणं भवेद्? इति सर्वस्मात् सम्भवे कथं नियताज्जन्म?, सतो जन्मनोऽसम्भवे च 'सर्वस्माद्' इतिहेत्वर्थकपञ्चम्युक्तेरप्यनुपपत्तिरित्याह– यत इति। तच्च सर्वस्मात् सम्भवाभावतो नियताज्जन्म च। प्रसक्तस्य निषेधो भवति, नाऽप्रसक्तस्येति सर्वस्माद् यदि सम्भवो भवेत् तदा तत्प्रतिषेधः कुतश्चिद् हेतोः कर्तुं शक्यः, सत्कार्यवादे च कार्ये सत्त्वस्याऽविशेषाद् विशेषान्तरस्य वक्तुमशक्यत्वात् प्रतिनियतकारणापेक्षयेवाऽन्यापेक्षयाऽप्युत्पादसम्भवे सर्वस्माद् भावापत्तितः सर्वस्मात् सम्भवाऽभावाऽसिद्ध्या न नियताज्जन्मप्रसिद्धिरित्याह– सति सम्भव इति– सत उत्पादसम्भवे सतीत्यर्थः। यदि च सत उत्पाद एव न सम्भवति तर्हि न सर्वस्य कस्यचित् कारणत्वमिति कारणत्वार्थकपञ्चमीविभक्तिरेव सर्वशब्दान्नोत्पत्तुमर्हतीति 'सर्वस्माद्' इति वक्तुमशक्यत्वे 'सर्वस्मात् सम्भवाभावः' इत्यपि नाभिधातुं शक्यमिति कथं ततो नियताज्जन्मप्रसिद्धिरित्याह– असति चेति– सतो जन्मनः सम्भवेऽसति चेत्यर्थः।

चतुर्थहेतुं भावयति– तथेति। सत्कार्यवादे 'शक्तस्य शक्य-

'शक्तस्य शक्यकरणाद्' इत्येतदपि साध्याभावादेवायुक्तम्, यदि हि किञ्चित् केनचिदभिनिर्वर्त्येत, तदा निर्वर्तकस्य शक्तिर्व्यवस्थाप्येत, निर्वर्त्यस्य च कारणं सिद्धिमध्यासीत नान्यथेति ४ कारणभावोऽपि भावानां साध्याभावादेव सत्कार्यवादे न युक्तः ५ ।

न चैतदिष्टमिति न सत्कार्यं कारणावस्थायामिति प्रसङ्ग-

करणाद्' इत्यस्य साध्याभावादयुक्तत्वं यदुक्तं तदुपपादयति– यदि हीति । अभिनिर्वर्त्येत **जन्येत** । निर्वर्तकस्य **उत्पादकस्य** । नान्यथा **केनचित् कस्यचिन्निर्वृतेरभावे शक्तिर्व्यवस्थापिता न भवति, नवा कस्यचित् किञ्चित् कारणं सिद्धयतीति** । 'कारणभावाद्०' **इति पञ्चमहेतुं समर्थयति**– कारणभावोऽपीति– **'न युक्तः' इत्यनेनान्वयः** ।

न चैतदिष्टम् **सर्वैरेव कर्तृभिः प्रतिनियतकार्योत्पादनार्थं प्रतिनियतोपादानग्रहणं क्रियत एवेति तस्यानुपपन्नत्वं नेष्टम्, तथा नियतादेव क्षीरादेर्दध्याद्युत्पादस्य प्रतीयमानत्वान्नियताज्जन्मनोऽनुपपन्नत्वं नेष्टम्, एवं शक्तादेव कारणाच्छक्यस्य कार्यस्योद्भव इति शक्तस्य शक्यकरणानुपपन्नत्वमपि नेष्टम्, कारणभावस्य प्रतीयमानस्यानुपपन्नत्वमपि नेष्टम्** । इति **एतस्मात् कारणात्। कारणे उत्पत्तेः प्राक् कार्यसत्त्वे यदनिष्टमापतति तत्परिहाराय कारणावस्थायां कार्यं न सदित्येवंस्वरूपः प्रसङ्गविपर्ययः सर्वत्र योज्य इत्याह**– न सत्कार्यमिति ।

सत्कार्यवादे दूषणान्तरमप्युपदर्शयति– अपि चेति। **परस्याङ्गस्य यद्विषयकं ज्ञानं नास्ति तद्विषयकनिश्चयात्मकज्ञानोत्पत्तये, संशयितस्य परस्य यद्विषयकं संशयात्मकं ज्ञानं तन्निर्णयजनकप्रमाणानवलोकनादुत्पद्यते तस्य तद्विषयकसंशयनिवृत्तये विपर्यस्तस्य परस्य यद्विषयको विपर्यासो विपरीतकोटिनिर्णयात्मको भ्रम उत्पद्यते तस्य तादृशभ्रमनिवृत्तये वा स्वसाध्यप्रमेयव्याप्यलक्षणं लिङ्गं प्रयुञ्जते वादिनः, सत्कार्यवादिनस्तु कापिला नैवं साधनं प्रयोक्तुमुत्सहन्ते**

विपर्ययः पञ्चस्वपि प्रसङ्गसाधनेषु योज्यः। अपि च सर्वमेव साधनं स्वविषये प्रवर्तमानं द्वयं विदधाति-स्वप्रमेयार्थविषये उत्पद्यमानौ संशय-विपर्यासौ वा निवर्तयति, स्वसाध्यविषयं वा निश्चयमुपजनयतीति, न चैतत् सत्कार्यवादे युक्त्या सङ्गच्छते, संशय-विपर्यासयोश्चैतन्यस्वरूपत्वे नित्यत्वेन साधनव्यापारान्निवृत्त्ययोगात्, बुद्धि-

---

निरुक्तप्रयोजनस्यैव तन्मतेऽसम्भवादिति येषां स्वशास्त्रप्रणयनमेवाचतुरस्रमित्याह- अपि चेति। स्वविषये प्रवर्तमानं सर्वमेव साधनं द्वयं विदधाति स्वस्य लिङ्गलक्षणसाधनस्य विषये स्वज्ञानजन्यज्ञानविषयत्वेन विषयीभूते व्यापकलक्षणसाध्ये, प्रवर्तमानं तन्निर्णयाय प्रयुज्यमानम्, सर्वमेव साधनं लिङ्गम्, द्वयं विदधाति उभयं करोति स्वप्रमेयसाध्यविषयकसंशयविपर्ययान्यतरनिवृत्तिलक्षणं यदेकं कार्यं यच्चापरं स्वसाध्यविषयकनिश्चयलक्षणं कार्यं तदुभयं करोति, एकदा कार्यद्वयरूपफलोपधानाभावेऽपि तत्स्वरूपयोग्यत्वस्य सद्भावात्। किं द्वयं विदधातीत्यपेक्षायामाह- स्वप्रमेयार्थविषय इति- स्वज्ञानजन्यप्रमाविषयसाध्यरूपार्थविषय इत्यर्थः। उत्पद्यमानौ विषयतासम्बन्धेन उत्पद्यमानौ, यदि स्वविषये प्रवर्तमानं साधनं न स्यात् तर्हि तत्र संशयो विपर्यासो वोत्पद्येतैव, तौ च संशय-विपर्यासौ निवर्तयति तदुत्पत्तिं प्रतिबध्नाति, निरुक्तसाधनाप्रवृत्तिकाले उत्पद्यमानावपि तौ तत्प्रवृत्तौ सत्यां नोत्पद्येते इति तदुत्पत्तिप्रतिबन्ध एव तन्निवर्तनमित्यर्थः। वा अथवा। स्वसाध्यविषये निश्चयं स्वस्य प्रकृतसाधनस्य यत् साध्यं स्वज्ञानजन्यज्ञानविषयार्थस्वरूपं तद्विषयकं निश्चयात्मकज्ञानम् उपजनयति उत्पादयतीत्यर्थः। तदेतन्निरुक्तसाधनप्रयोजनं यथा सत्कार्यवादे साङ्ख्यमते न घटते तत् प्रपञ्चयति- न चेत्यादिना। 'न च' इत्यस्य 'सङ्गच्छते' इत्यनेनान्वयः। एतत् संशयविपर्ययनिवृत्ति-स्वविषयनिश्चयरूपफलद्वयम्। तत्र संशय-विपर्यय-निवृत्त्यसम्भवं सहेतुकमुपदर्शयति- संशये इति। यदि साङ्ख्यमते संशय-विपर्ययौ न चैतन्यस्वरूपौ, किन्तु बुद्धेर्मनसो वा वृत्तिविशेषत्वात् तद्रूपावेव तौ

मनःस्वरूपत्वेऽपि तयोर्नित्यत्वेन तद्दोषानुद्धारात्, मनसो नित्यत्वेऽपि तद्वृत्तिरूपसंशय-विपर्यासयोरनित्यत्वाभ्युपगमे वाऽनेकान्तप्रवेशात्, निश्चयोत्पत्तेरपि साधनादसम्भवात्, तस्याः सर्वदाऽवस्थितत्वात्, अन्यथा सत्कार्यप्रतिज्ञाहानेरिति साधनप्रयोगनैष्फल्यमेव साङ्ख्य-दर्शने। प्रागनभिव्यक्तो निश्चयः पश्चात् साधनेभ्योऽभिव्यक्तिमा-सादयतीत्यभिव्यक्त्यर्थं साधनप्रयोगसाफल्यमिति चेत्? न-स्वभावातिशयोत्पत्तिलक्षणायास्तद्विषयज्ञानलक्षणायास्तदुपलम्भका-वारकापगमलक्षणाया वाऽभिव्यक्तेः प्राक् सत्त्वेन साधनप्रयोग-

---

तदाप्याह- बुद्धि-मनःस्वरूपत्वेऽपीति। तयोः **बुद्धि-मनसोः**। तद्दोषानुद्धारात् **संशय-विपर्यासाऽनिवृत्तिलक्षणदोषतादवस्थ्यात्**। ननु न मनःस्वरूपौ **संशय-विपर्यासौ**, किन्तु तद्वृत्तिरूपौ तावनित्याविति तन्निवृत्ति-सम्भव इत्यत आह- मनसो नित्यत्वेऽपीति। तद्वृत्तिरूपेति- **मनोवृत्ति-रूपेत्यर्थः**, कार्यकारणयोरभेदोऽपि कापिलेनोपेयत इति **संशय-विपर्या-सयोर्मनःपरिणामयोर्मनसाऽभेदेन नित्यत्वम्, स्वरूपतश्चानित्यत्व-मित्येवं स्याद्वादप्रवेशः स्यात् तयोः स्वरूपतोऽनित्यत्वाभ्युपगमे इत्यर्थः। संशय-विपर्यासनिवृत्तिलक्षणफलानुपपत्तिमुपदर्श्य निश्चयो-त्पत्तिलक्षणफलासम्भवमुपदर्शयति**- निश्चयोत्पत्तेरपीति। तस्याः **निश्चयो-त्पत्तेः**। अन्यथा **निश्चयोत्पत्तेः सदावस्थितत्वानङ्गीकारे। यदा च साधनस्य निरुक्तफलद्वयमप्युक्तदिशा साङ्ख्यदर्शने न सम्भवति तर्हि साधनप्रयोगवैफल्यमेव तद्दर्शने स्यादित्याह**- इति साधनप्रयोग-वैफल्यमेव साङ्ख्यदर्शन **इति**। **साङ्ख्यः साधनप्रयोगसाफल्ये युक्तिमा-शङ्कते**- प्रागनभिव्यक्त **इति**। अभिव्यक्त्यर्थं **निश्चयाभिव्यक्त्यर्थम्**। **यादृशी तादृशी वाऽभिव्यक्तिर्भवतु एवं साऽपि सत्कार्यवादिना प्राक् सत्ये-वाङ्गीकार्येत्येवमपि साधनप्रयोगवैफल्यमेवेति समाधत्ते**- नेति, **निश्च-याभिव्यक्तिः**- **निश्चयस्य स्वभावातिशयोत्पत्तिः, निश्चयविषयकज्ञानं**

वैफल्यानुद्धारात्, असत्त्वे च सत्कार्यवादक्षतेः, एतेन 'अभिव्यक्त्यतिरिक्तस्यैव कार्यस्य प्राक् कारणे सत्त्वमित्यभिव्यञ्जकतया साधनप्रयोगस्य च वैफल्यम्, दण्डादीनां च घटादौ न कारकत्वं ज्ञापकत्वं वा, तद्व्यवहारश्च तत्र वासनाविशेषादेव, विलक्षणसंस्थानावच्छेदेन चक्षुःसंयोगादेरेव च घटाद्यभिव्यञ्जकत्वम्, तदभावादेव न प्राग् घटाद्युपलम्भः' इत्युच्छृङ्खलसाङ्ख्यमतमपि निरस्तम्, चक्षुःसंयोगविशेषादेरपि प्राक् सत्त्वे घटाद्युपलम्भप्रसङ्गात्, असत्त्वे च प्रतिज्ञाहानेः।

वा, निश्चयोपलम्भकस्य यद् आवारकं तदपगमस्वरूपा वा, तस्याः सत्कार्यवादे प्रागपि सत्त्वेन तदर्थं साधनप्रयोगवैफल्यादित्यर्थः। ननु निरुक्तान्यतमस्वरूपा निश्चयाभिव्यक्तिः प्रागसत्येवोररीक्रियत इति तदर्थं साधनप्रयोगस्य साफल्यं स्यादित्यत आह- असत्त्वे चेति- निरुक्तलक्षणाभिव्यक्तेः प्रागसत्त्वे चेत्यर्थः। 'एतेन' इत्यस्य 'निरस्तम्' इत्यनेनान्वयः, एतेन- सत्कार्यवादक्षतिलक्षणदोषेण। ननु घटादिलक्षणकार्यमभिव्यक्त्यतिरिक्तमेव तस्य कारणे प्राक् सत्त्वमेतावताऽप्यापातमेवेति तदर्थं दण्डादिव्यापारवैयर्थ्यमित्यत आह- दण्डादीनां चेति। तद्व्यवहारश्च दण्डादयो घटादीनां कारणम्, घटादयश्च दण्डादीनां कार्यमिति व्यवहारश्च। तत्र दण्डादिघटादिषु। यदि दण्डादयो न घटादेः कारणम्, घटादिकं वा न दण्डादिकार्यं तर्हि दण्डादिव्यापारात् पूर्वमपि घटाद्युपलम्भः कस्मान्न भवतीत्यत आह- विलक्षणेति। तदभावादेव विलक्षणसंस्थानावच्छेदेन चक्षुस्संयोगविशेषादेरभावादेव। एतेन इत्यभिमतमेव निरासहेतुमुपदर्शयति- चक्षुस्संयोगविशेषादेरपीति- चक्षुस्संयोगविशेषादिरपि कार्यमेव, सत्कार्यवादे तस्यापि प्राक् सत्त्वे तज्जन्यस्य घटाद्युपलम्भस्यापि प्राक् सत्त्वं स्यादित्यर्थः। असत्त्वे च चक्षुस्संयोगविशेषादेः पूर्वमसत्त्वे च। प्रतिज्ञाहानेः एवं सति असतोऽपि चक्षुस्संयोगविशेषादेः कार्यस्याभ्यु-

न च चक्षुःसंयोगादेरप्यभिव्यक्तस्यैव व्यञ्जकत्वोपगमान्नायं दोषः ? अभिव्यक्तत्वं हि ज्ञातत्वम्, न च चक्षुःसंयोगादेर्ज्ञातस्य व्यञ्जकत्वम्, किन्तु स्वरूपसत इति यत्किञ्चिदेतत् । कालविशेषवैशिष्ट्यमेवाभिव्यक्तिरिति चेत् ? सा तर्हि व्यञ्जकतावच्छेदिका मृद्द्रव्य एव कल्पनीया, चैत्रादिभेदेनाऽनन्तचक्षुःसंयोगादौ तत्क-

---

पगतत्वेन 'सदेव कारणे कार्यम्' इति साङ्ख्यप्रतिज्ञायाः सन्न्यासप्रसङ्गादित्यर्थः । चक्षुस्संयोगादेः स्वरूपतो नाभिव्यञ्जकत्वं तेन स्वरूपतः चक्षुस्संयोगादेः पूर्वं सत्त्वेऽपि न घटोपलम्भप्रसङ्गः, किन्त्वभिव्यक्तस्य चक्षुस्संयोगादेरभिव्यञ्जकत्वम्, अभिव्यक्तिव्यतिरिक्तस्यैव कार्यस्य पूर्वं सत्त्वमुच्छृङ्खलसाङ्ख्यमतेऽभिमतमित्यभिव्यक्तेः पूर्वमभावादभिव्यक्तचक्षुःसंयोगादेरपि पूर्वमभाव इति न तत्कारणस्य घटाद्युपलम्भस्य पूर्वं प्रसङ्ग इत्याशङ्क्य प्रतिक्षिपति- न चेति । प्रतिक्षेपहेतुमुपदर्शयति- अभिव्यक्तत्वं हीति । साङ्ख्यः शङ्कते- फलविशेषेति एवं सति स्याद्वादप्रवेश एव साङ्ख्यस्य ज्यायानिति सिद्धान्ती समाधत्ते- सेति-कालविशेषवैशिष्ट्यलक्षणाऽभिव्यक्तिरित्यर्थः । मृद्द्रव्य एवेति-अभिव्यक्तमृद्द्रव्यमेव घटाद्यभिव्यञ्जकम्, तत्र व्यञ्जकतावच्छेदकतया प्रतिष्ठाभिव्यक्तिश्च कालविशेषवैशिष्ट्यमेव, अभिव्यक्तमृद्द्रव्यस्य घटाद्यभिव्यञ्जकत्वकल्पनापेक्षयाऽभिव्यक्तचक्षुःसंयोगादौ घटाद्यभिव्यञ्जकत्वकल्पने गौरवमपीत्यतो लाघवादभिव्यक्तमृद्द्रव्यस्यैव घटाद्यभिव्यञ्जकत्वं युक्तमित्याह- चैत्रादिभेदेनेति । तत्कल्पने कालविशेषवैशिष्ट्यलक्षणस्याभिव्यक्तत्वस्य कल्पने । भवत्वेवमेव किं नश्छिन्नमित्यत आह- तथा चेति- अभिव्यक्तमृद्द्रव्यस्य घटाद्यभिव्यञ्जकत्वे चेत्यर्थः । अपेक्षाभेदेन सत्त्वाऽसत्त्वयोरेकत्र कार्ये सदसत्कार्यवादो जैनानां सिद्धिमुपयाति, घटरूपकार्यस्य मृद्द्रव्ये-

ल्पने गौरवात्, तथा च मृद्द्रव्येऽनभिव्यक्तद्रव्यात्मना घट-सत्त्वमभिव्यक्तपर्यायात्मना च घटासत्त्वमिति स्याद्वाद एव विजयत इति सूक्ष्मदृशा निभालनीयम् ॥

अथ असत्कार्यवादिनः कारणतां प्रति नियताः शक्तयो न घटन्ते, कार्यात्मकानामवधीनामनिष्पत्तेः, नह्यवधिमन्तरेणावधिमतः सद्भावः सम्भवतीति प्रतिनियतशक्तिकुक्षिप्रविष्टत्वादेव कारणेषु कार्यसत्त्वमावश्यकम्, तदुक्तम्—

"अवधीनामनिष्पत्तेर्नियतास्ते न शक्तयः ।
सत्त्वे च नियमस्तासां, युक्तः सावधिको ननु" ॥ [ ]

ऽनभिव्यक्तद्रव्यात्मापेक्षया सत्त्वम्, पृथुबुध्नोदरादिलक्षणाभिव्यक्त-पर्यायापेक्षयोत्पत्तितः प्राग् मृद्द्रव्ये घटास्यासत्त्वमित्यतः सदसद्रूपो घट इति सदसत्कार्यवादलक्षणः स्याद्वादोऽयत्नोपनत इति सोऽन्य-वादापेक्षयाऽतिसुदृढनिरूढत्वाद् विजयत इत्याह— मृद्द्रव्य इति ।

य उत्पत्तेः पूर्वमसदेव कार्यमित्युपैति, तन्मते उत्पत्तेः प्रागसतः कार्यस्य न किञ्चिन्निष्ठकारणतानिरूपकत्वं सम्भवति, सावधिकस्य कारणत्वस्यावध्यभावेऽसत्त्वे तदधीना शक्तिरपि न घटत इति कारणत्वेनाभिमते पदार्थे कार्यत्वेनाभिमतपदार्थानुकूलशक्तिप्रसिद्ध्यर्थं कार्यस्य सत्त्वमावश्यकमिति सत्कार्यवादः स्वीकरणीय इति सत्कार्यवादी शङ्कते— अथेति 'असत्कार्यवादिनः' इत्यनन्तरं 'मते' इति शेषः । कारणतां प्रति नियता इति— यत्र यन्निरूपितकारणत्वं तत्र तन्निरूपिता शक्तिरित्येवं कारणतां प्रति नियता इत्यर्थः । कार्ये शक्त्यवधित्वं शक्तिनिरूपकत्वमेव, यदा कार्यलक्षणोऽवधिर्नास्ति तदा तदवधिका शक्तिरपि न सम्भवतीत्याह— नहीति— अस्य 'सम्भवति' इत्यनेनान्वयः ।

उक्तार्थे प्राचां सम्मतिमाह- तदुक्तमिति । ते तव मते । सत्त्वे च अवधिभूतानां कार्याणामुत्पत्तेः प्राक् सत्त्वे पुनः । तासां शक्तीनाम् ।

इति चेत्? न-अवधीनामनिष्पत्तौ क्षीरस्य दध्युत्पादने शक्तिरिति व्यपदेशासम्भवेऽप्यनारोपितं सर्वोपाधिनिरपेक्षं प्रतिनियतकार्यजनकं यद् वस्तुस्वरूपं यदनन्तरं पूर्वमदृष्टं वस्त्वन्तरं प्रादुर्भवद् दृश्यते तत्प्रतिषेधस्य कर्तुमशक्यत्वात्। न च शब्दविकल्पानां यत्र

ननु निश्चयेन। सावधिको नियमः एतन्निरूपिता शक्तिरस्मिन्नेवेति नियमः। युक्तः युक्त्या घटते।

अवध्यनिष्पत्तौ तन्निरूपितवस्तुव्यवहारस्याऽसम्भवेऽपि तद्वस्तुतो जायमानं कार्यं प्रतिषेद्धुं न शक्यते, कार्यं प्रति यद् वस्तुनः कारणत्वं तत् स्वरूपत एव, न तु तन्निरूपितकारणतयाऽवगतत्वेनेत्यसदपि कार्यं कारणतो जायमानमुपलब्धिगोचरत्वात् स्वीकरणीयमेवेति समाधत्ते- नेति। कीदृशं वस्तुस्वरूपमित्यपेक्षायामाह- यदनन्तरमिति। तत्प्रतिषेधस्य असत्कार्यकारणवस्तुस्वरूपप्रतिषेधस्य। अस्येदं कारणमस्येदं कार्यमित्येवं शब्दप्रयोगो विकल्पो वा मा जायताम्, नैतावता कारणीभूतवस्तुनः कार्यीभूतवस्तुनश्च स्वभावो निवर्तत इत्याह- 'न च' इति- अस्य 'व्यावर्तते' इत्यनेनान्वयः। व्यापकनिवृत्त्या व्याप्यस्य कारणनिवृत्त्या कार्यस्य च निवृत्तिर्भवति, यतो व्यापकनिवृत्तावपि व्याप्यं यदि न निवर्तेत तदा तदभाववदवृत्तित्वलक्षणं व्याप्यत्वमेव व्याप्यत्वेनाभिमतस्य न स्यात्, तदभाववति तस्य विद्यमानत्वात्। एवं तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वलक्षणं व्यापकत्वमपि व्यापकत्वेनाभिमतस्य न भवेत्, तत्समानाधिकरणात्यन्ताभावप्रतियोगित्वात्, इति व्याप्य-व्यापकभाव एवोच्छिद्येत, एवं कारणत्वेनाभिमतपदार्थस्याभावेऽपि कार्यत्वेनाभिमतपदार्थो यदि भवेत् तर्हि तदव्यवहितप्राक्क्षणावच्छेदेन तत्समानाधिकरणात्यन्ताभावप्रतियोगित्वेन तदभावलक्षणकारणत्वमेव न भवेत्, तदभावे तत्सत्त्वलक्षणव्यतिरेकव्यभिचारेण तत्कार्यत्वमेव च तस्य न स्यादिति कार्य-कारणभावो न निर्वहेदित्यतो

व्यावृत्तिस्तत्र वस्तुस्वभावोऽपि व्यावर्तते, यतो व्यापकस्वभावः कारणं वा व्यावर्तमानं स्वव्याप्यं स्वकार्यं वाऽऽदाय व्यावर्तत इति युक्तम्, तयोस्ताभ्यां प्रतिबन्धात्, न च पयसो दधिन शक्तिरित्यादिव्यपदेशो विकल्पो वा भावानां व्यापकस्वभावः कारणं वा, येनासौ निवर्तमानो वस्तुस्वभावं निवर्तयेत्, व्यपदेश-विकल्पा हि न वस्तुस्वभावायत्ताः, किन्तु यदृच्छाजन्मानः, एकत्रैव शब्दादौ नित्याऽनित्यादिरूपेण वादिनां नानाविकल्पप्रवृत्तेः। एवमपि यद्यवधिनिरूपितत्वे

व्यापकाभावेऽवश्यं व्याप्यस्याभावः कारणाभावे चावश्यं कार्यस्याभाव आस्थेयः, विकल्पो व्यपदेशश्च न वस्तुस्वभावस्य व्यापको नवा कारणमिति न तन्निवृत्त्या वस्तुस्वभावनिवृत्तिरावश्यकीत्याह–यत इति। तयोः व्याप्य-कार्ययोः। ताभ्यां व्यापक-कारणाभ्याम्। प्रतिबन्धात् व्याप्तेः। 'न च' इत्यस्य 'व्यापकस्वभावः, कारणं वा' इत्युभयत्रान्वयः। येन व्यापकत्वेन कारणत्वेन वा। असौ निरुक्तव्यपदेशो निरुक्तविकल्पो वा। व्यपदेश-विकल्पानां वस्तुस्वभावनियतत्वाभावे युक्तिमुपदर्शयति- व्यपदेश-विकल्पा हीति। हि यतः। व्यपदेश-विकल्पानामिच्छामात्रप्रभवत्वे हेतुमुपदर्शयति– एकत्रेति– एक एव शब्दो नित्य इति मीमांसकेन विकल्प्यते, व्यपदिश्यते च, स एव नैयायिकेनाऽनित्य इति विकल्प्यते, व्यपदिश्यते चेति, एवं कश्चिद् वादी तं गुण इति विकल्पयति, कश्चित् तं द्रव्यमिति, तथा च यो वादी यं यथेच्छति तं तथा विकल्पयति, व्यपदिशति च, यदि च वस्तुस्वभावाधीनौ व्यपदेश-विकल्पौ स्यातां तदा सर्ववादिनामेकस्मिन् वस्तुनि व्यपदेश-विकल्पावेकप्रकारावेव भवेताम्, न तु विभिन्नाकारा विकल्प-व्यपदेशा स्युरिति न वस्तुस्वभावायत्ता विकल्प-व्यपदेशा इत्यर्थः। एवं सत्यपि शक्त्यादिव्यपदेशस्य किञ्चिन्निरूपितशक्त्यादिविषयकत्वेन जायमानत्वतो निरूपकीभूतावधेः शक्तिस्वरूपप्रविष्टत्वमुररीकृत्य शक्तेः कारणगतायाः पूर्वकालसत्त्वतस्तत्स्वरूपप्रविष्टत्वात् तदभेदमाश्रित्य कार्य-

शक्तौ तदभेदपर्यवसितमिति तत्कुक्षिप्रविष्टत्वमवधीनां स्वीक्रियते, तदा 'घटाभावः, पटाभावः' इत्यादिव्यवहारानुरोधेन घटादीनामभावकुक्षिप्रविष्टत्वादभावे घटादिसत्त्वमपि प्रसज्यते, 'चैतन्यं जडभिन्नम्' इत्याद्यनुरोधाच्चैतन्येऽपि च जडसत्त्वमासज्येत, तथा च महदासमञ्जस्यमिति दिग्।

किञ्च सत्कार्यवादे बन्ध-मोक्षाभावोऽपि साङ्ख्यानामासज्यते, प्रधान-पुरुषयोः कैवल्योपलम्भलक्षणतत्त्वज्ञानोत्पत्तौ ह्यपवर्गस्तैरिष्यते, तत्त्वज्ञानं च सर्वदा व्यवस्थितमेवेति सर्व एव देहिनोऽपावृताः स्युः,

---

स्यापि तदानीं सत्त्वं यदि स्वीक्रियेत तदाऽभावव्यपदेश-विकल्पयोरपि प्रतियोगिसहिताभावविषयत्वतः प्रतियोगिनोऽप्यभावकुक्षिप्रविष्टत्वेन तदभेदमुपाश्रित्य प्रतियोगिनोऽप्यभावे सत्त्वं प्रसज्येत, एवं ज्ञानलक्षणचैतन्यमपि विषयनिरूप्यमिति विषयीभूतजडसंवलितचैतन्यविषयकव्यपदेश-विकल्पबलाज्जडीभूतविषयस्यापि चैतन्यस्वरूपप्रविष्टत्वतस्तदभेदमवलम्ब्य चैतन्ये जडस्यापि सत्त्वं प्रसज्येत, एवं सति भावाऽभावयोश्चैतन्य-जडयोश्च स्वरूपसाङ्कर्यमसमञ्जसमापद्येतेत्याह- एवमपीति- व्यपदेश-विकल्पानां यादृच्छिकानामपि वस्तुस्वभावायत्तत्वाभावेऽपि वस्तुघटितस्वरूपत्वाङ्गीकार इत्यर्थः। तदभेदेति- वस्त्वभेदेति, शक्त्यभेदेति वाऽर्थः। तत्कुक्षिप्रविष्टत्वं शक्तिकुक्षिप्रविष्टत्वम्। 'जडभिन्नमित्यादि' इत्यादिपदाज्जडविषयकमित्यादेः परिग्रहः।

साङ्ख्यस्य सत्कार्यवादे बन्ध-मोक्षव्यवस्थाऽनुपपत्तिरपि दोष इत्याह- किञ्चेति। तत्र सर्वस्य सर्वदा मोक्षप्रसक्तौ बन्धाभावस्तावदादावुपदर्शयति- प्रधान-पुरुषयोरिति। अपवर्गः मोक्षः। तैः साङ्ख्यैः। सत्कार्यवादे तत्त्वज्ञानलक्षणं कार्यं सर्वदा व्यवस्थितमिति तदधीनमोक्षोऽपि सर्वदा व्यवस्थित एव स्यादित्याह- तत्त्वज्ञानं चेति। अपवृत्ताः मुक्ताः। सर्वस्य सर्वदा बन्धभावे मोक्षाभाव इत्युपदर्शयति-

मिथ्याज्ञानवशाच्च तैर्बन्ध इष्यते, तस्य च सर्वदा व्यवस्थितत्वात् सर्वेषां बद्धत्वमिति कुतो मोक्षः ?। नित्यमुक्त एवात्मा कण्ठगतचामीकरन्यायेनाप्राप्तिभ्रमादेव तदर्थं प्रवृत्तिरित्यपि दुर्वचनम्, प्राप्तेः सत्त्वेऽप्राप्तिभ्रमायोगात्, असत्त्वे चानुत्पत्तेः।

यदपि भेदानामन्वयदर्शनात् प्रधानास्तित्वमुक्तम्, तत्रापि हेतोरसिद्धत्वं पर्यायास्तिकनयानुसारिण उद्भावयन्ति, तथाहि–नहि

मिथ्याज्ञानवशाच्चेति। तैः साङ्ख्यैः। तस्य च मिथ्याज्ञानस्य पुनः। आत्मनो नित्यमुक्तत्वेऽपि तदर्थप्रवृत्तौ साङ्ख्यानां मूलयुक्तिमुपन्यस्याप्यहस्तयति– नित्यमुक्त एवात्मेति। कण्ठगतेति– यथा कस्यचित् पुंसः कण्ठे सुवर्णं विद्यत एव, परं भ्रान्त्या तन्नावगच्छति, प्रत्युताप्राप्तं सुवर्णमवगच्छति यावत् तावत् तत्प्राप्त्यर्थं यतते, यदा तु तव कण्ठे विद्यत एव सुवर्णं मुधा तदर्थं भ्रमसीति कस्यचिदाप्तस्योपदेशं शृणोति तदा प्राप्तं तदवगत्य तत्प्राप्तिप्रयत्नान्निवर्तते, एवमात्मा सर्वदा मुक्तो यावत् तं भ्रान्त्या तथा नावगच्छति तावत् तन्मुक्त्यर्थं प्रवर्तते, तत्त्वज्ञाने च सति तदप्राप्तिभ्रमनिवृत्त्या तत्र शिथिलयत्नो भवतीत्येतदपि साङ्ख्यस्य वचनं दुर्वचनमित्यर्थः। प्राप्तेः मोक्षप्राप्तेः। सत्त्वे सद्भावे। अप्राप्तिभ्रमायोगादिति– मुक्तो हि तत्त्वज्ञानवानेव भवति, तत्त्वज्ञानं च भ्रमविरोधीति तद्रूपप्रतिबन्धकसद्भावान्मया मुक्तत्वं न प्राप्तमिति भ्रमस्याऽसम्भवादित्यर्थः। असत्त्वे चानुत्पत्तेरिति– नित्यमुक्तत्वप्राप्तेरसत्त्वे च सत्कार्यवादिमते चासत उत्पत्तिर्न भवतीत्यसत्यानित्यमुक्तत्वप्राप्तेरनुत्पत्तेरुत्पत्त्यसम्भवादित्यर्थः।

प्रधानसद्भावसाधकं युक्तिकदम्बकमपि साङ्ख्यस्यायुक्तमित्यावेदयितुमाह– यदपीति। उक्तं "भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च०" [ ]इत्यनया कारिकयोपदर्शितम्। तत्रापि तदुक्तावपि। हेतोः 'अन्वयदर्शनाद्' इत्यस्य प्रधानास्तित्वसाधकस्य।

शब्दादिलक्षणं व्यक्तं सुखाद्यन्वितं सिद्धम्, सुखादीनां ज्ञानरूपत्वात्, शब्दादीनां च तद्रूपविकलत्वात्, न च सुखादीनां ज्ञानरूपत्वमसिद्धम्, स्वसंवेदनरूपतया स्पष्टमनुभूयमानत्वात् तत्त्वसिद्धेः, तथाहि- स्पष्टेयं सुखादीनां प्रीति-परितापादिरूपेण शब्दादिविषयसन्निधाने प्रकाशान्तरनिरपेक्षा प्रकाशात्मिका स्वसंवित्तिः, यच्च प्रकाशान्तरनिरपेक्षं सातादिरूपतया स्वयं सिद्धिमवतरति तद् 'ज्ञानं, संवेदनं, चैतन्यं, सुखम्' इत्यादिभिः पर्यायशब्दैरभिधीयते, न च सुखादीनामन्येन संवेदनेन वेदनादनुभूयमानता, तत्संवेदनस्यासातादिरूपताप्रसक्तेः, नहि योगजप्रत्यासत्त्याऽनुमानादिना वा परकीयसुखादिसंवेदने सातादिरूपता दृष्टा।

असिद्धत्वं **स्वरूपासिद्धत्वम्**, '**उद्भावयन्ति**' **इत्यत्र कर्मतयाऽन्वितम्। तदुद्भावनस्वरूपमेव प्रकटयति**- तदाहीत्यादिना। तद्रूपविकलत्वात् **ज्ञानरूपरहितत्वात्। सुखादीनां ज्ञानरूपत्वासिद्धिमाशङ्क्य परिहरति**- न चेति। तत्त्वसिद्धेः **सुखादीनां ज्ञानरूपत्वसिद्धेः। स्वसंवेदनप्रत्यक्षविषयत्वेन सुखादीनां ज्ञानरूपत्वसाधनमुपदर्शयति**- तथाहीति। '**स्पष्टेयम्**' **इत्यस्य** '**स्वसंवित्तिः**' **इत्यनेनान्वयः**। '**सुखादीनाम्**' **इत्यादिपदाद्**' **दुःखादीनामुपसङ्ग्रहः, इष्टशब्दादिविषयसन्निधाने सति प्रकाशान्तरमन्तरेणैव प्रीतिरूपेण सुखस्य प्रकाशात्मिका स्वसंवित्तिर्भवति, तथाऽनिष्टशब्दादिविषयसन्निधाने सति परितापरूपेण प्रकाशान्तरमन्तरेण दुःखस्य प्रकाशात्मिका स्वसंवित्तिर्भवतीत्यर्थः।** '**सातादि**' **इत्यादिपदादसातादेरुपग्रहः। सुखादीनामन्येन संवेदनेन वेदनतोऽनुभूयमानत्वं प्रतिक्षिपति**- न चेति। तत्संवेदनस्य **सुखादीनामन्यवेदनेन संवेदनस्य। अन्यवेदनेन संवेद्यमानस्य सातादिरूपत्वमदृष्टत्वान्न भवतीत्युपदर्शयति**- नहीति-**अस्य** '**दृष्टा**' **इत्यनेनान्वयः, परकीयसुखादीनां यज्ज्ञानं तन्नियमेन विषयीभूतपरसुखादितो**

भोगाख्यलौकिकमानससाक्षात्कारेणानुभवादनुभूयमानता सुखादेः, न तु स्वयंवेदनादनुभूतिरूपतेत्यपि वार्तम्, चन्दनादिस्पर्शन-सामग्रीकाले सुखादिमानसानुपपत्तेर्मानससामग्र्याः सर्वतो दुर्बलत्वात्,

---

भिन्नमिति तथासंवेदने 'अहं सुखी' इत्येवंरूपेण सातवेदनम्, 'अहं दुःखी', इत्येवंरूपेणाऽसातवेदनं न भवतीत्यतस्तथासंवेदनस्य सातादिरूपता न दृष्टेत्यर्थः।

स्वसंवेदनेनाऽनुभूयमानत्वं नास्त्येव सुखादेः, किन्त्विष्टविषय-सम्प्रयोगे सुखस्य, अनिष्टविषयसम्प्रयोगे च सुखस्योत्पत्तिः, तद-नन्तरं तेन सुख-दुःखादिना सह मनसः स्वसंयुक्तात्मसमवायलक्षण-सन्निकर्षबलाद् 'अहं सुखी, अहं दुःखी' इत्येवं मानसं सुखादीनां प्रत्यक्षम्, तत् सुखादितो भिन्नमिति परसंवेदनेनैव सुखादीनामनु-भूयमानतेति न स्वसंविदितरूपत्वाज्ज्ञानरूपत्वसिद्धिः सुखादीनामिति नैयायिकादिमतमुपन्यस्य प्रतिक्षिपति- भोगाख्येति। अन्यगतसुखादेर्यः सामान्यलक्षणाद्यलौकिकप्रत्यासत्तिप्रभवो मानससाक्षात्कारः स भोगो न भवत्येव, किन्तु स्वसंयुक्तात्मसमवायलक्षणलौकिकसन्निकर्षप्रभव एव स तथेत्यावेदनाय लौकिकेति। वार्तं तुच्छम्। तुच्छत्वे हेतुमुप-दर्शयति- चन्दनादीति- यदि सुखं स्वसंविदितप्रत्यक्षेणानुभूयमानं न स्वीक्रियेत, किन्तु मानसप्रत्यक्षात्मकपरसंवेदनेनैवानुभूयमानं तदु-पेयात्, न भवेत् तर्हि तथा अनुभूयमानं तत्, यतः यदा सुख-स्योत्पत्तिस्तदानीं चन्दनादीष्टविषयेण सह त्वगिन्द्रियसन्निकर्षे सति तदनन्तरं चन्दनादेस्त्वगिन्द्रियजन्यप्रत्यक्षमेव स्यान्न सुखस्य मानसम्, मानसप्रत्यक्षसामग्रीतो बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष-सामग्र्या बलवत्त्वेन मानसप्रत्यक्षं प्रति बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष-सामग्र्याः प्रतिबन्धकत्वादित्यर्थः।

ननु भोगान्यमानसप्रत्यक्षं प्रत्येव बहिरिन्द्रियजन्यलौकिक-प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं सुखादिमानससाक्षात्कारस्तु भोग एवेति प्रतिबध्यतावच्छेदकधर्मानाक्रान्तत्वान्न तत्प्रयुक्तसामग्र्याः

तत्र भोगान्यत्वनिवेशे गौरवात्, भोगत्वावच्छिन्नं प्रति वैजात्येन सुख-दुःखयोरेव हेतुत्वे भोगाख्यमानसे चन्दनादिभानानुपपत्तेः, चन्दनादि-भान एव विलक्षणे भोगत्वकल्पनौचित्यात्, 'इदं चन्दनम्' इति

प्रतिबन्धकत्वमिति स्यादेवेत्यत आह- तत्रेति-मानसे इत्यर्थः। भोगान्यमानसत्वावच्छिन्नं प्रति बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष-सामग्र्याः प्रतिबन्धकत्वकल्पनापेक्षया मानसत्वावच्छिन्नं प्रत्येव तस्याः प्रतिबन्धकत्वकल्पनस्य लाघवादौचित्यादित्याशयः। अपि च भोगान्यमानसत्वावच्छिन्नं प्रति बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष-सामग्र्याः प्रतिबन्धकत्वे बहिरिन्द्रियजन्यलौकिकप्रत्यक्षसामग्रीकाले भोगान्यमानसं मा भवतु, भोगाख्यमानसं तु तदानीं जायमानं सुख-दुःखविषयकमिव घटादिविषयकमपि किं न स्यात्? तस्य घटादिविषयकमानसरूपत्वेऽपि भोगान्यत्वाभावेन प्रतिबध्यतावच्छे-दकधर्मानाक्रान्तत्वात्, तत्र घटादिविषयकत्वाभावार्थं यदि विषयता-सम्बन्धेन भोगत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन सुख-दुःखयोरेव कारणत्वम्, तत्र यद्यपि सुखत्वं दुःखत्वं वा न कारणतावच्छेदकम्, सुखत्वेन कारणत्वे दुःखस्य, दुःखत्वेन कारणत्वे सुखस्य च भानं तत्र न स्यात्, तथापि सुख-दुःखोभयगतं वैजात्यमभ्युपेत्य तद्रूपेण तयोस्तत्र कारणत्वमुपेयत इति भोगविशेषे सुखस्य भानं भोग-विशेषे च दुःखस्य भानमुपपद्यते, तदापि चन्दनसुखमिदम्, शीत-वेदनेयम्' इति चन्दनादिभानं यद् भोगे भवति तन्न स्यादित्याह- भोगत्वावच्छिन्नं प्रतीति। वैजात्येन सुख-दुःखोभयगतवैजात्यविशेषेण। 'सुख-दुःखयोरेव' इत्येवकारेण सुख-दुःखभिन्नस्य हेतुत्वव्यवच्छेदः। सुख दुःखान्यतरविषयकलौकिकमानससाक्षात्कारे भोगत्वकल्पना-पेक्षया विलक्षणे चन्दनादिभाने भोगत्वकल्पने ज्ञानान्तराऽकल्पन-प्रयुक्तलाघवमपीत्याह- चन्दनादिभान एवेति। चन्दनादिभानम् 'इदं चन्दनम्' इत्याद्यपि, तच्च न भोगरूपमत आह- विलक्षणे इति, तथा च यादृशचन्दनभाने सुखसम्प्रत्ययस्तादृशचन्दनभाने भोगत्वम्,

बहिर्मुखाकारेण चन्दनादिभानेऽपि 'चन्दनीयं सुखमिदं जातम्' इत्यन्तर्मुखाकारेण सुखस्यापि तत्क्षणमेवानुभवात्, अतिरिक्त-तज्ज्ञान-तत्सामग्र्यादिकल्पने गौरवात्। एतेन 'मानसत्वावच्छिन्नं प्रति मानसाऽन्यज्ञानसामग्र्याः प्रतिबन्धकतायां वैजात्येन सुख-दुःख-योरुत्तेजकत्वमेवास्तु' इत्यपि निरस्तम्, तदुत्तेजकत्वकल्पनायामपि

एवं यादृशकण्टकादिभाने दुःखसम्प्रत्ययस्तादृशकण्टकादिभाने भोगत्वमित्यर्थः, ननु चन्दनभाने सुखसम्प्रत्ययो यदि भवेत् तदा तत्र भोगत्वकल्पनमुचितं तदेव तु नानुभवविषय इत्यत आह– इद चन्दनमितीति। तत्क्षणमेव चन्दनभानक्षणमेव। चन्दनज्ञानमेव सुखरूपं सुखस्य स्वसंवेदनरूपमित्युपगमेऽतिरिक्तसुखज्ञान तत्सामग्र्याद्य-कल्पनेन लाघवमपीत्याह– अतिरिक्तेति– चन्दनज्ञानातिरिक्तेत्यर्थः। तज्ज्ञानेति– सुखज्ञानेत्यर्थः। तत्सामग्र्यादीति– सुखज्ञानसामग्र्यादीत्यर्थः, आदिपदात् सुखज्ञानप्रागभाव-सुखज्ञानध्वंसाद्युपग्रहः। एतेनेति– अस्य 'निरस्तम्' इत्यनेनान्वयः। एतेन अतिरिक्तसुखज्ञानादिकल्पनगौरवेण, मानसत्वावच्छिन्नं प्रति मानसान्यज्ञानसामग्र्याः प्रतिबन्धकत्वे सुख-दुःखोत्पत्तिकाले चन्दनादिरूपार्थानसामग्रीसत्त्वाच्चन्दनादिप्रत्यक्षमेव स्याद् न सुखादिमानसप्रत्यक्षमित्यस्य परिहाराय सुख-दुःखानुगत-वैजात्यावच्छिन्नाभावविशिष्टाया एव मानसान्यज्ञानसामग्र्या मान-सत्वावच्छिन्नं प्रति प्रतिबन्धकत्वमुररीक्रियत इति सुख-दुःखान्यतर-सत्त्वे निरुक्तवैजात्यावच्छिन्नप्रतियोगिकाभावविशिष्टाया मानसान्य-ज्ञानसामग्र्या अभावान्न सुख-दुःखान्यतरविषयकमानसप्रत्यक्षानुप-पत्तिरित्यर्थः। उत्तेजकत्वं च प्रतिबन्धकता-कारणतान्यतरावच्छेद-कीभूताभावप्रतियोगित्वम्, प्रकृते मानसत्वावच्छिन्नप्रतिबध्यतानि-रूपिता या निरुक्तवैजात्यावच्छिन्नप्रतियोगिताकाभावविशिष्टमानसा-न्यज्ञानसामग्रीनिष्ठप्रतिबन्धकतातदवच्छेदकीभूताभावप्रतियोगित्वात् सुख-दुःखयोरुत्तेजकत्वमिति बोध्यम्। 'एतेन' इत्यतिदिष्टमेव हेतुमुप-

गौरवात्, वैजात्येन सुख-दुःखयोर्वा तत्रोत्तेजकत्वं मनःसंयोगविशेषादेर्वेति विनिगमनाविरहाच्चेति नव्यबौद्धसिद्धान्तस्यैवोद्धतत्वात्।

किञ्च शब्दादीनां सुखादिरूपत्वे भावनावशेन मद्याऽङ्गनादिषु कामुकादीनाम्, करभादीनां च कण्टकादिषु प्रतिनियताः प्रीत्यादयो न प्रादुर्भवेयुः, किन्तु प्रत्येकं चित्रा संवित् प्रसज्येत। अथ यद्यपि त्रयात्मकं वस्तु तथाप्यदृष्टादिसहकारिवशात् किञ्चिदेव कस्यचिद्रूपमाभाति न सर्वं सर्वस्येति चेत्? न-तदाकारशून्यत्वादवस्त्वालम्बनप्रतीतिप्रसक्तेः, तथाहि-त्र्याकारं तद्वस्त्वेकाकारं च संविदा संवेद्यत इति। न च, यथा प्रत्यक्षेण गृहीतेऽपि सर्वात्मना वस्तुन्यभ्यासादिवशात् क्वचिदेव क्षणिकत्वादौ निश्चयोत्पत्तिर्न सर्वत्र, तद्वददृष्टादिबलादेकाकारा संविदुदेष्यतीत्यभिधातुं क्षमम्, क्षणिकादिविकल्पस्यापि परमार्थतो वस्तुविषयत्वानभ्युपगमात्, वस्तुनो विकल्पा-

---

दर्शयति- तदुत्तेजकत्वेति- सुख-दुःखोत्तेजकत्वेत्यर्थः। निरासे हेत्वन्तरमप्याह- वैजात्येनेति। तत्र मानसान्यज्ञानसामग्रीनिष्ठप्रतिबन्धकतायाम्। सुख-दुःखादिकं ज्ञानस्वरूपमेवेति नव्यबौद्धसिद्धान्तः। अपि च शब्दादीनां सुख-दुःख-मोहस्वरूपत्वे सर्वस्य पुंसस्तेषु प्रीत्यप्रीति-मोहादिचित्रप्रतिपत्तिः स्यात्, न तु कस्यचित् कुत्रचित् प्रीतिः कस्यचिदप्रीतिरित्येवं प्रीत्यादयः प्रतिनियताः प्रादुर्भवेयुरित्याह किञ्चेति। 'कामुकादीनाम्' इत्यस्य 'प्रीत्यादयः' इत्यत्रान्वयः। चित्रा प्रीत्यप्रीति-मोहात्मिका। साङ्ख्यः शङ्कते- अथेति। प्रतिक्षिपति- नेति। त्रयात्मकं वस्तु प्रतीतिश्चैकाकारेति त्रयात्मकवस्त्वाकारत्वाऽभावादेकात्मकस्याऽवस्तुत्वेन तदाकारप्रतीतेरवस्त्वालम्बनत्वेनाऽवस्त्वालम्बनप्रतीतिप्रसङ्गादित्यर्थः। एतदेव स्पष्टयति- तथाहीति। न चेति- अस्य 'क्षमम्' इत्युत्तरेणाऽन्वयः। निषेधे हेतुमाह- क्षणिकादिविकल्पस्यापीति। कथं न क्षणिकादिविकल्पस्य परमार्थतो वस्तुविषयत्वमित्याकाङ्क्षायामाह- वस्तुन इति।

गोचरत्वात् परम्परया वस्तुप्रतिबन्धात् तथाविधतत्प्राप्तिहेतुतया तु तस्य प्रामाण्यमिष्टम्, उक्तं च—

"लिङ्ग-लिङ्गिधियोरेवं, पारम्पर्येण वस्तुनि।
प्रतिबन्धात् तदाभासशून्ययोरप्यबन्धनम्"॥ [ ] इति।

परैस्तु परमार्थत एव वस्तुविषयत्वमिष्टं प्रीत्यादिप्रतिपत्तीनाम्, अन्यथा 'सुखाद्यात्मनां शब्दादीनामनुभवात् सुखाद्यनुभवख्यातिः'

नन्वेवं विकल्परूपस्याऽनुमानस्य प्रामाण्यं यद् बौद्धस्याभिमतं तत् कथं विकल्पस्य वस्त्वविषयकत्वे सङ्गतमित्यत आह- परम्परयेति- यद्यपि विकल्पो न वस्तुगोचरः, तथापि परम्परया वस्तुप्रतिबन्धस्तस्य समस्ति, यतो वस्तुविषयकं निर्विकल्पकम्। ततोऽनुरूपविकल्पोत्पत्तिः, ततः प्रवृत्तस्य पुंसो वस्तुप्राप्तिरिति परम्परया वस्तुप्रतिबन्धाद् वस्तुप्राप्तिहेतुत्वाच्च विकल्परूपस्याप्यनुमानस्य प्रामाण्यम्। तथाविधतत्प्राप्तीति- परम्परया प्रतिबद्धवस्तुप्राप्तीत्यर्थः। तस्य विकल्पस्य। इष्टं बौद्धैरभ्युपगतम्।

इदानीं साङ्ख्यमतखण्डनं बौद्धमतमवलम्ब्येति बोध्यम्, अत एवोक्तार्थे तत्संवादमुपदर्शयति- उक्तं चेति। लिङ्ग-लिङ्गिधियोः हेतुज्ञान-साध्यज्ञानयोः। एवं सविकल्पप्रत्यक्षवत्। तदाभास-शून्ययोः वस्तुप्रतिभास शून्ययोः, एतच्च 'लिङ्ग-लिङ्गिधियोः' इत्यस्य विशेषणम्। अपिना प्रत्यक्षविकल्पस्याप्रेडनम्। पारम्पर्येण स्वकारणीभूतनिर्विकल्प-प्रत्यक्षद्वारेण। वस्तुनि प्रतिबन्धात्, सम्बन्धात्, अबन्धनम् साक्षाद्वस्तु-सम्बन्धाभाव-। परैस्तु सविकल्पकस्य साक्षादेव वस्तुप्रतिबन्धात् प्रामाण्यमित्यभ्युपगन्तृभिः साङ्ख्यैः पुनः, अस्य 'इष्टम्' इत्यनेनान्वयः। अन्यथा साङ्ख्याचार्यैः प्रीत्यादिप्रतिपत्तीनां परमार्थतो वस्तुविषयत्वं नेष्टमित्युपगमे, अस्या 'असङ्गतं स्याद्' इत्यत्रान्वयः। यदा च साङ्ख्यमते सुखादिसंवेदनस्य सविकल्पकस्य वस्तुविषयकत्वात् परमार्थत एव प्रामाण्यं तदा तस्य शब्दादीनां त्रयात्मकत्वे यदनिष्ट-

इत्येतदभिधानमसङ्गतं स्यात्, सुखादिसंविदां च सविकल्पकत्वाच्च किञ्चिदनिश्चितं रूपमस्तीति सर्वात्मनाऽनुभवख्यातिप्रसक्तिः। यदि च, त्रिगुणात्मकत्वं शब्दादीनाम्, ततः प्रीत्यादिप्रतिपत्तिनियमाय पुरुषविशेषेऽदृष्टविशेषस्य तन्नियामकत्वं दुःखादिधीप्रतिबन्धकत्वं च कल्पनीयम्, तदा दशाविशेषे प्रीतिधीस्थले परितापधीर्न स्यात् प्राक्तनाक्षयाऽपूर्वादृष्टोत्पत्तिसामग्र्यभावाद्, दशाविशेषस्यैवोत्तेज-

---

मापतति तद् दर्शयति– सुखादिसंविदां चेति। ततः त्रिगुणात्मकत्वतः। तन्नियामकत्वं प्रीत्यादिप्रतिपत्तिनियमहेतुत्वम्। दुःखात्मकत्वे सत्यपि यत् तदानीं न दुःखधीस्तत्र तदर्थं दुःखधीप्रतिबन्धकत्वमपि तस्यैवाऽदृष्टविशेषस्य कल्पनीयमित्याह– दुःखादिधीप्रतिबन्धकत्वं चेति। तदा अदृष्टविशेषस्य दुःखादिधीप्रतिबन्धकत्वकल्पने च। दशाविशेष इति– यस्यैव पुंसो यत्र पूर्वं सुखधीर्न दुःखादिधीस्तस्यैवोत्तरकाले तत्रैव दुःखादिधीरपि भवति, सा न भवेत् प्रतिबन्धकीभूतस्याऽदृष्टविशेषस्याऽक्षयात्, दुःखादिधीकारणीभूतस्याऽदृष्टविशेषस्य पूर्वं सत्त्वे पूर्वमपि दुःखादिधीर्भवेत्, न च पूर्वं दुःखादिधीरतः पूर्वं तदनुकूलादृष्टविशेषो नासीदेव, तदानीं च तदनुकूलादृष्टविशेषसामग्र्यभावादेव न तदुत्पत्तिः, तदभावाच्च कथं दुःखादिधीः स्यात्?। यादृशदशाविशेषे दुःखादिधीर्भवति तादृशदशाविशेषाभावविशिष्टस्यादृष्टविशेषस्यैव दुःखादिधीप्रतिबन्धकत्वमिति तथाभूतप्रतिबन्धकाभावबलादेव तदानीं दुःखादिधिय उत्पत्तिस्वीकारे तु वरं तादृशदशाविशेषस्यैव दुःखादिधीकारणत्वम्, तथादशाविशेषस्य सुखादिधीकारणत्वमिति कालैककारणपरिशेषापत्तिः, अदृष्टस्य पुण्य-पापरूपतया तत्र धर्मत्वादिना साङ्कर्यान्न वैजात्यसम्भव इति तद्रूपेण कारणत्वं प्रतिबन्धकत्वं च न सम्भवत्यपीत्याह– तदेति। 'प्राक्तनाऽक्षयाऽपूर्वादृष्ट०' इति स्थाने 'प्राक्तनाऽदृष्टाक्षयादपूर्वादृष्ट०' इति पाठो युक्तः। दशाविशेषस्यैवेति– यदृशायां दुःखादिधीस्तदृशाविशेषस्यै-

कत्वे तु तस्यैव सर्वत्र हेतुत्वसम्भवात् कालैककारणपरिशेषापत्तिः' अदृष्टे पुण्य-पापरूपे साङ्ख्यार्जातिरूपविशेषाऽसम्भवश्चेति यत्किञ्चिदेतत्। यदपि 'प्रसाद-ताप-दैन्याद्युपलम्भात् सुखाद्यन्वितत्वं सिद्धं शब्दादीनाम्' इत्यभिहितम्, तदप्यनैकान्तिकम्, तथाहि—योगिनां प्रकृतिव्यतिरिक्तं पुरुषं भावयतां तमालम्ब्य प्रकर्षप्राप्तयोगानां प्रसादः प्रादुर्भवति प्रीतिश्च, अप्राप्तयोगानां तु द्रुततरमपश्यतामुद्वेग आविर्भवति, जडमतीनां च प्रकृत्यावरणम्, न च परैः

वेत्यर्थः। उतेजकत्वे तु अदृष्टविशेषनिष्ठदुःखादिधीप्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वे पुनः, तादृशदशाविशेषाभावविशिष्टाऽदृष्टविशेषस्य दुःखादिधीप्रतिबन्धकत्वे त्विति यावत्। तस्यैव दशाविशेषस्यैव। सर्वत्र सुखादिधीदुःखादिधीप्रभृतिकार्ये। अदृष्टे वैजात्यसम्भवे तद्रूपेण किञ्चित् कार्ये कारणत्वं प्रतिबन्धकत्वं वा कल्प्येताऽपि साङ्ख्येन च न तत्र वैजात्यसम्भव इत्याह- अदृष्ट इति।

प्रसादाद्युपलम्भहेतोरप्यनैकान्तिकत्वेन तेन शब्दादीनां सुखाद्यन्वितत्वसाधनमपि साङ्ख्यस्य न समीचीनमित्याह- यदपीति। प्रसादाद्युपलम्भस्य सुखाद्यन्वितत्वलक्षणसाध्याभाववति पुरुषे सत्त्वेनाऽनैकान्तिकत्वं स्पष्टयति- तथाहीति। तं पुरुषं यमालम्ब्य प्रसादप्रीत्याद्युत्पत्तिर्भवति, तस्य सुखान्वितत्वम्, साङ्ख्यस्याभिमतं पुरुषमालम्ब्य प्रसादाद्युत्पत्तिः प्रकर्षप्राप्तायोगानां योगिनां भवति, न च पुरुषस्य त्रिगुणरहिततया साङ्ख्याभ्युपगतस्य सुखान्वितत्वमिति व्यभिचारः, अप्राप्तयोगानां पुरुषाणां पुरुषं द्रुततरमपश्यतां पुरुषमालम्ब्योद्वेगो भवति, न च पुरुषस्य दुःखान्वितत्वमिति व्यभिचारः, तथा जडमतीनां च पुरुषमालम्ब्य प्रकृत्यावरणं तमःकार्यत्वेन सम्मतमाविर्भवति, न च पुरुषस्य मोहान्वितत्वमिति व्यभिचारः। 'न च' इत्यस्य 'अभीष्टः' इत्यनेनान्वयः। परैः साङ्ख्यैः।

पुरुषस्त्रिगुणात्मकोऽभीष्ट इति। न च सङ्कल्पात् प्रीत्यादीनि प्रादुर्भवन्ति न पुरुषादिति वाच्यम्, शब्दादिष्वप्यस्य समानत्वात्, तस्मात् 'समन्वयाद्' इत्यसिद्धो हेतुरनैकान्तिकश्च, प्रधानान्वयस्य क्वचिदप्यसिद्धेः 'यदात्मकं कारणं तदात्मकं कार्यम्' इत्यस्यापि दुर्वचत्वात्, व्यक्ता-ऽव्यक्तयोः स्वयमेव भेदप्रतिपादनात्, विरुद्धश्चानित्यानेकरूपेण कार्येण तादृशस्यैव प्रधानस्य सिद्धेः। अनेनैव न्यायेनान्येऽपि हेतवो निरसनीयाः। नहि प्रधानाख्यस्य हेतोरभावेन

तत्र व्यभिचारपरिहारमाशङ्क्य प्रतिक्षिपति– न चेति– अस्य 'वाच्यम्' इत्यनेनान्वयः। अस्य 'सङ्कल्पात् प्रीत्यादीनि प्रादुर्भवन्ति, न शब्दादिभ्यः' इत्यस्य। उपसंहरति–तस्मादिति। प्रधानान्वयित्वस्य सिद्धौ सत्यां ततः प्रधानात्मकत्वं सिध्येदिति विशेषतः प्रधानान्वयित्वलक्षणहेतोः प्रधानासिद्धया, न क्वचिदपि सिद्धिरित्याह– प्रधानान्वयस्येति। यदात्मकं कारणं तदात्मकं कार्यमिति सामान्यव्याप्तिरपि न सिद्धा, येन प्रधानस्य त्रिगुणात्मकत्वे शब्दादीनामपि त्रिगुणात्मकत्वं स्यादित्याह– यदात्मकमिति निरुक्तव्याप्तेर्दुर्वचत्वे हेतुमाह– व्यक्तेति– व्यक्तं बुद्ध्यादि, अव्यक्तं प्रधानमित्येवं व्यक्ताऽव्यक्तयोः कार्य-कारणयोः स्वयमेव साङ्ख्यैनैव भेदप्रतिपादनात्, तथा च अव्यक्तात्मकं प्रधानलक्षणं कारणम्, कार्यं च महदादिना व्यक्तात्मकमित्युक्तव्याप्तेरभावादित्यर्थः। नित्यैकरूपप्रधानप्रसाधनाय चोक्तहेतूनामादरः, उक्तव्याप्त्या च अनित्याऽनेकरूपं महदादिकार्यं तदा भवेद् यद्यनित्यानेकरूपं प्रधानलक्षणं कारणं स्यादित्यनित्यानेकरूपेण महदादिकार्येणाऽनित्यानेकरूपस्यैव प्रधानस्य सिद्धिः स्यादिति विरुद्धोऽपि तदन्वयादिहेतुरित्याह– विरुद्धश्चेति। तत्रैव हेतुमाह- अनित्येति। तादृशस्यैव अनित्यानेकरूपस्यैव। अनेनैव न्यायेन समन्वयहेतुखण्डनयुक्त्यैव। अन्येऽपि हेतवः प्रधानसाधनायोपन्यस्ताः परिमाणादिहेतवोऽपि। परिमाणादिहेतूनां

परिमाणादीनां विरोधः सिद्धः, तथाहि यदि तावत् कारणमात्रस्यास्तित्वं साध्यते, तदा सिद्धसाध्यता, नह्यस्माकं कारणमन्तरेण कार्यस्योत्पादोऽभीष्टः, न च कारणमात्रस्य प्रधानमिति नामकरणे किञ्चिदस्माकं हीयते। अथ प्रेक्षावत् कारणमस्ति, यद् व्यक्तं नियतपरिमाणमुत्पादयति शक्तितश्च प्रवर्तत इति, तदयुक्तम्- अनैकान्तिकत्वात्, प्रेक्षावत् कारणं विनापि स्वहेतुसामर्थ्यात् प्रतिनियतपरिमा-

---

प्रधानलक्षणसाध्यस्याभावेन विरोधासिद्धया न तेभ्यः प्रधानसिद्धिरित्याह- नहीति- अस्य 'सिद्धः' इत्यत्रान्वयः। हेतोः महदादिकारणत्वेनाभिमतस्य, यदि प्रधानाभावेन सह परिमाणादीनां विरोधः स्यात् तदा प्रधानाभावविरुद्धत्वात् परिमाणादयः प्रधानव्याप्ता इति तैः प्रधानलक्षणसाध्यसिद्धिर्भवेत्, विरोधाभावे तु परिमाणादयोऽपि भवेयुः प्रधानाभावोऽपि स्यादिति न प्रधानसिद्धिरित्याशयः। परिमाणादितः प्रधानाऽसिद्धिमेव भावयति- तथ हीति। यदि कार्यगतपरिमितत्वादिहेतुना कारणमात्रास्तित्वसाधनमभिमतं तदा सिद्धसाध्यता, तामेव स्पष्टयति- नहीति- अस्य 'अभीष्टः' इत्यनेनान्वयः। अस्माकं साङ्ख्यभिन्नवादिनाम्, एवमग्रेऽपि। 'न च' इत्यस्य 'हीयते' इत्यनेनान्वयः, कार्येण कारणमात्रं यत् सिध्यति तस्य कारणस्य प्रधानमिति संज्ञाऽस्तु नाम साङ्ख्यकृता, ततः साङ्ख्यकृता, ततः साङ्ख्यातिरिक्तवादिनां न किञ्चिद्धीयत इत्यर्थः। साङ्ख्यः शङ्कते- अथेति- कार्यस्य परिमितत्वादिना न कारणमात्रस्यास्तित्वं साध्यते, किन्तु प्रेक्षावत्कारणस्यास्तित्वं साध्यते, प्रेक्षावत् कारणं हि नियतपरिमाणं कार्यमुत्पादयितुमलम्, शक्तितश्च प्रवर्तत इति, उक्ताशङ्कां प्रतिक्षिपति- तदयुक्तमिति। अयुक्तत्वहेतुमनैकान्तिकत्वमेव समर्थयति- प्रेक्षावत् कारणं विनाऽपीति। स्वहेतुसामर्थ्यादिति- कार्यस्य यो हेतुस्तत्सामर्थ्यं कारणत्वं नियतपरिमाणयुक्तकार्यनिरूपितमित्यर्थः, इदं कारण-

णादियुक्तस्योत्पत्त्याऽविरोधात्। न च प्रधानं प्रेक्षावत् कारणं युक्तम्, अचेतनत्वात् तस्य, 'शक्तितः प्रवृत्तेः' इत्यनेन च किमप्यतिरिक्तशक्तिमत् कारणं साध्यते? आहोस्वित् व्यतिरिक्तानेकशक्तिसम्बन्धि तदेकत्वादिधर्मकलापाध्यासितम्? नाद्यः- सिद्धसाधनात् कारणमात्रस्य ततः सिद्ध्यभ्युपगमात्, द्वितीये हेतोरनैकान्तिकता, तथाभूतेन क्वचिदप्यन्यथासिद्धेः, न च विभिन्नशक्ति-

---

मेतत् परिमितकार्यमेवोत्पादयितुं प्रभुरीदृशसामर्थ्यबलात् प्रतिनियतपरिमाणस्य कार्यस्योत्पत्तौ विरोधाभावेन प्रेक्षावत्कारणस्य ततः सिद्ध्यभावादित्यर्थः। किञ्च, चेतनं प्रेक्षाकारि भवति, नाचेतनम्, प्रधानं चाऽचेतनमुपेयते साङ्ख्यैरिति प्रेक्षावत्कारणसाधने न प्रधानसिद्धिरपीत्याह- न चेति- अस्य 'युक्तम्' इत्यनेनान्वयः। तस्य प्रधानस्य। 'शक्तितः प्रवृत्तेः' इति हेतुं विकल्प्य दूषयति- शक्तित इति। 'शक्तितः प्रवृत्तेः' इत्यनेनाऽतिरिक्तशक्तिमत् किमपि कारणं साध्यत इति प्रथमपक्षं प्रतिक्षिपति- नाऽऽद्य इति। यत् किमपि कारणं यत्र क्वचन कार्ये प्रति मयोपेयते तत् तत्र शक्तिमदेवेति तथासाधने सिद्धसाधनमेवेत्याह- सिद्धसाधनादिति। उत्तरग्रन्थपर्यालोचनया प्रथमविकल्पे 'अतिरिक्तशक्तिमत् कारणम्' इति स्थाने 'अनतिरिक्तशक्तिमद्' इत्याभाति, यतोऽत्र साङ्ख्यस्य प्रतिमल्लीकृतो बौद्धः कुर्वद्रूपत्वाख्यलक्षणामेव शक्तिमुररीकरोति, सा च शक्तिः कारणस्यात्मभूतैव, अत एव द्वितीयपक्षखण्डने 'स्वात्मभूतत्वाच्छक्तीनाम्' इत्युक्तमिति। व्यतिरिक्तानेकशक्तिसम्बन्धि तदेकत्वादिधर्मकलापाध्यासितं साध्यत इति द्वितीयकल्पं दूषयति- द्वितीय इति। अनन्यथासिद्धौ सत्यां कारणत्वं भवति, न त्वन्यथासिद्धौ, प्रकृते चोक्तरूपेणान्यथासिद्धिरेव, न त्वनन्यथासिद्धिरिति व्यतिरिक्तानेकशक्तिसम्बन्धिन एकत्वादिधर्मकलापाध्यासितस्य प्रधानस्यानन्यथासिद्धय-

योगात् कस्यचित् क्वचित् प्रवृत्तिर्दृष्टा, स्वात्मभूतत्वाच्छक्तीनाम्। कारणकार्यविभागोऽप्यभेदैकान्तेऽयुक्त एव। पर्यायनये निरन्वयविनाशाच्च सर्वभावानां क्वचिदपि लयासिद्धेः 'अविभागाद् वैश्वरूप्यस्य' इत्ययमपि हेतुरसिद्धः, लयो हि भवन् पूर्वस्वभावापगमे

भावान्न कारणत्वमिति न कारणतया तत्सिद्धिरित्याह– तथाभूतेनेति– व्यतिरिक्तानेकशक्तिसम्बन्धिनैकत्वादिधर्मकलापाध्यासितेन प्रधानेनेत्यर्थः। 'अन्यथासिद्धेः' इत्यस्याऽनन्यथासिद्धिलक्षणव्याप्त्याभावादित्यर्थः, तथात्व एव शक्तितः प्रवृत्तिर्यस्य कारणस्याऽस्ति न तस्योक्तरूपात्मना कारणस्वरूपतेत्यनैकान्तिकतेति, वस्तुतः 'तथाभूतेन क्वचिदप्यर्थासिद्धेः' इति पाठो युक्तः। तथाभूतेनार्थसिद्धौ कार्योत्पत्तिलक्षणायां सत्यामेव शक्तितः प्रवृत्तेरित्यस्य तेन व्याप्तिर्नान्यथेत्याशयः। कथं तथाभूतेन नाऽन्यथासिद्धिर्नार्थसिद्धिर्वेत्यपेक्षायामाह– न चेति– अस्य 'दृष्टा' इत्यनेनान्वयः। निषेधे हेतुमाह– स्वात्मभूतत्वाच्छक्तीनामिति। 'कारण-कार्यविभागाद्' इति हेतुं प्रतिक्षिपति– कारणेति। कारणमिदं कार्यं चेदमित्येवं कारण-कार्यविभागस्तदा भवेद् यदि तयोर्भेदो भवेत्, साङ्ख्याभिमते तु कारण-कार्ययोरेकान्ताभेदे यदेव कारणं तदेव कार्यमिति न तयोर्विभागसम्भव इत्याह– अभेदैकान्तेऽयुक्त एवेति। 'अविभागाद् वैश्वरूप्यस्य' इति हेतोरसिद्धत्वादेवायुक्तत्वमित्याह– पर्यायनय इति–द्रव्यार्थिकनयप्रसूतत्वाद् द्रव्यार्थिकनयाऽऽभासे साङ्ख्यमते तु न निरन्वयविनाशः, किन्तु लयावस्थायां कार्यं कारणरूपेणावतिष्ठत इति वैश्वरूप्यस्याऽविभागः सम्भवतीत्यतः' 'पर्यायनये' इत्युक्तम्, तत्र प्रथमविभागस्याऽसिद्धत्वमित्यपेक्षायामाह– निरन्वयविनाशाच्चेति– निरन्वयविनाशो नाम सर्वथा विनाशः, तन्मतेऽन्वयिनो द्रव्यस्यैवाभावान्न द्रव्यरूपेणाप्यवस्थानमिति। अत एव क्वचिदपि लयाऽसिद्धेरिति– यदि विनाशकाले स्वोपादानभूतद्रव्यरूपेणावस्थानं तदा तत्रैव तिरोभावलक्षणलयो

वा भवेद् अनपगमे वा ? आद्ये निरन्वयनाशः, द्वितीये लयानुपपत्तिः, अविकलस्वरूपस्य लयोपगमेऽतिप्रसङ्गादिति दिग् ॥

यदपि- "प्रधानविकारबुद्धिव्यतिरिक्तं चैतन्यमात्मनो रूपं ते कल्पयन्ति, 'चैतन्यं पुरुषस्य स्वरूपम्' [ ] इत्यागमात्, पुरुषश्च शुभाशुभकर्मफलस्य प्रधानोपनीतस्य भोक्ता, न तु कर्ता, सकलजगत्परिणतिरूपायाः प्रकृतेरेव कर्तृत्वोपगमादिति वदन्ति, प्रमाणयन्ति चात्र- यत् सङ्घातरूपं वस्तु तत् परार्थम्, यथा- शयना-

---

भवेद्, न चैवमिति युक्तमुक्तं 'क्वचिदपि लयासिद्धेः' इति। लयासिद्धिमेवोपपादयति- लयो हीत्यादिना। आद्ये पूर्वस्वभावापगमे लयो भवतीति पक्षे, निरन्वयनाशलक्षणे लये सत्युपादानीभूतस्थानाभावान्न तत्र लय इति न तेनाऽविभागः। द्वितीये पूर्वस्वभावानपगमे लयो भवतीति पक्षे। तदानीं पूर्वस्वभावलक्षणं स्वस्वरूपं तस्यास्त्येवेति लयानुपपत्तिः। स्वस्वरूपावस्थानेऽपि लयोपगमे प्रकृतेरपि प्रलये स्वस्वरूपेणावस्थिताया लयः स्यादित्याह- अविकलस्वरूपस्येति।

साङ्ख्याभिमतं पुरुषस्वरूपमपि तन्मतोपदर्शनपूर्वकं दूषयति- यदपीति। प्रधानेति- प्रधानस्य- मूलप्रकृतिरूपस्य विकारः प्रथमविकृतिर्या बुद्धिर्महदाख्या, तद्व्यतिरिक्तम्-तद्भिन्नम्। ते साङ्ख्याः। आगमप्रमाणमूला तदीयात्मरूपचैतन्यकल्पनेत्युपदर्शयितुं तद्रूपावबोधकमागममुल्लिखति- चैतन्यमिति। चैतन्यस्वरूपात्मद्रव्याभ्युपगमे तस्यैव कर्तृत्वमुपगम्यतामित्यत आह- पुरुषश्चेति। कथं न कर्तृत्वं पुरुषस्येत्यपेक्षायामाह- सकलेति। यदि सत्त्व-रजस्तमोरूपा प्रकृतिरेव कर्त्री, तर्हि तद्व्यतिरिक्ते किं प्रमाणमित्यपेक्षायामाह-प्रमाणयन्ति चेति। अत्र प्रकृत्यादिव्यतिरिक्तचैतन्यस्वरूपपुरुषे। अत्र 'चक्षुरादयः परार्थाः सङ्घातरूपत्वात्' इति प्रतिज्ञा-हेतू, बौद्धश्चोदाहरणोपनयावेवावयवद्वयमभ्युपगच्छति, तं प्रत्यवयवद्वयप्रयोग एव न्याय्य

सनाभ्यङ्गादि, सङ्घातरूपाश्च चक्षुरादय इति स्वभावहेतुः, यश्चासौ परः स आत्मेति सामर्थ्यात् सिद्धम्" इति, अत्र 'चैतन्यं पुरुषस्य स्वरूपम्' इत्यादि वदता चैतन्यं नित्यैकरूपं प्रतिज्ञातम्, तच्चाध्यक्षविरुद्धम्, रूपादिसंविदः स्फुटं संवित्त्या भिन्नस्वरूपावगमात्, एकरूपत्वे चात्मनोऽनेकविधार्थस्य भोक्तृत्वाभ्युपगमो विरुध्येत, अभोक्तृावस्थाव्यतिरिक्तत्वाद् भोक्तृावस्थायाः, न च दिदृक्षादियोगाद-

---

इत्यतः 'यत् सङ्घातरूपं वस्तु तत् परार्थम्, यथा-शयना-ऽऽसनाऽभ्यङ्गादि' इत्युदाहरणम्, 'सङ्घातरूपाश्च चक्षुरादयः' इत्युपनय इत्येवमवयवद्वयप्रयोग एवादृतः। विधिसाधकतया कार्य-स्वभावहेतू एव बौद्धाभिमताविति प्रकृतः सङ्घातरूपत्वहेतुः परार्थत्वरूपस्य साध्यस्य न कार्यं किन्त्वेकाश्रयगतयोस्तयोस्तादात्म्यमेवेति स्वभावहेतुरेवाऽयमित्याह- स्वभावहेतुरिति। सामान्यतः परार्थत्वसिद्धावप्यात्मा सिध्यत्येव, सङ्घातरूपस्य चक्षुरादेरसङ्घातरूप आत्मैव परोऽभिमतः, सङ्घातरूपस्यैव परस्याश्रयणे तस्यापि सङ्घातरूपापरार्थत्वम्, एवं तस्यापीत्यनिष्ठा स्यादित्याशयेनाह- यश्चासाविति। असौ सिध्यमानपरार्थत्वस्वरूपसाध्यसन्निविष्टः। सामर्थ्यादिति- हेतौ साध्यस्याविनाभावः पक्षधर्मत्वं च बलम्, तत्राविनाभावरूपसामर्थ्यात् सामान्यतः साध्यस्य प्रसिद्धिः पक्षधर्मतारूपसामर्थ्याच्च साध्यविशेषस्य पक्षगतस्य सिद्धिः, प्रकृते सङ्घातरूपचक्षुरादिरूपपक्षधर्मत्वेऽनवस्थाभयादसङ्घातपरार्थत्वस्यैव सिद्धिरिति सामर्थ्यात् पर आत्मेति सिद्धमित्यर्थः। एतस्य साङ्ख्याभिमतस्यायुक्तत्वमावेदयितुमाह-अत्रेति उक्तवाक्य इत्यर्थः। 'इत्यादि वदता' इत्यनन्तरं साङ्ख्याचार्येणेति शेषः। तच्च चैतन्यं नित्यैकरूपमिति च। चैतन्यं रूपज्ञानरूपतया रसज्ञानरूपतया स्पर्शादिज्ञानरूपतया विभिन्नमेव प्रत्यक्षात्मकसंवित्त्या प्रतीयत इति तस्यैकरूपत्वमध्यक्षविरुद्धमध्यक्षबाधितमिति स्पष्टयति-

विरोधः, दिदृक्षा-शुश्रूषादीनामुत्पादे आत्मनोऽप्युत्पादप्रसङ्गात्, तदव्यतिरेकात् तासाम्, व्यतिरेके च तस्य ता इति सम्बन्धानुपपत्तेः, उपकारस्य तन्निबन्धनस्याभावात्, भावे वा तत्रापि भेदाऽभेदविकल्प-

---

रूपादिसंविद इति। यद्यात्मा सर्वथैकरूपः स्यात् तर्हि पूर्वमभोक्ता पश्चाद् भोक्तेत्यवस्थाद्वयमपि विरोधान्न सम्भवतीत्यनेकविधार्थस्य भोक्तृत्वं तस्येत्यभ्युपगमोऽपि साङ्ख्यस्य विरुध्येतेत्याह–एकरूपत्वे चेति। विरोधे हेतुमुपदर्शयति - अभोक्तृत्वस्थेति। एकरूप एवात्मा दिदृक्षादियोगाद् भोक्ता भवतीति न विरोध इत्याशङ्क्य प्रतिक्षिपति– न चेति। आत्मना सह दिदृक्षादेरभिन्नत्वे दिदृक्षादीनामुत्पादे आत्मनोऽप्युत्पादः स्यादिति नित्यत्वं तस्य न भवेदित्याह– दिदृक्षेति। तदव्यतिरेकात् आत्मनोऽभिन्नत्वात्। तासां दिदृक्षा-शुश्रूषादीनाम्। ननु दिदृक्षाद्या आत्मनो भिन्ना एवाभ्युपगम्यन्त इति न तासामुत्पादे आत्मन उत्पादप्रसङ्ग इत्यत आह– व्यतिरेके चेति– दिदृक्षादीनामात्मनो भिन्नत्वे चेत्यर्थः। तस्य आत्मनः। ताः दिदृक्षाद्यवस्थाः। सम्बन्धानुपपत्तेः षष्ठीविभक्त्याऽभिलप्यमानस्य सम्बन्धस्यानुपपत्तेः, भेदे सम्बन्धाभ्युपगमे यथात्मनो भिन्नास्तास्तथाऽऽकाशादितोऽपि भिन्ना इति यथाऽऽत्मनस्तास्तथाऽऽकाशादेरपि ताः प्रसज्येरन्निति भेदे न सम्बन्धोऽभ्युपगमार्ह इत्याशयः। ननु भिन्नत्वाविशेषेऽपि यत्रैवोपकारं विदधति तास्तेनैव सम्बध्यन्त इत्यात्मन्युपकाराधानादात्मना सम्बध्यन्ते नाकाशादिभिस्तेषूपकाराधानादात्मनस्ता नाकाशादीनामित्यत आह– उपकारस्येति। तन्निबन्धनस्य सम्बन्धनिबन्धनस्य। भावे वा सम्बन्धनिबन्धनस्योपकारस्य भावे वा, उपकारोऽप्यात्मनि क्रियमाण आत्मनो भिन्नोऽभिन्नो वा क्रियेत?, आद्ये आत्मन उपकार इति सम्बन्धानुपपत्तिः, भेदेऽपि सम्बन्धाभ्युपगमे आकाशादीनामपि स स्यादिति तद्बलादाकाशादीनां ता इति प्रसज्येत, द्वितीये उपकारोत्पादतस्तदभिन्नस्यात्मनोऽप्युत्पादप्रसङ्ग इत्याह– तत्राऽपीति– उपकारेऽपीत्यर्थः।

कृतदोषानुद्धारात् ।

किञ्च, कर्तृत्व-भोक्तृत्वयोः सामानाधिकरण्यनियमात् कर्तृत्वाभावे भोक्तृत्वमपि तस्य न युक्तम्, नह्यकृतस्य कर्मणः फलं कश्चिदुपभुङ्क्ते, अकृताभ्यागमप्रसङ्गात्, न च पुरुषस्य कर्माऽकर्तृत्वेऽपि प्रकृतिरस्याभिलषितमर्थमुपनयतीत्यसौ भोक्ता भवति, यतो नासावप्यचेतना सती शुभा-ऽशुभकर्मणां कर्त्री युक्ता, येन कर्मफलं पुरुषस्य सम्पादयेत् ।

अथ यथा पङ्ग्वन्धयोः परस्परसम्बन्धात् प्रवृत्तिस्तथा महदा-

अन्यकृतस्य कर्मणोऽन्येन भोगाभावाद् य एव कर्ता स एव भोक्तेति कर्तृत्व-भोक्तृत्वयोः सामानाधिकरण्यव्यवस्थितेरात्मनः साङ्ख्यमते कर्तृत्वाभावे भोक्तृत्वमपि न स्यादित्याह- किञ्चेति । तस्य आत्मनः । कर्तुरेव भोक्तृत्वमित्यस्योपपादनायाह- नहीति - अस्य 'उपभुङ्क्ते' इत्यनेनान्वयः । साङ्ख्यमते चैत्रेण यत् कृतं कर्म तद् वस्तुतश्चैत्रात्मना न कृतमेव, तस्योपभोगो यथा चैत्रस्य तथा मैत्रादेरपि स्याद्, इत्यकृतकर्मोपभोक्तृत्वलक्षणस्याऽकृताभ्यागमस्य प्रसङ्ग इत्यतः कर्त्तैव भोक्तेत्यात्मनः कर्तृत्वाभावे भोक्तृत्वमपि न स्यादित्याह- अकृताभ्यागमप्रसङ्गादिति । यद्यपि पुरुषो न कर्ता तथाऽपि प्रकृतिः स्वकृतकर्मणः फलं पुरुषस्याभिलषितं प्रयच्छतीत्यकृतकर्मफलभोगोपपत्तिः पुरुषस्याकर्तृत्वेऽपीति साङ्ख्यमतमाशङ्क्य प्रतिक्षिपति- न चेति । अस्य आत्मनः । अर्थं कर्मफलम् । उपनयति प्रापयति । असौ आत्मा । निषेधे हेतुमाह- यत इति । 'न' इत्यस्य 'युक्ता' इत्यनेनान्वयः । असौ प्रकृतिः, यो जानाति स एव कर्तुं प्रभवति, अचेतना च प्रकृतिः कर्म-तत्फलादिकमजानन्ती न कर्त्री युक्तेत्यर्थः । येन कर्तृत्वेन, 'प्रकृतिः' इत्यनुवर्तते ।

पुनः साङ्ख्यः स्वमतं तदुपपादनाय शङ्कते- अथेति । पङ्ग्वन्धयो-

दिलिङ्गं चेतनपुरुषसम्बन्धाच्चेतनावदिव धर्मादिकार्येष्वध्यवसायं करोतीत्यदोष एवायम्, उक्तं च–

"पुरुषस्य दर्शनार्थं, कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि, संयोगस्तत्कृतः सर्गः"॥

[साङ्ख्यकारिका–२१]

इति चेत्? न–सर्गस्योभयजत्वे संयोगादिवद् द्विष्ठत्वेन नैमि-

रिति– पङ्ग्वश्चरणविकलो न गन्तुं समर्थः, परं चक्षुष्मान् गन्तव्य-ग्रामादिमार्गं पश्यति, अन्धस्तु चक्षुर्विकलो न मार्गं पश्यति, किन्तु दृढचरणो गन्तु समर्थः, तौ चाऽसंयुक्तौ न प्रत्येकमभीष्ट-ग्रामादिकमासादयतः, संयुक्तौ तु तथा गच्छत एवाभीष्टग्रामादिकं परस्परसम्बन्धबलाद्, यथा तयोरभीष्टग्रामाद्यवाप्तिस्तथाऽचेतन-त्वादन्धकल्पं महदादिलिङ्गं कर्तृत्वराहित्यात् पङ्गुकल्पः पुरुषः परं चेतनत्वाज्ज्ञातुं समर्थ इति तत्सम्बन्धाच्चेतनावदिव लिङ्गं धर्मादि-कार्यमध्यवस्य करोतीति पुरुषाभीष्टमर्थमुपनयतीत्यर्थः। अयम् 'नासौ' इत्यादिनाऽनन्तरोऽभिहितो दोषः।

उक्तमर्थं साङ्ख्यकारिकया संवादयति– उक्तं चेति– पुरुषस्य दर्शनार्थं प्रकृत्या संयोगः, पुरुषस्य प्रकृत्या सह संयोगे सति पुरुष-संयुक्ता प्रकृतिश्चेतनैव भवतीति द्रष्टुं समर्था, अन्यथा स्वतोऽचेतन-रूपा सा न द्रष्टुं समर्थेति, प्रधानस्य कैवल्यार्थं पुरुषेण सह संयोगः, अन्यथाऽकर्ता पुरुषोऽज्ञानाद्युच्छेदोपायं कर्तुमसमर्थो न केवलो भवेदिति उभयोरपि प्रधान-पुरुषयोरपि, तत्कृतः परस्परसम्बन्धकृतः, सर्गः महदादिसृष्टिः।

प्रतिक्षिपति– नेति। उभयजत्वे प्रधान-पुरुषोभयजन्यत्वे। संयोगा-दिवदिति– आदिपदाद् विभाग-द्वित्वसंख्या-द्विपृथक्त्वान्वयव्यादीना-मुपग्रहः, संयोगादेर्यथोभयजन्यत्वेन द्विष्ठत्वं तथा सर्गस्याप्युभय-

त्तिकद्रवत्वादिस्थानीयत्वेऽपि तं प्रति निमित्तत्वेनात्मनोऽप्रकृति-विकृतित्वभङ्गापत्तेः ।

किञ्च, यदि प्रकृतिरकृतस्यापि कर्मणोऽतात्त्विकसंयोगेनापि फलमभिलषितमुपनयति, तदा सर्वदा सर्वस्य पुंसोऽभिलषितार्थसिद्धिः किमिति न स्यात् ?, न च तत्कारणस्य धर्मस्याभावान्न सा

जन्यत्वेन द्विष्ठत्वमिति सर्गस्य द्विष्ठत्वेनात्मनिष्ठत्वमपीत्यात्मविकृतित्वेन तं प्रत्यात्मनः प्रकृतित्वप्रसङ्गः । नैमित्तिकद्रवत्वेति - नैमित्तिकद्रवत्वं सुवर्णादिगतमग्निस्वर्णोभयसंयोगजत्वादग्नि-स्वर्णोभयजत्वेऽपि स्वर्णनिष्ठमेव नाग्निनिष्ठं तथा तत्कल्पः सर्ग उभयजोऽपि प्रकृतिनिष्ठ एव न पुरुषनिष्ठः, एवमपि पुरुषस्य तत्र निमित्तकारणत्वेन कूटस्थनित्यरूपत्वं न स्यादिति "न प्रकृतिर्नापि विकृतिः पुरुष०" [साङ्ख्यकारिका—] इत्यनेन स्वीकृतस्याऽप्रकृति-विकृतित्वस्य भङ्गापत्तेरित्यर्थः । पुरुषेणाऽकृतस्यापि कर्मणः फलं यदि स्वसंयोगमात्रेण प्रकृतिः पुरुषस्य सम्पादयति तदा तत्संयोगस्य सर्वदा सर्वस्य पुरुषस्य भावात् सर्वस्य सर्वदा पुंसोऽभिलषितार्थसिद्धिः प्रसज्येतेत्याह- किञ्चेति । असङ्गे पुरुषे न वस्तुतः प्रकृतिसंयोगः सम्भवतीत्यत उक्तम्- अतात्त्विकसंयोगेनेति । ननु प्रकृत्या धर्मफलस्य सुखस्य जनने धर्मोऽपि सहकारिकारणतयाऽपेक्षित इति धर्मरूपकारणं यदैव यं पुरुषमधिकृत्य फलप्रदानाभिमुखं भवति तदैव तस्य फलं भवतीति न सर्वदा सर्वस्य पुंसोऽभिलषितार्थसिद्धिप्रसङ्ग इत्याशङ्क्य प्रतिक्षिपति- न चेति- अस्य 'वाच्यम्' इत्यनेन सम्बन्धः । तत्कारणस्य अभीष्टफलकारणस्य । सा सर्वस्य पुरुषस्य सर्वदाऽभिलषितार्थसिद्धिः । धर्मोऽपि प्रकृतेरेव धर्मः, तमप्युत्पादयितुं प्रकृतिरेव प्रगल्भेति धर्ममुत्पाद्य तद्द्वारा पुरुषस्याभिलषितार्थसिद्धिं सम्पादयेदिति

स्यादिति वाच्यम्, धर्मधर्मस्यापि प्रकृतिकार्यतया तदुत्पादनद्वारोक्त-प्रसङ्गानुद्धारात्।

किञ्च, यद्यभिलषितं फलं प्रकृतिरुपनयति तदा नानिष्टं प्रयच्छेत्, नहि कश्चिदनिष्टमभिलषति।

किञ्च, उपनयतु नाम प्रकृतिः फलम्, तथापि भोक्तृत्वं पुंसोऽयुक्तम्, अविकारित्वात्, नहि सुख दुःखादिबलादपरितापादि-रूपविकारमनुपनीयमानस्य भोक्तृत्वमाकाशवत् सङ्गतम्।

अथ न विकारापत्त्याऽऽत्मनो भोक्तृत्वमिष्टम्, किं तर्हि बुद्ध्य-ध्यवसितस्यार्थस्य प्रतिबिम्बोदयन्यायेन सञ्चेतनात्, तथाहि- बुद्धि-दर्पणसङ्क्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति,

---

प्रतिक्षेपहेतुमुपन्यस्यति- धर्मधर्मस्यापीति- धर्मात्मकधर्मस्यापीत्यर्थः, अपिना फलस्योपग्रहः। तदुत्पादनद्वारा धर्मोत्पादनद्वारा। उक्तप्रसङ्गेति- सर्वदा सर्वस्य पुंसोऽभिलषितार्थसिद्धिप्रसङ्गेत्यर्थः। अभिलषितं सर्वस्येष्टमेव भवति नानिष्टं कस्यचिदभिलषितमित्यभिलषितफल-दान एव यदि प्रकृतिः प्रभुः सर्वस्याभिलषितमेव विदध्यादित्यनिष्ट-फलानुत्पादप्रसङ्ग इत्याह- किञ्चेति। कुतोऽनिष्टं न प्रयच्छेदित्यपेक्षा-यामाह- नहीति। पुरुषस्य साङ्ख्याभिमतं भोक्तृत्वमपि न युक्त-मित्याह- किञ्चेति। पुंसो भोक्तृत्वस्यायुक्तत्वे हेतुमाह- अविकारित्वा-दिति। अविकारिणि भोक्तृत्वासम्भवे युक्तिमुपढौकयति- नहीति- अस्य 'सङ्गतम्' इत्यनेनान्वयः। प्रतिबिम्बोदयन्यायेन भोक्तृत्व-मात्मनोऽविकृतत्वेऽपि सङ्गतिमङ्गतीति साङ्ख्यः शङ्कते- अथेति। 'न' इत्यस्य 'इष्टम्' इत्यनेनान्वयः, इष्टं साङ्ख्याचार्यैरिष्टम्। प्रतिबिम्बोदयन्यायेन भोक्तृत्वमुपपादयति- तथाहीति। 'अर्थप्रतिबिम्बकम्' इत्यस्य 'अध्यारोहति' इत्यनेनान्वयः, अध्यारोहतीत्यस्य सङ्क्राम-

तदेव भोक्तृत्वमस्य, न तु विकारापत्तिः, न च पुरुषे प्रतिबिम्बमात्रसङ्क्रान्तावपि स्वरूपं प्रच्युतिमेति, दर्पणवदविचलितस्वरूपत्वादिति चेत् ? ननु प्रतिबिम्बसङ्क्रमाऽसम्भवात् तदधिष्ठानत्वमेव सः, तथा च भोक्तृत्वव्यवहारानुरोधात् प्रातिभासिकभोक्तृत्ववत् कर्तृत्वव्यवहारानुरोधात् प्रातिभासिकं कर्तृत्वमप्यात्मनि किं न स्वीक्रियते ? । किञ्च, एवमात्मनि भ्रान्तभोक्तृत्वादिकल्पनापेक्षयाऽभ्रान्ततत्कल्पना-

---

तीत्यर्थः । तदेव अर्थेप्रतिबिम्बसङ्क्रमणमेव । अस्य पुंसः । न चेति- पुंसि विकारापत्तिर्न तु, भोक्तृत्वमित्यर्थः । प्रतिबिम्बसङ्क्रान्तावपि पुरुषोऽविचलितस्वरूप एवेति दृष्टान्तावष्टम्भेन समर्थयति- न चेति- अस्य 'पति' इत्यनेन सम्बन्धः । दर्पणवदिति- दर्पणे मुखप्रतिबिम्बसङ्क्रान्तावपि यथा दर्पणमविचलितरूपं तथेत्यर्थः । सिद्धान्ती युक्त्या तत् प्रतिक्षिपति- नन्वित्यादिना, एकं स्थानं परित्यज्याऽन्यस्थानगमनं सङ्क्रमणम्, न च तत् प्रतिबिम्बस्य सम्भवतीति प्रतिबिम्बाधिष्ठानत्वमेव प्रतिबिम्बसङ्क्रमणम्, तथा च शुक्तौ रजताध्यासाद् रजताध्यासाधिष्ठानत्वं शुक्तेरिति रजतं तत्र प्रातिभासिकम्, न तु वास्तविकम्, एवमपि भ्रमदशायां भ्रान्तस्य रजतव्यवहारस्तत्र, तथा भोक्तृत्वस्योक्तप्रतिबिम्बाधिष्ठानत्वरूपस्य व्यवहारोऽध्यासनिबन्धन इत्यतः प्रातिभासिकभोक्तृत्वमात्मनो न वास्तविकम्, एवं कर्तृत्वव्यवहारानुरोधात् प्रातिभासिककर्तृत्वमप्यात्मनि किं न साङ्ख्यैः स्वीक्रियत इत्यर्थः । सः प्रतिबिम्बसङ्क्रमः । तथा च प्रतिबिम्बाधिष्ठानत्वस्यैव प्रतिबिम्बसङ्क्रमरूपत्वे च । उक्तदिशा भ्रान्तमेव भोक्तृत्वादिकं साङ्ख्यमते कल्पितं भवति, तत्र चान्यगतं भोक्तृत्वादिकं वास्तविकम्, तदन्यत्राऽऽरोपितमिति कल्पनाद्वयं स्यात् तदपेक्षया लाघवाद् वास्तविकमेव कर्तृत्व-भोक्तृत्वादिकमभ्युपगम्यतामित्याह- किञ्चेति । एवम् उक्तप्रकारेण प्राति-

यामेव लाघवादौचित्यं किं बुध्यसे ?, पङ्ग्वन्धदृष्टान्तोऽप्यत्र तदा शोभेत, यदि वैषम्यं न स्यात्; अस्ति च तत्, तथाहि- अन्धो यद्यपि मार्गं नोपलभते तथापि पङ्गोर्विवक्षामसौ वेत्ति चेतनावत्त्वात्, न चैवं प्रधानं पुरुषविवक्षामधिगच्छतीत्यभ्युपगम्यते, तथा सति भोक्तृत्वमपि तस्य प्रसज्येत, करणज्ञस्य भोक्तृत्वाविरोधात्, न च बुद्धिव्यतिरिक्तं चैतन्यं प्रमाणसिद्धमिति कः परश्चिद्रूप आत्मा ?।

यदपि " चिद्रूपाद् बुद्धेर्भेदप्रसाधनाय परैरनुमानमुपन्यस्यते- 'यद् यदुत्पत्तिमत्त्व-नाशित्वादिधर्मयोगि तत् तदचेतनम्, यथा-

---

भासिकभोक्तृत्वादिकल्पने । दृष्टान्तस्य पङ्ग्वन्धसंयोगरूपस्य दार्ष्टान्तिकवैषम्याद् दृष्टान्तता न सम्भवतीत्याह- पङ्ग्वन्धदृष्टान्तोऽपीति । तत् वैषम्यम् । दृष्टान्तस्य प्रकृतस्य प्रकृतदार्ष्टान्तिकवैषम्यमेव भावयति- तथाहीति । नोपलभते **न पश्यति** । असौ **अन्धः** 'न च' **इत्यस्य** 'अभ्युपगम्यते' **इत्यनेनान्वयः** । तथा सति **प्रधानस्य पुरुषविवक्षाधिगन्तृत्वाभ्युपगमे सति** । तस्य **प्रधानस्य, एवं सति प्रकृतिरेव कर्त्री भोक्त्री चेति पुरुषकल्पनावैयर्थ्यमिति भावः** । 'न च' **इत्यस्य** 'प्रमाणसिद्धम्' **इत्यनेनान्वयः** ।

बुद्धावात्मनो भेदस्य साधकं साङ्ख्याभिमतमनुमानमपि न विचारसहमित्युपन्यस्य दर्शयति- यदपीति । परः साङ्ख्याचार्यैः । 'यद्' इत्यादि 'रसादयः' इत्यन्तमुदाहरणम्, 'तथा बुद्धिः' इत्युपनयः, 'बुद्धिरचेतना, उत्पत्तिमत्त्व-नाशित्वादिधर्मयोगित्वाद्' इति प्रतिज्ञा-हेतू अत्र बोध्यौ, परमवयवद्वयवादिनं बौद्धं प्रति प्रयोग इति तौ नोक्तौ । अचेतनत्वलक्षणसाध्यस्योत्पत्तिमत्त्व-नाशित्वादिधर्मयोगित्वं न कार्यं किन्त्वेकधर्मिगतयोस्तयोस्तादात्म्यमिति प्रकृतहेतुः साध्यस्य

रसादयः' 'तथा च बुद्धिः' इति स्वभावहेतुः" इति, तत्रापि वक्तव्यम्– किमिदं स्वतन्त्रसाधनम्? आहोस्वित् प्रसङ्गसाधनम्?, आद्येऽन्यतराऽसिद्धो हेतुः, यथाविधमुत्पत्तिमत्त्वमपूर्वोत्पादलक्षणम्, नाशित्वं च निरन्वयविनाशात्मकं प्रसिद्धं बौद्धस्य, न तथाविधं साङ्ख्यस्य, तयोरविर्भाव-तिरोभावरूपत्वेन तेनाङ्गीकारात्, यथा च साङ्ख्यस्य तौ प्रसिद्धौ, न तथा बौद्धस्येति, न च शब्दमात्रसिद्धावनुगतहेतुसिद्धिः, तदिदमुक्तम्—

"तस्यैव व्यभिचारादौ, शब्देऽप्यव्यभिचारिणि ।
दोषवत् साधनं ज्ञेयं, वस्तुनो वस्तुसिद्धितः" ॥ [ ] इति ।

स्वभाव एवेत्याह– स्वभावहेतुरिति । सिद्धान्ती बौद्धमतमालम्ब्योक्तानुमानप्रयोक्तॄन् साङ्ख्यान् पृच्छति– तत्राऽपीति– उक्तानुमानप्रयोगेऽपीत्यर्थः । आद्ये इदं साधनं स्वतन्त्रसाधनमिति पक्षे । अन्यतराऽसिद्ध इति– साङ्ख्याभिमतोत्पत्तिमत्त्वादिधर्मयोगित्वस्य हेतूकरणे बौद्धस्य, बौद्धाभिमतोत्पत्तिमत्त्वादिधर्मयोगित्वस्य हेतूकरणे साङ्ख्यस्याऽसिद्धो हेतुरित्यर्थः । अन्यथासिद्धिमेव सङ्गमयति– तथाविधमिति । तयोः उत्पत्ति-विनाशयोः । तेन साङ्ख्येन । साङ्ख्यमते उत्पत्तिराविर्भावो नाशस्तिरोभाव इति । तौ उत्पत्ति-विनाशौ ।

ननूत्पत्ति-विनाशपदवाच्यस्योभयमते एकस्याभावेऽपि उत्पत्त्यादिशब्दस्तावन्मतद्वयसिद्ध एकोऽस्त्येवेति शब्दस्वरूपमात्राश्रयणेन वादि-प्रतिवाद्युभयमतसिद्धो हेतुर्भविष्यतीत्यत आह– न चेति ।

शब्दस्यानुगतस्य भावेऽप्यर्थस्यानुगतस्याभावे साधनस्य दुष्टत्वे प्राचां सम्मतिमुपदर्शयति– तदिदमुक्तमिति । तस्यैव साधनीभूतार्थस्यैव । 'व्यभिचारादौ' इत्यादिपदादसिद्धत्वादेरुपग्रहः, सति सप्तमी चेयम् । शब्देऽपीति– साधनाभिलापके शब्देऽनुगते सत्यपीत्यर्थः । कथं शब्द-

द्वितीये साध्यविपर्यये बाधकप्रमाणाऽदर्शनादनैकान्तिकता, नह्यत्र प्रतिबन्धोऽस्ति—चेतनस्योत्पाद-नाशाभ्यां न भवितव्यमिति।

यदपि कल्पितम्—

"वत्सविवृद्धिनिमित्तं, क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं, तथा प्रवृत्तिः प्रधानस्य" ॥

[साङ्ख्यकारिका—५७] इति।

स्यानुग. त्रेऽप्यर्थस्याननुगतत्वे साधनस्य दुष्टत्वमित्यपेक्षायामाह—वस्तुन इति— अर्थस्वरूपहेतुतोऽर्थस्वरूपस्य साध्यस्य सिद्धेरित्यर्थः।

प्रसङ्गसाधने हेतोरुभयवादिप्रसिद्धिर्नापेक्षिता, किन्तु यमुद्दिश्य प्रसङ्गसाधनं प्रयुज्यते तन्मतसिद्धत्वमेव तत्रापेक्षितमिति न तत्रान्यतराऽसिद्ध्या हेतुर्दुष्ट इति तत्रानैकान्तिकत्वादेव हेतोर्दुष्टत्वमित्याह—द्वितीय इति - प्रकृतसाधनस्य प्रसङ्गसाधनरूपत्वपक्ष इत्यर्थः। साध्यविपर्यये अचेतनत्वलक्षणसाध्याभाववति चेतन इति यावत्। बाधकप्रमाणाऽदर्शनात् उत्पत्तिमत्त्वादिलक्षणहेतोर्बाधकस्य प्रमाणस्याऽदर्शनात्। तथा च साध्याभाववति हेतोः सद्भावाद् अनैकान्तिकता व्यभिचारिता। चेतनमुत्पत्ति-विनाशवन्न भवतीत्यविनाभावो यत्र स्यात् तदा तद्ग्राहकप्रमाणमेव त्रैपक्षे हेतुबाधकं प्रमाणं स्याद्, न चास्त्युक्ताविनाभाव इत्याह— नहीति। अत्र उक्तानुमानस्थले।

अन्यदपि साङ्ख्यकल्पितं न समीचीनमित्याह— यदपीति। तत्कल्पितमुल्लिखति— वत्सेति— प्रकृतेरचेतनत्वात् पुरुषविमोक्षार्थं प्रवृत्तिरेव न सम्भवतीति साङ्ख्यं प्रत्याक्षेपो न युक्तः, अज्ञस्यापि क्षीरस्य वत्सविवृद्ध्यर्थं प्रवृत्तेः, तथा च अज्ञस्य क्षीरस्य वत्सविवृद्धिनिमित्त यथा प्रवृत्तिस्तथा प्रधानस्य प्रकृतेरज्ञाया अपि पुरुषविमोक्षनिमित्तं पुरुषस्य मोक्षलक्षण फलार्थं प्रवृत्तिर्महदादिसर्जनलक्षणेत्यर्थः। उक्तस्य

तदपि न सम्यग्– यतः क्षीरमपि न स्वातन्त्र्येण वत्सविवृद्धिं चेतस्याधाय प्रवर्तते, किं तर्हि कांचित्केभ्यः स्वहेतुभ्यः प्रतिनियतेभ्यः समुत्पत्तिमासादयति, तच्च लब्धात्मलाभं वत्सविवृद्धिनिमित्ततामुपयातीत्यचेतनमपि प्रवर्तत इति व्यपदिश्यते, न चैवं प्रधानस्य कादाचित्का प्रवृत्तिर्युक्ता, नित्यत्वात्, कादाचित्कसहकारिसमवधानस्याप्यनागन्तुकस्वशक्तिनिमित्तत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गात्,

---

साङ्ख्यकल्पितस्याऽयुक्तत्वे हेतुमाह– यत इति– 'न' इत्यस्य 'प्रवर्तते' इत्यनेनान्वयः। आसादयति प्राप्नोति 'क्षीरम्' इत्यनुषज्यते। तच्च क्षीरं च। लब्धात्मलाभं स्वकारणेभ्यो लब्धोत्पत्तिकम्। इति यतस्मादेव कारणात् 'न च' इत्यस्य 'युक्ता' इत्यनेनान्वयः। एवं पूर्वमसतः क्षीरस्य स्वकारणतो लब्धोत्पत्तिकस्य वत्सविवृद्ध्यर्थं यथा कादाचित्की प्रवृत्तिस्तथा। नित्यत्वात् प्रकृतेर्नित्यत्वात् तद्रूपकारणस्य सर्वदा सत्त्वेन कार्यसर्जनलक्षणतत्प्रवर्तनस्यापि सर्वदाभावेन कादाचित्कत्वं न स्यादित्यर्थः। ननु न केवलायाः प्रकृतेः कार्यसर्जनलक्षणा प्रवृत्तिः, किन्तु कादाचित्कसहकारिसमवहिताया एव तस्याः प्रवृत्तिरिति तस्या नित्यत्वेऽपि सहकारिसमवधानस्य कादाचित्कत्वात् कादाचित्की प्रवृत्तिरित्यत आह- कादाचित्केति– आगन्तुककारणनिमित्तं यदि प्रधानस्य सहकारिसमवधानं स्यात् तदा यदैव कारणस्यागन्तुकस्य भावस्तदैव सहकारिसमवधानमिति स्यात्, न चैवम्, किन्तु अनागन्तुका अन्यकारणतोऽलब्धात्मलाभा नित्येति यावत्, या स्वस्य –प्रधानस्य शक्तिस्तन्निमित्तत्वात्–तत्कारणकत्वात् सहकारिसमवधानस्य सदाभावसम्भवेन तद्विशिष्टायाः प्रकृतेरपि सर्वदाभावेन सदैव प्रवृत्तिः स्यादित्यर्थः। किञ्च स्वमोक्षार्थं कमपि व्यापारमकुर्वाणस्यैव पुरुषस्य प्रकृतिव्यापारत एव मोक्षस्याभ्युपगमे मोक्षार्थमव्याप्रियमाणत्वस्य सर्वपुरुषसाधारण्यात् प्रकृतिप्रयत्नात् यथैकस्य पुंसो मुक्तिस्तथाऽन्यस्यापि स्यादित्येकमुक्तौ सर्वमुक्तिः स्यादि-

अन्यथैतद्वैषम्यनिर्वाहकप्रतिनियतात्मव्यापाराभ्युपगमप्रसङ्गाद्, तत्तत्काले तत्तत्पुरुषस्य मोक्षसम्पादकतत्तत्सहकारिचक्रसमवधायकानन्तशक्तिमत्प्रधानाभ्युपगमे च तत्तत्क्षणोत्तरकार्ये तत्तत्क्षणस्यैव हेतुत्वावश्यकतया तत्कालैककारणपरिशेषादेव किमन्तर्गडुना प्रधानेनेति द्वात्रिंशिकाप्रकरणादावभिहितमस्माभिः ।

यदपि 'परार्थाश्चक्षुरादयः' इत्युक्तम्, तत्राप्याधेयातिशयो वा परः साध्यत्वेनाभिप्रेतः १, यद्वाऽविकार्यनाधेयातिशयश्च २, आहोस्वित् सामान्येन चक्षुरादीनां पारार्थ्यमात्रं साध्यत्वेनाभिप्रेतम् ३ इति विकल्पत्रयम्, नाद्यः— सिद्धसाधनात्, अस्माभिरपि चक्षुरादीनां

त्याह-एकमुक्तावितिं । अन्यथा एकमुक्तौ सर्वमुक्त्यनभ्युपगमे । एतद्वैषम्येति-एकस्य मुक्तिरन्यस्य न मुक्तिरित्येवं यद् वैषम्यं तन्निर्वाहकः तत्सम्पादको यः प्रतिनियतात्मव्यापारः-यो मुक्त्यर्थं तदुपायानुष्ठानं करोति तस्य मुक्तिः, यस्तु न तथा यतते तस्य न मुक्तिरिति मुक्त्यर्थं यतमानस्य पुंसो व्यापारस्तस्याभ्युपगमप्रसङ्गादित्यर्थः । यस्मिन् काले यस्य पुरुषस्य मोक्षस्य सम्पादकं तत्सहकारिचक्रं तत्समवधानानुकूलशक्तिमत्प्रधानतस्तस्य पुरुषस्य तदा मुक्तिरित्युपगमे प्रतिनियतसहकारिचक्रानन्त्यस्य तत्सम्पादकशक्त्यानन्त्यस्य कल्पनीयतया तदपेक्षया लाघवाद् यद्यत्क्षणोत्तरं यद्यत् कार्यं भवति तत्तत्कार्ये तत्तत्क्षणस्य कारणत्वमित्येवं कल्पनैव भद्रा, किमनर्थिकया प्रधानकल्पनयेत्याह- तत्तत्काल इति । तत्तद्विस्तरार्थिगतयेऽस्मत्कृतद्वात्रिंशिकाप्रकरणादिकमवलोकनीयं विशेषजिज्ञासुभिरित्याशयेनाह- द्वात्रिंशिकाप्रकरणादाविति । अस्माभिः यशोविजयोपाध्यायैः ।

व्यतिरिक्तात्मसिद्धिपर्यवसायि चक्षुरादीनां परार्थत्वसाधनमपि साङ्ख्यस्य विकल्पजर्जरितमित्याह- यदपीति । तत्रापि 'परार्थाश्चक्षुरादयः' इति साधनेऽपि । नाद्य इति- आधेयातिशयः परः साध्यत्वेनाभिप्रेत-

विज्ञानोपकारित्वेनाभ्युपगमात्, न द्वितीयः-विरुद्धत्वात्, साध्यविपर्ययेण दृष्टान्त-हेत्वोर्व्याप्तत्वेन प्रतीतेः, अविकारिण्युपकारस्याशक्यक्रियत्वेन पारार्थ्यायोगाच्च न तृतीयः, यथाकथञ्चित् पारार्थ्यस्य सर्वैरभ्युपगमात्। न च चित्तमपि साध्यधर्मित्वेनोपात्तमिति तदपरस्य परस्य साध्ये प्रवेशान्न सिद्धसाधनम्, अपरस्याविकारिण उपकार्यत्वासम्भवात्, चक्षूरूपालोकमनस्काराणामपरचक्षुरादिकदम्बकोप-

---

इति प्रथमपक्षो नास्माभ्युपगमविरोधीत्यर्थः। सिद्धसाधनमेव व्यवस्थापयति- अस्माभिरपीति- साङ्ख्यभिन्नवादिभिरपीत्यर्थः। चक्षुरादीनामिति-चक्षुरादिभिरात्मनि विज्ञानरूपातिशय आधीयत इत्याधेयातिशयपरार्थत्वं चक्षुरादीनामनुमतमेवेति सिद्धस्यैव साधनमेतदिति। न द्वितीय इति अविकार्यनाधेयातिशयो यः परस्तदर्थत्वं चक्षुरादीनामिति द्वितीयपक्षो न समीचीन इत्यर्थः। विरुद्धत्वादिति- सङ्घातत्वलक्षणहेतोरविकार्यनाधेयातिशयपरार्थत्वलक्षणसाध्यस्याभावेन व्याप्तत्वादित्यर्थः। विरुद्धत्वमेव प्रकटयति- साध्यविपर्ययेणेति- साध्याभावेन सह दृष्टान्तस्य-शयनासनादेः, हेतोश्च-संघातत्वस्य, व्याप्तत्वेन प्रतीतेः- शयनासनादिकं विकार्याधेयातिशयपरार्थत्वेन तत्र सङ्घातत्वरूपहेतोरविनाभाववत्तया प्रतीतेरित्यर्थः। येन परस्मिन् कश्चिदुपकारः क्रियते स परार्थो भवतिः अविकारिणि चात्मनि परस्मिन् नोपकारः शक्यक्रिय इति तथाभूतस्य परस्याभिमतत्वे पारार्थ्यासम्भवादित्याह- अविकारिणीति। सामान्येन परार्थत्वं साध्यत्वेनाभिप्रेतमिति तृतीयपक्षोऽपि न समीचीन इत्याह- न तृतीय इति। सिद्धसाधनमत्रापीत्याह- यथाकथञ्चिदिति। सिद्धसाधनपरिहारमाशङ्क्य प्रतिक्षिपति- न चेति- विज्ञानरूपपरार्थत्वं चक्षुरादीनामाश्रित्य सिद्धसाधनं यदुपदर्शितं प्राक् तत्र 'चक्षुरादयः परार्थाः' इत्यनुमाने चक्षुरादित्वेन विज्ञानलक्षणचित्तस्यापि पक्षकोटिप्रविष्टत्वेन तदपे-

कारित्वस्यैव न्याय्यत्वाद् विज्ञातस्य चानेककारणकृतोपकाराध्यासितस्य संहतत्वं कल्पितमविरुद्धमेवेति न किञ्चिद् विचार्यमाणं साङ्ख्यदर्शने चारिमाणमश्नुतीति दिक् ॥

दर्शितेयं यथाशास्त्रं, व्यवहारनयस्य दिक् ।
साङ्ख्यसिद्धान्तहेतुः श्रीयशोविजयवाचकैः ॥१॥

क्षया परत्वस्य विज्ञानेऽभावेन परतया विज्ञानस्य ग्रहणासम्भवेन तदर्थत्वस्य साध्यत्वाभावेन न सिद्धसाधनमित्यर्थः। निषेधे हेतुमाह- अपरस्येति- विज्ञानभिन्नस्याऽविकारिणः पुरुषस्योपकार्यत्वासम्भवात् परतयाऽविकार्यात्मनो ग्रहणे तदर्थत्वं न सम्भवत्येवेत्यर्थः। पूर्वपूर्वचक्षुरादीनामुत्तरोत्तरचक्षुरादिजनकत्वेन सङ्घातरूपचक्षुरादीनां संघातरूपचक्षुरादिकदम्बोपकारित्वतस्तदर्थत्वस्यैव न्याय्यत्वादित्याह- चक्षूरूपेति- विज्ञानस्यापि कल्पितं सङ्घातत्वमस्ति, न च तस्यात्मस्वरूपस्य स्वव्यतिरिक्तपदार्थत्वमिति न सङ्घातत्वस्य परार्थत्वेन व्याप्तिरित्याह- विज्ञातस्येति। 'विज्ञानस्य' इति त्वत्र युक्तः। साङ्ख्यमतखण्डनमुपसंहरति- इति न किञ्चिद् विचार्यमाणमिति। दर्शितेयमिति- साङ्ख्यसिद्धान्तुहेतुरियं व्यवहारनयस्य दिक् श्रीयशोविजयवाचकैर्यथाशास्त्रं दर्शितेत्यन्वयः, व्यक्तमदः।

द्रव्यार्थोऽशुद्ध इष्टो व्यवहृतिनिपुणो यो नयः सोऽत्र विज्ञै-
र्नव्योक्त्या वाचकाग्र्यैरनुपमरचनाशालिवाक्यैर्निरुक्तः।
तस्मादुक्त्या सुयुक्त्या कपिलसुतमतं संनिरुच्य व्युदस्तं,
बौद्धोक्त्या न्यायदृष्ट्याऽवितथजिनमतं वस्तुतोऽर्थात् प्रसिद्धम् ॥१॥
व्याख्यानं तस्य सूरिर्गुरुवरकृपया मन्दधीरन्यगत्यै,
कृत्वा लावण्यनामा जिनमतनिरतो लब्धवान् यत् सुपुण्यम्।
तस्मादेतत् सुपाठ्यं व्यवहृतिनयधीप्रापकं शिष्यवर्गैः,
सिद्धान्तैकान्तनिष्ठैर्भवतु भवकथा दूरतस्तत् प्रयातु ॥२॥

इति व्यवहारनयनिरूपणम् ।